Digitized by Madhuban Trust

सामवेदीयाष्टब्राह्मणानि

SAMAVEDEEYASTHABRAHMANANI

मूलमात्रम्

सम्पादकः
विद्वान् प्रकाश सुब्राय भट्टः

प्रकाशकः
राणायनीयसंशोधनाप्रतिष्ठानम्,
तिरुपति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सामवेदीयाष्टब्राह्मणानि

SAMAVEDEEYASTHABRAHMANANI

blic Domain. Vipin Kumar Collection,

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सामवेदीयाष्टब्राह्मणानि

SAMAVEDEEYASTHABRAHMANANI

मूलमात्रम्

सम्पादकः

विद्वान् प्रकाश सुब्राय भट्टः

प्रकाशकः

राणायनीयसंशोधनाप्रतिष्ठानम्, तिरुपति.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ग्रन्थस्य नाम : **सामवेदीयाष्टब्राह्मणानि (मूलमात्रम्)**

प्रकाशकः – राणायनीयसंशोधनाप्रतिष्ठानम्, तिरुपति.

सम्पादकः –विद्वान् प्रकाश सुब्राय भट्टः, कोलगि,

सिद्दापुर (उत्तरकन्नडमण्डलम्) । कर्नाटक

प्रथममुद्रणम् – २०१७

पृष्ठाः १५+४६०+९१=५६६

प्रतयः ५००

मौल्यम् १००० रूप्यकाणि

ग्रन्थलब्धिस्थानम् :–

1.Dr. Girijaprasad Shadangi, Tirupati

Email- gpshadangi@gmail.com, Mo-9951051209

2.Vidwan Prakash S. Bhat, Siddapur

Email- shreematakolgi@gmail.com,Mo-7760602377

3. Vedanta Book House, Bangalore-9036420629

4. Jayalaxmi Indological Book House, Chennai

5. Bharata mata Book house, Tirupati-9299901355

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विषयानुक्रमणिका

पुरोवाक्	०६-०७
प्रस्तावना	०८-१८
१.ताण्ड्यमहाब्राह्मणम्	००१-२५६
प्रथमोऽध्यायः	००२-००९
द्वितीयोऽध्यायः	०१०-०१७
तृतीयोऽध्यायः	०१७-०२२
चतुर्थोऽध्यायः	०२२-०३३
पञ्चमोऽध्यायः	०३३-०४१
षष्ठोऽध्यायः	०४२-०५५
सप्तमोऽध्यायः	०५५-०६६
अष्टमोऽध्यायः	०६६-०७७
नवमोऽध्यायः	०७७-०८८
दशमोऽध्यायः	०८८-०९६
एकादशोऽध्यायः	०९७-१०४
द्वादशोऽध्यायः	१०५-११८
त्रयोदशोऽध्यायः	११९-१३१
चतुर्दशोऽध्यायः	१३२-१४४
पञ्चदशोऽध्यायः	१४४-१५६
षोडशोऽध्यायः	१५६-१६८
सप्तदशोऽध्यायः	१६८-१७५
अष्टादशोऽध्यायः	१७५-१८६
एकोनविंशोऽध्यायः	१८६-१९५
विंशोऽध्यायः	१९५-२०६
एकविंशोऽध्यायः	२०६-२१८
द्वाविंशोऽध्यायः	२१९-२२५
त्रयोविंशोध्यायः	२२५-२३४

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतुर्विंशोऽध्यायः	२३४-२४२
पञ्चविंशोऽध्यायः	२४२-२५३
२.षड्विंशब्राह्मणम्	२५४-२९४
प्रथमोऽध्यायः	२५५-२६४
द्वितीयोऽध्यायः	२६४-२७१
तृतीयोऽध्यायः	२७१-२७८
चतुर्थोऽध्यायः	२७८-२८२
पञ्चमोऽध्यायः	२८२-२८८
षष्ठोऽध्यायः	२८८-२९४
३.सामविधानब्राह्मणम्	२९५-३२१
प्रथमःप्रपाठकः	२९६-३०४
द्वितीयःप्रपाठकः	३०५-३१२
तृतीयःप्रपाठकः	३१३-३२१
४.आर्षेयब्राह्मणम्	३२२-३४६
प्रथमोऽध्यायः	३२३-३२७
द्वितीयोऽध्यायः	३२७-३३०
तृतीयोऽध्यायः	३३०-३३४
चतुर्थोऽध्यायः	३३४-३३७
पञ्चमोऽध्यायः	३३७-३४१
षष्ठोऽध्यायः	३४२-३४६
५.देवताध्यायब्राह्मणम्	३४७-३५१
६.छान्दोग्यब्राह्मणम्(मन्त्र)	३५२-३७०
प्रथमःप्रपाठकः	३५३-३६१
द्वितीयःप्रपाठकः	३६२-३७०
छान्दोग्यब्राह्मणम्(उपनिषत्)	३७१-४५०
तृतीयःप्रपाठकः	३७२-३८२
चतुर्थःप्रपाठकः	३८२-३९१

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पञ्चमःप्रपाठकः ३९१-४०१
षष्ठःप्रपाठकः ४०१-४१०
सप्तमःप्रपाठकः ४१०-४२१
अष्टमःप्रपाठकः ४२१-४३०
नवमःप्रपाठकः ४३०-४४०
दशमःप्रपाठकः ४४०-४५०
७.संहितोपनिषद्ब्राह्मणम् ४५१-४५६
८.वंशब्राह्मणम् ४५७-४६०
९.मन्त्राणामनुक्रमणिका ०१-९१
ताण्ड्यब्राह्मणम् ०१-५१
षड्विंशब्राह्मणम् ५२-५९
सामविधानब्राह्मणम् ५९-६३
आर्षेयब्राह्मणम् ६४-७४
देवताध्यायब्राह्मणम् ७५-७६
छान्दोग्यमन्त्रब्राह्मणम् ७६-८०
छान्दोग्योपनिषत् ८०-८९
संहितोपनिषद्ब्राह्मणम् ८९-९१

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ श्रीः॥

सपर्या पर्यायस्तव भवतु यन्मे विलसितम्

ॐ नमः सामवेदाय

पुरोवाक्

सप्ताकारविभक्तिरम्यतनुमान् सप्तस्वरद्वीपवान्
नानारूपमखाख्यरत्ननिलयो देवर्ष्यनेकाश्रयः।
कल्पेन्दूदयवर्धमानविभवश्छन्दोनदीपूरितः
स्तोभोत्तुङ्गतरङ्गवानवतु वस्सामागमाम्भोनिधिः॥

अथ जानन्ति सर्वे चत्वारः वेदाः, ते च ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति । प्रत्येकस्मिन्वेदे पुनश्चत्वारो भेदाः सन्ति ते च संहिताब्राह्मणारण्यकोपनिषदिति । वेदाध्ययनं नाम एतेषां संहिताब्राह्मणारण्यकोपनिषद्भागानामध्ययनमेव भवति । यजुर्वेदे तु अध्ययनं संहितया सह ब्राह्मणारण्यकोपनिषद्भागानां स्वाभाविकतया भवत्येव । परं सामवेदे तथा न भवति । यतोहि ब्राह्मणोपनिषद्भागः सामवेदे संहितारण्यकाभ्यां प्रत्येकतया ऋक्सामस्वरभिन्नत्वेन च विद्यते । ग्रामेगेयगाने संहिता, आरण्येगेयगाने आरण्यकं च अध्ययनं कुर्वन्ति । ब्राह्मणमिति छान्दोग्यमन्त्रब्राह्मणस्य अध्ययनं कुर्वन्ति । उपनिषदिति छान्दोग्योपनिषदं पठन्ति । परं एतावता समग्रवेदाध्ययनं न सम्पद्यते सामवेदे, अष्टब्राह्मणानां सद्भावात् । यतोहि एकत्रैवाष्टानां ब्राह्मणानां समुपलब्धिः मन्त्राध्ययन–सौलभ्याय नासीत् । प्रत्येकतया भाष्यसहितब्राह्मणग्रन्थः लभ्यते । ब्राह्मणाध्ययनपरम्परापि नष्टप्रायास्ति । कर्नाटके उत्तरकन्नडमण्डले होन्नावरप्रान्ते राष्ट्रपतिप्रशस्तिपुरस्कृतस्य वेदमूर्ति अलेख शिवराम भट्ट महोदयस्य गृहे ताण्ड्यब्राह्मणस्य तिकलारि लिप्यां हस्तलिखितं पत्रात्मकं पुस्तकं लब्धम् । तत्र पाठे पदविभागः नास्ति । दण्डाकारेण लिखितमासीत् । तत्र लब्धेन ताण्ड्यब्राह्मणेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सह शिष्टसप्तब्राह्मणानां च सङ्ग्रहः कृतः । इतः पूर्वं भागत्रये लक्ष्मीकान्त शर्मा कुम्भघोणम् एतैः १९८० तमे क्रिस्ताब्दे मुद्रापितमासीत् । प्रतयः नोपलभ्यन्ते । विषयबाहुल्यात् पुस्तकत्रयं कृतमासीदिति भाति । परमधुना एकस्मिन्नेव पुस्तके सर्वं सङ्गृहीतमस्ति । अन्ते मन्त्रानुक्रमणिकापि दत्तास्ति । अष्टब्राह्मणस्थमन्त्राणां शुद्धताप्राप्तये कानिचन ग्रन्थानां सहकारः स्वीकृतः । लक्ष्मीकान्तशर्मभिः प्रकाशितं छान्दोग्यब्राह्मणं पुस्तकत्रयात्मकम्, चौखम्बा सभाष्यं ताण्ड्यब्राह्मणपुस्तकम्, बि.आर्.शर्मभिः सम्पादितानि सभाष्याणि षड्विंशार्षेयसामविधान-ब्राह्मणानि, काश्यां प्रकाशितं भाष्यद्वयोपेतं छान्दोग्यमन्त्रब्राह्मणम्, गीताप्रेस् गोरखपुर द्वारा प्रकाशितं छान्दोग्योपनिषत् शाङ्करभाष्योपेतं पुस्तकं च स्वीकृतमस्ति । तेभ्यः सर्वेभ्यः सनमोवाकं धन्यवादं समर्पयामि । हस्तप्रतिं दत्तवते श्री शिवराम शम्भु भट्ट महोदयाय च सनमोवाकं हार्दं कार्तज्ञं समर्पयामि । पुस्तकस्यास्य प्रकाशनं कर्तुमुद्युक्तायै **राणायनीयसंशोधनाप्रतिष्ठानम्, तिरुपति** संस्थायै हार्दं कार्तज्ञं समर्पयामि । प्रकाशनार्थं सम्पूर्णधनदातृभ्यः **गुजरात् निवासिभ्यः नारायणभक्तेभ्यः शिष्टेभ्यः** सत्सम्पदः ददातु इति वेदमातरं प्रार्थयामि । प्रकाशनार्थं प्रयत्नं कृतवते मच्छिष्याय तिरुपतौ स्थिताय डा॥ गिरिजाप्रसाद षडङ्गिवर्याय च धन्यवादं वदामि । सर्वे सामवेदिनः ग्रन्थमिमं सादरं स्वीकुर्वन्तु ब्राह्मणाध्ययनपरम्परामुज्जीवयन्तु इति समस्तान् सामगान् सम्प्रार्थ्य नीलोत्पलदलाभासाय हयाननाय सामवेदपुरुषाय ग्रन्थोऽयं समर्प्यते।

इति भवदीयः

विद्वान् प्रकाश सुब्राय भट्ट

२५.०८.२०१७

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ श्रीः॥

सपर्या पर्यायस्तव भवतु यन्मे विलसितम्

ॐ नमः सामवेदाय

पुरोवाक्

सप्ताकारविभक्तिरम्यतनुमान् सप्तस्वरद्वीपवान्
नानारूपमखाख्यरत्ननिलयो देवर्ष्यनेकाश्रयः।
कल्पेन्दूदयवर्धमानविभवश्छन्दोनदीपूरितः
स्तोभोत्तुङ्गतरङ्गवानवतु वस्सामागमाम्भोनिधिः॥

अथ जानन्ति सर्वे चत्वारः वेदाः, ते च ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति । प्रत्येकस्मिन्वेदे पुनश्चत्वारो भेदाः सन्ति ते च संहिताब्राह्मणारण्यकोपनिषदिति । वेदाध्ययनं नाम एतेषां संहिताब्राह्मणारण्यकोपनिषद्भागानामध्ययनमेव भवति । यजुर्वेदे तु अध्ययनं संहितया सह ब्राह्मणारण्यकोपनिषद्भागानां स्वाभाविकतया भवत्येव । परं सामवेदे तथा न भवति । यतोहि ब्राह्मणोपनिषद्भागः सामवेदे संहितारण्यकाभ्यां प्रत्येकतया ऋक्सामस्वरभिन्नत्वेन च विद्यते । ग्रामेगेयगाने संहिता, आरण्येगेयगाने आरण्यकं च अध्ययनं कुर्वन्ति । ब्राह्मणमिति छान्दोग्यमन्त्रब्राह्मणस्य अध्ययनं कुर्वन्ति । उपनिषदिति छान्दोग्योपनिषदं पठन्ति । परं एतावता समग्रवेदाध्ययनं न सम्पद्यते सामवेदे, अष्टब्राह्मणानां सद्भावात् । यतोहि एकत्रैवाष्टानां ब्राह्मणानां समुपलब्धिः मन्त्राध्ययन-सौलभ्याय नासीत् । प्रत्येकतया भाष्यसहितब्राह्मणग्रन्थः लभ्यते । ब्राह्मणाध्ययनपरम्परापि नष्टप्रायास्ति । कर्नाटके उत्तरकन्नडमण्डले होन्नावरप्रान्ते राष्ट्रपतिप्रशस्तिपुरस्कृतस्य वेदमूर्ति अलेख शिवराम भट्ट महोदयस्य गृहे ताण्ड्यब्राह्मणस्य तिकलारि लिप्यां हस्तलिखितं पत्रात्मकं पुस्तकं लब्धम् । तत्र पाठे पदविभागः नास्ति । दण्डाकारेण लिखितमासीत् । तत्र लब्धेन ताण्ड्यब्राह्मणेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सह शिष्टसप्तब्राह्मणानां च सङ्ग्रहः कृतः । इतः पूर्वं भागत्रये लक्ष्मीकान्त शर्मा कुम्भघोणम् एतैः १९८० तमे क्रिस्ताब्दे मुद्रापितमासीत् । प्रतयः नोपलभ्यन्ते । विषयबाहुल्यात् पुस्तकत्रयं कृतमासीदिति भाति । परमधुना एकस्मिन्नेव पुस्तके सर्वं सङ्गृहीतमस्ति । अन्ते मन्त्रानुक्रमणिकापि दत्तास्ति । अष्टब्राह्मणस्थमन्त्राणां शुद्धताप्राप्तये कानिचन ग्रन्थानां सहकारः स्वीकृतः । लक्ष्मीकान्तशर्मभिः प्रकाशितं छान्दोग्यब्राह्मणं पुस्तकत्रयात्मकम्, चौखम्बा सभाष्यं ताण्ड्यब्राह्मणपुस्तकम्, बि.आर्.शर्मभिः सम्पादितानि सभाष्याणि षड्विंशार्षेयसामविधान-ब्राह्मणानि, काश्यां प्रकाशितं भाष्यद्वयोपेतं छान्दोग्यमन्त्रब्राह्मणम्, गीताप्रेस् गोरखपुर द्वारा प्रकाशितं छान्दोग्योपनिषत् शाङ्करभाष्योपेतं पुस्तकं च स्वीकृतमस्ति । तेभ्यः सर्वेभ्यः सनमोवाकं धन्यवादं समर्पयामि । हस्तप्रतिं दत्तवते श्री शिवराम शम्भु भट्ट महोदयाय च सनमोवाकं हार्दं कार्तज्ञं समर्पयामि । पुस्तकस्यास्य प्रकाशनं कर्तुमुद्युक्तायै **राणायनीयसंशोधनाप्रतिष्ठानम्, तिरुपति** संस्थायै हार्दं कार्तज्ञं समर्पयामि । प्रकाशनार्थं सम्पूर्णधनदातृभ्यः **गुजरात् निवासिभ्यः नारायणभक्तेभ्यः शिष्टेभ्यः** सत्सम्पदः ददातु इति वेदमातरं प्रार्थयामि । प्रकाशनार्थं प्रयत्नं कृतवते मच्छिष्याय तिरुपतौ स्थिताय डा॥ गिरिजाप्रसाद षडङ्गिवर्याय च धन्यवादं वदामि । सर्वे सामवेदिनः ग्रन्थमिमं सादरं स्वीकुर्वन्तु ब्राह्मणाध्ययनपरम्परामुज्जीवयन्तु इति समस्तान् सामगान् सम्प्रार्थ्य नीलोत्पलदलाभासाय हयाननाय सामवेदपुरुषाय ग्रन्थोऽयं समर्प्यते।

इति भवदीयः

विद्वान् प्रकाश सुब्राय भट्ट

२५.०८.२०१७

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रस्तावना

ॐनमः सामवेदाय

सप्तस्वरैः समस्तँ यो जगदेतच्चराचरम् ।
सञ्जीवयति विश्वात्मा स मे विष्णुः प्रसीदतु ॥

अस्य ग्रन्थस्य विषये

राणायनिकौथुमयोः केवलं संहितारण्यकयोः मन्त्रविभाग-(ग्रन्थविभागः)करणे भेदः तथा क्वचित् मन्त्रेषु पाठभेदः स्वरभेदश्च भवति । अध्ययनग्रन्थाः, ब्राह्मणग्रन्थाः, लक्षणग्रन्थाः सर्वे समाना एव । तत्र राणायनीयाः सप्तभेदाः भवन्ति राणायनीयाः, शाट्यमुग्राः, कालोपाः, महाकालोपाः, लाङ्गलायनाः, शार्दूलाः, कौथुमाश्चेति इति चरणव्यूहवाक्यश्रवणेन कौथुमाः अपि राणायनीयसप्तभेदेष्व-न्यतमत्वेन वर्णितो दृश्यते । अतः राणायनीयकौथुमयोः अध्ययन-ग्रन्थाः सर्वे समाना एव । राणायनीयानां तु संहिताध्ययनार्थं राणायनीयवर्गपरिभाषाधारितं वेयगानमिति पुस्तकं मुद्रितमस्ति । ब्राह्मणानामध्ययनेऽपि क्लेशः अस्ति । ताण्ड्यब्राह्मणं हस्तलिखित-रूपेण विना पदविभागेन तिकलारि लिप्यामासीत् । तत् संस्कृत्य स्थापितमेतत्पुस्तकम् । अस्य ब्राह्मणग्रन्थस्य अध्ययने स्वरक्लेशो नास्ति । यतः **आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम् । कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः॥** इति नारदीयशिक्षायाम् । आर्चिकं ऋक्स्वरं, गाथिकं ब्राह्मणादि मन्त्रपठनस्वरः, तथा सामिकं सामस्वरमिति सामवेदे मन्त्रपठने स्वराणां त्रयो भेदाः भवन्ति । गाथिके स्वरे उदात्तानुदात्तस्वरितप्रचयादि ऋक्स्वराः उत क्रुष्टप्रथम द्वितीयतृतीयचतुर्थमन्द्रातिस्वारादि गानस्वरा वा न भवन्ति । परम्परया यथा उपदिश्यते तथा स्वरः उच्यते ।

एष्वष्टब्राह्मणेष्वन्तर्गताः विषयाः अन्यत्र वेदेषु कुत्रापि न लभ्यन्ते । तर्हि अष्टब्राह्मणेषु वर्णितान् विषयान् संक्षेपेण पश्यामः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आद्ये **ताण्ड्यमहाब्राह्मणे** २५ अध्यायाः, ३४७ खण्डाः, ३५३१ मन्त्राः सन्ति । इदं सोमयागेषु उत्तरार्चिकगीतानां विनियोगाय प्रवृत्तम् । अस्मिन् सर्वसोमयागाङ्गभूता औद्गात्रा यजुर्मन्त्राः प्रथमाध्याये ब्राह्मस्तुतिप्रसरमन्त्रैः सह विद्यन्ते । द्वितीय-तृतीयाध्याययोः नित्यनैमित्तिककाम्यस्तोमाः यज्ञे उपयुज्यमानाः उक्ताः । चतुर्थपञ्चमयोः गवामयनसत्रमुपवर्णितम् । षष्ठसप्तमाष्टम-नवमेषु प्रायश्चित्तैः सह अग्निष्टोमउक्थ्यषोडश्यतिरात्राः सोमसत्राः प्रस्ताविताः सन्ति । एते चत्वारः यज्ञाः अन्येषामेकाहानां प्रकृतिभूताः सन्ति । एतेषामाश्रयेणैव द्वादशाहादयोऽहीनसत्रयागाः क्रियन्ते । दशमात् पञ्चदशाध्यायपर्यन्तं षड्भिरध्यायैः सामभिः सह दशरात्रस्य विवेचनं कृतमस्ति । साममन्त्राणामध्ययनमपि अत्र निर्दिष्टक्रमेणैव भवति । एवं संवत्सरसाध्याः अनेके क्रतवः प्रदर्शिताः। पञ्चविंशाध्यायेऽपि अनेके सारस्वतयागाः प्रतिपादिताः । सामभिर्विना सोमक्रतवः सर्वदा न भवन्त्येव । अस्मिन् ब्राह्मणे एकाशीति सहस्राधिक सङ्ख्यया सुत्यादिनानि निर्दिष्टानि सन्ति । एतावन्तः सोमयागाः सामवेदं विहाय अन्यत्र वेदेषु कुत्रापि नोपलभ्यन्ते । एतादृशविशिष्टं सामवेदस्य इदमाद्यं ब्राह्मणं ताण्डिमहर्षिणा दृष्टत्वात्ताण्ड्यब्राह्मणं, विषयस्य प्रौढत्वात् प्रौढब्राह्मणं, अस्मिन् पञ्चविंशत्यध्यायाः सन्तीति पञ्चविंशब्राह्मणमिति व्यवहरन्ति ।

षड्विंशे ६ अध्यायाः, ४८खण्डाः, ४९५ मन्त्राः सन्ति । **प्रथमाध्याये** – ब्रह्मसुब्रह्मप्रदर्शनम्, देवब्राह्मणाह्वानम्, सुब्रह्मण्य देवतानामनिर्देशः, सवनत्रये गायत्र्याः सामान्यप्रशंसा, विश्वरूपा गानविधानम्, यज्ञफलसमृद्धिकथनम्, विराडतिरेकदोषप्रदर्शनम्, मृण्मयपात्रभेदनप्रायश्चित्तम्, सौम्यचरुविधिः निरूपितमस्ति ।
द्वितीयाध्याये– अग्निष्टोमे बहिष्पवमानम्, धूर्गाने ऋचामनुलोम विधानम्, धुरादीनां प्रशंसा, होताध्वर्यूद्गातृब्रह्मसदस्यहोत्राशंसि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चमसाध्वर्यूणां धर्मा:, यजमानेन होत्रादिभिरनुज्ञा प्रार्थना, माध्यन्दिनतृतीयसवनयो: प्रार्थना अनुज्ञास्वीकारश्च दर्शित:।

तृतीयाध्याये– आर्त्विज्येषु होत्रादिभिर्विज्ञेया: विषया:, कर्मवैकल्यदोषप्रायश्चित्तम्, ऋत्विग्वरणविधानम्, अवभृथविशेष:, अभिचरणीययज्ञेषु विशेष:, पञ्चदश–सप्तदश–एकोनविंशतिस्तोमे तथा तृणवे च विष्टुतिविधायकब्राह्मणमस्ति ।

चतुर्थाध्याये– व्यूढद्वादशाहे नवरात्रभेद प्रदर्शनम्, आभिचारयज्ञेषु श्येनयज्ञप्रतिज्ञा, श्येनयागधर्मा:, सन्दंशाख्य यागविशेष:, वज्रयागधर्मा:, वैश्वदेवसत्रे अह:क्लृप्तिदर्शनमस्ति ।

पञ्चमाध्याये – आख्यायिकया सह अग्निष्टोमनिरूपणम्, सर्वकृत्वानुष्ठानसिद्धि:, औदुम्बर्युच्छ्रयणम्, यूपवृक्षलक्षणनिरूपणम्, सन्ध्योपासनविषय: तत्फलं च, चन्द्रस्य क्षयवृद्धिनिरूपणम्, स्वाहाख्यदेवताया: स्वरूपनिरूपणमस्ति ।

षष्ठाध्याये – अद्भुतशान्तिनिरूपणम्, शत्रुविजयार्थं होम:, ऐन्द्राद्भुतहोमस्य स्थलनिर्देश:, शान्ति:, याम्यनिमित्तजशान्तिहोम:, वरुणनिमित्तजदोषा: तत्परिहारोपाय:, वैश्रवणनिमित्तस्य दोषप्रभाव: तत्परिहारोपायश्च, आग्नेयनिमित्तजाद्भुतदर्शनं तस्य शान्तिहोम:, वायव्यनिमित्तजदोषशान्तिहोम:, सौम्यनिमित्तजाद्भुतदर्शनं तच्छान्ति:, वैष्णवनिमित्तजदोषफलकथनं तन्निवृत्ति:, रौद्रजदोषदर्शनं तस्य परिहार:, सौर्याणामद्भुतानां निवृत्तौ होमविशेष:, मानुषादीनामति दु:खादि दोषफलं तन्निवृत्तिहोमश्च प्रदर्शितो विद्यते ॥

सामविधानब्राह्मणे ३ प्रपाठका:, २५ अध्याया:, २८१ मन्त्रा: सन्ति ।

प्रथमप्रपाठके – प्रथमसृष्टि:, देवानामुपजीवनम्, साम्नां स्वरूपम्, स्वर्गप्राप्त्युपाय:, कृच्छ्रविधि:, तत्फलम्, स्वाध्याया–ध्ययनविधि:, व्रतसहितमन्त्राणामनुष्ठानेन यागफलप्राप्ति:, अग्न्याधेयादि सहस्र–संवत्सरयागफलप्राप्त्युपाय:, षोडशमहाव्याहृतय:, रुद्रसंहिता, विष्णु–

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विनायकस्कन्दपितृसंहितादीनां सामानि, पूतत्वप्राप्तिविधिः, परुषभाषणप्रायश्चित्तम्, अयाज्ययाजने सुरादिपाने ब्रह्महत्यादि पातकानां उपपातकानां च प्रायश्चित्तम्, ब्रह्मस्वहरणे गुरुदारगमने ब्राह्मणादिभिः वार्धुषिकादाने प्रायश्चित्तम्, प्रतिग्रहप्रायश्चित्तम्, गोवधे शूद्रोपजीवने प्रायश्चित्तम्, तैलादिविक्रयणे, सूर्योदयास्तमयोः सुप्ते, अक्षिस्पन्दनादि दुर्निमित्ते, गृहादिदाहे, दर्भासनस्य अग्निदाहे, गवादीनां अभिघाते प्रायश्चित्तविशेषः प्रदर्शितः ।

द्वितीयप्रपाठके - काम्यकर्माणि, बहुप्रतिग्रहात् शुद्धिः, आरोग्य-कामस्य दीर्घायुकामस्य कर्मविशेषः, रक्षोगृहीतस्य दीर्घरोग-पीडितस्य च निवृत्युपायः, क्षुद्ररोगशान्त्यै, सर्पभयनिवृत्यै च कर्मविशेषः, शत्रुभ्यः रक्षणोपायः, आधिदैविकभयनिवारणोपायः, अनधीत सामगस्य क्षेमाशंसिनः कर्तव्यानि, जरामृत्युभ्यां जयकामिनामुपासनाविशेषः, स्त्रीपुरुषाणां राजकीयपुरुषाणां च वशीकरणोपायः, सौभाग्यप्राप्त्यै, सुभगत्वप्राप्त्यै, यशःप्राप्त्यै, ब्रह्मवर्चसप्राप्त्यै, श्रुतनिगादित्वप्राप्त्यै, वादकथासु श्रैष्ठ्यत्वप्राप्त्यै, प्रजाप्राप्त्यै च कर्तव्यकर्म विशेषः दर्शितः ।

तृतीयप्रपाठके-धनधान्यलाभाय, गोसम्पदभिवृद्ध्यै, अलक्ष्मी-निवारणार्थं च काम्यकर्मविशेषः, ग्रामकामाय हिरण्यधान्यपश्वादि लाभाय प्रयोगान्तराणि, दिव्यभोगप्राप्त्यै आशुभोगबहुकिङ्करप्राप्त्यै प्रयोगविशेषः, अविधवास्त्रीत्वादि नानाफलविशेषप्राप्त्यै वास्तुशान्ति विधिः, चिरकालजीवनपरिज्ञानाय च प्रयोगः, राजाभिषेकः, युद्धे जयप्राप्त्यै भाविजन्मसु पूर्वजन्मस्मृतिलाभाय पितृपिशाचइन्द्र गन्धर्वादीनां दर्शनाय च उपासनाविशेषः, पुनर्जन्माभावाय रात्रेर्व्रतोपासना, स्वेच्छया लोकान्तरगमनाय देवतादर्शनाय मानुषानन्दलाभाय दिव्यभोगलाभाय त्रैलोक्याधिपत्यलाभाय च प्रयोगविशेषाः, कामनानुगुण्येन सामगानम्, गुरुदक्षिणादानेन कामनावाप्तिरित्यादीनां विषयाणां समन्त्रकप्रयोगः प्रदर्शितः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आर्षेयब्राह्मणे ६ अध्यायाः,८२ खण्डाः,७३१ मन्त्राः सन्ति। ऋषीणां नामगोत्रादीनां प्रतिपादनम्, ब्राह्मणाध्ययने नियमाः, अध्ययनफलम्, ऋष्यादीनामपरिज्ञाने दोषस्मरणं, प्रणवस्य आद्योच्चार्यत्वम्, हिङ्कारस्य अवसानोच्चार्यत्वं च प्रथमखण्डे उक्त्वा अवशिष्टद्वादशखण्डेषु आग्नेयकाण्डस्थसाम्नां ऋषिनिर्देशः कृतः। द्वितीयतृतीयचतुर्थाध्यायेषु ऐन्द्रकाण्डस्थसाम्नां ऋषिनिर्देशः, पञ्चमाध्याये पावमानस्थसाम्नां ऋषिनिर्देशः तथा षष्ठाध्याये आरण्येगेयसाम्नां ऋषिनिर्देशः कृतः।

देवताध्यायब्राह्मणे ४ खण्डाः, ६० मन्त्राः सन्ति।
प्रथमखण्डे – साम्नां निधनभेदेन देवताभेदः, ऋक्सामयोः माता-पितृत्वं तज्ज्ञानफलं च निरूपितम्।
द्वितीयखण्डे – गायत्र्यादीनां छन्दसां वर्णनिरूपणम्, अग्न्यादि देवतानां गायत्र्यादि छन्दसां च सम्बन्धः निरूपितः।
तृतीयखण्डे – गायत्र्यादि छन्दसां निचृद्भुरिजयोश्च निर्वचनम्।
चतुर्थखण्डे – गायत्रसामस्वरूपं, सावित्र्याः तत्तदङ्गेषु देवता-प्रतिपादनं कृतं विद्यते।

छान्दोग्य(मन्त्र)ब्राह्मणे २ प्रपाठकाः, १६ खण्डाः, २६७ मन्त्राः सन्ति।
प्रथमप्रपाठके– अग्निपर्युक्षणमन्त्रः, विवाहाङ्गभूतः, लेखाहोमः, गर्भाधान, पुंसवन, सीमन्तोन्नयन, सोष्यन्तीहोमः, नामकरणं, चौलोपनयने, ब्रह्मचारिणां समिदाधान मन्त्रः,समावर्तनाङ्गभूतः, आदित्योपस्थानं, स्रग्बन्धन, उपानत्परिधान, दण्डग्रहणं, परिषद्वीक्षणं तथा पशुवृद्धि आदि कर्मणां मन्त्राः सन्ति।
द्वितीयप्रपाठके – सर्पबलिः, नवयज्ञः, आग्रहायणं, तिस्रोष्टकाः, अन्वष्टकाः, पश्वनुमन्त्रणं, पिण्ड पितृयज्ञमन्त्राः, इन्द्राण्याः स्थालीपाकः, सर्व साधारणानि सुखप्रयोगमन्त्राः, प्रपदमन्त्रः,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पशुकाम:,सख्यकाम:, पृथिवीपतित्वकाम:, आदित्योपस्थानमन्त्र:, अलक्ष्म्या: अपनोदनं, सन्ध्योपस्थानं, सञ्चिताभिवृद्धि कामाय, वास्तुहोम:, जनवशीकरणहोम:, पुण्यलाभाय, यशस्कामाय, सहायकामाय, आधिपत्यकामाय च कर्मविशेष:, विषनिर्हरणं, क्रिमिनाशक:, मधुपर्काङ्गभूता: मन्त्राश्च सन्ति ।

छान्दोग्य(उपनिषत्)ब्राह्मणे – (३ तः १० पर्यन्तम्) ८ प्रपाठका:, १४९ खण्डा:, ६२८ मन्त्रा: सन्ति ।

तृतीयप्रपाठके – उद्गीथावयवस्य ओंकारस्य उपासना, प्राणादिदृष्ट्या ओंकारोपासना, प्रस्तावप्रतिहाराणामुपासना तथा स्तोभोपासना चोक्ता ।

चतुर्थप्रपाठके– समस्तसाम्नामुपासना, पञ्चविध सामोपासना, सप्तविध सामोपासना, गायत्र्यादि साम्नामुपासना, साम समूहस्योपासना, गानविशेष: तस्योपदेश:, ओंकारोपासना तथा सामहोम मन्त्रोत्थानानि प्रदर्शितानि ।

पञ्चमप्रपाठके – आदित्योपासना, गायत्रीब्रह्मो पासना, गायत्र्या: अङ्गोपासना, शाण्डिल्यविद्या, पुत्रस्य आयुर्वृद्ध्यै दीर्घायुष्यप्राप्त्यै च उपासना, मनआकाशादिषु ब्रह्मदृष्टि:, आदित्यब्रह्मोपासनादि विषया: निरूपिता: ।

षष्ठप्रपाठके – जानश्रुतेराख्यानं, संवर्गविद्या, सत्यकाम जाबालोपाख्यानं, षोडशकलविद्या, उपकोसलविद्या, यज्ञधर्माश्च निरूपिता: ।

सप्तमप्रपाठके – प्राणस्य वैशिष्ट्यं, प्राणोपासना, पञ्चाग्निविद्या, वैश्वानरविद्याया: उपासनादिप्रकार: प्रणाग्निहोत्रविद्याया: प्रशंसा प्रतिपादित: ।

अष्टमप्रपाठके– एकज्ञानात्सर्वज्ञत्वं, सृष्टिक्रम:, सृष्टावात्मप्रवेश:, त्रिवृत्करणं, बाह्यत्रिवृत्करणं, सुषुप्तिविचार:, सत्सम्पद्विचार:,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सदात्मनः दर्शन उपायः, ज्ञानिनां पुनरावृत्तिरहितावस्थादयः निरूपिताः।

नवमप्रपाठके – नारदसनत्कुमारोपाख्यानं, नामब्रह्मोपासना, वाक्, मनः, सङ्कल्पः, चित्तं, ध्यानं, विज्ञानं, बलं,अन्नं,अप्,तेजः,आकाश, स्मरः,आशा,प्राणः, सत्यं,विज्ञानं,मननं,श्रद्धा,निष्ठा,कृतिः,सुखप्राप्तिः, भूमोपासनादिषु उत्तरोत्तरश्रेयो विशेषः (भूमविद्या) प्रदर्शितः ।

दशमप्रपाठके – दहरोपासना, दहरविद्या, ब्रह्मचर्यप्रशंसा, अमृतनाडिविषयः, अवस्थात्रयनिरूपणादात्मतत्वनिश्चयः, इन्द्रविरो– चनोपाख्यानं,अवस्थात्रयातीतात्मनः स्वरूपं, जपध्यानार्थमन्त्राः, ध्यानार्थं ब्रह्मलक्षणं, गुरुवंशपरम्परा, साधनाक्रमः, साधनाफलं, उपासकस्य ब्रह्मलोकप्राप्तिरूपफलप्राप्तिश्च निरूपितः।

संहितोपनिषद्ब्राह्मणे ५ खण्डाः, ९३ मन्त्राः सन्ति ।

प्रथमखण्डे – दैवासुरार्षसंहिताविभागः, संहितानां तिसृणां फलविशेषः, संहितासु पुनः देवहूः वाक्शबहूः अमित्रहूः इति त्रैविध्यं, तासां फलकीर्तनं च, उक्तानामेव संहितानां फलविशेषकथनं, शुद्धा, अदुस्पृष्टा, अनिर्भुजेति संहितासु पुनः त्रैविध्यं तासां फलविशेषश्च, पुनः वृत्तिभेदेन देवताभेदेन च त्रैविध्यं निरूपितमस्ति ।

द्वितीयखण्डे – गानविधौ संहितासमावर्तनयोः वर्णनं, लोपातिहार– वर्णनं, सम्नां स्तोभसाहित्यराहित्ये, स्वराणामनुलोमप्रतिलोमभेदः, रोहाभिगीतविनतप्रणतविसर्गोपग्रहकर्षणभेदाः, प्रस्ताववर्णनं, रथन्तरस्तोत्रे भकारनिवेशः, तद्विज्ञाने फलविशेषः, अविज्ञाने दोषश्च प्रदर्शितः ।

तृतीयखण्डे – साम्नां स्तोत्रकाले अन्तर्निधनप्रयोगः, उदूहविचारः तस्य लक्षणं च, तत्र लाङ्गलशाखाप्रमाणं, उदात्तानुदात्तादिसंशये उदात्ताद्याश्रयणं, अपात्रदानभीतविद्यया स्वरक्षणार्थं ब्राह्मणप्रार्थना, विद्यादानपात्रनिरूपणं, गुरौ मातापित्रोरिव वृत्तिः, अपात्रदाननिन्दा,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विद्याधिकारिणां विशेषणं, छन्दोदेवतादिज्ञानस्य प्राशस्त्यं, तदविज्ञानफलं, अध्ययनधर्मोपसंहारः विवृतः ।

चतुर्थखण्डे – गुरुदक्षिणया सर्वकामप्राप्तिः, अध्ययने नियमविशेषः तत्फलं च, अतिदानानि गोपृथिवीसरस्वतीति कथनं, तेषां दानफलं च, जपवापनदोहनोपस्पर्शनादीनां फलं च निरूपितम् ।

पञ्चमखण्डे– हिरण्यदानफलं, अध्येतुः फलं च, ब्रह्मचारिधर्माः, व्रतनियम विशिष्टवेदाध्ययनफलं च प्रदर्शितम् ।

वंशब्राह्मणे ३ खण्डाः सन्ति ।

प्रथमखण्डे– शर्वदत्तात् अँशुर्धानञ्जय्यपर्यन्तं विंशति ऋषीणां तर्पणम् ।

द्वितीयखण्डे – अमावास्य शाण्डिल्यात् कश्यपपर्यन्तं एकविंशति ऋषीणां षड्देवतानां च तर्पणम् ।

तृतीयखण्डे– नयन्तमारभ्य गोभिलपर्यन्तं अष्टादशऋषीणां तर्पणम् ।

एवमष्टब्राह्मणेषु विषयाः निरूपिताः सन्ति । इतोऽप्यधिक जिज्ञासूनां तु भाष्यग्रन्थो विद्यते । ब्राह्मणाध्ययनपरम्परायाः क्षीणावस्थायामस्मिन्काले अध्येतृणामध्ययनसौकर्याय मूलमात्र–सङ्ग्रहणं कृतमस्ति ।

हरिः ॐ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ॐनमः सामवेदाय

अथ सामवेदीयाष्टब्राह्मणानि

(मूलमात्रम्)

अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम् ।
षड्विँशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रन्था अष्टावुदीरिताः ॥

आदिमं ताण्ड्यमहाब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ॐनमः सामवेदाय

आदिमं ताण्ड्यमहाब्राह्मणम्

प्रथमोऽध्यायः

ॐ महन्मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचो भुक्तिं मे वोचस्सर्व्वं मे वोचस्तन्मावतु तन्माविशतु तेन भुक्षिषीय ॥१॥ देवो देवमेतुं सोमः सोममेत्वृतस्य पथा ॥२॥ विहाय दौष्कृत्यम् ॥३॥ बद्धानामासि सृतिः सोमसरणी सोमं गमेयम् ॥४॥ पितरो भूः पितरो भूः पितरो भूः ॥५॥ नृमण ऊर्द्धभरसं त्वोद्ध्र्वभरा दृशेयम् ॥६॥ मृदा शिथिरा देवानां तीर्थँ वेदिरसि मा मा हिँसीः ॥७॥ विष्णोः शिरोऽसि यशोधा यशो मयि धेहि ॥८॥ इष ऊर्ज्ज आयुषे वर्च्चसे च ॥९॥ इति प्रथमः खण्डः ॥१/१॥

युनज्मि ते पृथिवीमग्निना सह युनज्मि वाचँ सह सूर्य्येण युक्तो वातोऽन्तरिक्षेण ते सह युक्तास्तिस्रो विमृजः सूर्य्यस्य ॥१॥ ऋतस्य सदने सीदामि ॥२॥ ऋतपात्रमसि ॥३॥ वानस्पत्योऽसि बार्हस्पत्योऽसि प्राजापत्योऽसि प्रजापतेर्मूर्धासि अत्यायुपात्रमसीदमहं मां प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्च्चसाय ॥४॥ मरुतो नपातोऽपाङ्क्षयाः पर्वतानाङ्ककुभः श्येना अजिरा एन्द्रँ वग्नुना वहत घोषेणामीवां चातयध्वँ युक्तास्थ वहत ॥५॥ इदमहममुँ यजमानं पशुष्वध्यूहामि पशुषु च मां ब्रह्मवर्च्चसे च ॥६॥ वसवस्त्वा गायत्रेण छन्दसा सम्मृजन्तु रुद्रास्त्वा त्रैष्टुभेन छन्दसा सम्मृजन्त्वादित्यास्त्वा जागतेन छन्दसा सम्मृजन्तु ॥७॥ पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पर्य्येषि विश्वतः। अतप्ततनूर्न्न तदामो अश्नुते श्रृतास इद्वहन्तः सन्तदाशत ॥८॥ प्रशुक्रैतु देवी मनीषास्मद्रथः सुतष्टो न वाज्यायुषे मे पवस्व वर्च्चसे मे पवस्व विदुः पृथिव्या दिवो जनित्राच्छृणवन्त्वापोऽधः क्षरन्तीस्सोमे होद्वाय ममायुषे मम ब्रह्मवर्च्चसाय यजमानस्यद्ध्र्या अमुष्य राज्याय ॥९॥ इति द्वितीयः खण्डः॥१/२॥

बेकुरा नामासि जुष्टा देवेभ्यो नमो वाचे नमो वाचस्पतये देवि वाग्यत्ते वाचो मधुमत्तस्मिन्माधाः सरस्वत्यै स्वाहा ॥१॥ सूर्य्यो मा दिव्याभ्यो नाष्ट्राभ्यः पातु वायुरन्तरिक्षाभ्योऽग्निः पार्थिवाभ्यः स्वाहा ॥२॥ योऽद्य सौम्यो वधोघायूनामुदीरते विषूकुहस्य धन्वनाप तान् वरुणोऽधमत् ॥३॥ यो म आत्मा या मे प्रजा ये मे पशवस्तैरहं मनो वाचं प्रसीदामि ॥४॥ अग्नेस्तेजसेन्द्रस्येन्द्रियेण सूर्य्यस्य वर्च्चसा बृहस्पतिस्त्वा युनक्तु देवेभ्यः प्राणायाग्निर्य्युनक्तु तपसा स्तोमँ यज्ञाय वोढवे दधात्विन्द्र इन्द्रियँ सत्याः कामा यजमानस्य सन्तु ॥५॥ अन्नं करिष्याम्यन्नं प्रविष्याम्यन्नञ्जनयिष्यामि ॥६॥ अन्नमकरमन्न-मभूदन्नमजीजनम् ॥७॥ श्येनोऽसि गायत्रछन्दा अनु त्वारभे स्वस्ति मा सम्पारयामास्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम् ॥८॥ सँवर्च्चसा पयसा सन्तपोभिर-गन्महि मनसा सँ शिवेन सँविज्ञानेन मनसश्च सत्यैर्य्यथावोऽहं चारुतमँ वदानीन्द्रो वो दृशे भूयासँ सूर्य्यश्चक्षुषे वातः प्राणाय सोमो गन्धाय ब्रह्म क्षत्राय ॥९॥ नमो गन्धर्व्वाय विष्वग्वादिने वर्च्चोधा असि वर्च्चो मयि धेहि॥१०॥ इति तृतीयः खण्डः ॥१/३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध्वनामध्वपते स्वस्ति मेऽद्यास्मिन् देवयाने पथि भूयात् ॥१॥ सम्राडसि कृशानुः ॥२॥ तुथोऽसि जनधायो नभोऽसि प्रतक्वाऽसम्मृष्टोऽसि हव्यसूदनः ॥३॥ विभुरसि प्रवाहणः ॥४॥ वह्निरसि हव्यवाहनः ॥५॥ श्वात्रोऽसि प्रचेताः ॥६॥ तुथोऽसि विश्ववेदा उशिगसि कविरङ्घारिरसि बम्भारिरवस्युरसि दुवस्वान् ॥७॥ शुन्ध्युरसि मार्जालीयः ॥८॥ ऋतधामासि स्वर्ज्योतिः ॥९॥ समुद्रोऽसि विश्वव्यचाः ॥१०॥ अहिरसि बुध्न्यः ॥११॥ अजोस्येकपात् ॥१२॥ सगरा असि बुध्न्यः ॥१३॥ कव्योऽसि कव्यवाहनः॥१४॥ पातमाग्नयो रौद्रेणानीकेन पिपृत मा नमो वोऽस्तु मा मा हिँसिष्ठ ॥१५॥ इति चतुर्थः खण्डः॥१/४॥

ऋतस्य द्वारौ स्थो मा मा सन्ताप्तम् ॥१॥ नमः सखिभ्यः पूर्व्वसद्भ्यो नमोऽपरसद्भ्यः ॥२॥ श्येनो नृचक्षा अग्नेष्ट्वा चक्षुषावपश्यामि ॥३॥ इन्द्रविन्द्र पीतस्य त इन्द्रियावतो गायत्रछन्दसः सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि ॥४॥ ऊद्ध्र्वस्सप्तऋषीनुपतिष्ठस्वेन्द्रपीतो वाचस्पते सप्तर्त्विजोऽभ्युच्छ्रयस्व जुषस्व लोकम्माऽवाङ्वगाः॥५॥ सोमरारन्धिनो हृदि पिता नोऽसि मम तन्मा मा हिँसीः ॥६॥ सोम गीर्भिष्ट्वा वयँ वर्द्धयामो वचोविदः सुमृडीको न आविश ॥७॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥८॥ अवमैस्त ऊर्व्वैस्ते काव्यैस्ते पितृभिर्भक्षितस्य मधुमतो नाराशँसस्य सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि ॥९॥ दीक्षायै वर्णेन तपसो रूपेण मनसो महिम्ना वाचो विभूत्या प्रजापतिस्त्वा युनक्तु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रजाभ्योऽपानाय ॥१०॥ वायुर्य्युनक्तु मनसा स्तोमँ यज्ञाय वोढवे दधात्विन्द्र इन्द्रियँ सत्याः कामा यजमानस्य सन्तु ॥११॥ वृषकोऽसि त्रिष्टुप्छन्दा अनुत्वारभे स्वस्ति मा सम्पारय आमास्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम् ॥१२॥ इन्दविन्द्रपीतस्य त इन्द्रियावतस्त्रिष्टुप्छन्दसः सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि ॥१३॥ सूर्य्यो युनक्तु वाचा स्तोमँ यज्ञाय वोढवे दधात्विन्द्र इन्द्रियँ सत्याः कामा यजमानस्य सन्तु ॥१४॥ स्वरोऽसि गयोऽसि जगछन्दा अनु त्वारभे स्वस्ति मा सम्पारयामास्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम् ॥१५॥ इन्दविन्द्रपीतस्य त इन्द्रियावतो जगच्छन्दसः सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि ॥१६॥ आयुर्मे प्राणो मनसि मे प्राण आयु पत्न्यामृचि यन्मे मनो यमं गतँ यद्वा मे अपरागतँ राज्ञा सोमेन तद्वयं पुनरस्मासु दध्नसि ॥१७॥ यन्मे यमँ वैवस्वतं मनो जगाम दूरगास्तन्म आवर्त्तया पुनर्ज्जीवातवे न मर्त्तवेऽथो अरिष्टतातये ॥१८॥ येनाह्याजिमजय द्विचक्ष्य येन श्येनँ शकुनँ सुपर्णँ यदाहुश्चक्षुरदिता वनन्तँ सोमो नृचक्षा मयि तद्दधातु ॥१९॥ इति पञ्चमः खण्डः ॥१/५॥

ऐन्द्रँ सहोऽसर्जि तस्य त इन्दविन्द्र पीतस्येन्द्रियावतोऽनुष्टुप्छन्दसो हरिवतः सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि ॥१॥ इन्दविन्द्रपीतस्य त इन्द्रियावतोऽनुष्टुप्छन्दसः सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि ॥२॥ स्तुतस्य स्तुतमस्यूर्जस्वत्पयस्वदामास्तोत्रस्य स्तोत्रं गम्यात्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम् ॥३॥ इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य शस्तोक्थस्य तिरोह्नस्य योऽश्वसनि-र्गोसनिर्भक्षस्तस्योपहूत उपहूतस्य भक्षयामि ॥४॥ ऋतस्य त्वा देव स्तोमपदे विष्णोर्द्धामनि विमुञ्चाम्येतत्त्वं देव स्तोमानवकरमगन्नशीमहि वयं प्रतिष्ठाम् ॥५॥ सोमे ह्यनुमेहि सोम सह सदस इन्द्रियेण ॥६॥ सुभूरसि श्रेष्ठो रश्मिर्द्देवानाँ सँसद्देवानाँ यातुर्य्यया तन्वा ब्रह्म जिन्वसि तया मा जिन्व तया मा जनय प्रकाशं मा कुरु ॥७॥ अपां पुष्पमस्योषधीनाँ रस इन्द्रस्य प्रियतमँ हविः स्वाहा ॥८॥ हारियोजनस्य ते देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य योऽश्वसनिर्गोसनि र्भक्षस्तस्योपहूत उपहूतस्य भक्षयामि ॥९॥ देवकृतस्यैनसोऽ वयजनमसि पितृकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽ वयजनमस्यस्मत्कृतस्यैनसोऽवयजनमसि यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि यत्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि यद्विद्वाँसश्चाविद्वाँसश्चैनश्चकृम तस्यावयजनम स्येनस एनसोऽवयजनमसि ॥१०॥ अप्सु धौतस्य ते देव सोम नृभिस्सुतस्य ॥११॥ मधुमन्तं भक्षं करोमि ॥१२॥ शमद्भ्य ओषधीभ्यः॥१३॥ कामकामं म आवर्त्तय ॥१४॥ ऊर्ग्गस्यूर्ज-म्मयि धेहि ॥१५॥ प्राणसोमपीथे मे जागृहि ॥१६॥ दधिक्राव्णो अकारिषञ्जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत्प्र न आयूँषि तारिषत् ॥१७॥ इति षष्ठः खण्डः॥१/६॥

अश्वोऽस्यत्योऽसि मयोऽसि हयोऽसि वाज्यसि सप्तिर-स्यर्व्वागसि वृषासि ॥१॥ आदित्यानां पत्मान्विहि नमस्तेऽस्तु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा मा हिँसीः ॥२॥ वायोष्ट्वा तेजसा प्रतिगृह्णामि नक्षत्राणां त्वाँ रूपेण प्रतिगृह्णामि सूर्य्यस्य त्वा वर्च्चसा प्रतिगृह्णामि ॥३॥ रथन्तरमसि वामदेव्यमसि बृहदसि ॥४॥ अङ्गान्यङ्कू अभितो रथँ यौ ध्वान्तँ वाताग्रमभिसञ्चरन्तौ दूरे हेतिरिन्द्रियवान् पतत्री ते नोऽग्गनयः पप्रयः पारयन्तु ॥५॥ वैश्वानरः प्रत्नथा नाकमारु-हद्दिवः पृष्ठे मन्दमानः सुमन्मभिः सपूर्व्ववज्जनयञ्जन्तवे धनँ समानमय्मन् पर्य्येति जागृविः॥६॥ गिदैष ते रथ एष वामश्विना रथोरिष्टो विश्वभेषजः॥७॥ कृशानो सव्यानायच्छ ॥८॥ दासनो दक्षिणानवगृहाण ॥९॥ इति सप्तमः खण्डः॥१/७॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ॥१॥ वरुणस्त्वा नयतु देवि दक्षिणे वरुणायाश्वं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥२॥ वरुणस्त्वा नयतु देवि दक्षिणे रुद्राय गां तयामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥३॥ वरुणस्त्वा नयतु देवि दक्षिणेऽग्गनयेऽजम् ॥४॥ अग्गनये हिरण्यम् ॥५॥ अग्गनीषोमा-भ्यामजान् मयामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥६॥ अन्नस्यान्नपतिः प्रादादनमीवस्य शुष्मिणो नमो विश्वजनस्य क्षामाय भुञ्जति मा मा हिँसीः॥७॥ वरुणस्त्वा नयतु देवि दक्षिणे त्वष्ट्रेऽविं तयामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥८॥ ग्नास्त्वाऽकृन्तन्नपसोऽतन्वत वयित्र्योऽवयन् ॥९॥ वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वासस्तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥१०॥ वरुणस्त्वा नयतु देवि दक्षिणे उत्तानायाङ्गिरसायाप्राणत्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥११॥ वरुणस्त्वा नयतु देवि दक्षिणे पूष्ण उष्ट्रम् ॥१२॥ वायवे मृगं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥१३॥ वरुणस्त्वा नयतु देवि दक्षिणे प्रजापतये पुरुषं प्रजापतये हस्तिनं प्रजापतये वराहं प्रजापतये व्रीहियवाँस्तैरमृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥१४॥ वरुणस्त्वा नयतु देवि दक्षिणे क्षेत्रपतये तिलमाषाँ स्तैरमृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे ॥१५॥ वरुणस्त्वा नयतु देवि दक्षिणे सवित्रेऽश्वतरँ वाश्वतरीँ वा तयामृतत्वमशीय वयो दात्रे भूयान् मयो मह्यं प्रतिगृहीत्रे ॥१६॥ क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामः समुद्द्रमा-विशत्कामेन त्वा प्रतिगृह्णामि कामैतत्ते॥१७॥इत्यष्टमः खण्डः॥१/८॥

रश्मिरसि क्षयाय त्वा क्षयं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥१॥ प्रेतिरसि धर्म्मणे त्वा धर्म्मं जिन्व सवितृप्रसूता बृहस्पतये स्तुत॥२॥अन्वितिरसि दिवे त्वा दिवं जिन्व सवितृ-प्रसूता बृहस्पतये स्तुत ॥३॥ सन्धिरस्यन्त्तरिक्षाय त्वान्त्तरिक्षं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥४॥ प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥५॥ विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥६॥ प्राचोऽस्यह्ने त्वाहर्ज्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥७॥ अन्वासि रात्र्यै त्वा रात्रिञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥८॥ उशिगसि वसुभ्यस्त्वा वसून् जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥९॥ प्रकेतोऽसि रुद्रेभ्यस्त्वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रुद्रान्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥१०॥ सुदीतिरस्यादित्येभ्यस्त्वादित्याञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥११॥ ओजोऽसि पितृभ्यस्त्वा पितॄञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥१२॥ इति नवमः खण्डः ॥१/९॥

तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥१॥ रेवदस्योषधीभ्यस्त्वौषधीर्ज्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥२॥ पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥३॥ अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥४॥ अधिपतिरसि प्राणाय त्वा प्राणाञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥५॥ धरुणोऽस्यपानाय त्वापानाञ्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥६॥ सँसर्प्पोऽसि चक्षुषे त्वा चक्षुर्ज्जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥७॥ वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व सवितृप्रसूता बृहस्पतये स्तुत ॥८॥ त्रिवृदसि त्रिवृते त्वा सवृदसि सवृते त्वा प्रवृदसि प्रवृते त्वाऽनुवृदस्यनुवृते त्वा सवितृप्रसूता बृहस्पतये स्तुत ॥९॥ निरोहोऽसि निरोहाय त्वा सँरोहोऽसि सँरोहाय त्वा प्ररोहोऽसि प्ररोहाय त्वाऽनुरोहोऽस्यनुरोहायत्वा सवितृप्रसूता बृहस्पतये स्तुत ॥१०॥ वसुकोऽसि वस्यष्टिरसि वेषश्रीरसि सवितृप्रसूता बृहस्पतये स्तुत ॥११॥ आक्रमोऽस्याक्रमाय त्वा सङ्क्रमोऽसि सङ्क्रमाय त्वोत्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वा सवितृप्रसूता बृहस्पतये स्तुत ॥१२॥ इति दशमः खण्डः ॥१/१०॥

इति प्रथमोऽध्यायः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयोऽध्यायः

तिसृभ्यो हिङ्करोति स प्रथमया तिसृभ्यो हिङ्करोति स मध्यमया तिसृभ्यो हिङ्करोति स उत्तमयोद्यती त्रिवृतो विष्टुतिः ॥१॥ ज्येष्ठो ज्यैष्ठिनेय स्तुवीत ॥२॥ अग्रादग्रँ रोहत्यभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभि क्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव॥३॥ पापवसीयसो विधृतिर्विपाप्मना निवर्त्तते य एतया स्तुते नावगतोऽपरुध्यते नापरुद्धोऽवगच्छति । न श्रेयाँसं पापीयानभ्यारोहति न जनता जनतामभ्येति नान्योन्यस्य प्रजा आददते यथा क्षेत्रं कल्पन्ते । अवर्षुकस्तु पर्ज्जन्यो भवतीमे हि लोका स्तृचस्तान् हिङ्कारेण व्येति ॥४॥ एषा वै प्रतिष्ठिता त्रिवृतो विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥५॥ इति प्रथमः खण्डः॥२/१॥

तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति स पराचीभिः परिवर्त्तिनी त्रिविष्टुतिः ॥१॥ प्रपरीवर्त्तमाप्नोति य एतया स्तुते सन्तता विष्टुतिः प्राणोऽपानो व्यानस्त ऋचस्तान् हिङ्कारेण सन्तनोति। सर्व्वमायुरेति न पुरायुषः प्रमीयते य एतया स्तुते वर्षुकः पर्ज्जन्यो भवतीमे हि लोकस्तृचस्तान् हिङ्कारेण सन्दधाति ॥२॥ श्लक्ष्णेव तु वा ईश्वरा पशून्निर्मृजः सैषा च पराचोत श्रेयान् भवत्युत यादृङ्ङेव तादृङ् नेत्तु पापीयान् ॥३॥ तामेतां भाल्लवय उपासते तस्मात्ते प्रतिगृह्णन्तः परीवर्त्तान्न च्यवन्ते ॥४॥ इति द्वितीयः खण्डः॥२/२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति या मध्यमा सा प्रथमा योत्तमा सा मध्यमा या प्रथमा सोत्तमा तिसृभ्यो हिङ्करोति योत्तमा सा प्रथमा या प्रथमा सा मध्यमा या मध्यमा सोत्तमा कुलायिनी त्रिवृतो विष्टुतिः ॥१॥ प्रजाकामो वा पशुकामो वा स्तुवीत प्रजा वै कुलानाय पशवः कुलायङ्कुलायमेव भवति ॥२॥ एतामेवानुजावराय कुर्य्या–देतासामेवाग्रं परियतीनां प्रजानामग्रम्पर्य्येति ॥३॥ एतामेव बहुभ्यो यजमानेभ्यः कुर्य्यात् यत्सर्व्वा अग्रिया भवन्ति सर्व्वा मध्ये सर्व्वा उत्तमास्सर्व्वानेवैनान्समावद्भाजः करोति नान्योन्यमपघ्नते सर्व्वे समावदिन्द्रिया भवन्ति ॥४॥ वर्षुकः पर्ज्जन्यो भवतीमे हि लोकास्तृचस्तान् हिङ्कारेण व्यतिषजति ॥५॥ पापवसीयसन्तु भवति ॥६॥ अधरोत्तरमपावगतो रुध्यतेव गच्छत्यपरुद्धः पापीयान् श्रेयाँसमभ्यारोहति जनता जनताम–भ्येत्यन्योन्यस्य प्रजा आददते न यथा क्षेत्रं कल्पन्ते ॥७॥ इति तृतीयः खण्डः ॥२/३॥

पञ्चभ्यो हिङ्करोति स तिसृभिस्स एकया स एकया पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिः पञ्च पञ्चिनी पञ्च पञ्चदशस्य विष्टुतिः॥१॥ पाङ्क्तः पुरुषः पाङ्क्ताः पशवस्तया पुरुषञ्च पशूँश्चाप्नोति वज्ज्रो वै पञ्चदशो यत्पञ्च पञ्च व्यूहति वज्ज्रमेव तद्व्यूहति शान्त्या एषा वै प्रतिष्ठिता पञ्चदशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥२॥ इति चतुर्थःखण्डः॥२/४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पञ्चभ्यो हिङ्करोति स तिसृभिस्स एकया तिसृभ्यो हिङ्करोति स पराचीभिस्सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः ॥१॥ त्रीन् स्तोमान् प्रतिविहिता ब्रह्मवर्च्चसकामः स्तुवीत ॥२॥ पञ्चभिः पञ्चदशं तिसृभिस्त्रिवृतँ सप्तभिः सप्तदशम् ॥३॥ वीर्य्यँ वै स्तोमा वीर्य्यमेव तदेकधा समूहते ब्रह्मवर्च्चसस्यावरुध्यै तेजस्वी ब्रह्मवर्च्चसी भवति य एतया स्तुते ॥४॥ इति पञ्चमः खण्डः॥२/५॥

तिसृभ्यो हिङ्करोति स पराचीभिः पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिरुद्यती पञ्चदशस्य विष्टुतिः॥१॥ एतया वै देवाः स्वर्ग्गँल्लोकमायन् स्वर्ग्गकामः स्तुवीत स्वर्ग्गस्य लोकस्य समष्ट्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः ॥२॥ अभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥३॥ इति षष्ठःखण्डः॥२/६॥

पञ्चभ्यो हिङ्करोति स तिसृभिस्स एकया स एकया पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृभिर्द्दशसप्ता सप्तदशस्य विष्टुतिः ॥१॥ एतया वै देवा असुरानत्यक्रामन्नति पाप्मानं भ्रातृव्यं क्रामति य एतया स्तुते ॥२॥ अभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥३॥ गर्भिणी विष्टुतिः प्रप्रजया प्रपशुभिर्ज्जायते य एतया स्तुते ॥४॥ विड्वै सप्तदशस्तस्या राजा गर्भो विश एव तद्राजानङ्गर्भं करोति ॥५॥ नावगतोपरुध्यते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नापरुद्धोऽवगच्छति ॥६॥ अन्नँ वै सप्तदशो यत्सप्त मध्ये भवन्ति पञ्च पञ्चाभितोऽन्नमेव तन्मध्यतो धीयतेऽनशनायुको यजमानो भवत्यनशनायुकाः प्रजाः ॥७॥ वैराजो वै पुरुषः सप्त ग्राम्याः पशवो यद्दशपूर्व्वा भवन्ति सप्तोत्तमा यजमानमेव तत्पशुषु प्रतिष्ठापयति ॥८॥ एषा वै प्रतिष्ठिता सप्तदशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥९॥ इति सप्तमःखण्डः॥२/७॥

एष एव व्यूहः सप्तैकमध्या ॥१॥ ब्रह्मणो वा आयतनं प्रथमा क्षत्त्रस्य मध्यमा विश उत्तमा यत्प्रथमा भूयिष्ठा भाजयति ब्रह्मण्येव तदोजो वीर्य्यं दधाति ब्रह्मण एव तत्क्षत्त्रं च विशञ्चानुगे करोति क्षत्त्रस्येवास्य प्रकाशो भवति य एतया स्तुते ॥२॥ तामेतान्निखर्व्वा उपासते तस्मात्ते स्पर्धमाना न व्लीयन्ते ॥३॥ इत्यष्टमः खण्डः ॥२/८॥

सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया तिसृभ्यो हिङ्करोति स पराचीभिस्सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृभिस्सप्तास्थिता ॥१॥ भ्रातृव्यवाँ स्तुवीत यथा सप्तास्थितेन मत्येन समीकरोत्येवं पाप्मानं भ्रातृव्यं प्ररुजति ॥२॥ एतामेव बहुभ्यो यजमानेभ्यः कुर्य्याद्यः प्रथमो हिङ्कारः स प्रथमया यत्ताँ सप्तभ्यो हिङ्करोति तेन सा सप्त भजते यत्सप्तैव मध्ये सम्पद्यन्ते तेन सा सप्त भजते य उत्तमो हिङ्कारः स उत्तमाया यत्ताँ सप्तभ्यो हिङ्करोति तेन सा सप्त भजते सर्व्वानिवैनान् समावद्भाजः करोति नान्योन्यमपघ्नते सर्व्वे समावदिन्द्रिया भवन्ति ॥३॥ तामेतामाभिप्रतारिण उपासते तस्मात्त ओजिष्ठास्वानाम्॥४॥ इति नवमः खण्डः ॥२/९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष एव व्यूह उभयस्सप्तैकमध्या निर्म्मथ्या ॥१॥ आनुजावर स्तुवीता लोको वा एष यदानुजावरो यत् सप्तप्रथमास्सप्तोत्तमास्तिस्रो मध्ये त्र्यक्षरःपुरुषो लोकमेवास्मै तन्मध्यतः करोति तस्मिँल्लोके प्रतितिष्ठति ॥२॥ एतामेव प्रजाकामाय कुर्य्यान्मध्यतो वा एष सँरूढो यः प्रजान्न विन्दते लोकमेवास्मै तं मध्यतः करोति तँल्लोकं प्रजया च पशुभिश्चानु प्रजायते ॥३॥ एतामेवापरुद्धराजन्याय कुर्य्याद्विड्वै सप्तदशस्तस्या राजा गर्भो विश एव तद्राजानन्निर्हन्त्यपावगतो रुध्यतेव गच्छत्यपरुद्धः ॥४॥ एतामेवाभिचर्य्यमाणाय कुर्य्या त्प्रजापतिर्व्वै सप्तदशः प्रजापतिमेव मध्यतः प्रविशत्यस्तृप्त्यै ॥५॥ इति दशमः खण्डः॥२/१०॥

पञ्चभ्यो हिङ्करोति स तिसृभिस्स एकया स एकया तिसृभ्यो हिङ्करोति स पराचीभिर्न्नवभ्यो हिङ्करोति स तिसृभि-स्स तिसृभिस्स तिसृभिः ॥१॥ चतुरस्तोमान् प्रतिविहिता ब्रह्मवर्च्चसकामः स्तुवीत पञ्चभिः पञ्चदशं तिसृभिस्त्रिवृत-न्नवभिस्त्रिणवँ स्वयँ सप्तदशः सम्पन्नो वीर्य्यँ वै स्तोमा वीर्य्यमेव तदेकधा समूहते ब्रह्मवर्च्चस्यावरुध्यै तेजस्वी ब्रह्मवर्च्चसी भवति य एतया स्तुते ॥२॥ इत्येकादशःखण्डः॥२/११॥

तिसृभ्यो हिङ्करोति स पराचीभिः पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिरुद्यती सप्तदशस्य विष्टुतिः॥१॥ एतया वै देवाः स्वर्ग्गँल्लोकमायन् स्वर्ग्गकामः स्तुवीत स्वर्ग्गस्य लोकस्य समष्ट्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानोऽभिक्रामन्ती

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥२॥ इति द्वादशः खण्डः॥२/१२॥

सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिर्भस्त्रावाचीनबिला ॥१॥ यं द्विष्यात्तस्य कुर्य्याद्यथावाचीनबिलया भस्त्रया प्रधूनुयादेवँ यजमानस्य पशून् प्रधूनोत्यपक्रामन्ती विष्टुतिस्तया यजमानस्य पशवोऽपक्रामन्ति पापीयान् भवति य एतया स्तुते ॥२॥ इति त्रयोदशः खण्डः॥२/१३॥

सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृभिस्सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिस्सप्त-सप्तिन्येकविँशस्य विष्टुतिः॥१॥ सप्तग्राम्याः पशवस्तानेतया स्पृणोति सप्त शिरसि प्राणाः प्राणा इन्द्रियाणी न्द्रियाण्ये-वैतयाप्नोति॥२॥ एषा वै प्रतिष्ठितैकविँशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥३॥ इति चतुर्दशः खण्डः॥२/१४॥

पञ्चभ्यो हिङ्करोति स तिसृभिस्स एकया स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिस्स तिसृभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिरुद्यत्येकविँशस्य विष्टुतिः ॥१॥ एतया वै देवाः सर्ग्गँल्लोकमायन् स्वर्ग्गकामः स्तुवीत स्वर्ग्गस्य लोकस्य समष्ट्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानोऽभिक्रामन्ती विष्टुतिरभिक्रामन्त्या एवाभिक्रान्तेनहि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥२॥ सैषा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिवृत्प्रायणा त्रिवृदुदयना यत्त्रिवृद्बहिष्पवमानं भवति नवैता एकविँशस्योत्तमा भवन्ति प्राणा वै त्रिवृत्प्राणानेव तदुभयतो दधाति तस्मादयमर्ध भागवाक्प्राण उत्तरेषां प्राणानाँ सर्व्वमायु-रेति न पुरायुषः प्रमीयते य एतया स्तुते ॥३॥ तामेताङ्करद्विष उपासते तस्मात्ते सर्व्वमायुर्य्यन्ति ॥४॥ इतिपञ्चदशःखण्डः॥२/१५॥

नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिः पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिः प्रतिष्टुतिः॥१॥ नवभिस्त्रिवृतं प्रतिष्ठौति पञ्चभिः पञ्चदशँ सप्तभिस्सप्तदशँ स्वयमेकविँशस्सम्पन्नः॥२॥ य एव स्तोमा यज्ञँ वहन्ति तानुत्तमे स्तोत्रे सन्तर्प्पयति यथाऽनडुहो वाश्वान्वाश्वतरान्वोहुषः सन्तर्प्पयेदेवमेतदुत्तमे स्तोत्रे स्तोमान् सन्तर्प्पयति तृप्यति प्रजया पशुभिर्य्य एतया स्तुते ॥३॥ एतामेव पुरोऽधाकामाय कुर्य्याद्ब्रह्म वै त्रिवृत्क्षत्रमेकविँशो यत्त्रिवृतैकविँशं प्रतिपद्यते ब्रह्म तत्क्षत्रस्य पुरस्तान्निदधाति गच्छति पुरोधान्न पुरोधाया-श्च्यवते य एतया स्तुते ॥४॥ तामेतां प्रावाहण्य उपासते तस्मात्ते पुरोधाया न च्यवन्ते ॥५॥ इति षोडशः खण्डः ॥२/१६॥

नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभि-स्तिसृभ्यो हिङ्करोति स पराचीभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिस्सूर्म्युभयत आदीप्ता ॥१॥ ब्रह्मवर्च्चसकामः स्तुवीत तेजो वै त्रिवृत्त्यक्षरः पुरुषो यत्त्रिवृतावभितो भवतस्तिस्रो मध्ये यथा हि हिरण्यं निष्टपेदेवमेनं त्रिवृतौ निष्टपतस्तेजसे बह्मवर्च्चसाय ॥२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपशव्येव तु वा ईश्वरा पशून्निर्दहः किलासत्त्वान्नूभयमति हि निष्टपतः॥३॥ एतामेवाभिशस्यमानाय कुर्य्याच्छमलँ वा एतमृच्छति यमश्लीला वागृच्छति यै वैनमसावश्लीलँ वाग्वदति तामस्य त्रिवृतौ निष्टपतस्तेजस्वी भवति य एतया स्तुते ॥४॥ इति सप्तदशः खण्डः ॥२/१७॥

इति द्वितीयोऽध्यायः

अथ तृतीयोऽध्यायः

नवभ्यो हिङ्करोति स तिसृभिस्स पञ्चभिस्स एकया नवभ्यो हिङ्करोति स एकया स तिसृभिस्स पञ्चभिर्न्नवभ्यो हिङ्करोति स पञ्चभिस्स एकया स तिसृभिः ॥१॥ वज्जो वै त्रिणवो वज्जमेव तद्व्यूहति शान्त्यै ॥२॥ पञ्चभिर्व्विहितैका परिचरा पाङ्क्ताः पशवो यजमानः परिचरा यत्पञ्चभि-र्व्विदधात्येका परिचरा भवति यजमानमेव तत्पशुषु प्रतिष्ठापय-त्येषा वै प्रतिष्ठिता त्रिणवस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥३॥ इति प्रथमः खण्डः ॥३/१॥

सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया नवभ्यो हिङ्करोति स एकया स तिसृभिस्स पञ्चभिरेका-दशभ्यो हिङ्करोति स पञ्चभिस्स तिसृभिस्स तिसृभिरुद्यती त्रिणवस्य विष्टुतिः॥१॥ एतया वै देवाः स्वर्गँ ल्लोकमायन् स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वर्गा-ल्लोकान्न च्यवते तुष्टुवानोऽभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृद्ध्या

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एव ॥२॥ इति द्वितीयः खण्डः॥३/२॥

एकादशभ्यो हिङ्करोति स तिसृभिस्स सप्तभिस्स एकयैकादशभ्यो हिङ्करोति स एकया स तिसृभिस्स सप्तभिरेकादशभ्यो हिङ्करोति स सप्तभिस्स एकया स तिसृभिः ॥१॥ अन्तो वै त्रयस्त्रिँशः परमो वै त्रयस्त्रिँश-स्तोमानाँ सप्तभिर्व्विहितैका परिचरा सप्त ग्राम्याः पशवो यजमानः परिचरा यत्सप्तभिर्व्विदधात्येका परिचरा भवति यजमानमेव तदन्ततः पशुषु प्रतिष्ठापयत्येषा वै प्रतिष्ठिता त्रयस्त्रिँशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥२॥ इति तृतीयः खण्डः ॥३/३॥

एकादशभ्यो हिङ्करोति स तिसृभिस्स पञ्चभिस्स तिसृभिरेकादशभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिस्स तिसृभिस्स तिसृभिर्न्नेदीयस्सङ्क्रमा ॥१॥ अन्तो वै त्रयस्त्रिँशो यथा महावृक्षस्याग्रँ सृप्त्वा नेदीयः सङ्क्रमात् सङ्क्रामत्येवमेत-न्नेदीयः सङ्क्रमया नेदीयः सङ्क्रमात् सङ्क्रामति ॥२॥ पञ्चभिर्व्विहितास्तिस्रः परिचराः पाङ्क्ताः पशव एतावान् पुरुषो यदात्मा प्रजा जाया यत्पञ्चभिर्व्विदधाति तिस्रः परिचरा भवन्ति यजमानमेव तत्पशुषु प्रतिष्ठापयति पशुमान् भवति य एतया स्तुते ॥३॥ इति चतुर्थः खण्डः ॥३/४॥

नवभ्यो हिङ्करोति स तिसृभिस्स पञ्चभिस्स एकयैका-दशभ्यो हिङ्करोति स एकया स तिसृभिस्स सप्तभिस्त्रयो-दशभ्यो हिङ्करोति स सप्तभिस्स तिसृभिस्स तिसृभिरुद्यती

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रयस्त्रिँशस्य विष्टुतिः ॥१॥ एतया वै देवाः स्वर्गँल्लोकमायन् स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानोऽग्रादग्रँ रोहत्यभिक्रामन्ती विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृद्ध्या एव ॥२॥ इति पञ्चमः खण्डः ॥३/५॥

त्रयोदशभ्यो हिङ्करोति स तिसृभिस्स पञ्चभिस्स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिस्स तिसृभिस्स तिसृभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिः प्रत्यवरोहिणी त्रयस्त्रिँशस्य विष्टुतिः ॥१॥ यथा महावृक्षस्याग्रँ सृप्त्वा शाखायाः शाखामालम्भमुपावरोहेदेवमेतयेमँ लोकमुपावरोहति प्रतिष्ठायै ॥२॥ त्रिवृता प्रैति त्रिवृतोदेति प्राणा वै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति सर्व्व मायुरेति न पुरायुषः प्रमीयते य एतया स्तुते ॥३॥ तामेताङ्कर द्विष उपासते तस्मात्ते सर्व्वमायुर्य्यन्ति ॥४॥ इति षष्ठः खण्डः ॥३/६॥

पञ्चदशभ्यो हिङ्करोति स तिसृभिः स सप्तभिस्स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिस्स तिसृभिस्स तिसृभिस्सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिः ॥१॥ यो वै त्रयस्त्रिँशमेकविँशे प्रतिष्ठितँ वेद प्रतितिष्ठति प्रतिष्ठा वा एकविँशः स्तोमानाँ यदेताः सप्तत्रयस्त्रिँशस्योत्तमा भवन्ति सप्तविधैकविँशस्य विष्टुतिरेकविँश एव तत्त्रयस्त्रिँशं प्रतिष्ठापयति प्रतितिष्ठति य एतया स्तुते॥२॥ इति सप्तमःखण्डः॥३/७॥

अष्टाभ्यो हिङ्करोति स तिसृभिस्स चतसृभिस्स एकया-ऽष्टाभ्यो हिङ्करोति स एकया स तिसृभिस्स चतसृभिरष्टाभ्यो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हिङ्करोति स चतसृभिस्स एकया स तिसृभिः ॥१॥ पशवो वै छन्दोमा यदष्टाभ्योऽष्टाभ्यो हिङ्करोति अष्टाशफाः पशवः शफशस्तत्पशूनाप्नोति ॥२॥ चतसृभिर्व्विहितैका परिचरा चतुष्पादाः पशवो यजमानः परिचरा यच्चतसृभिर्व्विदधात्येका परिचरा भवति यजमानमेव तत्पशुषु प्रतिष्ठापयत्येषा वै प्रतिष्ठिता चतुर्व्विँशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥३॥ इत्यष्टमः खण्डः ॥३/८॥

पञ्चदशभ्यो हिङ्करोति स तिसृभिस्स एकादशभिस्स एकया चतुर्द्दशभ्यो हिङ्करोति स एकया स तिसृभिस्स दशभिः पञ्चदशभ्यो हिङ्करोति स एकादशभिस्स एकया स तिसृभिः ॥१॥ ब्रह्मणो वा आयतनं प्रथमा क्षत्रस्य मध्यमा विश उत्तमा यत्पञ्चदशिन्यौ पूर्व्वे भवतश्चतुर्द्दशोत्तमा ब्रह्मणि चैव तत्क्षत्रे चौजो वीर्य्यं दधाति ब्रह्मणे चैव तत्क्षत्राय च विशमनुगां करोति क्षत्रस्येवास्य प्रकाशो भवति य एतया स्तुते ॥२॥ अस्तोमा वा एते यच्छन्दोमा अयुजो हि स्तोमा युग्मन्ति छन्दाँसि यदेषा युजिनी चतुश्चत्वारिँशस्य विष्टुतिस्तेना-स्तोमाः॥३॥ एषा वै प्रतिष्ठिता चतुश्चत्वारिँशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥ इति नवमः खण्डः ॥३/९॥

चतुर्द्दशभ्यो हिङ्करोति स तिसृभिस्स दशभिस्स एकया पञ्चदशभ्यो हिङ्करोति स एकया स तिसृभिस्स एकादशभिः पञ्चदशभ्यो हिङ्करोति स एकादशभिस्स एकया स तिसृभि-र्न्निर्म्मध्या॥१॥ अस्तवि वा अयँल्लोकोऽस्तीवासौ छिद्रमिवेद-मन्तरिक्षँ यदेषा निर्म्मध्या भवतीमानेव लोकाननु प्रजायते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रप्रजया प्रपशुभिर्ज्जायते य एतया स्तुते ॥२॥ इति दशमः खण्डः॥३/१०॥

पञ्चदशभ्यो हिङ्करोति स तिसृभिस्स एकादशभिस्स एकया पञ्चदशभ्यो हिङ्करोति स एकया स तिसृभिस्स एकादशभिश्चतुर्द्दशभ्यो हिङ्करोति स दशभिस्स एकया स तिसृभिः ॥१॥ आज्यानां प्रथमा पृष्ठानां द्वितीयोक्थ्यानां तृतीया ॥२॥ याज्यानाँ सा होतुर्य्या पृष्ठानाँ सा मैत्रावरुणस्य योक्थ्यानाँ सा ब्राह्मणाच्छाँसिनो यैव होतुस्साच्छावाकस्य या पृष्ठानाँ सा होतुर्य्योक्थ्यानाँ सा मैत्रावरुणस्य याज्यानाँ सा ब्राह्मणाच्छँसिनो यैव होतुः साच्छावाकस्य योक्थ्यानाँ सा होतुर्य्याज्यानाँ सा मैत्रावरुणस्य या पृष्ठानाँ सा ब्राह्मणा-च्छँसिनो यैव होतुः साच्छावाकस्य सर्व्वा आज्येषु सर्व्वाः पृष्ठेषु सर्व्वा उक्थ्येषु ॥३॥ पशवो वै समीषन्तो यदेषा सर्व्वाणि सवनान्यनुसञ्चरत्यनुसवनमेवैनं पशुभिः समर्द्धयति पशुमान् भवति य एतया स्तुते ॥४॥ इत्येकादशःखण्डः ॥३/११॥

षोडशभ्यो हिङ्करोति स तिसृभिस्स द्वादशभिस्स एकया षोडशभ्यो हिङ्करोति स एकया स तिसृभिस्स द्वादशभिः षोडशभ्यो हिङ्करोति स द्वादशभिस्स एकया स तिसृभिः॥१॥ अन्तो वा अष्टाचत्वारिँशः पशवश्छन्दोमा यत् षोडशभ्यः षोडशभ्यो हिङ्करोति षोडशकलाः पशवः कलाशस्तत् पशूनाप्नोति ॥२॥ द्वादशभिर्व्विहितैका परिचरा द्वादशमासा-स्संवत्सरो यजमानःपरिचरा यद्द्वादशभिर्व्विदधात्येका परिचरा भवति यजमानमेव तदन्ततस्सँवत्सरे पशुषु प्रतिष्ठापयत्येषा वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतिष्ठिताऽष्टाचत्वारिँशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुते ॥३॥ इति द्वादशः खण्डः ॥३/१२॥

षोडशभ्यो हिङ्करोति स तिसृभिस्स दशभिस्स तिसृभिः षोडशभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स दशभिः षोडशभ्यो हिङ्करोति स दशभिस्स तिसृभिस्स तिसृभिर्न्नेदीयः सङ्क्रमा ॥१॥ अन्तो वा अष्टाचत्वारिँशो यथा महावृक्षस्याग्रँ सृप्त्वा नेदीयः सङ्क्रमात् सङ्क्रामत्येवमेतन्नेदीयः सङ्क्रमया नेदीयः सङ्क्रमात् सङ्क्रामति ॥२॥ दशभिर्व्विहिता तिस्रः परिचरा दशाक्षरा विराडेतावान् पुरुषो यदात्मा प्रजा जाया यद्दशभिर्व्विदधाति तिस्रः परिचरा भवन्ति यजमानमेव तत् विराज्यन्नाद्येऽन्ततः प्रतिष्ठापयत्यन्नादो भवति य एतया स्तुते ॥३॥ इति त्रयोदशः खण्डः॥३/१३॥ **इति तृतीयोऽध्यायः**

अथ चतुर्थोऽध्यायः

गावो वा एतत्सत्रमासत तासां दशसु मासेसु शृङ्गाण्यजायन्त ता अब्रुवन्नराः स्मोत्तिष्ठामोपशा नोऽज्ञतेति ता उदतिष्ठन् ॥१॥ तासान्त्वेवाब्रुवन्नासामहा अवेमौ द्वादशौ मासौ सँसँवत्सरमापयामेति तासां द्वादशसु माःसु शृङ्गाणि प्रावर्त्तन्त ताः सर्व्वमन्नाद्यमाप्नुवँस्ता एनास्तूपरास्तस्मात्ताः सर्व्वा-न्द्वादशमासः प्रेरते सर्व्वँ हि ता अन्नाद्यमाप्नुवन् ॥२॥ सर्व्वमन्नाद्यमाप्नोति य एवँ वेद ॥३॥ प्रजापतिर्व्वा इदमेक आसीत् सोऽकामयत बहु स्यां प्रजायेयेति स एतमतिरात्र-मपश्यत्तमाहरत्तेनाहोरात्रे प्राजनयत्॥४॥ यदेषोऽतिरात्रो भवत्य-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

होरात्रे एव प्रजनयन्त्यहोरात्रयोः प्रतितिष्ठन्त्येतावान्वाव सँवत्सरो यदहश्च रात्रिश्चाहोरात्राभ्यामेव तत्सँवत्सरमाप्नुवन्ति ॥५॥ यज्ज्योतिष्टोमो भवति यज्ञमुखन्तदृध्नुवन्ति यदुक्थ्यो यज्ञक्रतोरन्तरयाय यद्रात्रिः सर्व्वस्याप्त्यै ॥६॥ स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरितीमे वै लोका एते स्तोमा अयमेव ज्योतिरयं मध्यमो गौरसावुत्तम आयुः॥७॥ यदेते स्तोमा भवन्तीमानेव लोकान् प्रजनयन्त्येषु लोकेषु प्रतितिष्ठन्ति ॥८॥ स एतन्त्र्यहं पुनः प्रायुङ्क्त तेन षडहेन षट्क्रतून् प्राजनयत्॥९॥ यदेष षडहो भवति ऋतूनेव प्रजनयन्ति ऋतुषु प्रतितिष्ठन्ति ॥१०॥ स एतँ षडहं पुनः प्रायुङ्क्त ताभ्यां द्वाभ्याँ षडहाभ्यां द्वादशमासः प्राजनयत् ॥११॥ यदेतौ द्वौ षडहौ भवतो मासानेव प्रजनयन्ति मासेषु प्रतितिष्ठन्ति ॥१२॥ स एतौ द्वौ षडहौ पुनः प्रायुङ्क्त तैश्चतुर्भिः षडहैश्चतुर्व्विँशति-मर्द्धमासान् प्राजनयत् ॥१३॥ यदेते चत्वारः षडहा भवन्त्यर्द्ध-मासानेव प्राजनयन्त्यर्द्धमासेषु प्रतितिष्ठन्ति ॥१४॥ स इदं भुवनं प्रजनयित्वा पृष्ठ्येन षडहेन वीर्य्यमात्मन्यधत्त ॥१५॥ यदेष पृष्ठ्यः षडहो भवति वीर्य्य एवान्ततः प्रतितिष्ठन्ति ॥१६॥ तेन मासान् सँवत्सरं प्राजनयद्यदेष मासो भवति सँवत्सरमेव प्रजनयन्ति सँवत्सरे प्रतितिष्ठन्ति ॥१७॥ इति प्रथमःखण्डः॥४/१॥

प्रायणीयमेतदहर्भवति ॥१॥ प्रायणीयेन वा अह्ना देवा स्वर्गँल्लोकं प्रायन् यत् प्रायँ स्तत्प्रायणीयस्य प्रायणीयत्वम् ॥२॥ तस्मात्प्रायणीयस्याह्न ऋत्विजा भवितव्यमेतद्धि स्वर्गस्य लोकस्य नेदिष्ठँ य एतस्यर्त्विङ् न भवति हीयते स्वर्गा-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ल्लोकात् ॥३॥ चतुर्विँशं भवति ॥४॥ चतुर्विँशत्यक्षरा गायत्री तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमारभ्य प्रयन्ति ॥५॥ चतुर्व्विँशं भवति चतुर्व्विँशो वै सँवत्सरः साक्षादेव सँवत्सरमारभन्ते ॥६॥ यावत्यश्चतुर्व्विँशस्योक्थस्य स्तोत्रीयास्तावत्यः सँवत्सरस्य रात्रयः स्तोत्रीयाभिरेव तत्सँवत्सरमाप्नुवन्ति ॥७॥ पञ्चदशस्तोत्राणि भवन्ति पञ्चदशार्द्धमासस्य रात्रयोऽर्द्धमासश एव तत्सँवत्सरमाप्नुवन्ति ॥८॥ पञ्चदशस्तोत्राणि पञ्चदशशस्त्राणि स मासो मासश एव तत्सँवत्सरमाप्नुवन्ति ॥९॥ तदाहुरीर्म्म इव वा एषा होत्रा यदच्छावाक्या यदच्छावाकमनुसन्तिष्ठत ईश्वरेर्म्मा भवितोरिति यद्युक्थँ स्मा त्रैककुभञ्चोद्वँशीयञ्चान्ततः प्रतिष्ठाप्ये वीर्य्यँ वा एते सामनी वीर्य्य एवान्ततः प्रतितिष्ठन्ति ॥१०॥ अथो खल्वाहुरग्निष्टोममेव कार्य्यमेष वै यज्ञः स्वर्ग्यो यदग्निष्टोम ऊर्ध्वो हि होतारमनु सन्तिष्ठते ॥११॥ द्वादशस्तोत्राण्यग्निष्टोमो द्वादशमासः सँवत्सरस्तेन सँवत्सरसम्मितो द्वादशस्तोत्राणि द्वादशशस्त्राणि तच्चतुर्व्विँशतिश्चतुर्व्विँशतिरर्द्धमासाः सँवत्सरस्तेन सँवत्सरसम्मितः ॥१२॥ अथो खल्वाहुरुक्थमेव कार्य्यमह्नः समृध्यै ॥१३॥ सर्व्वाणि रूपाणि क्रियन्ते सर्व्वँ ह्येतेनाह्नाप्यते ॥१४॥ पवन्ते वाजसातये सोमाः सहस्रपाजस इति सहस्रवती प्रतिपत्कार्य्या ॥१५॥ सँवत्सरस्य रूपँ सर्व्वानेवैनानेतया पुनाति सर्व्वानभि वदति ॥१६॥ अथो खल्वाहुः पवस्व वाचो अग्रिय इत्येव कार्य्या मुखँ वा एतत् सँवत्सरस्य यद्वाचोऽग्रम्मुखत एव तत्सँवत्सरमारभन्ते ॥१७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मिथुनमिव वा एषा व्याहृतिः पवस्वेति पुँसो रूपँ वाच इति स्त्रियाः सोमेति पुँसो रूपञ्चित्राभिरिति स्त्रिया मिथुनमेवैभ्यो यज्ञमुखे दधाति प्रजननाय ॥१८॥ अग्ग्ने युङ्क्ष्वा हि ये तवेति जराबोधीयमग्निष्टोमसाम कार्य्यँ युक्तेनैव सँवत्सरेण प्रयन्ति चतुर्व्विँशत्यक्षरासु भवति चतुर्व्विँशस्य रूपम् ॥१९॥ अथो खल्वाहुर्य्यज्ञायज्ञीयमेव कार्य्यम् ॥२०॥ पन्था वै यज्ञायज्ञीयं पथ एव तन्नयन्ति ॥२१॥ इति द्वितीयः खण्डः॥४/२॥

अभीवर्त्तो ब्रह्मसाम भवति ॥१॥ अभीवर्त्तेन वै देवाः स्वर्ग्गँल्लोकमभ्यवर्त्तन्त यदभीवर्त्तो ब्रह्मसाम भवति स्वर्ग्गस्य लोकस्याभिवृत्त्यै ॥२॥ एकाक्षरणिधनो भवत्येकाक्षरा वै वाग्वाचैव तदारभ्य स्वर्ग्गँल्लोकँ यन्ति ॥३॥ साम्नेतो यन्त्यृचा पुनरायन्ति ॥४॥ साम वा असौ लोको ऋगयँ यदितः साम्ना यन्ति स्वर्ग्गँल्लोकमारभ्य यन्ति यदृचा पुनरायन्त्यस्मिँल्लोके प्रतितिष्ठन्ति ॥५॥ यत्सामावसृजेयुरवस्वर्ग्गाल्लोकात्पद्येरन् यदृचमनुसृजेयुर्न्नश्येयुरस्माल्लोकात् ॥६॥ समानँ साम भवत्यन्योऽन्यः प्रगाथोऽन्यदन्यद्धि चित्रमध्वानमवगच्छन्नेति ॥७॥ वृषा वा एष रेतोधा यदभीवर्त्तः प्रगाथेषु रेतो दधदेति यदितस्समानँ साम भवत्यन्योऽन्यः प्रगाथो रेत एव तद्दधति यत्परस्तात्समानः प्रगाथो भवत्यन्यदन्यत्साम रेत एव तद्धितं प्रजनयन्ति॥८॥ साम्नेतः प्रगाथां दुग्धे प्रगाथेन परस्तात्सामानि दुग्धे सलोमत्वाय॥९॥ये वा अध्वानं पुनर्न्निवर्त्तयन्ति नैनं ते गच्छन्ति येऽपुनर्न्निवर्त्तयन्ति ते गच्छन्ति ॥१०॥ य आस्तुतं कुर्व्वते यथा दुग्धामुपसीदेदेवन्तत् ॥११॥ ये नास्तुतँ यं कामं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कामयन्ते तमभ्यश्नुवते ॥१२॥ ब्रह्मवादिनो वदन्ति यातयामाः सँवत्सरा ३ अयातयामा ३ इति ते नायातयामेति वक्तव्यं पुनरन्यानि स्तोत्राणि निवर्त्तन्त ऊद्ध्र्वोमेव ब्रह्मसामैति ॥१३॥ इति तृतीयः खण्डः ॥४/३॥

पञ्चसु मास्सु बार्हता प्रगाथा आप्यन्ते ॥१॥ तेष्वाप्तेषु छन्दसी सँयुज्यैतव्यम् ॥२॥ तिस्र उष्णिहः स्युरेका गायत्री तास्तिस्रो बृहत्यो भवन्ति ॥३॥ तदाहुः सँशर इव वा एष च्छन्दसाँ यद्द्वे छन्दसी सँयुञ्जन्तीति ॥४॥ चतुरुत्तरैरेव छन्दोभिरेतव्यम्॥५॥ पशवो वै चतुरुत्तराणि छन्दाँसि पशुभिरेव तत्स्वर्गँल्लोकमाक्रममानयन्ति ॥६॥ एकाङ्गायत्रीमेकाहमुपेयुरेकामुष्णिहमेकाहमेकामनुष्टुभमेकाहं बृहत्या पञ्चमास इयुः पङ्क्तिमेकाहमुपेयुस्त्रिष्टुभा षष्ठं मासमीयुः श्वो विषुवान् भवितेति जगतीमुपेयुः ॥७॥ तदाहुरनवक्लृप्तानि वा एतानि छन्दाँसि मध्यन्दिने बृहत्या चैव त्रिष्टुभा चैतव्यम् ॥८॥ एते वै च्छन्दसी वीर्य्यवतो एते प्रत्यक्षं मध्यन्दिनस्य रूपम् ॥९॥ राथन्तरेऽहनि बृहती कार्य्यैतद्वै रथन्तरस्य स्वमायतनँ यद्बृहती स्व एव तदायतने रथन्तरं प्रतितिष्ठति बार्हतेऽहनि त्रिष्टुप्कार्य्यैतद्वै बृहतः स्वमायतनँ यत्त्रिष्टुप्स्व एव तदायतने बृहद्रथन्तरे प्रतितिष्ठन्ती इतः ॥१०॥त्रयस्त्रिँशता प्रगाथैरेतव्यं त्रयस्त्रिँशद्देवता देवतास्वेव प्रतितिष्ठन्तो यन्ति चतुर्विँशत्यैतव्यं चतुर्व्विँशतिरर्द्धमासाः सँवत्सरः सँवत्सर एव प्रतितिष्ठन्तो यन्ति द्वादशभिरेतव्यं द्वादशमासाः सँवत्सरः सँवत्सर एव प्रतितिष्ठन्तो यन्ति षड्भिरेतव्यँ षड्ऋतव ऋतुष्वेव प्रतितिष्ठन्तो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यन्ति चतुर्भिरेतव्यञ्चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठन्तो यन्ति त्रिभिरेतव्यन्त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठन्तो यन्ति द्वाभ्यामेतव्यन्द्विपाद्यजमानः स्वर्गस्य लोकस्याक्रान्त्या अन्येनान्येन हि पदा पुरुषःप्रतितिष्ठन्नेति॥११॥इतिचतुर्थःखण्डः॥४/४॥

स्वरसामान एते भवन्ति ॥१॥ स्वर्भानुर्व्वा आसुर आदित्यन्तमसाऽविध्यत्तं देवाः स्वरैरस्पृण्वन्यत् स्वरसामानो भवन्त्यादित्यस्य स्पृत्यै ॥२॥ परैर्व्वै देवा आदित्यँ स्वर्गँ ल्लोकमपारयन्यदपारयँस्तत्पराणां परत्वम् ॥३॥ पारयन्त्येनं पराणि य एवँ वेद ॥४॥ सप्तदशा भवन्ति ॥५॥ प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवोपयन्ति ॥६॥ अनुष्टुप् छन्दसो भवन्त्यानुष्टुभो वै प्रजापतिस्साक्षादेव प्रजापतिमारभन्ते ॥७॥ त्रयः पुरस्तात्त्रयः परस्ताद्भवन्ति ॥८॥ देवा वा आदित्यस्य स्वर्गाल्लोकादवपादादबिभयुस्तमेतैः स्तोमैः सप्तदशैरदृँह-न्यदेते स्तोमा भवन्त्यादित्यस्य धृत्यै ॥९॥ चतुस्त्रिँशा भवन्ति वर्ष्म वै चतुस्त्रिँशो वर्ष्मणैवैनँ सम्मिमते ॥१०॥ तस्य पराचीनातिपादादबिभयुस्तँ सर्व्वैः स्तोमैः पर्य्यारिषन्विश्वजि-दभिजिद्भ्याँ वीर्य्यँ वा एतौ स्तोमौ वीर्य्येणैव तदादित्यं पर्य्युषन्ति धृत्यै ॥११॥ अनवपादायानतिपादाय ॥१२॥ तदाहुः कर्त्तप्रस्कन्द इव वा एष यत् त्रयस्त्रिँशत सप्तदश-मुपयन्तीति पृष्ट्योन्तरः कार्य्यः ॥१३॥ तस्य यत्सप्तदश-महस्तदुत्तमं कार्य्यँ सलोमत्वाय ॥१४॥ तदाहुरुदरँ वा एष स्तोमानाँ यत् सप्तदशो यत्सप्तदशम्मध्यतो निर्हरेयुरशनायवः प्रजाः स्युरशनायवः सत्रिणः ॥१५॥ त्रयस्त्रिँशादेव सप्तदश

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उपेत्यो वर्ष्म वै त्रयस्त्रिँशो वर्ष्म सप्तदशो वर्ष्मण एव तद्वर्ष्माभिसङ्क्रामन्ति॥१६॥तानाहुरुक्थाः कार्य्या३ अग्निष्टोमा ३ इति यद्युक्थाः स्युः ॥१७॥ पशवो वा उक्थानि शान्तिः पशवः शान्तेनैव तद्विषुवन्तमुपयन्ति ॥१८॥ तदाहुर्व्विवीवधमिव वा एतद्यदग्निष्टोमो विषुवानग्निष्टोमौ विश्वजिदभिजितावथेतर उक्थाः स्युरिति ॥१९॥ अग्निष्टोमा एव सर्व्वे कार्य्याः ॥२०॥ वीर्य्यँ वा अग्निष्टोमो वीर्य्य एव मध्यतः प्रतितिष्ठन्ति नवसँस्तुता भवन्ति नवप्राणाः प्राणेष्वेव प्रतितिष्ठन्ति ॥२१॥ इति पञ्चमः खण्डः॥४/५॥

विषुवानेव भवति ॥१॥ देवलोको वा एष यद्विषुवान्देव-लोकमेव तदभ्यारोहन्ति ॥२॥ एकविँशो भवत्येकविँशो वा अस्य भुवनस्यादित्य आदित्यलोकमेव तदभ्यारोहन्ति ॥३॥ द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविँशः ॥४॥ मध्यत एव यज्ञस्य प्रतितिष्ठन्ति ॥५॥ वायो शुक्र अयामित इति शुक्रवती प्रतिपद्भवत्यादित्यस्य रूपम् ॥६॥ वायुर्व्वा एतन्देवतानामानशोऽनुष्टुप् छन्दसाँ यदतोन्या प्रतिपत् स्यात्प्रदहेत ॥७॥ यन्ति वा एते प्राणादित्याहुर्य्ये गायत्र्याः प्रतिपदो यन्तीति यद्वायव्या भवन्ति तेन प्राणान्नयन्ति प्राणो हि वायुः॥८॥ अथो शमयन्त्येवैनमेतया शान्तिर्हि वायुः॥९॥ आयाहि सोमपीतय इति सौमी पावमानी ॥१०॥ नियुत्वती भवति पशवो वै नियुतः शान्तिः पशवः शान्तेनैव तदादित्य-मुपयन्ति ॥११॥ दिवाकीर्त्त्यं सामा भवति ॥१२॥ स्वर्भानुर्व्वा आसुर आदित्यन्तमसा विध्यत्तस्य देवा दिवाकीर्त्त्यैस्तमो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऽपाघ्नन्यद्दिवाकीर्त्त्यानि भवन्ति ॥१३॥ तम एवास्मादपघ्नन्ति रश्मयो वा एत आदित्यस्य यद्दिवाकीर्त्त्यानि रश्मिभिरेव तदादित्यँ साक्षादारभन्ते ॥१४॥ भ्राजाभ्राजे पवमानमुखे भवतो मुखत एवास्य ताभ्यां तमोऽपघ्नन्ति ॥१५॥ महादिवाकीर्त्त्यञ्च विकर्णञ्च मध्यतो भवतो मध्यत एवास्य ताभ्यां तमोऽपघ्नन्ति भासमन्ततो भवति पत्त एवास्य तेन तमोऽपघ्नन्ति॥१६॥ दशस्तोभं भवति दशाक्षरा विराड्विराज्येव प्रतितिष्ठन्ति ॥१७॥ यत्त्वित्याहुः षड्भिरितो मासैरध्वानँ यन्ति षड्भिः पुनरायान्ति क्व तर्हि स्वर्ग्गो लोको यस्य कामाय सत्रमासत इति ॥१८॥ मूर्द्धानन्दिव इति स्वर्ग्गँ लोकमारभन्ते ॥१९॥ अरतिं पृथिव्या इत्यस्मिँल्लोके प्रतितिष्ठन्ति॥२०॥ वैश्वानरमृत आजातमग्निमिति विषुवत एव तद्रूपं क्रियते ॥२१॥ कविँ सम्राजमतिथिञ्जनानामित्यन्नाद्यमेवोपयन्ति ॥२२॥ आसन्ना पात्रञ्जनयन्त देवा इति जायन्त एव॥२३॥तत्त्रिष्टुब्जगतीषु भवति त्रैष्टुब्जागतो वा आदित्यो यदतोऽन्यासु स्यादवस्वर्ग्गाल्लोकात्पद्येरन् ॥२४॥ सम्राड्वतीषु भवति साम्राज्यँ वै स्वर्ग्गो लोकः स्वर्ग्ग एव लोके प्रतितिष्ठन्ति ॥२५॥ इति षष्ठः खण्डः॥४/६॥

आत्मा वा एष सँवत्सरस्य यद्विषुवान् पक्षावेतावभितो भवतो येन चेतोऽभीवर्त्तेन यन्ति यश्च परस्तात्प्रगाथो भवति तावुभौ विषुवति कार्य्यौ पक्षावेव तद्यज्ञस्यात्मन्प्रतिदधाति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥१॥ इन्द्र क्रतुं न आभरेति प्रगाथो भवति ॥२॥ वसिष्ठो वा एतं पुत्रहतोऽपश्यत् स प्रजया पशुभिः प्राजायत यदेष प्रगाथो भवति प्रजात्यै ॥३॥ जीवा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ज्योतिरशीमहीति ये वै स्वस्ति सँवत्सरँ सन्तरन्ति ते जीवा ज्योतिरश्नुवते ॥४॥ मानो अज्ञाता वृजना दुराध्यो मा शिवासो ऽवक्रमुरिति ये वै स्तेना रिपवस्ते दुराध्यस्तानेव तदतिक्रामन्ति ॥५॥ त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसोऽतिसँवत्सरो वै प्रवतः शश्वतीरपस्तमेव तत्तरन्ति ॥६॥ अद्याद्या श्वः श्वस्त्वामिदा ह्यो नरो वयमेनमिदाह्य इति सन्तनयः प्रगाथा भवन्ति तेषामेकः कार्य्यः सलोमत्वाय श्वस्तनमेवाभि-सन्तन्वन्ति ॥७॥ अथो खल्वाहुरिन्द्र क्रतुन्न आभरेत्येव कार्य्यँ समृद्ध्यै ॥८॥ प्रत्यवरोहिणो मासा भवन्ति ॥९॥ यथा वा इतो वृक्षँ रोहन्त्येवमेनं प्रत्यवरोहन्ति स्वर्ग्गमेव तल्लोकँ रूढ्वास्मिँल्लोके प्रतितिष्ठन्ति ॥१०॥ इति सप्तमःखण्डः॥४/७॥

गौश्चायुश्च स्तोमौ भवतः॥१॥ द्विपाद्यजमानः प्रतिष्ठित्यै ॥२॥ ऊनातिरिक्तौ भवत ऊनातिरिक्तँ वा अनु प्रजाः प्रजायन्ते प्रजात्यै ॥३॥ वैराजो भवतोऽन्नँ विराडन्नाद्य एव प्रतितिष्ठन्ति ॥४॥ द्वादशाहस्य दशाहानि भवन्ति ॥५॥ विराड्वा एषा समृद्धा यद्दशाहानि विराज्येव समृद्धायां प्रतितिष्ठन्ति ॥६॥ पृष्ठानि भवन्ति वीर्य्यँ वै पृष्ठानि वीर्य्य एव प्रतितिष्ठन्ति छन्दोमा भवन्ति पशवो वै छन्दोमाः पशुष्वेव प्रतितिष्ठ-न्त्यथैतद्दशममहराप्तस्तोममाप्तच्छन्द आप्त विभक्तिकमनिरुक्तं प्राजापत्यम् ॥७॥ यदध्याहुरति तद्रेचयन्ति तस्मान्न व्युच्यम् ॥८॥ परोक्षमनुष्टुभमुपयन्ति प्रजापतिर्व्वा अनुष्टुप् यत्प्रत्यक्ष-मुपेयुः प्रजापतिमृच्छेयुः॥९॥ यो वै सत्रस्य सद्वेद सद्भवति वामदेव्यँ वै साम्नाँ सदग्निर्द्देवतानाँ विराट् छन्दसां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रयस्त्रिँशस्स्तोमानां तान्येव तदेकधा सम्भृत्योत्तिष्ठन्ति ॥१०॥ ब्रह्मवादिनो वदन्ति यतः सत्रादुदस्थाता ३ स्थिता ३ दिति ॥११॥ ये रथन्तरेण स्तुत्वोत्तिष्ठन्ति ते यत उत्तिष्ठन्ति तान् ब्रूयादप्रतिष्ठाना भविष्यन्तीति ये बृहता स्तुत्वोत्तिष्ठन्ति ते स्थितादुत्तिष्ठन्ति तान् ब्रूयात्स्थायुकैषाँ श्रीर्भविष्यति न वसीयाँसो भविष्यन्तीति ॥१२॥ ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति ते सतः सदभ्युत्तिष्ठन्ति पूर्णात्पूर्णमायतनादायतनमन्तरिक्षायतना हि प्रजा ॥१३॥ त्रयस्त्रिँशदक्षरासु भवति त्रयस्त्रिँशद्देवतास्वेव प्रतिष्ठायोत्तिष्ठन्ति ॥१४॥ प्राजापत्यँ वै वामदेव्यं प्रजापतावेव प्रतिष्ठायोत्तिष्ठन्ति पशवो वै वामदेव्यं पशुष्वेव प्रतिष्ठायोत्तिष्ठन्ति ॥१५॥ इत्यष्टमः खण्डः॥४/८॥

पत्नीः सँयाज्य प्राञ्च उदेत्यायँ सहस्रमानव इत्यतिच्छन्दसाऽऽहवनीयमुपतिष्ठन्ते ॥१॥ इमे वै लोका अतिच्छन्दा एष्वेव लोकेषु प्रतितिष्ठन्ति ॥२॥ गोरिति निधनं भवति विराजो वा एतद्रूपँ यद्गौर्व्विराज्येव प्रतितिष्ठन्ति ॥३॥ प्रत्यञ्चः प्रपद्य सार्पराज़्या ऋग्भिः स्तुवन्ति ॥४॥ अर्ब्बुदः सर्प्प एताभिर्मृतान्त्वचमपाहत मृतामेवैताभिस्त्वचमपघ्नते ॥५॥ इयँ वै सार्प्पराज़्यस्यामेव प्रतितिष्ठन्ति ॥६॥ तिसृभिः स्तुवन्ति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठन्ति ॥७॥ मनसोपावर्त्तयति ॥८॥ मनसा हिङ्करोति मनसा प्रस्तौति मनसोद्गायति मनसा प्रतिहरति मनसा निधनमुपयन्त्यसमाप्तस्य समाप्त्यै ॥९॥ यद्वै वाचा न समाप्नुवन्ति मनसा तत्समापयन्ति ॥१०॥ परिश्रिते स्तुवन्ति ब्रह्मणः परिगृहीत्यै ॥११॥ ब्रह्मोद्यँ वदन्ति ब्रह्मवर्च्चस

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एव प्रतितिष्ठन्ति ॥१२॥ चतुर्होतारँ होता व्याचष्टे स्तुतमेव तदनुशँसति नहि तत्स्तुतँ यदननुशस्तम् ॥१३॥ प्रजापतिं परिवदन्त्याप्त्वैवैनं तद्व्याचक्षते तावदापामैनमिति ॥१४॥ गृहपतिरौदुम्बरीं धारयति गृहपतिर्व्वा ऊर्ज्जो यन्तोर्ज्जमेवैभ्यो यच्छति॥१५॥ वाचँ यच्छन्ति॥१६॥ दुग्धानीव वै तर्हि छन्दाँसि यातयामान्यन्तगतानि तान्येव तद्रसेनाप्याययन्ति ॥१७॥ अथो श्वस्तनमेवाभिसन्तन्वन्ति ॥१८॥ आत्मदक्षिणँ वा एतद्यत्सत्रम् ॥१९॥ यदा वै पुरुष आत्मनोऽवद्यति यं कामं कामयते तमभ्यश्नुते ॥२०॥ द्वाभ्याँ लोमावद्यति द्वाभ्यां त्वचं द्वाभ्यां माँसं द्वाभ्यामस्थि द्वाभ्यामज्जानं द्वाभ्यां पीवश्च लोहितञ्च ॥२१॥ शिखा अनु प्रवपन्ते पाप्मानमेव तदपघ्नते लघीयाँसः स्वर्गँल्लोकमयामेति ॥२२॥ अथो गवामेवानुरूपा भवन्ति सर्व्वस्यान्नाद्यस्यावरुध्यै ॥२३॥ इति नवमः खण्डः॥४/९॥

प्रजापतिः प्रजा असृजत सोऽरिच्यत सोऽपद्यत तं देवा अभिसमगच्छन्त तेऽब्रुवन्महदस्मै व्रतँ सम्भराम यदिमन्धिन-वदिति तस्मै यत्सँवत्सरमन्नं पच्यते तत्समभरँस्तदस्मै प्रायच्छँस्तदव्रजयन्तदेनमधिनोन्महन्मर्य्या व्रतँ यदिममधिन्वी-दिति तन्महाव्रतस्य महाव्रतत्वम् ॥१॥ प्रजापतिर्व्वाव महाँ-स्तस्यैतद् व्रतमन्नमेव ॥२॥ तदाहुर्म्मध्यतः सँवत्सरस्योपेत्यं मध्यतो वा अन्नं जग्धं धिनोति ॥३॥ तदाहुर्य्यन्मध्यत उपयन्त्यर्द्धमन्नाद्यस्याप्नुवन्त्यर्द्धँ सम्बट् कुर्व्वन्तीत्युपरिष्टादेव सँवत्सरस्योपेत्यँ सँवत्सरे वा अन्नँ सर्व्वं पच्यते ॥४॥ चतुर्व्विँशं भवति चतुर्व्विँशो वै सँवत्सरोऽन्नं पञ्चविँशम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥५॥ यद्वा अदश्चतुर्व्विँशं प्रायणीयन्तदेतदुदयनीयम् ॥६॥ यत्सँवत्सरमन्नँ सम्भरन्ति सैषा पञ्चविँश्युपजायते ॥७॥ इति दशमः खण्डः॥४/१०॥ इति चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

वामदेव्यं महाव्रतं कार्य्यम् ॥१॥ त्रिवृच्छिरो भवति ॥२॥ त्रिवृद्ध्येव शिरोलोमत्वगस्थि ॥३॥ पाङ्क्त इतर लोम त्वङ्माँसमस्थिमज्जा ॥४॥ सकृद्धिङ्कृतेन शिरसा पाराचा स्तुवते ॥५॥ तस्माच्छिरोऽङ्गानि मेद्यन्ति नानुमेद्यति न कृश्यन्त्यनुकृश्यति ॥६॥ पुनरभ्यावर्त्तमितरेणात्मना स्तुवते तस्मादितर आत्मा मेद्यति च कृश्यति च ॥७॥ अर्क्कवतीषु गायत्रीषु शिरो भवति ॥८॥ अन्नँ वा अर्क्को ब्रह्मवर्च्चसं गायत्र्यन्नाद्यं चैवेभ्यो ब्रह्मवर्च्चसञ्च मुखतो दधाति ॥९॥ पञ्चदशसप्तदशौ पक्षौ भवतः पक्षाभ्याँ वै यजमानो वयो भूत्वा स्वर्गँल्लोकमेति॥१०॥ तावाहुः समौ कार्य्यौ पञ्चदशौ वा सप्तदशौ वा सवीवधत्वाय ॥११॥ तदाहुर्य्यत्समौ भवत एकवीर्य्यौ तर्हि भवत इति पञ्चदशसप्तदशावेव कार्य्यौ साचीव वै वयः पक्षौ कृत्वा पतीयः पतति ॥१२॥ दक्षिणतो बृहत्कार्य्यं दक्षिणे वा अर्द्ध आत्मनो वीर्य्यवत्तरः॥१३॥ अथो खल्वाहुरुत्तरत एव कार्य्यं ब्राह्मणाच्छँसिनोऽर्द्धात्त्रैष्टुभँ वै बृहत्त्रैष्टुभो ब्राह्मणाच्छँसी त्रैष्टुभः पञ्चदशस्तोमः ॥१४॥ दक्षिणतो रथन्तरं कार्य्यम्मैत्रावरुणस्यार्द्धाद्गायत्रँ वै रथन्तरं गायत्रो मैत्रावरुणो गायत्रः सप्तदश स्तोमः॥१५॥ एकविँशं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुच्छं भवति ॥१६॥ एकविँशो वै स्तोमानां प्रतिष्ठा तस्माद्वयः पुच्छेन प्रतिष्ठायोत्पतति पुच्छेन प्रतिष्ठाय निषीदति ॥१७॥ यज्ञायज्ञीयं पुच्छं कार्य्यँ यज्ञायज्ञीयँ ह्येव महाव्रतस्य पुच्छम् ॥१८॥ अथो खल्वाहुरतिशयँ वै द्विपदाँ यज्ञायज्ञीयं भद्रमेव कार्य्यँ समृद्ध्यै ॥१९॥ इति प्रथमः खण्डः ॥५/१॥

वामदेव्यम्महाव्रतं कार्य्यन्तस्य गायत्रँ शिरो बृहद्रथन्तरे पक्षौ यज्ञायज्ञीयं पुच्छम् ॥१॥ यो वै महाव्रते सहस्रं प्रोतँ वेद प्रसहस्रं पशूनाप्नोति ॥२॥ तस्य प्राचीदिक्शिरस्तच्छन्दोभिः सहस्रमसावन्यतरः पक्षः सनक्षत्रैः साहस्रोऽयमन्यतरः पक्षः स ओषधिभिश्च वनस्पतिभिश्च साहस्रोऽन्तरिक्षमात्मा तद्वयोभिः साहस्रं प्रतीचीदिक् पुच्छन्तदग्निभिश्च रश्मिभिश्च साहस्रं प्रसहस्रं पशूनाप्नोति य एवँ वेद॥३॥ तदाहुरपृष्ठँ वै वामदेव्य-मनिधनँ हीति ॥४॥ अनायतनँ वा एतत्साम यदनिधनम् ॥५॥ राजनम्महाव्रतं कार्य्यम्॥६॥एतद्वै साक्षादन्नं यद्राजनं पञ्चविधं भवति पाङ्क्तँ ह्यन्नम् ॥७॥ हिङ्कारवद्भवति तेन वामदेव्यस्य रूपम्॥८॥ निधनवद्भवति तेन पृष्ठस्य रूपम्॥९॥ अतिछन्दस्सु पञ्चनिधनँ वामदेव्यं ब्रह्मसाम कार्य्यम् ॥१०॥ अति वा एषाऽन्यानि छन्दाँसि यदतिछन्दा अत्येतदन्यान्यहान्यहर्य्य-न्महाव्रतम्॥११॥ ब्रह्म साम्नैव तदन्यान्यहान्यति मेदयति ॥१२॥ पञ्चनिधनं भवति पाङ्क्तँ ह्यन्नम् ॥१३॥ इति द्वितीयःखण्डः॥५/२॥

इलान्दमग्निष्टोमसाम कार्य्यम् ॥१॥ एतद्वै साक्षादन्नँ यदिलान्दमिरान्नँ वा एतदिरायामेवान्नाद्येऽन्ततः प्रतितिष्ठन्ति ॥२॥ समुद्रो वा एतछन्दः सलिलँल्लोमशँ समुद्र इव खलु वै स

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति सलिल इव लोमश इव यो भवति ॥३॥ तस्मादेतासु कार्य्यँ समृद्ध्यै ॥४॥ व्रतमिति निधनं भवति महाव्रतस्यैव तद्रूपं क्रियते स्वरिति भवति स्वर्ग्गस्य लोकस्य समष्ट्यै शकुन इति भवति शकुन इव वै यजमानो वयो भूत्वा स्वर्ग्गँल्लोकमेति ॥५॥ यज्ञायज्ञीयमग्निष्टोमसाम कार्य्यम् ॥६॥ यद्वा अन्या वाङ्नाति वदेत्तदग्निष्टोमसाम कार्य्यन्न वै वाग्वाचमतिवदति वाग्यज्ञायज्ञीयँ वाच्येवान्ततः प्रतितिष्ठन्ति ॥७॥ वारवन्तीयमग्निष्टोमसाम कार्य्यम् ॥८॥ अग्निर्व्वा इदँ वैश्वानरो दहन्नैत्तस्माद्देवा अबिभयुस्तँ वरणशाखयाऽवारयन्त यदवारयन्त तस्माद्वारवन्तीयम्॥९॥ तस्माद्वरणोभिषज्य एतेन हि देवा आत्मानमत्रायन्त ॥१०॥ तस्माद्ब्राह्मणो वारणेन न पिबे-द्वैश्वानरन्नेच्छमया इति ॥११॥ पशवो वै वारवन्तीयँ शान्तिः पशवः शान्तादेव तत्सँवत्सरादुत्तिष्ठन्ति ॥१२॥ इति तृतीयः खण्डः ॥५/३॥

प्राणेन पुरस्तादाहवनीयमुपतिष्ठन्ते प्राणमेव तज्जयन्ति ॥१॥ अपानेन पश्चात्पुच्छमुपतिष्ठन्ते अपानमेव तज्जयन्ति ॥२॥ व्रतपक्षाभ्यां पक्षावुपतिष्ठन्ते दिश एव तज्जयन्ति ॥३॥ प्रजापतेर्हृदयेनापिकक्षमुपतिष्ठन्ते ज्यैष्ठ्यमेव तज्जयन्ति ॥४॥ वसिष्ठस्य निहवेन चात्वालमुपतिष्ठन्ते स्वर्ग्गमेव तल्लोक-माप्त्वा श्रियँ वदन्ते ॥५॥ वैश्वदेव्यामृचि भवति विश्वरूपँ वै पशूनाँ रूपं पशूनेव तज्जयन्ति ॥६॥ सत्रस्यद्‌र्ध्याग्नीध्र-मुपतिष्ठन्त ऋद्धावेव प्रतितिष्ठन्ति ॥७॥ चतुरक्षरणिधनं भवति चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठन्ति ॥८॥ आतमितो-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्निधनमुपयन्त्यायुरेव सर्व्वमाप्नुवन्ति ॥९॥ श्लोकानुश्लोकाभ्याँ हविर्द्धाने उपतिष्ठन्ते कीर्त्तिमेव तज्जयन्ति ॥१०॥ यामेन मार्ज्जालीयमुपतिष्ठन्ते पितृलोकमेव तज्जयन्ति॥११॥ आयुर्णव-स्तोभाभ्याँ सद उपतिष्ठन्ते ब्रह्म चैव तत् क्षत्रञ्च जयन्ति ॥१२॥ ऋश्यस्य साम्ना गार्हपत्यमुपतिष्ठन्ते ॥१३॥ इन्द्रँ सर्व्वाणि भूतान्यस्तुवँस्तस्यश्र्य एकमङ्गमस्तुतमचायत्तदस्यैतेनास्तौ-त्तेनास्य प्रियं धामोपागच्छत्प्रियमेवास्यैतेन धामोपगच्छन्ति ॥१४॥यत्परोक्षं निधनमुपेयुर्ह्रीतमुखं प्रतिमुञ्चेरन् प्रत्यक्षमुप-यन्ति ह्रीतमुखमेवापजयन्ति ॥१५॥ इति चतुर्थःखण्डः॥५/४॥

आसन्दीमारुह्योद्गायति देवसाक्ष्य एव तदुपरिषद्यं जयति ॥१॥ औदुम्बरी भवत्यूर्ग्गुदुम्बर ऊर्ज्जमेवावरुन्धे ॥२॥ प्रादेश-मात्री भवत्यस्य लोकस्यानुख्यानाय ॥३॥ छन्दोभिरारोहति स्वर्ग्गमेव तल्लोकमारोहति ॥४॥ छन्दोभिरुपावरोहत्यस्मिँ ल्लोके प्रतितिष्ठति ॥५॥ सर्व्वेणात्मना समुद्धृत्योद्गेयमेषु लोकेषु नेद्व्याहितोऽसानीति ॥६॥ एकस्याँ स्तोत्रीयायामस्तुतायां पादावुपाहरति ॥७॥ सह निधनेन प्रतिष्ठामुपयन्त्येष्वेव लोकेषु प्रतितिष्ठन्ति ॥८॥ प्रेङ्खमारुह्य होता शँसति महस एव तद्रूपं क्रियते ॥९॥ यदा वै प्रजा मह आविशति प्रेङ्खास्तर्ह्यारोहन्ति ॥१०॥ फलकमारुह्याध्वर्य्युः प्रति गृणाति ॥११॥ कूर्च्चानितरे-ऽध्यासत ऊद्ध्वा एव तदुत्क्रामन्तो यन्ति ॥१२॥ अभिगरापगरौ भवतो निन्दत्येनानन्यः प्रान्यः शँसति य एतान्निन्दन्ति पाप्मानमेषाँ सोऽपहन्ति यः प्रशँसति यदेवैषाँ सुष्टुतँ सुशस्तं तत्सोऽभिगृणाति ॥१३॥ शूद्रार्य्यौ चर्म्मणि व्यायच्छेते तयोरार्य्यँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वर्णमुज्जापयन्ति॥१४॥ देवाश्च वा असुराश्चादित्ये व्यायच्छन्त-स्तन्देवा अभ्यजयँस्ततो देवा अभवन् । परासुरा अभवन्नात्मना परास्य भ्रातृव्यो भवति य एवँ वेद ॥१५॥ यदार्य्यँ वर्णमुज्जापयन्त्यात्मानमेव तदुज्जापयन्ति ॥१६॥ परिमण्डल-ञ्चर्म्म भवत्यादित्यस्यैव तद्रूपं क्रियते ॥१७॥ सर्व्वासु स्रक्तिषु दुन्दभयो वदन्ति या वनस्पतिषु वाक्तामेव तज्जयन्ति ॥१८॥ भूमिदुन्दुभिर्भवति या पृथिव्यां वाक्तामेव तज्जयन्ति ॥१९॥ सर्व्वा वाचो वदन्ति येषु लोकेषु वाक्तामेव तज्जयन्ति ॥२०॥ सन्नद्धाः कवचिनः परियन्तीन्द्रियस्यैव तद्रूपं क्रियतेऽथो महाव्रतमेव महयन्ति॥२१॥ इति पञ्चमः खण्डः ॥५/५॥

सर्व्वे सहर्त्विजो महाव्रतेन स्तुवीरन् ॥१॥ अध्वर्य्युः शिरसोद्गायेन्मैत्रावरुणो दक्षिणेन पक्षेण ब्राह्मणाच्छँस्युत्तरेण गृहपतिः पुच्छेनोद्गातात्मना ॥२॥ तद्यद्येवं कुर्य्युरेकैकया स्तोत्रीययाऽस्तुतयोद्गातारमभिसमेयुः ॥३॥ तिसृभिरुद्गातात्मन उद्गीयाथ या शिरसः स्तोत्रीया तां दध्यादपराभिस्तिसृभि-रुद्गीयाथ या दक्षिणस्य पक्षस्य स्तोत्रीया तान्दध्यादपराभि-स्तिसृभिरुद्गीयाथ योत्तरस्य पक्षस्य स्तोत्रीया तान्दध्या त्तिसृभिर्व्वैकया वा स्तुतँ स्यादथ या पुच्छस्य स्तोत्रीया तान्दध्यात् ॥४॥ आत्मन्येव तदङ्गानि प्रतिदधति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥५॥ अथो खल्वाहुः कथमध्वर्य्यु र्ब्बह्वृचः साम गायेदित्युद्गातैव सर्व्वेणोद्गायेत्तदेव समृद्धँ समृद्धावेव प्रतितिष्ठन्ति ॥६॥ हविर्द्धाने शिरसा स्तुत्वा सँरब्धाः प्रत्यञ्च एयुस्ते दक्षिणेन धिष्ण्यान् परीत्य पश्चान्मैत्रावरुणस्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धिष्ण्यस्योपविश्य रथन्तरेण पञ्चदशेन स्तुवीरँस्त उदञ्चः सँसर्प्येयुर्ज्जघनेन होतुर्धिष्ण्यं पश्चाद् ब्राह्मणाच्छँसिनो धिष्ण्यस्योपविश्य बृहता सप्तदशेन स्तुवीरँस्ते येनैव प्रसर्प्पेयुस्तेन पुनर्न्निस्सृप्योत्तरेणाग्नीध्रं परीत्य पश्चाद्गार्हपत्यस्योप विश्य पुच्छेनैकविँशेन स्तुवीरँस्ते येनैव निस्सर्प्येयुस्तेन पुनः प्रसृप्य यथायतनमुपविश्यासन्दीमारुह्योद्गातात्मनोद्गायति ॥७॥ तं पत्न्योऽपघाटिलाभिरुप गायन्त्यार्त्विज्यमेव तत्पत्न्यः कुर्व्वन्ति सह स्वर्ग्गँल्लोकमयामेति ॥८॥ कुले कुलेऽन्नं क्रियते तद्यत्पृच्छेयुः किमिदं कुर्व्वन्तीतीमे यजमाना अन्नमत्स्यन्तीति ब्रूयुः ॥९॥ यो वै दीक्षितानां पापं कीर्त्तयति तृतीयमेवाँशं पाप्मनोहरत्यन्नादस्तृतीयं पिपीलिकास्तृतीयम् ॥१०॥ परिमाद्भि श्चरन्ति त्वक्च वा एतल्लोम च महाव्रतस्य यत् परिमादस्त्वच ञ्चैव तल्लोम च महाव्रतस्याप्त्वावरुन्धते ॥११॥ वाणँ वितन्वन्त्यन्तो वै वाणोऽन्तो महाव्रतमन्तेनैव तदन्तमभिवादयन्ति ॥१२॥ शततन्त्रीको भवति शतायुर्व्वै पुरुषः शतवीर्य्यः ॥१३॥ तमुल्लिखेत्प्राणाय त्वाऽपानाय त्वा व्यानाय त्वेति प्राणापान व्यानानेव तदाप्त्वाऽवरुन्धते ॥१४॥ परिकुम्भिन्यो मार्ज्जालीयँ यन्तीदम्मध्विदम्मध्विति सघोषा एव तद्वयो भूत्वा सह स्वर्ग्गँल्लोकँ यन्ति ॥१५॥ इति षष्ठः खण्डः ॥५/६॥

देवा वै वाचँ व्यभजन्त तस्या यो रसोऽत्यरिच्यत तद्गौरीवितमभवदनुष्टुभमनुपरिप्लवते वागनुष्टु ब्वाचो रसो गौरीवितम् ॥१॥ यद्गौरीवितेनान्वहँ स्तुवते वाच्येव तद्वाचा रसन्दधति ॥२॥ रसवद्वाचा वदति य एवँ वेदेति ॥३॥ द्व्युदा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्भवति स्वर्ग्गस्य वा एतौ लोकस्यावसानदेशौ पूर्व्वेणैव पूर्व्वमहः सँस्थापयन्त्युत्तरेणोत्तरमहरभ्यतिवदन्ति ॥४॥ एतद्वै यज्ञस्य श्वस्तनँ यद्गौरीवितँ यद्गौरिवितमनुसृजेयुरश्वस्तना अप्रजसः स्युः ॥५॥ सँ वा अन्यो यज्ञस्तिष्ठत इत्याहुर्व्वागेव न सन्तिष्ठत इति यद्गौरीवितमन्वहं भवति वाचामेव तत्पुनः प्रयुञ्जते ॥६॥ स्वर्ण्णिधनमन्वहं भवति ॥७॥ देवक्षेत्रँ वा एतेऽभ्यारोहन्ति ये स्वर्ण्णिधनमुपयन्ति स उ वै सत्रिणः सत्रमुपनयेदित्याहुर्य्य एनान्देवक्षेत्रमभ्यारोहयेदिति न वै देवक्षेत्र आसीन आर्त्तिमार्च्छति यत्स्वर्ण्णिधनमन्वहं भवति नैव काञ्चनार्त्तिमार्च्छन्ति ॥८॥ च्यवन्ते वा एतेऽस्माल्लोकादि-त्याहुर्य्ये स्वर्ण्णिधनमुपयन्तीति यदृचा स्वरूपँ यन्त्यस्मिँ ल्लोके प्रतितिष्ठन्ति यदेकारोऽन्तरिक्षे यत्साम्नामुष्मिन्त्सर्व्वेषु लोकेषु प्रतितिष्ठन्ति स्वर्ण्णिधनेन तुष्टुवानाः ॥९॥ सुज्ञानं भवति ॥१०॥ देवा वै स्वर्ग्गँल्लोकँ यन्तोऽज्ञानादबिभयुस्त एतत् सुज्ञानमपश्यँस्तेन ज्ञात्रमगच्छन्यत् सुज्ञानमन्वहं भवति ज्ञात्रमेव गच्छन्ति ॥११॥ इति सप्तमः खण्डः ॥५/७॥

ये वै वाचमन्नमादयन्त्यन्नादा भवन्ति ये वितर्षयन्ति रूक्षा भवन्ति ॥१॥ गौरीवितँ श्यावाश्वन्निहव एतानि वै सामानि वाचोऽन्नमेतेषाँ वागन्नँ यदेतानि न च्यवन्ते वाचमेव तदन्नमाद-यन्ति तेन सर्व्वेऽन्नादा भवन्ति ॥२॥ अभिक्रान्तापक्रान्तानि भवन्त्यभिक्रान्तापक्रान्तँ वै वाचो रूपम् ॥३॥ प्लवोऽन्वहं भवति ॥४॥ समुद्द्रँ वा एते प्रस्नान्ति ये सँवत्सरमुपयन्ति यो वा अप्लवः समुद्द्रं प्रस्नाति न स तत उदेति यत्प्लवो भवति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वर्गस्य लोकस्य समष्ट्यै ॥५॥ अति विश्वानि दुरिता तरेमेति यदेवैषां दुष्टुतं दुःशस्तं तदेतेन तरन्ति ॥६॥ ओकोनिधनँ षडहमुखे भवति ॥७॥ पराँ वा एते परावतं गच्छन्ति ये षडहस्यान्तं गच्छन्ति यदोकोनिधनँ षडहमुखे भवति प्रज्ञात्यै ॥८॥ यदा वै पुरुषः स्वमोक आगच्छति सर्व्वं तर्हि प्रजानाति सर्व्वमस्मै दिवा भवति ॥९॥ इत्यष्टमः खण्डः॥५/८॥

एकाष्टकायां दीक्षेरन् ॥१॥ एषा वै सँवत्सरस्य पत्नी यदेकाष्टकैतस्याँ वा गताँ रात्रिँ वसति साक्षादेव तत्सँवत्सर-मारभ्य दीक्षन्ते ॥२॥ तस्य सानिर्य्या यदपोऽनभिनन्दन्तो ऽभ्यवयन्ति ॥३॥ विच्छिन्नँ वा एते सँवत्सर स्याभिदीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः ॥४॥ आर्त्तँ वा एते सँवत्सरस्याभिदीक्षन्ते येऽन्तनामानावृतू अभिदीक्षन्ते ॥५॥ तस्मादेकाष्टकायान्न दीक्ष्यम् ॥६॥ फाल्गुने दीक्षेरन् ॥७॥ मुखँ वा एतत्सँवत्सरस्य यत् फाल्गुनो मुखत एव तत्सँवत्सरमारभ्य दीक्षन्ते ॥८॥ तस्य सानिर्य्या यत्सम्मेधे विषुवान् सम्पद्यते॥९॥ चित्रापूर्ण्णमासे दीक्षेरन् ॥१०॥ चक्षुर्व्वा एतत्सँवत्सरस्य यच्चित्रापूर्ण्णमासो मुखतो वै चक्षुर्म्मुखत एव तत्सँवत्सर-मारभ्य दीक्षन्ते तस्य न निर्य्यास्ति ॥११॥ चतुरहे पुरस्तात् पौर्ण्णमास्या दीक्षेरन् ॥१२॥ तेषामेकाष्टकायां क्रयः सम्पद्यते तेनैकाष्टकान्न सम्बट् कुर्व्वन्ति ॥१३॥ तेषां पूर्व्वपक्षे सुत्या सम्पद्यते पूर्व्वपक्षे मासाःसन्तिष्ठमाना यन्ति पूर्व्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठतः पशव ओषधयोऽनूत्तिष्ठन्ति तान्कल्याणी वागभिव-दत्यरात्सुरिमे सत्रिण इति ते राध्नुवन्ति॥१४॥ इतिनवमःखण्डः॥५/९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आ वा एते सँवत्सरं प्याययन्ति य उत्सृजन्ति ॥१॥ यथा वै दृतिराध्मात एवँ सँवत्सरोऽनुत्सृष्टो यन्नोत्सृजेयुरमेहेन प्रमायुकाः स्युः ॥२॥ प्राणो वै सँवत्सर उदाना मासा यदुत्सृजन्ति प्राण एवोदानान्दधति यो दीक्षितः प्रमीयते या सँवत्सरस्यानुत्सृष्टस्य शुक्सा तमृच्छति ॥३॥ तदाहुरुत्सृज्या३ न्नोत्सृज्या३ मिति॥४॥ यद्युत्सृजेयुरुक्थान्युत्सृजेयुस्तदेवोत्सृष्टं तदनुत्सृष्टम् ॥५॥ अथो खल्वाहुरेकत्रिकं कार्य्यन्तदेव साक्षादुत्सृष्टमभ्युत्षुण्वन्ति ॥६॥ छिद्रो वा एतेषाँसँवत्सर इत्याहुर्य्ये स्तोममुत्सृजन्तीति॥७॥ पशुमालभन्ते स्तोममेव तदालभन्ते स्तोमो हि पशुः॥८॥ श्व उत्सृष्टाः स्म इति वत्सानपाकुर्व्वन्ति प्रातः पशुमालभन्ते तस्य वपया प्रचरन्ति ततः सवनीयेनाष्टाकपालेन तत आग्ग्नेयेनाष्टा कपालेन ततो दध्नैन्द्रेण ततश्चरुणा वैश्वदेवेन तत्प्रातः सवनँ सन्तिष्ठते ॥९॥ ततः पशुपुरोडाशेनैकादशकपालेन ततः सवनीयेनैकादश-कपालेन ततो मरुत्वतीयेनैकादशकपालेन ततश्चरुणैन्द्रेण तन्माध्यन्दिनँ सवनँ सन्तिष्ठते ॥१०॥ पशुना प्रचरति ततः सवनीयेन द्वादशकपालेन ततो वैश्वदेवेन द्वादशकपालेन ततश्चरुणाऽऽग्निमारुतेन तत्तृतीयसवनँ सन्तिष्ठते ॥११॥ पृषदाज्येन प्रचर्य्य पत्नीस्सँयाजयन्ति ॥१२॥ इति दशमः खण्डः॥५/१०॥ **इति पञ्चमोऽध्यायः**

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ षष्ठोऽध्यायः

प्रजापतिरकामयत बहु स्यां प्रजायेयेति स एतमग्निष्टोममपश्यत्तमाहरत्तेनेमाः प्रजा असृजत ॥१॥ एकादशेन च वै सता स्तोत्रेणाग्निष्टोमस्यासृजतैकादशेन च मासा सँवत्सरस्य ता द्वादशेन च स्तोत्रेणाग्निष्टोमस्य पर्य्यगृह्णात् द्वादशेन च मासा सँवत्सरस्य ॥२॥ तस्मात्प्रजा दशमासो गर्भं भूत्वैकादशमनु प्रजायन्ते तस्माद् द्वादशन्नाभ्यतिहरन्ति द्वादशेन हि परिगृहीतास्तद्य एवँ वेद परिजाताः प्रजा गृह्णाति प्रजाता जनयन्ति ॥३॥ तासां परिगृहीतानामश्वतर्य्यत्यक्रामत्तस्या अनुहाय रेत आदत्त तद्वडवा यान्न्यमाञ्छस्माद्वडवा द्विरेतास्तस्मादश्वतर्य्य प्रजा आत्तरेता हि ॥४॥ तस्माद्वदक्षिणीयाऽति हि सा यज्ञमरिच्यतातिरिक्तस्य दक्षिणा स्यात्सलोमत्वाय षोडशिनः स्तोत्रे देयाऽतिरिक्तो वै षोडश्यतिरिक्त एवातिरिक्तां ददाति ॥५॥ सोऽकामयत यज्ञँ सृजेयेति स मुखत एव त्रिवृतमसृजत तं गायत्रीच्छन्दोऽन्वसृज्यताग्निर्द्देवता ब्राह्मणो मनुष्यो वसन्त ऋतुस्तस्मात्त्रिवृत्स्तोमानां मुखं गायत्री छन्दसामग्निर्द्देवतानां ब्राह्मणो मनुष्याणाँ वसन्त ऋतूनां तस्माद् ब्राह्मणो मुखेन वीर्य्यङ्करोति मुखतो हि सृष्टः॥६॥ करोति मुखेन वीर्य्यँ य एवँ वेद ॥७॥ स उरस्त एव बाहुभ्यां पञ्चदशमसृजत तन्त्रिष्टुप्छन्दोऽन्वसृज्यतेन्द्रो देवता राजन्यो मनुष्यो ग्रीष्म ऋतुस्तस्माद्राजन्यस्य पञ्चदश स्तोमस्त्रिष्टुप्छन्द इन्द्रो देवता ग्रीष्म ऋतुस्तस्मादु बाहुवीर्य्यो बाहुभ्यां हि सृष्टः ॥८॥ करोति बाहुभ्याँ वीर्य्यँ य एवँ वेद ॥९॥ स मध्यत एव प्रजनना-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्सप्तदशमसृजत तज्जगती छन्दोऽन्वसृज्यत विश्वेदेवा देवता वैश्यो मनुष्यो वर्षा ऋतुस्तस्माद्वैश्योऽद्यमानो न क्षीयते प्रजननाद्धि सृष्टस्तस्मादु बहु पशुर्वैश्वदेवो हि जागतो वर्षा ह्यस्यर्तुस्तस्माद्ब्राह्मणस्य च राजन्यस्य चाद्योऽधरो हि सृष्टः ॥१०॥ स पत्त एव प्रतिष्ठाया एकविँशमसृजन्त तमनुष्टुप्छन्दोऽन्वसृज्यत न का च न देवता शूद्रो मनुष्यस्तस्माच्छूद्र उत बहुपशुरयज्ञियो विदेवो हि न हि तं का च न देवताऽन्वसृजत तस्मात्पादावनेज्यन्नाति वर्द्धते पत्तो हि सृष्टस्तस्मादेकविँश-स्तोमानां प्रतिष्ठा प्रतिष्ठाया हि सृष्टस्तस्मादनुष्टुभं छन्दाँसि नानु व्यूहन्ति ॥११॥ पापवसीयसो विधृत्यै ॥१२॥ विधृतिः पाप वसीयसो भवति य एवँ वेद ॥१३॥ इति प्रथमः खण्डः॥६/१॥

यो वै स्तोमानुपदेशनवतो वेदोपदेशनवान्भवति ॥१॥ प्राणो वै त्रिवृदर्द्धमासः पञ्चदशः सँवत्सरः सप्तदश आदित्य एकविँश एते वै स्तोमा उपदेशनवन्त उपदेशनवान् भवति य एवँ वेद ॥२॥ इमे वै लोकास्त्रिणवस्त्रिणवस्य वै ब्राह्मणेनेमे लोकास्त्रिष्पुनर्न्नवा भवन्ति ॥३॥ एषु लोकेषु प्रतितिष्ठति य एवँ वेद ॥४॥ देवता वाव त्रयस्त्रिँशोऽष्टौ वसव एकादशरुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च त्रयस्त्रिँशौ ॥५॥ स देवेन यज्ञेन यजते य एवँ वेद ॥६॥ यो वा अधिपतिँ वेदाधिपतिर्भवति त्रयस्त्रिँशो वै स्तोमानामधिपतिः पुरुषः पशूनाम्॥७॥ तस्मान्त्र्यञ्चोऽन्ये पशवोऽदन्त्यूद्ध्वः पुरुषोऽधि-पतिर्हि सः ॥८॥ अधिपतिः समानानां भवति य एवँ वेद ॥९॥ इति द्वितीयः खण्डः॥६/२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष वाव यज्ञो यदग्निष्टोमः॥१॥ एकस्मा अन्यो यज्ञः कामायाह्रियते सर्व्वेभ्योऽग्निष्टोमः ॥२॥ द्वादशस्तोत्राण्यग्निष्टोमो द्वादशमासाः सँवत्सरः सँवत्सरं पशवोऽनु प्रजायन्ते तेन पशव्यः समृद्धः ॥३॥ द्वादशस्तोत्राणि द्वादशशस्त्राणि तच्चतुर्व्विँशतिश्चतुर्व्विँशतिरर्द्धमासाः सँवत्सरः सँवत्सरं पशवोऽनु प्रजायन्ते तेन पशव्यः समृद्धः ॥४॥ अग्नौ स्तोत्रमग्नौ शस्त्रं प्रतितिष्ठति तेन ब्रह्मवर्च्चस्यः ॥५॥ किं ज्योतिष्टोमस्य ज्योतिष्टोमत्वमित्याहुर्व्विराजैः सँस्तुतः सम्पद्यते विराड्वै छन्दसां ज्योतिः॥६॥ ज्योतिः समानानां भवति य एवँ वेद ॥७॥ ज्येष्ठयज्ञो वा एष यदग्निष्टोमः॥८॥ प्रजापतिः प्रजा असृजत ता अस्मै श्रैष्ठ्याय नातिष्ठन्त स एतमग्निष्टोममपश्यत्तमाहरत्ततोऽस्मै प्रजाःश्रैष्ठ्यायातिष्ठन्त॥९॥ तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय य एवँ वेद ॥१०॥ यत्त्वित्याहुर्ग्गायत्रं प्रातः सवनं त्रैष्टुभं माध्यन्दिनँ सवनञ्जागतं तृतीयसवनं क्व तर्हि तुरीयं छन्दोऽनुष्टुबिति ॥११॥ छन्दसाँ वा अन्ववलुप्तिँ यजमानोऽन्ववलुप्यते॥१२॥ अष्टाक्षरा गायत्री हिङ्कारो नवम एकादशाक्षरा त्रिष्टुब्द्वादशाक्षरा जगती छन्दोभिरेवानुष्टुभमाप्नोति यजमानस्यानवलोपाय॥१३॥ यो वा अनुष्टुभँ सर्व्वत्रापिँ सवनान्यन्वायत्ताँ वेद सर्व्वत्रास्यापिर्भवत्येषा वा अनुष्टुप् सर्व्वत्रापिः सवनान्यन्वायत्ता तद्य एवँ वेद सर्व्वत्रास्यापिर्भवति ॥१४॥ यद्वै राजानोऽध्वानं धावयन्ति येऽश्वानाँ वीर्य्यवत्तमास्तान्युञ्जते त्रिवृत्पञ्चदशः सप्तदश एकविँश एते वै स्तोमानाँ वीर्य्यवत्तमास्तानेव युङ्क्ते स्वर्ग्गस्य लोकस्य समष्ट्यै ॥१५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतुष्टोमो भवति प्रतिष्ठा वै चतुष्टोमः प्रतिष्ठित्यै ॥१६॥ इति तृतीयः खण्डः ॥६/३॥

प्रजापतिर्द्देवेभ्य ऊर्ज्जँ व्यभजत्तत उदुम्बरः समभवत्प्राजापत्यो वा उदुम्बरः प्राजापत्य उद्गाता यदुद्गातौदुम्बरीं प्रथमेन कर्म्मणान्वारभते स्वयैव तद्देवतयात्मानमार्त्त्विज्याय वृणीते ॥१॥ तामुच्छ्रयति द्युतानस्त्वा मारुत उच्छ्रयतूद्दिवँ स्तभानान्तरिक्षं दृँह पृथिवीम् ॥२॥ तामन्वारभत आयोष्ट्वा सदने सादयाम्यवतश्छायायाँ समुद्द्रस्य हृदय इति ॥३॥ यज्ञो वा आयुस्तस्य तत्सदनं क्रियते ॥४॥ यज्ञो वा अवति तस्य सा च्छाया क्रियते ॥५॥ मध्यतो वा आत्मनो हृदयन्तस्मान्मध्ये सदस औदुम्बरी मीयते॥६॥ नमः समुद्द्राय नमःसमुद्द्रस्य चक्षुष इत्याह वाग्वै समुद्द्रो मनः समुद्द्रस्य चक्षुस्ताभ्यामेव तन्नमस्करोति ॥७॥ मामा यूनर्व्वाहासीदित्याह साम वै यूनर्व्वा साम्न एव तन्नमस्करोत्यार्त्त्विज्यं करिष्यन् ॥८॥ यो वा एवँ साम्ने नमस्कृत्य साम्नार्त्त्विज्यं करोति न साम्नो हीयते नैनँ सामापहते ॥९॥ य एनमनुव्याहरति स आर्त्तिमार्च्छति ॥१०॥ ऊर्ग्गस्यूर्ज्जोदा ऊर्ज्जं मे देह्यूर्ज्जं मे धेह्यन्नं मे देह्यन्नं मे धेहि प्रजापतेर्व्वा एतदुदरँ यत्सद ऊर्ग्गुदुम्बरो यदौदुम्बरी मध्ये सदसो मीयते मध्यत एव तत्प्रजाभ्योऽन्नमूर्ज्जन्दधाति ॥११॥ तस्माद्यत्रैषा यातयामा क्रियते तत्प्रजा अशनायवो भवन्ति ॥१२॥ साम देवानामन्नँ सामन्येव तद्देवेभ्योऽन्न ऊर्ज्जन्दधाति स एव तदूर्ज्जि श्रितः प्रजाभ्य ऊर्ज्जँ विभजति ॥१३॥ उदङ्ङासीन उद्गायत्युदीचीन्तद्दिशमूर्ज्जा भाजयति प्रत्यङ्ङासीनः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रस्तौति प्रतीचीन्तद्दिशमूर्ज्जा भाजयति दक्षिणासीनः प्रतिहरति दक्षिणान्तद्दिशमूर्ज्जा भाजयति प्राञ्चोऽन्य ऋत्विज आर्त्विज्यं कुर्व्वन्ति तस्मादेषा दिशां वीर्य्यवत्तमैताँ हि भूयिष्ठाः प्रीणन्ति ॥१४॥ ब्रह्मवादिनो वदन्ति कस्मात्सत्यात्प्राञ्चोऽन्य ऋत्विज आर्त्विज्यं कुर्व्वन्तीति विपरिक्रम्योद्गातार इति दिशामभीष्ट्यै दिशामभिप्रीत्या इति ब्रूयात्तस्मात्सर्व्वासु दिक्ष्वन्नँ विद्यते सर्व्वा ह्यभीष्टाः प्रीताः ॥१५॥ इति चतुर्थः खण्डः ॥६/४॥

प्रजापतिरकामयत बहु स्यां प्रजायेयेति सोऽशोचत्तस्य शोचत आदित्यो मूर्ध्नोऽसृज्यत सोऽस्य मूर्द्धानमुदहन् स द्रोणकलशोऽभवत्तस्मिन्देवाः शुक्रमगृह्णत तां वै स आयुषार्त्तिमत्यजीवत् ॥१॥ आयुषार्त्तिमतिजीवति य एवँ वेद ॥२॥ तं प्रोहेद्वानस्पत्योऽसि बार्हस्पत्योऽसि प्राजापत्योऽसि प्रजापतेर्म्मूर्द्धास्यत्यायुपात्रमसीदमहम्मां प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्च्चसायेति॥३॥यदाह वानस्पत्य इति सत्येनैवैनं तत्प्रोहति ॥४॥ यदाह बार्हस्पत्य इति बृहस्पतिर्व्वै देवानामुद्गाता तमेव तद्युनक्ति॥५॥ यदाह प्राजापत्य इति प्राजापत्यो ह्येष देवताया यद्द्रोणकलशो यदाह प्रजापतेर्म्मूर्द्धेति प्रजापतेर्ह्येष मूर्ध्न उदहन्यत ॥६॥ यदाहात्यायु पात्रमित्यति ह्येतदन्यानि पात्राणि यत् द्रोणकलशो देवपात्रं द्रोणकलशः ॥७॥ देवपात्री भवति य एवँ वेद ॥८॥ ब्राह्मणं पात्रे न मीमाँसेत यं ब्राह्मणमिव मन्यते प्र देवपात्रमाप्नोति न मनुष्यपात्राच्छिद्यते ॥९॥ वाग्वै देवेभ्योऽपक्रामत्सापः प्राविशत्तां देवाः पुनरयाचँस्ता अब्रुव-न्यत्पुनर्द्दद्याम किन्नस्ततः स्यादिति यत्कामयध्व इत्यब्रुवँ स्ता

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अब्रुवन्यदेवास्मासु मनुष्या अपूतं प्रवेशयाँस्तेनासँसृष्टा असामेति ॥१०॥ शुद्धा अस्मा आपः पूता भवन्ति य एवँ वेद ॥११॥ सा पुनर्त्तात्यक्रामत्सा वनस्पतीन् प्राविशत्तान्देवाः पुनरयाचँस्तान्न पुनरददुस्तानशपन् स्वेन वः किष्कुणा वज्जेण वृश्चानिति तस्माद्वनस्पतीन् स्वेन किष्कुणा वज्जेण वृश्चन्ति देवशप्ता हि ॥१२॥ ताँ वनस्पतयश्चतुर्द्धा वाचँ विन्यदधुर्दुन्दुभौ वीणायामक्षे तूणवे तस्मादेषा वदिष्ठैषा वल्गुतमाँ वाग्वा वनस्पतीनां देवानाँ ह्येषा वागासीत् ॥१३॥ अधोऽधोऽक्षं द्रोणकलशं प्रोहन्ति तस्या वाचोऽवरुध्या उपर्य्युपर्य्यक्षं पवित्रं प्रयच्छन्त्युभयत एव वाचं परिगृह्णन्ति ॥१४॥ यस्य कामयेतासुर्य्यमस्य यज्ञं कुर्य्याँ वाचँ वृञ्जीयति द्रोणकलशं प्रोहन्बाहुभ्यामक्षमुपस्पृशेदसुर्य्यमस्य यज्ञङ्करोति वाचँ वृङ्क्ते योऽस्य प्रियः स्यादनुपस्पृशन्नक्षं प्रोहेत्प्राणा वै द्रोणकलशः प्राणानेवास्य कल्पयति ॥१५॥ यन्वित्याहुर्व्वाचान्यानृत्त्विजो वृणते कस्मादुद्गातारो वृता आर्त्त्विज्यं कुर्व्वन्तीति ॥१६॥ यद्द्रोणकलशमुपसीदन्ति तेनोद्गातारो वृताः ॥१७॥ प्राजापत्या वा उद्गातारः प्राजापत्यो द्रोणकलशो द्रोणकलश एवैनाना-र्त्त्विज्याय वृणीते ॥१८॥ प्राञ्च उपसीदन्ति प्राञ्चो यज्ञस्याग्रे करवामेति ॥१९॥ अनभिजिता वा एषोद्गातृणां दिग्यत्प्राची यद्द्रोणकलशं प्राञ्चं प्रोहन्ति दिशोऽभिजित्यै॥२०॥ यन्वि-त्याहुरन्तराश्वः प्रासेवौ युज्यतेऽन्तरा शम्य अनड्वान्क उद्गातृणाँ योग इति यद् द्रोणकलशमुपसीदन्ति स एषाँ योगस्तस्मा-द्युक्तैरवोपसद्यन्न ह्ययुक्तो वहति ॥२१॥ इतिपञ्चमःखण्डः ॥६/५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ग्राव्णः सँसाद्य द्रोणकलशमध्यूहन्ति विड्वै ग्रावाणोऽन्नँ सोमो राष्ट्रं द्रोणकलशो यद्ग्रावसु द्रोणकलशमध्यूहन्ति विश्येव तद्राष्ट्रमध्यूहन्ति ॥१॥ यं द्विष्याद्वि मुखान् ग्राव्णः कृत्वेदमहममुममुष्यायणममुष्याः पुत्रममुष्या विशोऽमुष्मादन्ना-द्यान्निरूहामीति निरूहेद्विश एवैनमन्नाद्यन्निरूहति ॥२॥ योऽस्य प्रियः स्यात्सम्मुखान् ग्राव्णः कृत्वेदमह ममुष्यायणममुष्याः पुत्रममुष्याँ विश्यमुष्मिन्नन्नाद्येऽध्यूहामीत्यध्यूहेद्विश्येवैनमन्ना-द्येऽध्यूहति ॥३॥ अथो तदुभयमनादृत्येदमहं मां तेजसि ब्रह्मवर्च्चसेऽध्यूहामीत्यध्यूहेत्तेजस्येव ब्रह्मवर्च्चस आत्मान-मध्यूहति ॥४॥ यः कामयेत विशा राष्ट्रँ हन्यामिति व्यूह्य ग्राव्णोऽधो द्रोणकलशँ सादयित्वोपाँशु सवनमुपरिष्टादभि निदध्यादिदमहममुया विशाऽदो राष्ट्रँ हन्मीति विशैव तद्राष्ट्रँ हन्ति ॥५॥ यो वै दैवानि पवित्राणि वेद पूतो यज्ञियो भवति छन्दाँसि वै दैवानि पवित्राणि तैर्द्रोणकलशं पावयन्ति ॥६॥ वसवस्त्वा गायत्रेण छन्दसा पुनन्तु रुद्रास्त्वा त्रैष्टुभेन छन्दसा पुनन्त्वादित्यास्त्वा जागतेन छन्दसा पुनन्त्वेतानि वै दैवानि पवित्राणि पूतो यज्ञियो भवति य एवँ वेद ॥७॥ स्वर्भानुर्व्वा आसुर आदित्यन्तमसा विध्यत्तं देवा न व्यजानँस्तेऽत्रिमुपाधावँ स्तस्यात्रिर्भासेन तमोपा हन्यत् प्रथममपाहन् सा कृष्णावि-रभवद्यद्द्वितीयँ सा रजता यत्तृतीयँ सा लोहिनी यया वर्ण्ण-मभ्यतृणत् सा शुक्लासीत् ॥८॥ तस्माच्छुक्लं पवित्रँ शुक्रः सोमः स शुक्रत्वाय ॥९॥ यं द्विष्यात्तस्यैतेषाँ वर्ण्णानामपि पवित्रे कुर्य्यात्पाप्मनैवैनं तमसा विध्यति कृष्णमिव हि तमो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

योऽस्य प्रियः स्यादासक्तिशुक्लं कुर्य्याज्ज्योतिर्व्वै हिरण्यं ज्योतिरेवास्मिन्दधाति ॥१०॥ तस्मादात्रेयं चन्द्रेणेच्छन्त्यत्रिर्हि तस्य ज्योतिः॥११॥ अभ्यतृणत्पवित्रं विगृह्णन्ति हस्तकार्य्यमेव तद्यज्ञस्य क्रियत एतद्वा उद्गातॄणाँ हस्तकार्य्यँ यत्पवित्रस्य विग्रहणम् ॥१२॥ न हस्तवेष्यान्निर्ऋच्छति य एवँ वेद ॥१३॥ योऽपि न विगृह्णाति प्राणादेनमन्तर्य्यन्ति ॥१४॥ तं ब्रूयाद्वेपमानः प्रमेष्यस इति वेपमान एव प्रमीयते ॥१५॥ प्र शुक्रैतु देवी मनीषास्मद्रथः सुतष्टो न वाजीत्युद्गाता धारामनुमन्त्रयते ॥१६॥ आयुषे मे पवस्व वर्च्चसे मे पवस्व विदुः पृथिव्या दिवो जनित्रा च्छृण्वन्त्वापोऽधः क्षरन्तीः सोमोहोद्गायेत्याह मह्यं तेजसे ब्रह्मवर्च्चसायेति ॥१७॥ एष वै सोमस्योद्गीथो यत्पवते सोमोद्गीथमेव साम गायति ॥१८॥ अच्छिन्नं पावयन्ति यज्ञञ्चैव प्राणाँश्च सन्तन्वन्ति सन्ततं पावयन्ति यज्ञस्य सन्तत्यै ॥१९॥ इति षष्ठः खण्डः ॥६/६॥

बृहस्पतिर्व्वै देवानामुदगायत्तँ रक्षाँस्यजिघाँसन् स य एषां लोकानामधिपतयस्तान् भागधेयेनोपाधावत् ॥१॥ सूर्य्यो मा दिव्याभ्यो नाष्ट्राभ्यः पातु वायुरन्तरिक्षाभ्योऽग्निः पार्थिवाभ्यः स्वाहेति जुहोति ॥२॥ एते वा एषाँ लोकानामधिपतयस्तान् भागधेयेनोपासरत् ॥३॥ करोति वाचा वीर्य्यन्न सदस्यामार्त्तिमार्छति य एवँ वेद ॥४॥ वाग्वै देवेभ्योऽपाक्रामत्तां देवा अन्वमन्त्रयन्त साऽब्रवीदभागास्मि भागधेयं मेऽस्त्विति कस्ते भागधेयं कुर्य्यादित्युद्गातार इत्यब्रवीदुद्गातारो वै वाचे भागधेयं कुर्व्वन्ति ॥५॥ तस्यै जुहुयाद् बेकुरानामासि जुष्टा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवेभ्यो नमो वाचे नमो वाचस्पतये देवि वाग्यत्ते वाचो मधुमत्तस्मिन्मा धाः सरस्वत्यै स्वाहेति ॥६॥ वाग्वै सरस्वती तामेव तद्भागधेयेनारभते ॥७॥ यं द्विष्यात्तस्यैतामाहुतिञ्जुहुया-द्वाचं मनसा ध्यायेद्वाचमेवास्य वृङ्क्ते॥८॥बहिष्पवमानँ सर्प्पन्ति स्वर्गमेव तल्लोकँ सर्प्पन्ति ॥९॥ प्रक्वाणा इव सर्प्पन्ति प्रतिकूलमिव हीतः स्वर्गो लोकः त्सरन्त इव सर्प्पन्ति मृगधर्म्मा वै यज्ञो यज्ञस्य शान्त्या अपत्रासाय ॥१०॥ वाचँ यच्छन्ति यज्ञमेव तद्यच्छन्ति यद्व्यववदेयुर्य्यज्ञं निर्ब्रूयुस्तस्मान्न व्यववद्यम् ॥११॥ पञ्चर्त्त्विजः सँरब्धाः सर्प्पन्ति पाङ्क्तो यज्ञो यावान् यज्ञस्तमेव सन्तन्वन्ति ॥१२॥ यदि प्रस्तोता अवच्छिद्यते यज्ञस्य शिरश्छिद्यते ब्रह्मणे वरन्दत्वा स एव पुनर्व्वर्त्तव्यश्छिन्नमेव तत्प्रतिदधाति ॥१३॥ यद्युद्गातावच्छिद्यते यज्ञेन यजमानो वृध्यतेऽदक्षिणः स यज्ञक्रतुः सँस्थाप्योऽथान्य आहृत्यस्तस्मिन्देयँ यावद्धास्यन् स्यात् ॥१४॥ यदि प्रतिहर्त्ता वच्छिद्यते पशुभिर्य्यजमानो वृध्यते पशवो वै प्रतिहर्त्ता सर्व्ववेदसन्देयँ यदि सर्व्ववेदसन्न ददाति सर्व्वज्यानिञ्जीयते ॥१५॥ अध्वर्य्युः प्रस्तरँ हरति ॥१६॥ यजमानो वै प्रस्तरो यजमानमेव तत्स्वर्गँल्लोकँ हरति॥१७॥ यज्ञो वै देवेभ्योऽश्वो भूत्वापाक्रामत्तं देवाः प्रस्तरेणारमयँस्तस्मादश्वः प्रस्तरेण सम्मृज्यमान उपावरमते यदध्वर्य्युः प्रस्तरँ हरति यज्ञस्य शान्त्या अपत्रासाय ॥१८॥ प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अशनायन्तोऽपाक्रामँस्तेभ्यः प्रस्तरमन्नं प्रायच्छत्त एनमुपावर्त्तन्त तस्मादध्वर्य्युणा प्रस्तर ईषदिव विधूयो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विधूतमिव हि तृणं पशव उपावर्त्तन्ते ॥१९॥ उपैनं पशव आवर्त्तन्ते य एवँ वेद ॥२०॥ प्रस्तरमासद्योद्गायेद्धविषोऽस्कन्दाय ॥२१॥ यजमानन्तु स्वर्गाल्लोकादवगृह्णाति ॥२२॥ अष्ठीवतोपस्पृशतोद्गेयन्तेनास्य हविरस्कन्नं भवति न यजमानँ स्वर्गाल्लोकादवगृह्णाति ॥२३॥ चात्वालमवेक्ष्य बहिष्पवमानँ स्तुवन्त्यत्र वा असावादित्य आसीत्तं देवा बहिष्पवमानेन स्वर्गँल्लोकमहरन्यच्चात्वालमवेक्ष्य बहिष्पवमानँ स्तुवन्ति यजमानमेव तत्स्वर्गँल्लोकँ हरन्ति॥२४॥ इतिसप्तमःखण्डः॥६/७॥

स तु वै यज्ञेन यजेतेत्याहुर्य्यस्य विराजँ यज्ञमुखे दध्युरिति ॥१॥ नवभिः स्तुवन्ति हिङ्कारि दशमो दशाक्षरा विराड्विराजमेवास्य यज्ञमुखे दधति ॥२॥ नवभिः स्तुवन्ति नवप्राणाः प्राणैरेवैनँ समर्द्धयन्ति हिङ्कारो दशमस्तस्मान्नाभिरनवतृण्णा दशमी प्राणानाम् ॥३॥ नवभिः स्तुवन्ति नवाध्वर्य्युः प्रातः सवने ग्रहान् गृह्णाति तानेव तत्पावयन्ति तेषां प्राणानुत्सृजन्ति ॥४॥ प्रजापतिर्व्वै हिङ्कारस्त्रियो बहिष्पवमान्यो यद्धिङ्कृत्य प्रस्तौति मिथुनमेवास्या यज्ञमुखे दधाति प्रजननाय ॥५॥ एष वै स्तोमस्य योगो यद्धिङ्कारो यद्धिङ्कृत्य प्रस्तौति युक्तेनैव स्तोमेन प्रस्तौति ॥६॥ एष वै साम्नाँ रसो तद्धिङ्कारो यद्धिङ्कृत्य प्रस्तौति रसेनैवैता अभ्युद्य प्रस्तौति ॥७॥ आरण्येभ्यो वा एतत् पशुभ्यः स्तुवन्ति यद्बहिष्पवमानमेकरूपाभिः स्तुवन्ति तस्मादेकरूपा आरण्याः पशवः ॥८॥ पराचीभिः स्तुवन्ति तस्मात्पराञ्चः प्रजायन्ते पराञ्चो वितिष्ठन्ते ॥९॥ अपरिश्रिते स्तुवन्ति तस्मादपरिगृहीता आरण्याः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पशवः ॥१०॥ बहिः स्तुवन्त्यन्तरनु शँसन्ति तस्माद् ग्राममाहृतैर्भुञ्जते ॥११॥ ग्राम्येभ्यो वा एतत्पशुभ्यः स्तुवन्ति यदाज्यैर्न्नानारूपैः स्तुवन्ति तस्मान्नानारूपा ग्राम्याः पशवः ॥१२॥ पुनरभ्यावर्त्तँ स्तुवन्ति तस्मात्प्रेत्वर्य्यः प्रेत्य पुनरायन्ति ॥१३॥ परिश्रिते स्तुवन्ति तस्मात्परिगृहीता ग्राम्याः पशवः ॥१४॥ अमुष्मै वा एतल्लोकाय स्तुवन्ति यद्बहिष्पवमानँ सकृद्धिङ्कृताभिः पराचीभिः स्तुवन्ति सकृद्धीतोऽसौ पराङ् लोकः ॥१५॥ अस्मै वा एतल्लोकाय स्तुवन्ति यदाज्यैः पुनरभ्यावर्त्तँ स्तुवन्ति तस्मादयँल्लोकः पुनः पुनः प्रजायते ॥१६॥ पराञ्चो वा एतेषां प्राणा भवन्तीत्याहुर्य्ये पराचीभि-र्ब्बहिष्पमानीभिः स्तुवत इत्यावतीमुत्तमां गायेत्प्राणानान्धृत्यै ॥१७॥ च्यवन्ते वा एतेऽस्माल्लोकादित्याहुर्य्ये पराचीभिर्ब्बहि-ष्पवमानीभिः स्तुवत इति रथन्तरवर्ण्णामुत्तमाङ्गायेदियँ वै रथन्तरमस्यामेव प्रतितिष्ठति ॥१८॥ इत्यष्टमः खण्डः ॥६/८॥

उपास्मै गायता नर इति ग्रामकामाय प्रतिपदं कुर्य्यात् ॥१॥ नरो वै देवानां ग्रामो ग्राममेवास्मा उपाकः ॥२॥ उप वा अन्नमन्नमेवास्मा उपाकः ॥३॥ उपोषु जातमप्तुरमिति प्रजाकामाय प्रतिपदं कुर्य्यात् ॥४॥ उप वै प्रजा तां जातमित्येवाजीजनत् ॥५॥ स नः पवस्व शङ्गव इति प्रतिपदं कुर्य्यात् ॥६॥ याँ समां महादेवः पशून् हन्यात्स नः पवस्व शङ्गव इति चतुष्पदे भेषजं करोति ॥७॥ शञ्जनायेति द्विपदे शमर्व्वत इत्येकशफाय ॥८॥ विषेण वै ताँ समामोषधयोऽक्ता भवन्ति याँ समाम्महादेवः पशून् हन्ति यच्छँ राजन्नोषधीभ्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इत्याहौषधीरेवास्मै स्वदयत्युभय्योऽस्मै स्वदिताः पच्यन्तेऽ-कृष्टपच्याश्च कृष्टपच्याश्च ॥९॥ पवस्व वाचो अग्रिय इति प्रतिपदं कुर्य्याद्यं कामयेत समानानाँ श्रेष्ठः स्यादिति ॥१०॥ पवस्व वाचो अग्रिय इत्यग्रमेवैनं परिणयति ॥११॥ श्रीर्व्वै वाचोऽग्रँ श्रियमेवास्मिन्दधाति ॥१२॥ एते असृग्रमिन्दव इति बहुभ्यः प्रतिपदं कुर्य्यात् ॥१३॥ एत इति सर्व्वानेवैनानृद्ध्यै भूत्या अभिवदति ॥१४॥ एत इति वै प्रजापतिर्द्देवान-सृजतासृग्रमिति मनुष्यानिन्दव इति पितॄँस्तिरः पवित्र इति ग्रहानाशव इति स्तोत्रँ विश्वानीति शस्त्रमभि सौभगेत्यन्याः प्रजाः ॥१५॥ यदेत इति तस्माद्यावन्त एवाग्रे देवास्तावन्त इदानीम् ॥१६॥ सर्व्वान्वृद्धिमार्ध्नुवँ स्थितेव ह्येषा व्याहृतिः ॥१७॥ यदसृग्रमिति तस्मान्मनुष्याः श्वः श्वः सृज्यन्ते ॥१८॥ यदिन्दव इतीन्दव इव हि पितरः ॥१९॥ मन इव ॥२०॥ यान्ताः प्रजाः सृष्टा ऋद्धिमार्ध्नुवँ स्तामृध्नुवन्ति येषामेवँ विद्वानेतां प्रतिपदं करोति ॥२१॥ छन्दाँसि वै सोममाहरँ स्तं गन्धर्व्वो विश्वावसुः पर्य्यमुष्णात्तेनापः प्राविशत्तं देवता अन्वैच्छँ स्तँ विष्णुरप्सु पर्य्यपश्यत् स व्याकाङ्क्षदयन्नू ३ ना ३ इति तां पदा प्रास्फुरत्तस्मात्पृथगिन्दवोऽसृज्यन्त स देवताभ्योऽभित-स्तिष्ठन्तीभ्य एते असृग्रमिन्दव इति प्राब्रवीद्बहिष्पवमानेन वै यज्ञः सृज्यते यदेते असृग्रमिन्दव इति प्रस्तौति यज्ञमेव तत्सृष्टन्देवताभ्यः प्राह ॥२२॥ व्यृद्धँ वा एतदपश्यँ यत्प्रातः सवनमनिडँ हियदिडामस्मभ्यँ सँयतमित्याह प्रातः सवनमेव तदिडावत्पशुमत्करोति॥२३॥ दविद्युतत्या रुचेति व्राताय प्रतिपदं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कुर्य्यात् ॥२४॥ दविद्युतत्या रुचेति वै गायत्र्या रूपं परिष्टोभन्त्येति त्रिष्टुभः कृपेत्यनुष्टुभः सोमाः शुक्रा गवाशिर इति जगत्याः सर्व्वेषाँ वा एषा छन्दसाँ रूपं छन्दाँसीव खलु वै व्रातोपदेषा प्रतिपद्भवति स्वेनैवैनाँस्तद्रूपेण समर्द्धयति ॥२५॥ वृद्धा वा एत इन्द्रियेण वीर्य्येण यद्व्रात इन्द्रियँ वीर्य्यं छन्दाँसीन्द्रियेणैवैनान्वीर्य्येण समर्द्धयति॥२६॥इतिनवमःखण्डः॥६/९॥

अग्गन आयूँषि पवस इति प्रतिपदं कुर्य्याद्येषां दीक्षितानां प्रमीयेत ॥१॥ अपूता इव वा एते येषां दीक्षितानां प्रमीयते यद्येषाग्निपावमानी प्रतिपद्भवत्यग्निरेवैनान्निष्टपति पवमानः पुनाति ॥२॥ यदायूँषीत्याह य एव जीवन्ति तेष्वायुर्द्दधाति ॥३॥ आनो मित्रावरुणेति ज्योगामयाविने प्रतिपदं कुर्य्यात् ॥४॥ अपक्रान्तौ वा एतस्य प्राणापानौ यस्य ज्योगामयति प्राणापानौ मित्रावरुणौ प्राणापानावेवास्मिन्दधाति ॥५॥ अपघ्नन्पवते मृधोपसोमो अराव्ण इत्यनृतमभिशस्यमानाय प्रतिपदं कुर्य्यात् ॥६॥ अरावाणो वा एते येऽनृतमभि शँसन्ति तानेवास्मादपहन्ति ॥७॥ गच्छन्निन्द्रस्य निष्कृतमिति पूतमेवैनँ यज्ञियमिन्द्रस्य निष्कृतं गमयति ॥८॥ वृषा पवस्व धारयेति राजन्याय प्रतिपदं कुर्य्याद्वृषा वै राजन्यो वृषाणमेवैनं करोति ॥९॥ मरुत्वते च मत्सर इति मरुतो वै देवानां विशो विशमेवास्मा अनु नियुनक्त्यनपक्रामुकाऽस्माद्विड्भवति ॥१०॥ विश्वा दधान ओजसेत्योजसैवास्मै वीर्य्येण विशं पुरस्तात्परि गृह्णात्यनपक्रामुकास्माद्विड्भवति॥११॥ पवस्वेन्द्रो वृषा सुत इति प्रतिपदं कुर्य्याद्यः कामयेत जने म ऋध्येतेति ॥१२॥ कृधी नो यशसो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जन इति जनतायामेवास्मा ऋध्यते ॥१३॥ युवँ हि स्थः स्वः पती इति द्वाभ्यां प्रतिपदं कुर्य्यात्समावद्ध्राजावेवैनौ यज्ञस्य करोत्युभौ यज्ञयशसेनार्प्पयति ॥१४॥ प्रास्य धारा अक्षरन्निति वृष्टिकामाय प्रतिपदं कुर्य्यात् ॥१५॥ प्रास्य धारा अक्षरन्निति दिवो वृष्टिञ्च्यावयति वृष्णः सुतस्यौजस इत्यन्तरिक्षात् ॥१६॥ देवाँ अनु प्रभूषत इत्यस्मिँल्लोके प्रतिष्ठापयति ॥१७॥ ओजसा वा एतद्वीर्य्येण प्रदीयते यदप्रत्तं भवति यद्वृष्णः सुतस्यौजस इत्याहौजसैवास्मै वीर्य्येण दिवो वृष्टिं प्रयच्छति ॥१८॥ तया पवस्व धारया यया गाव इहागमञ्जन्यास उप नो गृहमिति प्रतिपदं कुर्य्याद्यः कामयेतोप मा जन्या गावो नमेयुर्व्विन्देत मे जन्या गा राष्ट्रमिति यदेषा प्रतिपद्भवत्युपैन-ञ्जन्या गावो नमन्ति विन्दतेऽस्य जन्या गा राष्ट्रम् ॥१९॥ इति दशमः खण्डः॥६/१०॥ **इति षष्ठोऽध्यायः**

अथ सप्तमोऽध्यायः

इमे वै लोका गायत्रं त्र्यावृद्वेयन्त्रयो हीमे लोका यत्त्र्यावृद्गायत्येभिरेवैनँ लोकैः सम्मिमीते ॥१॥ द्विरवनर्द्दे-द्धिङ्कुर्य्यात्तृतीयम् ॥२॥ यत्त्रिरवनर्द्दत्यति तद्गायत्रँ रेचयति ॥३॥ यो वै गायत्रेणाप्रतिहृतेनोद्गायत्यप्रतिष्ठानो भवति हिङ्कारो वै गायत्रस्य प्रतिहारः ॥४॥ स मनसा ध्येयः प्रतिहृतेन गायत्रेणोद्गायति प्रतितिष्ठति ॥५॥ यो वा एभ्यो लोकेभ्यो गायत्रं गायति नैभ्यो लोकेभ्य आवृश्च्यत इम एनँल्लोका ऊर्ज्जाऽभि सँवसते ॥६॥ मन्द्रमिवाग्र आददीताथ तारतरमथ तारतम

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्तदेभ्यो लोकेभ्योऽगासीत् ॥७॥ अनिरुक्तङ्गेयमेतद्वै गायत्रस्य क्रूरँ यन्निरुक्तँ यदनिरुक्तं गायति क्रूरमेवास्य परिवृणक्ति ॥८॥ प्राणो गायत्रन्न व्यवान्यात्प्राणस्याविच्छेदाय यदि व्यवानिति प्रमायुको भवति यदि न व्यवानिति सर्व्वमायुरेति ॥९॥ यदि व्यवान्यान्मध्य ऋचो व्यवान्यात्प्राणो वै गायत्रं प्राणः स्वरः प्राणमेव तन्मध्यत आत्मन्दधाति स सर्व्वमायुरेति ॥१०॥ इडां पशुकामाय निधनं कुर्य्यात्स्वः स्वर्गकामाय यशो ब्रह्मवर्च्चस कामायायुरामयाविने हँसीत्यभिचरते ॥११॥ एते वै गायत्रस्य दोहाः ॥१२॥ ब्रह्मवर्च्चसी पशुमान् भवति य एवँ वेद ॥१३॥ इति प्रथमः खण्डः॥७/१॥

प्रजापतिर्द्देवेभ्य आत्मानँ यज्ञं कृत्वा प्रायच्छत्तेऽन्योऽन्यस्मा अग्राय नातिष्ठन्त तानब्रवीदाजिम स्मिन्निततेति त आजिमायन्यदाजिमायँ स्तदाज्यानामाज्यत्वम् ॥१॥ स इन्द्रोऽवेदग्निर्व्वा इदमग्र उज्जेष्यतीति सोऽब्रवीद्यतरोनाविदमग्र उज्जयत्तनौ सहेति सोऽग्निरग्र उदजयदथ मित्रावरुणावथेन्द्रोऽथैषैका होत्रानुज्जितासीत्स इन्द्राग्निमब्रवीद्यत्सहावोचावही यन्नौ तदिति सैषैन्द्राग्गन्यध्यर्द्धमग्गने स्तोत्रमध्यर्द्धमिन्द्रस्य ॥२॥ चत्वारि सन्ति षड्दैवत्यानि ॥३॥ षड्धा विहितो यज्ञो यावान्यज्ञस्तमेवारभते ॥४॥ सर्व्वाणि स्वाराण्याज्यानि तज्जामि नानादेवत्यैः स्तुवन्त्यजामितायै ॥५॥ ग्राम्येभ्यो वा एतत्पशुभ्यः स्तुवन्ति यदाज्यैः पुनरभ्यावर्त्तँ स्तुवन्ति तस्मात्पराञ्चः प्राज्यन्ते प्रत्यञ्चः प्रजायन्ते तस्मादु प्रेत्य पुनरायन्ति ॥६॥ इति द्वितीयः खण्डः ॥७/२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतावता वाव माध्यन्दिनँ सवनं पुपुवे ॥१॥ त्रिभिश्च छन्दोभिः पञ्चभिश्च सामभिः ॥२॥ यन्माध्यन्दिनेन पवमानेन स्तुवन्ति माध्यन्दिनमेव तत्सवनं पावयन्ति ॥३॥ एतावन्ति वाव सर्व्वाणि सामानि यावन्ति माध्यन्दिने पवमाने ॥४॥ गायत्रन्निधनवदनिधनमैडम् ॥५॥ यन्माध्यन्दिनेन पवमानेन स्तुवन्ति सर्व्वैरेव तत्सामभिः स्तुवन्ति ॥६॥ आत्मा वै यज्ञस्य पवमानो मुखं गायत्री प्राणो गायत्रँ यद्गायत्र्यां गायत्रेण स्तुवन्ति मुखत एव तत्प्राणान्दधति ॥७॥ प्राणापाना वा एतानि छन्दाँसि प्राणो गायत्री व्यानो बृहत्यपानस्त्रिष्टुब्यदेतैश्छन्दोभिस्स्तुवन्ति प्राणापानानामवि च्छेदाय ॥८॥ इमे वै लोका एतानि छन्दाँस्ययमेव गायत्र्ययम्मध्यमो बृहत्यसावुत्तमस्त्रिष्टुब्यदेतै-श्छन्दोभिः सँहितैः स्तुवन्त्येषाँ लोकानामविच्छेदाय ॥९॥ यदन्यच्छन्दोऽन्तरा व्यवेयादिमाँल्लोकान्विच्छिन्द्यात् ॥१०॥ गायत्रेण स्तुत्वा निधनवता स्तुवन्तीयँ वै गायत्र्यस्यामेव तदायतनं क्रियते ॥११॥ यदनिधनेनाग्रे स्तुयुरनायतनो यजमानः स्यात् ॥१२॥ निधनवता स्तुवन्ति वीर्य्यँ वै गायत्री वीर्य्यन्निधनँ वीर्य्येणैव तद्वीर्य्यँ समर्द्धयति ॥१३॥ ऐडेन बृहतीमारभन्ते ॥१४॥ पशवो वा इडा पशवो बृहती पशुष्वेव तत्पशून्दधाति ॥१५॥ बृहत्यां भूयिष्ठानि सामानि भवन्ति ॥१६॥ तत्रापि त्रिणिधनम् ॥१७॥ अबलिष्ठ इव वा अयम्मध्यमो लोकस्तस्यैव तदायतनं क्रियते ॥१८॥ त्रिणिधनं भवति त्रीणि सवनानां छिद्राणि तानि तेनापिधीयन्ते ॥१९॥ त्रिणिधनं भवति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति ॥२०॥ त्रिणिधनं भवत्येतेन वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

माध्यन्दिनँ सवनँ प्रतिष्ठितँ यत्त्रिणिधनँ यत्त्रिणिधनन्न स्यादप्रतिष्ठितम्माध्यन्दिनँ सवनँ स्यात् ॥२१॥ द्व्यक्षराणि निधनानि भवन्ति द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति॥२२॥अनिधनमन्ततो भवति स्वर्गस्य लोकस्या-नतिपादाय ॥२३॥ यन्निधनवत्स्याद्यजमानँ स्वर्गाल्लोकान्नि-र्हन्यात् ॥२४॥ स्वारं भवति ॥२५॥ स्वरेण वै देवेभ्योऽन्ततो ऽन्नाद्यं प्रदीयते स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्रयच्छति ॥२६॥ गायत्रं पुरस्ताद्भवति स्वारमन्ततः ॥२७॥ प्राणो वै गायत्रं प्राणः स्वरः प्राणानेव तदुभयतो दधाति तस्मादुभयतः प्राणाः पशवः ॥२८॥ यद्गायत्रं पुरस्ताद्भवति स्वारमन्ततः प्राणैरेव प्रैत्यपाने प्रतितिष्ठति ॥२९॥ इति तृतीयः खण्डः ॥७/३॥

एतद्वै यज्ञस्य स्वर्ग्यँ यन्माध्यन्दिनँ सवनम्माध्यन्दिनस्य पवमानः पवमानस्य बृहती यद्बृहत्याः स्तोत्रे दक्षिणा दीयन्ते स्वर्गस्यैव तल्लोकस्यायतने दीयन्ते ॥१॥ देवा वै छन्दाँस्य-ब्रुवन्युष्माभिः स्वर्गँल्लोकमयामेति ते गायत्रीं प्रायुञ्जत तया न व्याप्नुवँ स्त्रिष्टुभं प्रायुञ्जत तया न व्याप्नुवञ्जगती प्रायुञ्जत तया न व्याप्नुवन्ननुष्टुभं प्रायुञ्जत तयाऽल्पकादि न व्याप्नुवँ स्त आसान्दिशाँ रसान्प्रबृह्य चत्वार्य्यक्षराण्युपादधुः सा बृहत्यभवत्तयेमाँल्लोकान् व्याप्नुवन् ॥२॥ बृहतीमर्य्या य येमाँल्लोकान्व्यापामेति तद्बृहत्या बृहत्त्वम् ॥३॥ पशून्वा अस्यान्तानुपादधुः पशवो वै बृहती यद्बृहत्याः स्तोत्रे दक्षिणा दीयन्ते स्व एव तदायतने दीयन्ते ॥४॥ यन्वित्याहुरन्यानि छन्दाँसि वर्षीयाँसि कस्माद्बृहत्युच्यत इत्येषा हीमाँल्लोकान्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

व्याप्नोन्नान्यच्छन्दः किञ्चन यानि सप्तचतुरुत्तराणि छन्दाँसि तानि बृहतीमभिसम्पद्यन्ते तस्माद्बृहत्युच्यते ॥५॥ यन्नित्याहु-र्ग्गायत्रं प्रातःसवनं त्रैष्टुभम्माध्यन्दिनँ सवनञ्जागतं तृतीयसवनँ कस्माद्बृहत्या मध्यन्दिने स्तुवन्तीति ॥६॥ बहिष्पवमानेन वै देवा आदित्यँ स्वर्ग्गँल्लोकमहरन् स नाध्रियत तं बृहत्या मध्यन्दिने स्तभ्नुवँस्तस्माद्बृहत्या मध्यन्दिने स्तुवन्त्यादित्यँ ह्येषा मध्यन्दिने दाधार ॥७॥ यैरुकैश्च छन्दोभिर्म्मध्यन्दिने स्तुवन्ति तानि त्रिष्टुभमभि सम्पद्यन्ते तस्मात्त्रिष्टुभो नयन्ति माध्यन्दिनात्सवनात् ॥८॥ इति चतुर्थःखण्डः॥७/४॥

प्रजापतिरकामयत बहु स्यां प्रजायेयेति स शोचन्न महीयमानोऽतिष्ठत्स एतदामहीयवमपश्यत्तेनेमाः प्रजाः असृजत ताः सृष्टा अमहीयन्त यदमहीयन्त तस्मादामहीयवम् ॥१॥ ता अस्मात्सृष्टा अपाक्रामँस्तासान्दिवि सद्भूम्या दद इति प्राणानादत्त ता एनं प्राणेष्वात्तेषु पुनरुपावर्त्तन्त ताभ्य उग्रँ शर्म्म महिश्रव इति पुनः प्राणान् प्रायच्छत्ता अस्मादुदेवायोधँस्तासाँ स्तौष इति मन्यूनवाश्रृणोत्ततो वै तस्मै ताः श्रैष्ठ्यायातिष्ठन्त ॥२॥ तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय य एवँ वेद ॥३॥ प्रजानाञ्च वा एषा सृष्टिः पापवसीयश्च विधृतिर्य्यदामहीयवम् ॥४॥ विधृतिः पापवसीयसो भवति य एवँ वेद ॥५॥ देवा वै यशस्कामाः सत्रमासताग्गिन रिन्द्रो वायुर्म्मखस्तेऽब्रुवन्यन्नो यशऽऋच्छात्तन्नः सहासदिति तेषाम्मखँ यश आर्च्छत्तदादाया-पाक्रामत्तदस्य प्रासहादित्सन्त तं पर्य्ययतन्त स्वधनुः प्रतिष्ठभ्यातिष्ठत्तस्य धनुरार्त्निरूद्ध्वा पतित्वा शिरोऽच्छिनत्स

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रवर्ग्योऽभवद्यज्ञो वै मखो यत् प्रवर्ग्यं प्रवृञ्जन्ति यज्ञस्यैव तच्छिरः प्रतिदधति ॥६॥ तद्देवा यशो व्यभजन्त तस्याग्नी रौरवं प्राबृहत ॥७॥ तद्वै स पशुवीर्य्यं प्राबृहत पशवो वै रौरवम् ॥८॥ पशुमान्भवति य एवँ वेद ॥९॥ अग्निर्व्वै रूरस्तस्यैतद्रौरवम् ॥१०॥ असुरा वै देवान् पर्य्ययतन्त तत एतावग्नी रूरौ विष्वञ्चौ स्तोभावपश्यत्ताभ्या मेनान् प्रत्यौषत्ते प्रत्युष्यमाणा अरवन्त यदरवन्त तस्माद्रौरवम् ॥११॥ अथेन्द्रो यौधाजयं प्राबृहत तद्वै स वज्रं प्राबृहत वज्रो वै यौधाजयम् ॥१२॥ वज्रं भ्रातृव्याय प्रहरति य एवँ वेद॥१३॥ इन्द्रो वै युधाजित्तस्यैतद्यौधाजयम् ॥१४॥ युधामर्य्या अजैष्मेति तस्माद्यौधाजयम् ॥१५॥ अथ वायुरौशनं प्राबृहत ॥१६॥ तद्वै स प्राण वीर्य्यं प्राबृहत प्राणा वा औशनम् ॥१७॥ सर्व्वमायुरेति य एवँ वेद ॥१८॥ वायुर्व्वा उशनँस्तस्यैतदौशनम् ॥१९॥ उशना वै काव्योऽसुराणां पुरोहित आसीत्तं देवाः कामदुघाभिरुपामन्त्रयन्त तस्मा एतान्यौशनानि प्रायच्छत् कामदुघा वा औशनानि ॥२०॥ कामदुघा एनमुपतिष्ठन्ते य एवँ वेद ॥२१॥ इति पञ्चमः खण्डः॥७/५॥

प्रजापतिरकामयत बहु स्यां प्रजायेयेति स तूष्णीं मनसा ध्यायत्तस्य यन्मनस्यासीत्तद् बृहत्साम समभवत् ॥१॥ स आदधीत गर्ब्भो वै मेऽयमन्तर्हितस्तँ वाचा प्रजनया इति ॥२॥ स वाचँ व्यसृजत सा वाग्रथन्तरमन्वपद्यत ॥३॥ रथम्मर्य्याः क्षेप्लातारीदिति तद्रथन्तरस्य रथन्तरत्वम् ॥४॥ ततो बृहदनु प्राजयत बृहन्मर्य्या इदँ स ज्योगन्तरभूदिति तद्बृहतो बृहत्वम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥५॥ यथा वै पुत्रो ज्येष्ठ एवं बृहत्प्रजापतेः॥६॥ ज्येष्ठब्राह्मणँ वा एतत् ॥७॥ प्रज्यैष्ठ्यमाप्नोति य एवँ वेद ॥८॥ यन्वित्याहुर्बृहत्पूर्वं प्रजापतौ समभवत् कस्माद्द्रथन्तरं पूर्व्वँ योगमानश इति ॥९॥ बृहदेव पूर्व्वँ समभवद्रथन्तरन्तु पूर्वँ सृष्ट्यासृजत तस्मात्पूर्व्वँ योगमानशे ॥१०॥ तयोः समानन्निधनमासीत्तस्मिन्नातिष्ठेतान्त आजिमैता तयोर्हसिति बृहत्प्राणमुदजयदसिति रथन्तरमपानमभिसमवेष्टत ॥११॥ प्राणापानौ वै बृहद्रथन्तरे ज्योगामयाविन उभे कुर्य्यादपक्रान्तौ वा एतस्य प्राणापानौ यस्य ज्योगामयति प्राणापानावेवास्मिन्दधाति ॥१२॥ यन्वित्याहुरुभे बृहद्रथन्तरे बहिर्णिधने कस्माद् बृहद्बहिर्णिधनानि भजतेऽन्तर्णिधनानि रथन्तरमिति ॥१३॥ प्राणो बृहत्तस्माद्बहिर्णिधनानि भजते बहिर्हि प्राणोऽपानो रथन्तरं तस्मादन्तर्णिधनानि भजतेऽन्तर्ह्यपानः ॥१४॥ महावृक्षौ वै बृहद्रथन्तरे निधनेन समर्य्ये ॥१५॥ यद्वै महावृक्षौ समृच्छेते बहु तत्र विभग्नं प्रभग्नँ शेते ॥१६॥ ऐरँ वै बृहदैडँ रथन्तरम्मनो वै बृहद्वाग्रथन्तरँ साम वै बृहदृग्रथन्तरं प्राणो वै बृहदपानो रथन्तरमसौ वै लोको बृहदयँ रथन्तरमेतानि मनसान्वीक्ष्योद्गायेत् क्लृप्ताभ्यामेवाभ्यामुद्गायति ॥१७॥ इति षष्ठः खण्डः ॥ ७/६ ॥

पशवो वै बृहद्रथन्तरे अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौत्यष्टाशफाँस्तत्पशूनवरुन्धे ॥१॥ द्व्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति ॥२॥ पञ्चाक्षरेण रथन्तरस्य प्रतिहरति पाङ्क्तस्तत्पशूनवरुन्धे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥३॥ चतुरक्षरेण बृहतः प्रतिहरति चतुष्पदस्तत्पशूनवरुन्धे ॥४॥ न वै बृहन्न रथन्तरमेकञ्छन्दो यच्छत्ततः ककुभावुत्तरे उपादधुस्तस्माद्बृहती प्रथमा ककुभावुत्तरे तस्माद्बृहद्रथन्तरे एकर्च्चेन कुर्व्वन्ति न हि ते एकञ्छन्दोऽयच्छत् ॥५॥ नव बृहतो रोहान् रोहति नव प्राणाः प्राणानेवावरुन्धे ॥६॥ त्रीन् प्रथमायाँ रोहति भूतं भवद्भविष्यत्तानेवावरुन्धे त्रीन् मध्यमायाँ रोहत्यात्मानं प्रजां पशूँस्तानेवावरुन्धे त्रीनुत्तमायाँ रोहति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति ॥७॥ सर्व्वान् कामानवरुन्धे य एवँ विद्वान् बृहतो रोहान्रोहति ॥८॥ वज्रेण वा एतत्प्रस्तोतोद्गातारमभि प्रवर्त्तयति यद्रथन्तरं प्रस्तौति समुद्द्रमन्तर्द्धायोद्गायेद्वागित्यादेयँ वाग्वै समुद्द्रः समुद्द्र-मेवान्तर्द्दधात्यहिँसायै ॥९॥ बलवद्देयँ वज्रमेवं प्रवृत्तं प्रत्युद्गृह्णाति ॥१०॥ वल्वला कुर्व्वता गेयमभिलोभयतेव वज्रमेवाभिलोभयति ॥११॥ क्षिप्रं गेयं स्वर्ग्गस्य लोकस्य समष्ट्यै ॥१२॥ देवरथो वै रथन्तरमक्षरेणाक्षरेण प्रतिष्ठापयतो-द्गेयमरेणारेण हि रथः प्रतितिष्ठति ॥१३॥ यो वै देवरथमनन्वा-लभ्यातिष्ठत्यवास्मात्पद्यत इयँ वै देवरथ इमामालभ्योद्गायेन्ना-स्मादवपद्यते ॥१४॥ ईश्वरँ वै रथन्तरमुद्गातुश्चक्षुः प्रमथितोः प्रस्तूयमाने सम्मीलेत्स्वर्दृशं प्रतिवीक्षेत नैनञ्चक्षुर्ज्जहाति ॥१५॥ प्रजननँ वै रथन्तरँ यत्तस्थुष इत्याहास्थायुकोद्गातुर्व्वा-ग्भवत्यपि प्रजननँ हन्त्यस्थुष इति वक्तव्यँ सुस्थुष इति वास्थायुकोद्गातुर्व्वाग्भवति न प्रजननमपि हन्ति ॥१६॥ पृष्ठानि वा असृजन्त तैर्द्देवाः स्वर्ग्गँ लोकमायँस्तेषां रथन्तरम्महिम्ना

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नाशक्नोदुत्पतत् ॥१७॥ तस्य वसिष्ठो महिम्नो विनिधाय तेन स्तुत्वा स्वर्गँल्लोकमैत्तान् सम्भृत्योद्गायेत् ॥१८॥ यस्ते गोषु महिमा यस्ते अप्सु रथे वा ते स्तनयित्नौ य उ ते यस्ते अग्नौ महिमा तेन सम्भव रथन्तर द्रविणवन्न एधि ॥१९॥ इति सप्तमः खण्डः ॥७/७॥

अपो वा ऋत्व्यमार्च्छत्तासाँ वायुः पृष्ठे व्यवर्त्तत ततो वसु वामँ समभवत्तस्मिन् मित्रावरुणौ पर्य्यपश्यतां तावब्रूताँ वामं मर्य्या इदं देवेष्वाजानीति तस्मा द्वामदेव्यम् ॥१॥ तत्परिगृह्णन्तावब्रूतामिदमविदावेदन्नौमाभ्यर्त्तिद्वमिति तत्प्रजापतिरब्रवीन्मह्वा एतदद्ध्यजनि मम वा एतदिति तदग्निरब्रवीन्मा वा एतदन्नमजनि मम वा एतदिति तदिन्द्रोऽब्रवीच्छ्रेष्ठस्था वा एतदहँ वः श्रेष्ठोऽस्मि मम वा एतदिति तद्विश्वेदेवा अब्रुवन्नस्मद्देवत्यँ वा एतद्यदद्भ्योऽधि समभूदस्माकँ वा एतदिति तत्प्रजापतिरब्रवीत्सर्व्वेषान्न इदमस्तु सर्व्व इदमुपजीवामेति तत्पृष्ठेषु न्यदधुः सर्व्वदेवत्यँ वै वामदेव्यम् ॥२॥ यत्कवतीषु तेन प्राजापत्यं को हि प्रजापतिर्य्यदनिरुक्तासु तेन प्राजापत्यमनिरुक्तो हि प्रजापतिः ॥३॥ यद्गायत्रीषु तेनाग्नेयं गायत्रच्छन्दा ह्यग्निः ॥४॥ यत्पृष्ठेषु न्यदधुस्तेनैन्द्रँ सर्व्वाणि हि पृष्ठानीन्द्रस्य निष्केवल्यानि ॥५॥ यन्मैत्रावरुणोऽनुशँसति तेन मैत्रावरुणम् ॥६॥ यद्बहुदेवत्यमुत्तमं पदं तेन वैश्वदेवँ सर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥७॥ प्रजापतिर्व्वा एतां गायत्रीँ योनिमपश्यत्स आदीधीतास्माद्योनेः पृष्ठानि सृजा इति ॥८॥ स रथन्तरमसृजत तद्रथस्य घोषोऽन्वसृज्यत ॥९॥ स

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बृहदसृजत तत्स्तनयित्नोर्घोषोऽन्वसृज्यत स वैरूपमसृजत तद्वा तस्य घोषोऽन्वसृज्यत ॥१०॥ स वैराजमसृजत तदग्नेर्घोषोऽन्वसृज्यत॥११॥स शक्वरीरसृजत तदपाङ्घोषोऽन्वसृज्यत ॥१२॥ स रेवतीरसृजत तद्गवां घोषोऽन्वसृज्यत ॥१३॥ एतैर्व्वा एतानि सह घोषैरसृज्यन्त ॥१४॥ सर्व्वेऽस्मिन् घोषाः सर्व्वाः पुण्या वाचो वदन्ति य एवँ वेद ॥१५॥ इत्यष्टमः खण्डः॥७/८॥

पिता वै वामदेव्यं पुत्राः पृष्ठानि ॥१॥ एतस्माद्वा एतानि योनेरसृज्यन्त ॥२॥ तस्मात्पृष्ठानाँ स्तोत्रँ वामदेव्येनानुष्टुवन्ति शान्त्यै ॥३॥ यद्धि पुत्रोऽशान्तं चरति पिता तच्छमयति ॥४॥ अयँ वै लोको मध्यमो वामदेव्यमेतस्माद्वा इमौ लोकौ विष्वञ्चावसृज्येतां बृहच्च रथन्तरञ्च ॥५॥ यद्रथन्तरेण स्तुवन्ति ये रथन्तराः पशवोऽन्तरिक्षन्त उपश्रयन्ति यद्बृहता स्तुवन्ति ये बार्हताः पशवोऽन्तरिक्षन्त उपश्रयन्ति ते वामदेव्यस्य स्तोत्रेणावरुद्धाः॥६॥ ध्रुव आसीनो वामदेव्येनोद्गायेत्पशूनामुपवृत्त्यै ॥७॥ उपैनं पशव आवर्त्तन्ते य एवँ वेद ॥८॥ अन्तरिक्षँ वै वामदेव्यमधून्वतेवोद्गेयमधूतमिवान्तरिक्षं पशवो वै वामदेव्यमहिँसतेवोद्गेयं पशूनामहिँसायै॥९॥ कथमिव वामदेव्यं गेयमित्याहुः॥१०॥यथाङ्कुली पुत्रान् सन्दश्यासम्भिन्दती हरति यथा वातोऽप्सु शनैर्व्वाति ॥११॥ स्वधूर्व्वामदेव्यङ्गेयम् ॥१२॥ यो वै स्वधूर्व्वामदेव्यङ्गायति स्वधूर्भवति ॥१३॥ यात्यस्यान्यो नियानेन नान्यस्य नियानेन याति ॥१४॥ न बृहतो न रथन्तरस्यानुरूपं गेयँ स्वेनैवायतनेन गेयमायतनवान् भवति ॥१५॥ देवा वै पशून्व्यभजन्त ते रुद्रमन्तरायँ स्तान्वामदेव्यस्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्तोत्र उपेक्षते ॥१६॥ अनिरुक्तं गेयम् ॥१७॥ यन्निराह रुद्राय पशूनपि दधाति रुद्रस्ताँ पशून् घातुको भवति ॥१८॥ रेवतीषु वामदेव्येन पशुकामः स्तुवीत ॥१९॥ आपो वै रेवत्यः पशवो वामदेव्यमद्भ्य एवास्मै पशून् प्रजनयति ॥२०॥ अनवर्त्तिः पशुतो भवति प्रजात्वस्य मीलितैव भवति ॥२१॥ कवतीभ्यो ह्येति प्रजापतेः ॥२२॥ इति नवमः खण्डः ॥७/९॥

इमौ वै लोकौ सहास्तान्तौ वियन्तावब्रूताँ विवाहँ विवहावहै सह नावास्त्विति ॥१॥ तयोरयममुष्मै श्यैतं प्रायच्छन्नौधसमसावस्मै ॥२॥ तत एनयोर्न्निधने विपर्य्यक्रामतां देव विवाहो वै श्यैतनौधसे ॥३॥ प्र वसीयाँसँ विवाहमाप्नोति य एवँ वेद ॥४॥ इतो वा इमे लोका ऊद्ध्र्वाः कल्पमानाय-न्त्यमुतोऽर्व्वाञ्चः कल्पमाना आयन्ति ॥५॥ यद्रथन्तरेण स्तुवन्तीमँल्लोकं तेन युनक्त्यन्तरिक्षँ वामदेव्येन नौधसेनामुँ यद्बृहता स्तुवन्त्यमुँल्लोकं तेन युनक्त्यन्तरिक्षँ वामदेव्येन श्यैतेनेमम् ॥६॥ क्लृप्तानिमाँल्लोकानुपास्ते य एवँ वेद ॥७॥ बृहद्रथन्तरे वै श्यैतनौधसे यद्रथन्तराय नौधसं प्रति प्रयुञ्जन्ति बृहदेवास्मै तत्प्रति प्रयुञ्जन्ति बृहद्ध्येतत्परोक्षँ यन्नौधसँ यद्बृहते श्यैतं प्रति प्रयुञ्जन्ति रथन्तरमेवास्मै तत्प्रतिप्रयुञ्जन्ति रथन्तरँ ह्येतत्परोक्षँ यच्छ्यैतम् ॥८॥ उभाभ्यां बृहद्रथन्तराभ्याँ स्तुते य एवँ वेद ॥९॥ देवा वै ब्रह्म व्यभजन्त तान्नोधाः काक्षीवत आगच्छत्तेऽब्रुवन्नृषिर्न्न आगँस्तस्मै ब्रह्म ददामेति तस्मा एतत्साम प्रायच्छन्यन्नौधसे प्रायच्छँस्तस्मान्नौधसं ब्रह्म वै नौधसम् ॥१०॥ ब्रह्मवर्च्चसकाम एतेन स्तुवीत ब्रह्मवर्च्चसी

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति ॥११॥ अथैतच्छ्यैतम् ॥१२॥ प्रजापतिः पशूनसृजत तेऽस्मात्सृष्टा अपाक्रामँस्तानेतेन साम्नाभिव्याहरत्तेऽस्मा अतिष्ठन्त ते श्येत्या अभवन् यच्छ्येत्या अभवँस्तस्माच्छ्यैतं पशवो वै श्यैतम् ॥१३॥ पशुकाम एतेन स्तुवीत पशुमान् भवति ॥१४॥ प्रजापतिः प्रजा असृजत ताः सृष्टा अशोचँस्ताः श्यैतेन हुं मा इत्यभ्रजिघ्रत्ततो वै ताः समैधन्त समेधन्ते ताँ समां प्रजा यत्रैवँ विद्वाञ्छ्यैतेनोद्गायति ॥१५॥ एष वै यजमानस्य प्रजापतिर्य्यदुद्गाता यच्छ्यैतेन हिङ्करोति प्रजापतिरेव भूत्वा प्रजा अभिजिघ्रति ॥१६॥ वसुनिधनं भवति पशवो वै वसु पशुष्वेव प्रतितिष्ठति ॥१७॥ इति दशमः खण्डः ॥७/१०॥ **इति सप्तमोऽध्यायः**

अथाष्टमोऽध्यायः

आष्कारणिधनं काण्वँ वषट्कारणिधनमभिचरणीयस्य ब्रह्मसाम कुर्य्यादभिनिधनम्माध्यन्दिने पवमाने ॥१॥ देवेषुर्व्वा एषा यद्वषट्कारोऽभीति वा इन्द्रो वृत्राय वज्ज्रं प्राहरद-भीत्येवास्मै वज्ज्रं प्रहृत्य देवेष्वा वषट्कारेण विध्यति ॥२॥ त्रैककुभं पशुकामाय ब्रह्मसाम कुर्य्यात् त्वमङ्ग प्रशँसिष इत्येतासु ॥३॥ इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तेषां त्रय उदशिष्यन्त रायो वाजो बृहद्गिरिः पृथुरश्मिस्तेऽब्रुवन् को नः पुत्रान् भरिष्यतीत्यहमितीन्द्रोऽब्रवीत्ताँस्त्रिककुबधिनिधाया चरत्स एतत्सामापश्यद्यत्त्रिककुबपश्यत्तस्मात्त्रैककुभम् ॥४॥ स आत्मानमेव पुनरुपाधावत्त्वमङ्ग प्रशँसिषो देवः शविष्ठमर्त्त्यं न

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वदन्यो मघवन्नस्ति च मर्डितेन्द्र ब्रवीमि ते वच इति स एतेन च प्रगाथेनैतेन साम्ना सहस्रं पशूनसृजत तानेभ्यः प्रायच्छत्ते प्रत्यतिष्ठन् ॥५॥ यः पशुकामः स्याद्यः प्रतिष्ठाकाम एतस्मिन् प्रगाथ एतेन साम्ना स्तुवीत प्रसहस्रं पशूनाप्नोति प्रतितिष्ठति ॥६॥ त्रिवीर्य्यँ वा एतत्साम त्रीन्द्रियमैन्द्र्य ऋच ऐन्द्रँ सामैन्द्रेति निधनमिन्द्रिय एव वीर्य्ये प्रतितिष्ठति ॥७॥ त्रैशोकं ज्योगाम-याविने ब्रह्मसाम कुर्य्यात् ॥८॥ इमे वै लोकाः सहासँ स्तेऽशोचँस्तेषामिन्द्र एतेन साम्ना शुचमपाहन्यत्त्रयाणाँ शोचतामपाहँस्तस्मात्त्रैशोकम्॥९॥ यामस्मादपाहन् सा पुँश्चलीं प्राविशद्यामन्तरिक्षात्सा क्लीबँ याममुष्मात्सैनस्विनम् ॥१०॥ तस्मात्तेषान्नाशैतव्या य एषामाशामेति तस्मा एव शुचोऽपभजते ॥११॥ शुचा वा एष विद्धो यस्य ज्योगामयति यत्त्रैशोकं ब्रह्मसाम भवति शुचमेवास्मादपहन्ति॥१२॥ दिवेति निधनमुप-यन्ति व्युष्टिर्व्वै दिवा व्येवास्मै वासयति ॥१३॥ इति प्रथमः खण्डः ॥८/१॥

आष्कारणिधनं काण्वं प्रतिष्ठाकामाय ब्रह्मसाम कुर्य्यात् ॥१॥ कण्वो वा एतत्सामर्त्ते निधनमपश्यत् स न प्रत्यतिष्ठत्स वृषदँशस्याषिति क्षुवत उपाश्रृणोत्स तदेव निधनमपश्यत्ततो वै स प्रत्यतिष्ठद्यदेतत्साम भवति प्रतिष्ठित्यै ॥२॥ वसिष्ठस्य जनित्रं प्रजाकामाय ब्रह्मसाम कुर्य्यात् ॥३॥ वसिष्ठो वा एतत्पुत्रहतः सामापश्यत्स प्रजया पशुभिः प्राजायत यदेतत्साम भवति प्रजात्यै ॥४॥ आथर्व्वणं लोककामाय ब्रह्मसाम कुर्य्यात् ॥५॥ अथर्व्वाणो वा एतल्लोक कामाः सामापश्यँस्तेनामर्त्त्यँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ल्लोकमपश्यन् यदेतत्साम भवति स्वर्गस्य लोकस्य प्रजात्यै ॥६॥ अभीवर्त्तं भ्रातृव्यवते ब्रह्मसाम कुर्य्यात् ॥७॥ अभीवर्त्तेन वै देवा असुरानभ्यवर्त्तन्त यदभीवर्त्तो ब्रह्मसाम भवति भ्रातृव्यस्याभिवृत्यै ॥८॥ श्रायन्तीयं यज्ञविभ्रष्टाय ब्रह्मसाम कुर्य्यात् ॥९॥ प्रजापतिरुषसमध्यैस्त्वां दुहितरं तस्य रेतः परापतत्तदस्यां न्यषिच्यत तदश्रीणादिदं मे माऽदुषदिति तत्सदकरोत्पशूनेव ॥१०॥ यच्छ्रायन्तीयं ब्रह्मसाम भवति श्रीणाति चैवैनँ सच्च करोति॥११॥ इति द्वितीयः खण्डः ॥८/२॥

देवाश्च असुराश्चैषु लोकेष्वस्पर्द्धन्त ते देवाः प्रजापति-मुपाधावँस्तेभ्य एतत्साम प्रायच्छदेतेनैनान् कालयिष्यद्ध्वमिति तेनैनानेभ्यो लोकेभ्योऽकालयन्त यदकालयन्त तस्मात्कालेयम् ॥१॥ एभ्यो वै लोकेभ्यो भ्रातृव्यं कालयते य एवँ वेद ॥२॥ स्तोमो वै देवेषु तरो नामासी द्यज्ञोऽसुरेषु विदद्वसुस्ते देवास्तरोभिर्व्वो विदद्वसुमिति स्तोमेन यज्ञमसुराणामवृञ्जत ॥३॥ स्तोमेन यज्ञं भ्रातृव्यस्य वृङ्क्ते य एवँ वेद ॥४॥ साध्या वै नाम देवा आसँ स्तेऽवच्छिद्य तृतीयसवनम्माध्यन्दिनेन सवनेन सह स्वर्गँल्लोकमायँ स्तद्देवाः कालेयेन समतन्व-न्यत्कालेयं भवति तृतीयसवनस्य सन्तत्यै ॥५॥ विदद्वसु वै तृतीयसवनं यत्तरोभिर्व्वो विदद्वसुमिति प्रस्तौति तृतीयसवनमेव तदभ्यति वदति ॥६॥ सर्व्वाणि वै रूपाणि कालेयँ यत्पदप्रस्तावं तेन राथन्तरं यद्बृहतो रोहान् रोहति तेन बार्हतं यत्स्तोभवान् प्रतिहारस्तेन बार्हतँ यद्रवदिडस्तेन राथन्तरँ सर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥७॥ इति तृतीयः खण्डः ॥८/३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

साध्या वै नाम देवा आसँस्ते सर्व्वेण यज्ञेन सह स्वर्गँल्लोकमायँ स्ते देवाश्छन्दाँस्यब्रुवन् सोममाहरतेति ते जगतीं प्राहिण्वन् सा त्रीण्यक्षराणि हित्वैकाक्षरा भूत्वागच्छ-त्रिष्टुभं प्राहिण्वन् सैकमक्षरँ हित्वा त्र्यक्षरा भूत्वागच्छद्गायत्रीं प्राहिण्वँश्चतुरक्षराणि वै तर्हि छन्दाँस्यासन् सा तानि चाक्षराणि हरन्त्यागच्छदष्टाक्षरा भूत्वा त्रीणि च सवनानि हस्ताभ्यां द्वे सवने दन्तैर्द्दँष्ट्वा तृतीयसवनं तस्माद्द्वे अँशुमती सवने धीतं तृतीयसवनं दन्तैर्हि तद्दँष्ट्वा धयन्त्यहरत्तस्य ये ह्रियमाण-स्याँशवः परापतँस्ते पूतीका अभवन् यानि पुष्पाण्यवाशीयन्त तान्यर्ज्जुनानि यत्प्राप्रोथत्ते प्रप्रोथास्तस्मात्तृतीयसवन आशिर-मवनयन्ति यमेव तं गावः सोममदन्ति तस्य तँ रसमवनयन्ति ससोमत्वाय ॥१॥ ते त्रिष्टुब्जगत्यौ गायत्रीमब्रूतामुपत्वायावेति साऽब्रवीत् किं मे ततः स्यादिति यत्कामयस इत्यब्रूताँ साब्रवीन्मम सर्व्वं प्रातःसवनमहमुत्तरे सवने प्रणयानीति तस्माद्गायत्रं प्रातःसवनं गायत्र्युत्तरे सवने प्रणयति ॥२॥ तान् त्रिष्टुप् त्रिभिरक्षरैरुपैत्सैकादशाक्षरा भूत्वा प्राजायत ताञ्जगत्येकेनाक्षरेणोपैत्सा द्वादशाक्षरा भूत्वा प्राजायत ॥३॥ तस्मादाहुर्ग्गायत्री वाव सर्व्वाणि छन्दाँसि गायत्री ह्येतान् पोषान् पुष्यन्त्यैदिति ॥४॥ इन्द्रस्तृतीयसवनाद्बीभत्समान उदक्रामत्तद्देवाः स्वादिष्ठयेत्यस्वदयन्मदिष्ठयेति मद्वदकुर्व्वन् पवस्व सोम धारयेत्यपावयन्निन्द्राय पातवे सुत इति ततो वै तदिन्द्र उपावर्त्तत यत् स्वादिष्ठया मदिष्ठयेति प्रस्तौति तृतीयसवनस्य सेन्द्रत्वाय ॥५॥ स्वादिष्ठा वै देवेषु पशव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आसन् मदिष्ठा असुरेषु ते देवाः स्वादिष्ठया मदिष्ठयेति पशूनसुराणामवृञ्जत ॥६॥ पशून् भ्रातृव्यस्य वृङ्क्ते य एवँ वेद ॥७॥ तासु सँहितम् ॥८॥ साध्या वै नाम देवा आसँस्तेऽवच्छिद्य तृतीयसवनम्माध्यन्दिनेन सवनेन सह स्वर्गँ ल्लोकमायँस्तद्देवाः सँहितेन समदधुर्य्यत्समदधुस्तस्मा-त्सँहितम् ॥९॥ कालेयं पुरस्ताद्भवति सँहितमुपरिष्टादेताभ्याँ हि तृतीयसवनँ सन्तायते ॥१०॥ सर्व्वाणि वै रूपाणि सँहितँ यत्पदप्रस्तावन्तेन राथन्तरँ यद्बृहतो रोहान् रोहति तेन बार्हतँ यत्पदनिधनं तेन राथन्तरँ सर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥११॥ इति चतुर्थः खण्डः ॥८/४॥

उष्णिक्ककुभावेते भवतः॥१॥ उष्णिक्ककुब्भ्याँ वा इन्द्रो वृत्राय वज्ज्रं प्राहरत्ककुभि पराक्रमतोष्णिहा प्राहरत्तस्मात् ककुभो मध्यमं पदं भूयिष्ठाक्षरं पराक्रमणँ हि तदभिसमौह-त्तस्मादुष्णिह उत्तमं पदं भूयिष्ठाक्षरं पुरो गुरुरिव हि वज्ज्रः ॥२॥ वज्ज्रं भ्रातृव्याय प्रहरति य एवँ वेद ॥३॥ नासिके वा एते यज्ञस्य यदुष्णिक्ककुभौ तस्मात्समानं छन्दः सती नाना यज्ञँ वहतस्तस्मात् समानाया नासिकायाः सत्या नाना प्राणा-वुच्चरतः ॥४॥ प्राणा वा उष्णिक्ककुभौ तस्मात्ताभ्यान्न वषट् कुर्व्वन्ति यद्वषट्कुर्य्युः प्राणानग्नौ प्रदध्युः ॥५॥ तासु सफँ विफमिव वै तृतीयसवनं तृतीयसवनस्य सफत्वायाथैत-त्पौष्कलमेतेन वै प्रजापतिः पुष्कलान् पशूनसृजत तेषु रूपमदधाद्यदेतत्साम भवति पशुष्वेव रूपं दधाति ॥६॥ पुरोजिती वो अन्धस इति पद्या चाक्षर्य्या च विराजौ भवतः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पद्यया वै देवाः स्वर्गँल्लोकमायन्नक्षर्य्यया ऋषयो नु प्राजानन्यदेते पद्याचाक्षर्य्या च विराजौ भवतः स्वर्गस्य लोकस्य प्रज्ञात्यै ॥७॥ तासु श्यावाश्वम् ॥८॥ श्यावाश्वमार्व्व-नानसँ सत्रमासीनं धन्वोदवहन् स एतत्सामापश्यत्तेन वृष्टिमसृजत ततो वै स प्रत्यतिष्ठत्ततो गातुमविन्दत गातुविद्वा एतत्साम ॥९॥ विन्दते गातुं प्रतितिष्ठत्येतेन तुष्टुवानः ॥१०॥ इन्द्रस्तृतीयसवनाद्बीभत्समान उदक्रामत्तन्देवाः श्यावाश्वेनैहायि एहियेत्यन्वाह्वयन् स उपावर्त्तत यदेतत्साम भवति तृतीय सवनस्य सेन्द्रत्वाय ॥११॥ अथैतदान्धीगवमन्धीगुर्व्वा एतत्पशु कामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां पुष्ट्यै मध्ये निधनमैडं भवत्येतेन वै तृतीयसवनं प्रतिष्ठितँ यन्मध्ये निधनमैडन्न स्यादप्रतिष्ठितं तृतीयसवनँ स्यात् ॥१२॥ दशाक्षरं मध्यतो निधनमुपयन्ति दशाक्षरा विराड् विराज्येव प्रतितिष्ठति ॥१३॥ अभिप्रियाणि पवत इति कावं प्राजापत्यँ साम ॥१४॥ प्रजा वै प्रियाणि पशवः प्रियाणि प्रजायामेव पशुषु प्रतितिष्ठति ॥१५॥ रश्मी वा एतौ यज्ञस्य यदौशनकावे देवकोशो वा एष यज्ञमभि समुब्जितो यदेते अन्ततो भवतो यज्ञस्यारिष्ट्यै ॥१६॥ इति पञ्चमः खण्डः॥८/५॥

देवा वै ब्रह्म व्यभजन्त तस्य यो रसोऽत्यरिच्यत तद्यज्ञायज्ञीयमभवत् ॥१॥ ब्रह्मणो वा एष रसो यद्यज्ञायज्ञीयँ यद्यज्ञायज्ञीयेन स्तुवन्ति ब्रह्मण एव रसो यज्ञं प्रतिष्ठापयन्ति ॥२॥ योनिर्व्वै यज्ञायज्ञीयमेतस्माद्वै योनेः प्रजापतिर्य्यज्ञमसृजत तस्माद्यज्ञायज्ञीयम् ॥३॥ तस्माद्वा एतेन पुरा ब्राह्मणा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बहिष्पवमानमस्तोषत योनेर्य्यज्ञं प्रतनवामहा इति यज्ञं ततः स्तुवन्ति योनौ यज्ञं प्रतिष्ठापयन्ति ॥४॥ असुरेषु वै सर्व्वो यज्ञ आसीत्ते देवा यज्ञायज्ञीयमपश्यत्तेषाँ यज्ञायज्ञा वो अग्नय इत्यग्निहोत्रमवृञ्जत गिरागिरा च दक्षस इति दर्शपूर्ण्णमासौ प्रप्र वयममृतं जातवेदसमिति चातुर्म्मास्यानि प्रियम्मित्रन्न शँसिषमिति सौम्यमध्वरम् ॥५॥ यज्ञा वो अग्नये गिरा च दक्षसे प्र वयममृतं जातवेदसं प्रियम्मित्रन्न शँसिषमिति वै तर्हि छन्दाँस्यासँस्ते देवा अभ्यारम्भमभिनिवर्त्यं छन्दोभिर्य्यज्ञमसुराणामवृञ्जत ॥६॥ छन्दोभिर्य्यज्ञं भ्रातृव्यस्य वृङ्क्ते य एवँ वेद ॥७॥ एतद्धस्म वा आह कूशाम्बः स्वायवो ब्रह्मा लातव्यः कँ स्विदद्य शिशुमारी यज्ञपथेऽप्यस्ता गरिष्यति ॥८॥ एषा वै शिशुमारी यज्ञपथेऽप्यस्ता यज्ञायज्ञीयँ यद्गिरा गिरेत्याहात्मनं तदुद्गाता गिरति ॥९॥ ऐरङ्कृत्वोद्गेयमिरायाँ यज्ञं प्रतिष्ठापयत्यप्रमायुक उद्गाता भवति ॥१०॥ वैश्वानरे वा एतदुद्गातात्मानं प्रदधाति यत्प्रप्रवयमित्याह प्रप्रीं वयमिति वक्तव्यँ वैश्वानरमेव परिक्रामति ॥११॥ यो वै निह्नुवानं छन्द उपैति पापीयानुज्जगिवान् भवत्येतद्वै निह्नुवानं छन्दो यन्न शँसिषमिति नु शँसिषमिति वक्तव्यँ सुशँसिषमिति वा न निह्नुवानं छन्द उपैति वसीयानुज्जगिवान् भवति ॥१२॥ यस्य वै यज्ञा वागन्ता भवन्ति वाचाश्छिद्रेण स्रवन्त्येते वै यज्ञा वागन्ता ये यज्ञायज्ञीयान्ता एतद्वाचश्छिद्रँ यदनृतँ यदग्निष्टोम याज्यनृतमाह तदन्वस्य यज्ञः स्रवत्यक्षरेणान्ततः प्रतिष्ठाप्य मक्षरेणैव यज्ञस्य छिद्रमपि दधाति ॥१३॥ विराजो वा एतद्रूपँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदक्षरँ विराज्येवान्ततः प्रतितिष्ठति ॥१४॥ इति षष्ठःखण्डः ॥८/६॥

इतो वै प्रातरूद्‌र्ध्वानि छन्दाँसि युज्यन्तेऽमुतोऽर्वाञ्चि यज्ञायज्ञीयस्य स्तोत्रे युज्यन्ते यज्ञा वो अग्नये गिरा च दक्षस इति द्वादशाक्षरं प्रवयममृतं जातवेदसमित्येकादशाक्षरं प्रियम्मित्रन्न शँसिषमित्यष्टाक्षरम् ॥१॥ अनुष्टुभमुत्तमाँ सम्पादयतीयँ वा अनुष्टुबस्यामेव प्रतितिष्ठति ॥२॥ वाग्वा अनुष्टुब्वाच्येव प्रतितिष्ठति ज्यैष्ठ्यँ वा अनुष्टुब्ज्यैष्ठ्य एव प्रतितिष्ठति ॥३॥ कथमिव यज्ञायज्ञीयङ्गेयमित्याहुर्य्यथाऽनड्वान् प्रस्रावयमाण इत्थमिव चेत्थमिव चेति ॥४॥ वैश्वानरँ वा एतदुद्गाताऽनु प्रसीदन्नेतीत्याहुर्य्यज्ञायज्ञीयस्यर्च्चँ सम्प्रत्याहेति परिक्रामतेवोद्गेयँ वैश्वानरमेव परिक्रामति ॥५॥ वैश्वानरे वा एतदध्वर्य्युः सदस्यानभिसृजति यज्ञायज्ञीयस्य स्तोत्रमुपावर्त्त-यति प्रावृतेनोद्गेयँ वैश्वानरेणानभिदाहाय ॥६॥ न ह तु वै पितरः प्रावृतञ्जानन्ति यज्ञायज्ञीयस्य वै स्तोत्रे पितरो यथायथं जिज्ञासन्त आकर्ण्णाभ्यां प्रावृत्यन्त्तदेव प्रावृतन्तदप्रावृत-ञ्जानन्ति पितरो न वैश्वानरो हिनस्ति ॥७॥ अपः पश्चात् पत्न्य उपसृजन्ति वैश्वानरमेव तच्छमयन्त्यापो हि शान्तिः ॥८॥ अथो रेत एव तत्सिञ्चन्त्यापो हि रेतः॥९॥ दक्षिणानूरूनभि षिञ्चन्ति दक्षिणतो हि रेतः सिच्यते ॥१०॥ महदिव प्रत्यूहम्मन एवास्य तज्जनयन्ति ॥११॥ उद्गात्रा पत्नीः सङ्ख्यापयन्ति रेतो धेयाय ॥१२॥ हिङ्कारं प्रति सङ्ख्यापयन्ति हिङ्कृताद्धि रेतोऽधीयत ॥१३॥ आतृतीयायाः सङ्ख्यापयन्ति त्रिवद्धि रेतः ॥१४॥ इति सप्तमः खण्डः॥८/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवा वा अग्निष्टोममभिजित्योक्थानि नाशक्नुवन्नभिजेतुं तेऽग्निमब्रुवँस्त्वया मुखेनेदञ्चयामेति सोऽ ब्रवीत् किम्मे ततः स्यादिति यत्कामस्य इत्यब्रुवन् सोऽब्रवीन्मद्देवत्यासूक्थानि प्रणयानिति ॥१॥ तस्मादाग्नेयीषूक्थानि प्रणयन्ति ॥२॥ तस्मादु गायत्रीषु गायत्रच्छन्दा ह्यग्निः ॥३॥ तेऽग्निमुखं कृत्वा साकमश्वेनाभ्यक्रामन् यत्साकमश्वेनाभ्यक्रामँस्तस्मात् साकमश्वम् ॥४॥ तस्मात्साकमश्वेनोक्थानि प्रणयन्त्येतेन हि तान्यग्रेऽभ्यजयन् ॥५॥ स इन्द्रोऽब्रवीत्कश्चाहञ्चेदमन्ववैष्याव इत्यहञ्चेति वरुणस्तँ वरुणोऽन्वतिष्ठदिन्द्र आहरत्तस्मादैन्द्रा-वारुणमनुशस्यते ॥६॥ स एवाब्रवीत्कश्चाहं चेदमन्ववैष्याव इत्यहञ्चेति बृहस्पतिस्तं बृहस्पतिरन्वतिष्ठदिन्द्र आहरत्तस्मा-दैन्द्राबार्हस्पत्यमनुशस्यते स एवाब्रवीत्कश्चाहं चेदमन्ववैष्याव इत्यहञ्चेति विष्णुस्तं विष्णुरन्वतिष्ठदिन्द्र आहरत्तस्मादैन्द्रा-वैष्णवमनुशस्यते ॥७॥ पशून्वा एभ्यस्तानाहरत् पशवो वा उक्थानि पशुकाम उक्थेन स्तुवीत पशुमान् भवति ॥८॥ बृहता वा इन्द्रो वृत्राय वज्रं प्राहरत्तस्य तेजः परापतत्त-त्सौभरमभवत् ॥९॥ जामि वा एतद्यज्ञे क्रियत इत्याहु र्य्यद्रथन्तरं पृष्ठँ रथन्तरँ सन्धिर्न्नान्तरा बृहता स्तुवन्तीति यत् सौभरेण स्तुवन्ति बृहतैव तदन्तरा स्तुवन्ति बृहतो ह्येतत्तेजो यत्सौभरम् ॥१०॥ यदि बृहत्सामातिरात्रः स्यात्सौभरमुक्थानां ब्रह्मसाम कार्य्यं बृहदेव तत्तेजसा समर्द्धयति ॥११॥ यदि रथन्तरसाम्ना सौभरं कुर्य्यादजामितायै॥१२॥ देवानाँ वै स्वर्गँ ल्लोकँ यन्तां दिशोऽव्लीयन्त ततः सौभरेणो इत्युदस्तभ्नुवँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्ततो वै ता अदूँहन्त ततः प्रत्यतिष्ठँस्ततः स्वर्गँल्लोकं प्रजानन्यः स्वर्ग्गकामः स्याद्यः प्रतिष्ठाकामः सौभरेण स्तुवीत प्र स्वर्गँल्लोकं जानाति प्रतितिष्ठति ॥१३॥ प्रजापतिः प्रजा असृजत ताः सृष्टा आशनायँस्ताभ्यः सौभरेणोर्ग्गित्यन्नं प्रायच्छत्ततो वै ताः समैधन्त ॥१४॥ समेधन्ते ताँ समां प्रजा यत्रैवँ विद्वान् सौभरेणोद्गायति ॥१५॥ ता अब्रुवन् सुभृतन्नोऽभार्षीरिति तस्मात्सौभरम् ॥१६॥ वृष्टिँ वा आभ्यस्तां प्रायच्छ-दन्नमेव॥१७॥यो वृष्टिकामः स्याद्योऽन्नाद्यकामो यः स्वर्ग्गकामः सौभरेण स्तुवीत॥१८॥हीषिति वृष्टिकामाय निधनं कुर्य्यादूर्ग्गि-त्यन्नाद्यकामायो इति स्वर्ग्गकामाय ॥१९॥ सर्व्वे वै कामाः सौभरँ सर्व्वेष्वेव कामेषु प्रतितिष्ठति ॥२०॥ अथैतन्नार्म्मेधम् ॥२१॥ नृमेधसमाङ्गिरसँ सत्रमासीनँ श्वभिरभ्याह्वयन् सोऽग्नि मुपाधावत्पाहि नो अग्न एकयेति तँ वैश्वानरः पर्य्युदतिष्ठत्ततो वै स प्रत्यतिष्ठत्ततो गातुमविन्दत ॥२२॥ गातुविद्वा एतत्साम विन्दते गातुं प्रतितिष्ठत्येतेन तुष्टुवानः ॥२३॥ विच्छन्दस ऋचो भवन्त्यहोरात्रयो रूपम् ॥२४॥ नैव ह्येतदह्नो रूपं न रात्रेर्य्यदु-क्थानाम् ॥२५॥ ककुप् प्रथमाथोष्णिगथ पुर उष्णिगनुष्टुप्तेना-नुष्टुभो नयन्त्यच्छावाकसाम्नः॥२६॥ इत्यष्टमःखण्डः ॥८/८॥

हारिवर्ण्णं भवति ॥१॥ असुरा वा एषु लोकेष्वासँस्ता-न्देवा हरिश्रियमित्यस्माल्लोकात्प्रणुदन्त विराजसीत्यन्तरिक्षा-द्दिवेदिव इत्यमुष्मात् ॥२॥ तद्य एवँ वेदैभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्येमाँल्लोकानभ्यारोहति ॥३॥ हरिवर्ण्णो वा एतत्पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुष्ट्यै ॥४॥ अङ्गिरसः स्वर्गँल्लोकँ यतो रक्षाँस्यन्वसचन्त तान्येतेन हरिवर्ण्णोऽपाहत यदेतत्साम भवति रक्षसामपहत्यै ॥५॥ पृष्ठानि वा असृज्यन्त तेषाँ यत्तेजो रसोऽत्यरिच्यत तद्देवाः समभरँस्तदुद्वँशीयमभवत् ॥६॥ सर्व्वेषाँ वा एतत् पृष्ठानां तेजो यदुद्वँशीयँ तस्माद्वा एतत्पुरा सजाताय नाक्रन् पापवसीयसो विधृत्यै ॥७॥ एष ह्येव पृष्ठैस्तुष्टुवानो यदुद्वँशीयेन स्तुवते ॥८॥ सर्व्वाणि वा रूपाण्युद्वँशीयम् ॥९॥ गायन्ति त्वा गायत्रिण एति रथन्तरस्य रूपमेति हि रथन्तरम्॥१०॥ आदिर्ब्बृहत ऊद्ध्र्वमिव हि बृहत् ॥११॥ परिष्टोभो वैरूपस्य परिष्टुभँ हि वैरूपम् ॥१२॥ अनुतोदो वैराजस्यानुतुन्नँ हि वैराजम् ॥१३॥ अर्द्धेडा शक्वरीणामतिस्वारो रेवतीनाम् ॥१४॥ अर्द्धेडया वै देवा असुरानवहत्याऽतिस्वारेण स्वर्गँल्लोकमारोहन् ॥१५॥ तद्य एवँ वेदार्द्धेडयैव भ्रातृव्यमवहत्याऽ तिस्वारेण स्वर्गँल्लोकमारोहति ॥१६॥ अर्द्धेडया वै पूर्व्वँ यज्ञँ सँस्थापयन्त्यतिस्वारेणोत्तर-मारभन्ते ॥१७॥ उपैनमुत्तरो यज्ञो नमति य एवँ वेद ॥१८॥ पाङ्क्तँ वा एतत्साम पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञ एव पशुषु प्रतितिष्ठति आष्टादँष्ट्रे ऋद्धिकमाय कुर्य्यात् ॥१९॥ अष्टादँष्ट्रो वैरूपोऽपुत्रोऽप्रजा अजीर्य्यत्स इमाँल्लोकान्वि-चिच्छिदिवाँ अमन्यत स एते जरसि सामनी अपश्य-त्तयोरप्रयोगादबिभेत् सोऽब्रवीदृध्नवद्योमे सामभ्याँस्तवाता इति ॥२०॥ ऋषेर्व्वा एतत्प्राशोद्भूतँ यदाष्टादँष्ट्रे भवत ऋध्या एव ॥२१॥ इति नवमः खण्डः ॥८/९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गायत्रीषु ब्रह्मवर्च्चसकामायोक्थानि प्रणयेयुर्गायत्र्यां ब्रह्मसामानुष्टुभ्यच्छावाकसाम सैषा गायत्री सम्पद्यते ॥१॥ तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमवरुन्धे ॥२॥ गायत्रीषु पशुकामायोक्थानि प्रणयेयुरुष्णिहि ब्रह्मसामानुष्टुभ्यच्छा-वाकसाम सैषोष्णिक्सम्पद्यते ॥३॥ पशवो वा उष्णिक् पशूनेवावरुन्धे ॥४॥ गायत्रीषु पुरुषकामायोक्थानि प्रणयेयुः ककुभि ब्रह्मसामानुष्टुभ्यच्छावाकसाम सैषा ककुप् सम्पद्यते ॥५॥ पुरुषो वै ककुप् पुरुषानेवावरुन्धे ॥६॥ विराट्स्वन्नाद्य-कामायोक्थानि प्रणयेयुरुष्णिहि ब्रह्मसामानुष्टुभ्यच्छावाकसाम सैषा विराट्सम्पद्यते ॥७॥ अन्नँ विराडन्नाद्यमेवावरुन्धे ॥८॥ अक्षरपङ्क्तिषु ज्यैष्ठ्यकामायोक्थानि प्रणयेयुरुष्णिहि ब्रह्म-सामानुष्टुभ्यच्छावाकसाम सैषानुष्टुप् सम्पद्यते ॥९॥ ज्यैष्ठ्यँ वा अनुष्टुब् ज्यैष्ठ्यमेवावरुन्धे ॥१०॥ इति दशमःखण्डः ॥८/१०॥

इत्यष्टमोऽध्यायः

अथ नवमोऽध्यायः

देवा वा उक्थान्यभिजित्य रात्रिन्नाशक्नुवन्नभिजेतुं तेऽसुरान् रात्रिं तमः प्रविष्टान्नानु व्यपश्यँस्त एतमनुष्टुप् शिरसं प्रगाथमपश्यन् विराजं ज्योतिस्तान् विराजा ज्योतिषानु-पश्यन्तोऽनुष्टुभा वज्रेण रात्रेर्न्निराघ्नन् ॥१॥ यदेषोऽनुष्टुप्शिराः प्रगाथो भवति विराजैव ज्योतिषानुपश्यन्ननुष्टुभा वज्रेण रात्रेर्भ्रातृव्यं निर्हन्ति ॥२॥ तान् समन्तं पर्य्यायं प्राणुदन्त यत् पर्य्यायं प्राणुदन्त तत्पर्य्यायाणां पर्य्यायत्वम् ॥३॥ प्रथमानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पदानि पुनरादीनि भवन्ति प्रथमस्य पर्य्यायस्य ॥४॥ प्रथमैर्हि पदैः पुनरादाय प्रथम रात्रात्प्राणुदन्त ॥५॥ पान्तमावो अन्धस इति प्रस्तौति ॥६॥ अहर्व्वै पान्तमन्धो रात्रिरहैव तद्रात्रिमारभन्ते ॥७॥ तासु वैतहव्यम् ॥८॥ वीतहव्यः श्रायसो ज्योग्गिनरुद्ध एव तत्सामापश्यत्सोऽवगच्छत् प्रत्यतिष्ठदव गच्छति प्रतितिष्ठत्येतेन तुष्टुवानः ॥९॥ तम इव वा एते प्रविशन्ति ये रात्रिमुपयन्ति यदोकोनिधनं रात्रेर्म्मुखे भवति प्रज्ञात्यै ॥१०॥ यदा वै पुरुषः स्वमोक आगच्छति सर्व्वं तर्हि प्रजानाति सर्व्वमस्मै दिवा भवति ॥११॥ ते मध्यमं पर्य्यायमश्रयन्त तेषामौद्ध्र्वसद्मनेन वाचमवृञ्जत ॥१२॥ वाचं भ्रातृव्यस्य वृङ्क्ते य एवँ वेद ॥१३॥ त्रिणिधनं भवति ॥१४॥ यथा वा अह्नो माध्यन्दिनँ सवनं त्रिणिधनायतनमेवमेष रात्रेर्म्मध्यमः पर्य्यायस्त्रिणिधनायतनः सलोमत्वाय ॥१५॥ मध्यमानि पदानि पुनरादीनि भवन्ति मध्यमस्य पर्य्यायस्य मध्यमैर्हि पदैः पुनरादायम्मध्यमरात्रात् प्राणुदन्त॥१६॥ त उत्तमं पर्य्यायमश्रयन्त तेषां घृतश्च्युन्निधनेन पशूनवृञ्जत पशवो वै घृतश्च्युतः ॥१७॥ पशून् भ्रातृव्यस्य वृङ्क्ते य एवँ वेद ॥१८॥ उत्तमानि पदानि पुनरादीनि भवन्त्युत्तमस्य पर्य्यायस्योत्तमैर्हि पदैः पुनरादाय-मुत्तमरात्रात् प्राणुदन्त ॥१९॥ तान् सन्धिनाभिपलायन्त ॥२०॥ तानाश्विनेनासँ हाय्यमगमयन् ॥२१॥ असँ हाय्यं भ्रातृव्यं गमयति य एवँ वेद ॥२२॥ एषा वा अग्निष्टोमस्य सम्मा यद्रात्रिः ॥२३॥ द्वादशस्तोत्राण्यग्निष्टोमो द्वादशस्तोत्राणि रात्रिः ॥२४॥ एषा वा उक्थस्य सम्मा यद्रात्रिः ॥२५॥ त्रीण्युक्थानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिदेवत्यः सन्धिः ॥२६॥ यथा वा अह्न उक्थान्येवमेष रात्रेः सन्धिर्न्नानारूपाण्यह्न उक्थानि नानारूपा एते तृचा भवन्ति ॥२७॥ रथन्तरं प्रतिष्ठाकामाय सन्धिं कुर्य्यात् ॥२८॥ इयँ वै रथन्तरमस्यामेव प्रतितिष्ठति ॥२९॥ बृहत् स्वर्ग्गकामाय सन्धिं कुर्य्यात् ॥३०॥ स्वर्ग्गो लोको बृहत्स्वर्ग्ग एव लोके प्रतितिष्ठति ॥३१॥ वारवन्तीयँ वा वामदेव्यँ वा श्रुद्ध्यँ वैतेषा-मेकं पशुकामाय सन्धिं कुर्य्यात् ॥३२॥ पशवो वा एतानि सामानि पशुष्वेव प्रतितिष्ठति ॥३३॥ आश्विनँ होतानुशँसति ॥३४॥ प्रजापतिर्व्वा एतत्सहस्रमसृजत तद्देवेभ्यः प्रायच्छत्त-स्मिन्न समराधयँस्ते सूर्य्यं काष्ठां कृत्वाऽऽजिमधावन् ॥३५॥ तेषामश्विनौ प्रथमावधावतां तावन्ववदन् सह नोऽस्त्विति तावब्रूतां किं ततः स्यादिति यत्कामयेथे इत्यब्रुवँस्तावब्रूता-मस्मद्देवत्यमिदमुक्थमुच्याता इति तस्मादाश्विनमुच्यते ॥३६॥ सर्व्वाः खलु देवताः शस्यन्ते ॥३७॥ क्षिप्रँ शस्यमाजिमिव ह्येते धावन्त्यासूर्य्यस्योदेतोःशँसेत्सूर्य्यँ हि काष्ठामकुर्व्वत ॥३८॥ इति प्रथमः खण्डः॥९/१॥

पान्तमा वो अन्धस इति वैतहव्य मन्यक्षेत्रँ वा एते प्रयन्ति ये रात्रिमुपयन्ति यदोकोनिधनँ रात्रेर्म्मुखे भवत्योकसो-ऽप्रच्यावाय॥१॥ प्र व इन्द्राय मादनमिति गौरीवितम् ॥२॥ ब्रह्म यद्देवा व्यकुर्व्वत ततो यदत्यरिच्यत तद्गौरीवितमभवत् ॥३॥ अतिरिक्तं गौरीवितमतिरिक्तमेतत् स्तोत्रँ यद्रात्रिरतिरिक्त एवातिरिक्तं दधाति ॥४॥ वयमु त्वा तदिदर्था इति काण्वम् ॥५॥ एतेन वै कण्व इन्द्रस्य साँविद्यमगच्छदिन्द्रस्यैवैतेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

साँविद्यं गच्छति ॥६॥ इन्द्राय मद्वने सुतमिति श्रौतकक्षं क्षत्रसाम प्रत्यक्षमेवैतेन भवति ॥७॥ अयं त इन्द्र सोम इति दैवोदासम् ॥८॥ अग्निष्टोमेन वै देवा इमँल्लोकमभ्यजयन्नन्तरिक्षमुक्थेनातिरात्रेणामुं त इमँल्लोकं पुनरभ्यकामयन्त त इहेत्यस्मिँल्लोके प्रत्यतिष्ठन् यदेतत्साम भवति प्रतिष्ठित्यै ॥९॥ ऊद्ध्र्वसद्मनमपि शर्व्वरीषु प्रोहन्ति ॥१०॥ असुरा वा एषु लोकेष्वासँस्तान्देवा ऊद्ध्र्वसद्मनेनैभ्यो लोकेभ्यः प्राणुदन्त ॥११॥ तद्य एवँ वेदैभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्य स्व आयतने सत्रमास्ते ॥१२॥ आ तू न इन्द्र क्षुमन्तमित्याकूपारम् ॥१३॥ आकूपाराङ्गिरस्यासीत्तस्या यथा गोधायास्त्वगेवं त्वगासीत्तामेतेन त्रिस्साम्नेन्द्रः पूत्वा सूर्य्यत्वचसमकरोत्तद्वाव सा तर्ह्यकामयत यत्कामा एतेन साम्ना स्तुवते स एभ्यः कामस्समृध्यते ॥१४॥ अभि त्वा वृषभा सुतमित्यार्षभं क्षत्रसाम क्षत्रमेवैतेन भवति ॥१५॥ इदँ वसो सुतमन्ध इति गारमेतेन वै गर इन्द्रमप्रीणात्प्रीत एवास्यैतेनेन्द्रो भवति ॥१६॥ इदँ ह्यन्वोजसेति माधुच्छन्दसं प्रजापतेर्व्वा एषा तनूरयातयाम्नी प्रयुज्यते ॥१७॥ आ त्वेता निषीदतेति दैवातिथम् ॥१८॥ देवातिथिः सपुत्रोऽशनायँश्चरन्नरण्य उर्व्वारूण्यविन्दत्तान्येतेन साम्नोपासीदत्ता अस्मै गावः पृश्नयो भूत्वोदतिष्ठन् यदेतत्साम भवति पशूनां पुष्ट्यै ॥१९॥ योगे योगे तवस्तरमिति सौमेधँ रात्रिषाम रात्रेरेव समृद्ध्यै ॥२०॥ इन्द्र सुतेषु सोमेष्विति कौत्सम् ॥२१॥ कुत्सश्च लुशश्चेन्द्रँ व्याह्वयेताँ स इन्द्रः कुत्समुपावर्त्तत तँशतेन वार्द्धीभिराण्डयोरबध्नात्तँ लुशोऽभ्य-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वदत् प्रमुच्यस्व परि कुत्सादिहागहि किमु त्वावानाण्डयोर्ब्बद्ध आसाता इति तास्सञ्छिद्य प्राद्रवत्स एतत् कुत्सः सामापश्य त्तेनैनमन्ववदत्स उपावर्त्तत ॥२२॥ यदेतत्साम भवति सेन्द्रत्वाय ॥२३॥ इति द्वितीयः खण्डः ॥९/२॥

यदि सत्राय दीक्षेरन्नथ साम्युत्तिष्ठेत् सोममपभज्य विश्वजितातिरात्रेण यजेत सर्व्ववेदसेन सर्व्वस्मा एव दीक्षते सर्व्वमाप्नोति ॥१॥ या इद्दक्षिणा ददाति ताभिरति प्रयुङ्क्ते ॥२॥ यदि पर्य्यायैरस्तुतमभिव्युच्छेत् पञ्चदशभिर्होत्रे स्तुयुः पञ्चभिः पञ्चभिरितरेभ्यः ॥३॥ अग्ग्ने विवस्व दुषस इति सन्धिना स्तुयुः प्राणा वै त्रिवृत् स्तोमानां प्रतिष्ठा रथन्तरँ साम्नां प्राणाँश्चैवोपयन्ति प्रतिष्ठाञ्च ॥४॥ षष्ठिञ्च त्रीणि च शतानि होता शँसति ॥५॥ तावत्यः सँवत्सरस्य रात्रयः सँवत्सरसम्मिताभिरेव तदृग्भिराश्विनमाप्नोति ॥६॥ यदर्व्वाक् स्तुवन्ति तदस्तुतँ यत्सम्प्रति स्तुवन्ति तत्स्तुतँ यदतिष्टुवन्ति तत्सुष्टुतम्॥७॥ यद्यर्व्वाक् स्तुयुर्य्यावतीभिर्न्न स्तुयुस्तावतीभि-र्व्वाऽतिष्टुयुर्भूयोऽक्षराभिर्व्वा ॥८॥ यद्यतिष्टुयुर्य्यावतीभिरतिष्टुयु स्तावतीभिर्व्वा न स्तुयुः कनीयोऽक्षराभिर्व्वा ॥९॥ यद्यर्व्वाक् स्तुयुस्त्रीडमग्गिनष्टोमसाम कार्य्यं निधनमेकेडा ये द्वे ताभ्यामेव तत्समं क्रियते ॥१०॥ यद्यतिष्टुयुः स्वारमग्गिनष्टोमसाम कार्य्यमूनमिव वा एतत्साम्नो यत् स्वरस्तेनैव तत्समं क्रियते ॥११॥ इति तृतीयः खण्डः ॥९/३॥

यदि सोमौ सँसुतौ स्यातां महति रात्रेः प्रातरनुवाक-मुपाकुर्य्यात् ॥१॥ पूर्व्वो वाचं पूर्व्वश्छन्दाँसि पूर्व्वो देवता

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृङ्क्ते ॥२॥ वृषण्वतीं प्रतिपदं कुर्य्यादिन्द्रो वै वृषा प्रातः सवनादेवैषामिन्द्रँ वृङ्क्ते ॥३॥ अथो खल्वाहुः सवनमुखे सवनमुखे कार्य्या सवनमुखात् सवनमुखादेवैषामिन्द्रँ वृङ्क्ते ॥४॥ सुसमिद्धे होतव्यमग्निर्व्वै सर्व्वा देवताः सर्व्वा एव देवताः पश्यञ्जुहोति ॥५॥ सँवेशायोपवेशाय गायत्र्यै छन्दसे-ऽभिभूतये स्वाहा सँवेशायोपवेशाय त्रिष्टुभे छन्दसेऽभिभूतये स्वाहा सँवेशायोपवेशाय जगत्यै छन्दसेऽभिभूतये स्वाहेति जुहोति ॥६॥ छन्दाँसि वा अभिभूतयस्तैरेवैनानभिभवत्युभे बृहद्रथन्तरे कार्य्ये ॥७॥ यत्र वा इन्द्रस्य हरी तदिन्द्र इन्द्रस्य वै हरी बृहद्रथन्तरे यदुभे बृहद्रथन्तरे भवतः पूर्व्व एवेन्द्रस्य हरी आरभन्ते ॥८॥ तौरश्रवसे कार्य्ये ॥९॥ तुरश्रवसश्च वै पारावतानाञ्च सोमौ सँसुतावास्तां तत एते तुरश्रवाः सामनी अपश्यत्ताभ्यामस्मा इन्द्रः शल्मलिनाँ यमुनाया हव्यं निरावहत् यत्तौरश्रवसे भवतो हव्यमेवैषाँ वृङ्क्ते ॥१०॥ पूर्वेऽभिषुणुयुः ॥११॥ या वै पूर्व्वाः प्रस्नान्ति ताः पूर्व्वास्तीर्थं जयन्ति पूर्व्व एवेन्द्रमारभन्ते ॥१२॥ विहव्यँ शस्यम् ॥१३॥ जमदग्नेश्च वा ऋषीणाञ्च सोमौ सँसुतावास्तां तत एतज्जमदग्निर्व्विहव्य-मपश्यत्तमिन्द्र उपावर्त्तत यद्विहव्यँ होता शँसतीन्द्रमेवैषाँ वृङ्क्ते ॥१४॥यदीतरोऽग्निष्टोमः स्यादुक्थ्यः कार्य्यो यद्युक्थ्योऽतिरात्रो यो वै भूयान्यज्ञक्रतुः स इन्द्रस्य प्रियो भूयसैवैषाँ यज्ञक्रतुनेन्द्रँ वृङ्क्ते ॥१५॥ अथो खल्वाहुर्दुष्प्राप इव वै परः पन्था यमेवाग्रे यज्ञक्रतुमारभेत तस्मान्नेयादिति ॥१६॥ सजनीयँ शस्यमगस्त्यस्य कयाशुभीयँ शस्यम् ॥१७॥ अस्या अमुष्या

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अद्यश्चान्मिथुनादहोरात्राभ्यामेवैनान्निर्भजति ॥१८॥ इति चतुर्थः खण्डः॥९/४॥

यदि सोममक्रीतमपहरेयुरन्यः क्रेतव्यः ॥१॥ यदि क्रीतँ योऽन्योऽभ्याशं स्यात् स आहृत्य सोमविक्रयिणे तु किञ्चिद्दद्यात् ॥२॥ यदि सोमं न विन्देयुः पूतीकानभिषुणुयु-र्य्यदि न पूतीकानर्ज्जुनानि ॥३॥ गायत्री सोममाहरत्तस्या अनु विसृज्य सोमरक्षिः पर्णमच्छिनत्तस्य योँशुः परापतत्स पूतीकोऽभवत्तस्मिन् देवा ऊतिमविन्दन्नूतीको वा एष यत्पूतीकानभिषुण्वन्त्यूतिमेवास्मै विन्दन्ति ॥४॥ प्रतिधुक्च प्रातः पूतीकाश्च शृतञ्च मध्यन्दिने पूतीकाश्च दधि चाऽपराह्णे पूतीकाश्च ॥५॥ सोमपीथो वा एतस्मादपक्रामतीत्याहुर्य्यस्य सोममपहरन्तीति स ओषधीश्च पशूँश्च प्रविशति तमोषधिभ्यश्च पशुभ्यश्चावरुन्धे ॥६॥ इन्द्रो वृत्रमहँस्तस्य यो नस्तः सोमः समधावत्तानि बभ्रुतूलान्यर्ज्जुनानि यो वपाया उत्खिन्नायास्तानि लोहिततूलानि यानि बभ्रुतूलान्यर्ज्जुनानि तान्यभिषुणुयादेतद्वै ब्रह्मणो रूपँ साक्षादेव सोममभिषुणोति ॥७॥ श्रायन्तीयं बह्मसाम कार्य्यँ सदेवैनं करोति ॥८॥ यज्ञायज्ञीयमनुष्टुभि प्रोहेद्वाचैवैनँ समर्द्धयति वारवन्तीयमग्निष्टोमसाम कार्य्य-मिन्द्रियस्य वीर्य्यस्य परिगृहीत्यै ॥९॥ पञ्चदक्षिणा देयाः॥१०॥ पाङ्क्तो यज्ञो यावान्यज्ञस्तमेवारभते ॥११॥ अवभृथादुदेत्य पुनर्द्दीक्षते ॥१२॥ तत्र तद्दद्याद्यद्दास्यँ स्यात् ॥१३॥ इति पञ्चमः खण्डः ॥९/५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदि कलशो दीर्य्येत वषट्कारणिधनं ब्रह्मसाम कुर्य्यात् ॥१॥ अवषट्कृतो वा एतस्य सोमः परा सिच्यते यस्य कलशो दीर्य्यते यद्वषट्कारणिधनं ब्रह्मसाम भवति वषट्कृत एवास्य सोमो भवति ॥२॥ विधुं दद्राणँ समने बहूनामित्येतासु कार्य्यम् ॥३॥ एष हि बहूनाँ समने दीर्य्यते यत्कलशः॥४॥ तदाहुर्न्नवा आर्त्त्यार्त्तिरनूद्यार्त्त्या वा एष आर्त्तिमनुवदति यः कलशे दीर्ण्णे दद्राणवतीषु करोतीति॥५॥श्रायन्तीयमेव कार्य्यम्॥६॥ प्रजापतिः प्रजा असृजत स दुग्धो रिरिचानोऽमन्यत स एतच्छ्रायन्तीय-मपश्यत्तेनात्मानँ समश्रीणात्प्रजया पशुभिरिन्द्रियेण ॥७॥ दुग्ध इव एष रिरिचानो यस्य कलशो दीर्य्यते यच्छ्रायन्तीयं ब्रह्मसाम भवति पुनरेवात्मानँ सँश्रीणाति प्रजया पशुभिरि-न्द्रियेण ॥८॥ यदि श्रायन्तीयं ब्रह्मसाम स्याद् वैष्णवीष्वनुष्टुप्सु वषट्कारणिधनं कुर्य्यात् ॥९॥ यद्वै यज्ञस्य स्रवति वाचं प्रति-स्रवति वागनुष्टुप् यज्ञो विष्णुर्व्वाचैव यज्ञस्य छिद्रमपि दधाति ॥१०॥ यद्वै यज्ञस्य स्रवत्यन्ततः स्रवति वारवन्तीयमग्नि-ष्टोमसाम कार्य्यँ यज्ञस्यैव छिद्रँ वारयते॥११॥इतिषष्ठःखण्डः॥९/६॥

यदि प्रातस्सवनात्सोमोऽतिरिच्येत अस्ति सोमो अयँ सुत इति मरुत्वतीषु गायत्रेण स्तुयुः॥१॥ माध्यन्दिनँ वा एष सवनं निकामयमानोऽभ्यतिरिच्यते यः प्रातस्सवनादतिरिच्यते तस्मान्मरुत्वतीषु स्तुवन्ति मरुत्वद्धि माध्यन्दिनँ सवनं तस्मादु गायत्रीषु गायत्रं हि प्रातस्सवनम् ॥२॥ यस्मात् स्तोमादति-रिच्येत स एव स्तोमः कार्य्यः सलोमत्वाय ॥३॥ ऐन्द्रावैष्णवँ होतानुशँसति ॥४॥ वीर्य्यँ वा इन्द्रो यज्ञो विष्णुर्व्वीर्य्य एव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यज्ञे प्रतितिष्ठति ॥५॥ यदि माध्यन्दिनात्सवनादतिरिच्येत बण्महाँ असि सूर्य्येत्यादित्यवतीषु गौरीवितेन स्तुयुः॥६॥ तृतीयसवनँ वा एष निकामयमानोऽभ्यतिरिच्यते यो माध्यन्दिनात्सवना- दतिरिच्यते तस्मादादित्यवतीषु स्तुवन्त्यादित्यँ हि तृतीयसवनं तस्मादु बृहतीषु बार्हतँ हि माध्यन्दिनँ सवनम् ॥७॥ यस्मात् स्तोमादतिरिच्येत स एव स्तोमः कार्य्यः सलोमत्वायैन्द्रावैष्णवँ होतानुशँसति वीर्य्यँ वा इन्द्रो यज्ञो विष्णुर्व्वीर्य्य एव यज्ञे प्रतितिष्ठति ॥८॥ यदि तृतीयसवनादतिरिच्येत विष्णोः शिपिविष्टवतीषु गौरीवितेन स्तुयुः ॥९॥ यज्ञो वै विष्णुः शिपिविष्टो यज्ञ एव विष्णौ प्रतितिष्ठत्यतिरिक्तं गौरीवितमतिरिक्त एवातिरिक्तं दधाति ॥१०॥ एतदन्यत् कुर्य्युरुक्थ्यानि प्रणयेयु- रुक्थ्यानि वा एष निकामयमानोऽभ्यतिरिच्यते योऽग्निष्टोमा- दतिरिच्यते यद्युक्थ्येभ्योऽतिरिच्येतातिरात्रः कार्य्यो रात्रिँ वा एष निकामयमानोऽभ्यतिरिच्यते य उक्थ्येभ्योऽतिरिच्यते यदि रात्रेरतिरिच्येत विष्णोः शिपिविष्टवतीषु बृहता स्तुयुरेष तु वा अतिरिच्यत इत्याहुर्य्यो रात्रेरतिरिच्यत इति ॥११॥ अमुँ वा एष लोकं निकामयमानोऽभ्यतिरिच्यते यो रात्रेरतिरिच्यते बृहता स्तुवन्ति बृहदमुँल्लोकमाप्तुमर्हति तमेवाप्नोति ॥१२॥ इति सप्तमः खण्डः ॥९/७॥

यदि दीक्षितानां प्रमीयेत दग्ध्वास्थीन्युपनह्य यो नेदिष्ठी स्यात्तं दीक्षयित्वा सह यजेरन् ॥१॥ एतदन्यत् कुर्य्युरभिषुत्या- न्यत्सोममगृहीत्वा ग्रहान् यासौ दक्षिणा स्रक्तिस्तद्वा स्तुयुर्म्मार्ज्जालीये वा ॥२॥ अपि वा एतस्य यज्ञे यो दीक्षितः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रमीयते तमेतेन निरवदयन्ते ॥३॥ यामेन स्तुवन्ति यमलोकमेवैनं गमयन्ति ॥४॥ तिसृभिः स्तुवन्ति तृतीये हि लोके पितरः॥५॥ पराचीभिःस्तुवन्ति पराङ् हीतोऽसौ लोकः ॥६॥ सर्प्पराज्या ऋग्भिः स्तुवन्ति ॥७॥ अर्ब्बुदस्सर्प्प एताभिर्मृतां त्वचमपाहत मृतामेवैताभिस्त्वचमपघ्नते ॥८॥ ता ऋचोऽनुब्रुवन्तस्त्रिर्म्मार्ज्जालीयं परियन्ति सव्यानूरूनाघ्नानाः ॥९॥ स्तुतमनु शँसन्त्यमुष्मिन्नेवैनँ लोके निध्नुवन्ति ॥१०॥ यन्ति वा एते पथ इत्याहुर्य्ये मृताय कुर्व्वन्तीत्यैन्द्रवायवाग्रान् ग्रहान् गृह्णते पुनः पन्थानमपियन्ति ॥११॥ अग्न आयूँषि पवस इति प्रतिपत्कार्य्या य एव जीवन्ति तेष्वायुर्द्दधाति ॥१२॥ सँवत्सरेऽस्थीनि याजयेयुः सँवत्सरो वै सर्व्वस्य शान्तिर्य्यत्पुरा सँवत्सराद्याजयेयुर्व्वाचमरुष्कृतां क्रूरामृच्छेयुः॥१३॥ असम्मितँ स्तोत्रँ स्यादसम्मितो ह्यसौ लोकस्त्रिवृतः पवमानाः स्युः सप्तदशमितरत्सर्व्वम् ॥१४॥ यत्त्रिवृतः पवमाना भवन्ति प्राणा वै त्रिवृत्प्राणानेवोपयन्ति यत्सप्तदशमितरत् सर्व्वं प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवोपयन्ति ॥१५॥ प्राणापानैर्व्वा एते व्यृध्यन्त इत्याहुर्य्ये मृताय कुर्व्वन्तीति मैत्रावरुणाग्रान् ग्रहान् गृह्णते प्राणापानौ मित्रावरुणौ प्राणापानैरेव समृध्यन्ते ॥१६॥

इत्यष्टमः खण्डः ॥९/८॥

यस्य कलश उपदस्यति कलशमेवास्योपदस्यन्तं प्राणोऽनूपदस्यति प्राणो हि सोमः ॥१॥ तदाहुः पयोऽवनयेदिति ॥२॥ अथो खल्वाहुरन्तर्हितमिव वा एतद्यत्पयो हिरण्यमेवापोऽभ्यवनयेद्धिरण्यमभ्युन्नयेदिति ॥३॥ प्राणा वा आपोऽमृतँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हिरण्यममृत एवास्य प्राणान् दधाति स सर्व्वमायुरेति ॥४॥ यस्य नाराशँस उपवायति नाराशँसमेवास्योपवीयन्तं प्राणोऽनूपदस्यति प्राणो हि सोमः ॥५॥ यमध्वर्य्युरन्ततो ग्रहं गृह्णीयात्तस्याप्तुमवनयेत् ॥६॥ प्रायश्चित्यै वै ग्रहो गृह्यते प्रायश्चित्येवास्मै प्रायश्चित्तिं करोति ॥७॥ यदि पीतापीतौ सोमौ सङ्गच्छेयातामन्तः परिध्यङ्गारान्निर्व्वर्त्त्य जुहुयात् हुतस्य चाहुतस्य चाहुतस्य हुतस्य च। पीतापीतस्य सोमस्येन्द्राग्नी पिबतँ सुतँ स्वाहेति सैव प्रायश्चित्तिः॥८॥प्रजापतये स्वाहेत्यभक्षणीयस्य जुहुयादुत्तराद्र्ध्यपूर्व्वाद्र्ध्य उपरवः ॥९॥ इन्दुरिन्द्रमवागादित्यववृष्टस्य भक्षयेत्॥१०॥तस्य त इन्द्रविन्द्रपीतस्येन्द्रियावतस्सर्व्वगणस्य सर्व्वगण उपहूत उपहूतस्य भक्षयामि ॥११॥ हिरण्यगर्भः समवर्त्तताग्र इत्याज्येनाभ्युपाकृतस्य जुहुयादाग्नीध्रं परेत्य भूतानां जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां तस्मै त इन्दो हविषा विधेम स्वाहेति सैव तस्य प्रायश्चित्तिः॥१२॥ यदि ग्रावापि शीर्य्यते पशुभिर्य्यजमानो व्यृद्ध्यते पशवो वै ग्रावाणो द्युतानस्य मारुतस्य साम्ना स्तुयुः॥१३॥ मारुता वै ग्रावाणः स्वेनैवैनाँस्तद्रूपेण समर्द्धयति ॥१४॥ यदि सोममभिदहेद् ग्रहानध्वर्य्युः स्पाशयेत स्तोत्राण्युद्गाता शस्त्राणि होताथ यथापूर्व्वँ यज्ञेन चरेयुः पञ्चदक्षिणा देयाः पाङ्क्तो यज्ञो यावान्यज्ञस्तमेवारभतेऽवभृतादुदेत्य पुनर्दीक्षेत तत्र तद्द्याद्यद्दास्यँ स्यात्पुरा द्वादश्या दीक्षेत यद् द्वादशीमतिनयेदन्तर्द्धीयेत ॥१५॥ इति नवमःखण्डः॥९/९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदि महावीरो भिद्येत तं भिन्नमभिमृशेत् य ऋते चिदभिश्रिषः पुरा जतृभ्य आतृदः । सन्धाता सन्धिं मघवा पुरूवसुर्न्निष्कर्त्ता विह्रुतं पुनः॥ मा भेम निष्ट्या इवेन्द्र त्वदरणा इव । वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि । अमन्महीदनाशवोनु ग्राभश्च वृत्रहन् । सकृत्सुते महता शूर राधसा नु स्तोमं मदेमहीति महावीरं भिन्नमभिमृशेत् सैव तस्य प्रायश्चित्तिः ॥१॥ असुर्य्यँ वा एतस्माद्वर्णं कृत्वा तेज इन्द्रियँ वीर्य्यमन्नाद्यं प्रजाः पशवोपक्रामन्ति यस्य यूपो विरोहति स ईश्वरः पापीयान् भवितोः ॥२॥ त्वाष्ट्रं पशुं बहुरूपमालभेत त्वष्टा वै पशूनाँ रूपाणाँ विकर्त्ता तमेव तदुपधावति स एनं तेजसेन्द्रियेण वीर्य्येणान्नाद्येन प्रजया पशुभिः पुनस्समर्द्धयति सैव तस्य प्रायश्चित्तिः ॥३॥ इति दशमः खण्डः ॥९/१०॥ **इति नवमोऽध्यायः**

अथ दशमोऽध्यायः

अग्निना पृथिव्यौषधिभिस्तेनायँ लोकस्त्रिवृद्वायुनान्त-रिक्षेण वयोभिस्तेनैष लोकस्त्रिवृद्योऽयमन्तरादित्येन दिवा नक्षत्रैस्तेनासौ लोकस्त्रिवृदेतदेव त्रिवृत आयतनमेषास्य बन्धुता ॥१॥ आयतनवान् बन्धुमान् भवति य एवँ वेद ॥२॥ तमु प्रतिष्ठेत्याहुस्त्रिवृद्ध्येवैषु लोकेषु प्रतिष्ठितः ॥३॥ अर्द्धमास एव पञ्चदशस्यायतनमेषास्य बन्धुता ॥४॥ आयतनवान् बन्धुमान् भवति य एवँ वेद ॥५॥ तं चौजो बलमित्याहु-रर्द्धमासशो हि प्रजाः पशव ओजो बलं पुष्यन्ति ॥६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सँवत्सर एव सप्तदशस्यायतनं द्वादशमासाः पञ्चर्त्तव एतदेव सप्तदशस्यायतनमेवास्य बन्धुता ॥७॥ आयतनवान् बन्धुमान् भवति य एवँ वेद ॥८॥ तमु प्रजापतिरित्याहुः सँवत्सरँ हि प्रजाः पशवोऽनुप्रजायन्ते॥९॥ आदित्य एवैकविँश स्यायतनं द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविँश एतदेवैकविंशस्यायतनमेषास्य बन्धुता ॥१०॥ आयतनवान् बन्धुमान् भवति य एवँ वेद ॥११॥ तमु देवतल्प इत्याहुः प्रदेवतल्पमाप्नोति य एवँ वेद ॥१२॥ त्रिवृदेव त्रिणवस्यायतन-मेषास्य बन्धुता ॥१३॥ आयतनवान् बन्धुमान् भवति य एवँ वेद ॥१४॥ तमु पुष्टिरित्याहुस्त्रिवृद्ध्येवैष पुष्टः ॥१५॥देवता एव त्रयस्त्रिँशस्यायतनं त्रयस्त्रिँशद्देवताः प्रजापति श्चतुस्त्रिँश एतदेव त्रयस्त्रिँशस्यायतनमेषास्य बन्धुता ॥१६॥ आयतनवान् बन्धुमान् भवति य एवँ वेद ॥१७॥ तमु नाक इत्याहुर्न्न हि प्रजापतिः कस्मै च नाकम् ॥१८॥ छन्दाँस्येव छन्दोमाना-मायतनमेषैषां बन्धुता ॥१९॥ आयतनवान् बन्धुमान् भवति य एवँ वेद ॥२०॥ तानु पुष्टिरित्याहुः पशवो हि छन्दोमाः ॥२१॥ इति प्रथमः खण्डः ॥ १०/१॥

प्रजापतिः प्रजा असृजत सोताम्यत्तस्मै वाग्ज्योतिरुद-गृह्णात्सोऽब्रवीत्को मेऽयं ज्योतिरुद ग्रहीदिति स्वैव ते वागित्यब्रवीत्तामब्रवीद्विराजं त्वा छन्दसां ज्योतिष्कृत्वा यजान्ता इति ॥१॥ तस्माद्यो विराजँ स्तोमः सम्पद्यते तं ज्योतिष्टोमो-ऽग्निष्टोम इत्याचक्षते विराड्ढि छन्दसां ज्योतिः ॥२॥ ज्योतिः समानानां भवति य एवँ वेद ॥३॥ अनुष्टुप् च वै सप्तदशश्च

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समभवता सानुष्टुप् चतुरुत्तराणि छन्दाँस्यसृजत षडुत्तरान् स्तोमान् सप्तदशस्तावेतान्मध्यतः प्राजनयताम् ॥४॥ त्रिवृच्च त्रिणवश्च राथन्तरौ तावजश्चाश्वश्चान्वसृज्येतां तस्मात्तौ राथन्तरं प्राचीनं प्रधूनुतः ॥५॥ पञ्चदशश्चैकविँशश्च बार्हतौ तौ गौश्चाविश्चान्वसृज्येतां तस्मात्तौ बार्हतं प्राचीनं भास्कुरुतः॥६॥ एवँ वै विद्वाँसमाहुरपि ग्राम्याणां पशूनाँ वाच आजानाति ॥७॥ इति द्वितीयः खण्डः ॥१०/२॥

प्रजापतिरकामयत बहु स्यां प्रजायेयेति आत्मन्नृत्व्यमपश्यत्तत ऋत्विजोऽसृजत यदृत्व्यादसृजत तदृत्विजामृत्विक्त्वं तैरेतं द्वादशाहमुपासीदत्सोऽराध्नोत् ॥१॥ पिता नोऽरात्सीदिति मासा उपासीदँस्ते दीक्षयैवारा ध्नुवन्नुपसत्सु त्रयोदशमदीक्षयन् सोऽनुव्यमभवत्तस्मादुपसत्सु दिदीक्षाणोऽनुव्यं भवत्येव च हि त्रयोदशं मासं चक्षते नैव च ॥२॥ एको दीक्षेतैको हि प्रजापतिरराध्नोद् द्वादशदीक्षेरन् द्वादश हि मासा अराध्नुवँश्चतुर्व्विँशतिर्द्दीक्षेरँ श्चतुर्व्विँशति र्ह्यर्द्धमासा अराध्नुवन् ॥३॥ यदि पञ्चविँशो दीक्षेतेमे पञ्चेमे पञ्चेमे पञ्चेमे पञ्चेमे चत्वारोऽसावेक इति निर्द्दिशेयुर्य्यस्मा अराद्धिकामाः स्युस्तमेवाराद्धिरन्वेति सर्व्व इतरे राध्नुवन्ति ॥४॥ यो वै देवानां गृहपतिँ वेदाश्नुते गार्हपतं प्र गार्हपत माप्नोति ॥५॥ सँवत्सरो वै देवानां गृहपतिः स एव प्रजापतिस्तस्य मासा एव सह दीक्षिणः ॥६॥ विन्दते सह दीक्षिणोऽश्नुते गार्हपतं प्रगार्हपतमाप्नोति य एवँ वेद ॥७॥ यो वै छन्दसाँ स्वराजँ वेदाश्नुते स्वाराज्यं प्रस्वाराज्यमाप्नोति बृहती वाव छन्दसाँ स्वराडश्नुते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वाराज्यं प्रस्वाराज्यमाप्नोति य एवँ वेद ॥८॥ ताँ वा एतामन्नाद्याय व्यावृज्याऽऽसते यदेतं द्वादशाहं द्वादशदीक्षा द्वादशोपसदो द्वादशप्रसुतः षट्त्रिँशदेता रात्रयो भवन्ति षट्त्रिँशदक्षरा बृहती ॥९॥ जायते वाव दीक्षया पुनीत उपसद्भिर्देवलोकमेव सुत्ययाप्येति ॥१०॥ एतावद्वाव सँवत्सर इन्द्रियँ वीर्य्यँ यदेता रात्रयो द्वादशपौर्णमास्यो द्वादशैकाष्टका द्वादशामावास्या यावदेव सँवत्सर इन्द्रियँ वीर्यं तदेतेनाप्त्वा- वरुन्धे द्वादशाहेन ॥११॥ त्रिँशदक्षरा वा एषा विराट् षड्तव ऋतुष्वेव विराजा प्रतितिष्ठत्यृतुभिर्व्विराजि ॥१२॥ द्वात्रिँशदक्षरा वा एषानुष्टुब्वागनुष्टुप् चतुष्पादः पशवो वाचा पशून्दाधार तस्माद्वाचासिद्धा वाचाहूता आयन्ति तस्मादु नाम जानते ॥१३॥ इति तृतीयः खण्डः ॥१०/३॥

भूतं पूर्व्वोऽतिरात्रो भविष्यदुत्तरः पृथिवी पूर्वोऽतिरात्रो द्यौरुत्तरोऽग्निः पूर्व्वोऽतिरात्र आदित्य उत्तरः प्राणः पूर्व्वोऽति- रात्र उदान उत्तरः॥१॥ चक्षुषी अतिरात्रौ कनीनिके अग्निष्टोमौ यस्मादन्तरा अग्निष्टोमावतिरात्राभ्यां तस्मादन्तरे सत्यौ कनीनिके भुङ्क्तः ॥२॥ सँवत्सरस्य वा एतौ दँष्ट्रौ यदतिरात्रौ तयोर्न्न स्वप्तव्यँ सँवत्सरस्य दँष्ट्रयोरात्मानं नेदपि दधानीति ॥३॥ तदाहुः कोऽस्वप्तुमर्हति यद्वाव प्राणो जागर तदेव जागरितमिति ॥४॥ गायत्रीँ वा एतां ज्योतिः पक्षामासते यदेतं द्वादशाहमष्टौ मध्य उक्थ्या अग्निष्टोमावभितो मासा स्वर्गँल्लोकमेत्याऽऽजरसं ब्रह्माद्यमन्नमत्ति दीप्यमानः ॥५॥ त्रिष्पुरस्ताद्रथन्तरमुपयन्ति त्र्यावृद्धै वाक् सर्व्वामेव वाच

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मवरुध्य सर्व्वमन्नाद्यं द्वादशाहं तन्वते ॥६॥ जामि वा एतद्यज्ञे क्रियत इत्याहुर्य्यत् त्रिष्टुरस्ताद्रथन्तरमुपयन्तीति सौभरमुक्थानां ब्रह्मसाम भवति तेनैव तदजामि ॥७॥ प्रत्नवत्यः प्रायणीय स्याह्नः प्रतिपदो भवन्ति तेनो एव तदजामि ॥८॥ त्रिर्व्वै वोपरिष्टाद्रथन्तरमुपयन्ति त्र्यावृद्वै वाक् सर्व्वामेव वाचमवरुध्य सर्व्वमन्नाद्यं द्वादशाहादुत्तिष्ठन्ति ॥९॥ इति चतुर्थः खण्डः ॥१०/४॥

त्रयो वा एते त्रिरात्रा यदेष द्वादशाहो गायत्रमुखः प्रथमो गायत्रमध्यो द्वितीयो गायत्रोत्तम स्तृतीयः ॥१॥ यस्माद्गायत्रमुखः प्रथमस्तस्मादूर्ध्वोऽग्निर्द्दीदाय यस्माद्गायत्रमध्यो द्वितीयस्तस्मा-त्तिर्य्यङ्वायुः पवते यस्माद्गायत्रो त्तमस्तृतीयस्तस्मादर्व्वा-ङादित्यस्तपति ॥२॥ तेजसा वै गायत्री प्रथमं त्रिरात्रं दाधार पदैर्द्वितीयमक्षरैस्तृतीयम् ॥३॥ त्रिवृद्वै गायत्र्यास्तेजस्त्रिवृ-त्प्रायणीयमहस्तेन प्रथमस्त्रिरात्रो धृतस्त्रिपदा गायत्री त्रिरात्रो मध्ये तेन द्वितीयस्त्रिरात्रो धृतश्चतुर्व्विँशत्यक्षरा गायत्री चतुर्व्विँशँ उत्तममहस्तेन तृतीयस्त्रिरात्रो धृतः ॥४॥ तेजसा वा एते प्रयन्ति तेजो मध्ये दधति तेजोऽभ्युद्यन्ति ज्योतिषा वा एते प्रयन्ति ज्योतिर्म्मध्ये दधति ज्योतिरभ्युद्यन्ति चक्षुषा वा एते प्रयन्ति चक्षुर्म्मध्ये दधति चक्षुरभ्युद्यन्ति प्राणेन वा एते प्रयन्ति प्राणं मध्ये दधति प्राणमभ्युद्यन्ति ये गायत्र्या प्रयन्ति गायत्रीं मध्ये दधति गायत्रीमभ्युद्यन्ति ॥५॥ तन्त्रँ वा एतद्वितायते यदेष द्वादशाहस्तस्यैते मयूखा यद्गायत्र्यसँव्याथाय ॥६॥ गिरिक्षिदौच्चामन्यवेति होवाचाभिप्रतारी काक्षसेनिः कथं द्वादशाह इति यथारान्नेमिः पर्य्येत्येवमेनं गायत्री पर्य्येत्यवि-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्रँसाय यथारा नाभौ धृता एवमस्यां द्वादशाहो धृतः॥७॥ अनुष्टुभँ वा एतामन्नाद्याय व्यावृज्याऽऽसते यदेतं द्वादशाहम् ॥८॥ अष्टाभिर्व्वा अक्षरैरनुष्टुप् प्रथमं द्वादशाहस्याहरुद्यच्छ-त्येकादश भिर्द्विर्द्वितीयं द्वादशभिस्तृतीयम् ॥९॥ अक्षरं त्र्यक्षर-मुच्छिष्यते तदेवोत्तरं त्रिरात्रमनुविदधाति॥१०॥ छन्दाँस्येवास्या-स्तृतीयं त्रिरात्रं वहन्ति ॥११॥ ताँ वा एतां प्रतीचीं तिरश्चीं पराचीमासतेऽन्नाद्याय तस्मात्प्रत्यञ्चं तिर्य्यञ्चं प्रजाः पशुमुपजीवन्ति ॥१२॥ छन्दाँसि वा अन्योन्यस्य लोकमभ्य-ध्यायन् गायत्री त्रिष्टुभस्त्रिष्टुब्जगत्या जगती गायत्र्यास्तानि व्यौहन् यथा लोकं ततो वै तानि यँ यं काममकामयन्त तमसन्वन् ॥१३॥ यत्कामो व्यूढच्छन्दसा द्वादशाहेन यजते सोऽस्मै कामः समृध्यते ॥१४॥ ओको वै देवानां द्वादशाहो यथा वै मनुष्या इमँल्लोकमाविष्टा एवं देवता द्वादशाहमाविष्टा देवता ह वा एतेन यजते य एवँ विद्वान् द्वादशाहेन यजते ॥१५॥ गृहा वै देवानां द्वादशाहो नागृहताया भय्यम् ॥१६॥ यो वै द्वादशाहमग्निष्टोमेन कल्पमानँ वेद कल्पतेऽस्मै प्रात-स्सवनेनैव प्रथमस्त्रिरात्रः कल्पते माध्यन्दिनेन सवनेन द्वितीय -स्तृतीयसवनेन तृतीयोऽग्निष्टोम साम्नैव दशममहः कल्पते ॥१७॥ कल्पतेऽस्मै य एवँ वेद ॥१८॥ इति पञ्चमः खण्डः ॥१०/५॥

एति प्रेत्याशुमद्वीतिमदृक्मत्तेजस्वद्युञ्जानं प्रथमस्याह्नो रूपं त्रिवृतः स्तोमस्य गायत्रस्य छन्दसो रथन्तरस्य साम्नः॥१॥ वृषवद्वृत्रहवद्रयिमद्विश्ववदुपस्थितं द्वितीयस्याह्नो रूपं पञ्चदशस्य स्तोमस्य त्रैष्टुभस्य छन्दसो बृहतः साम्नः ॥२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उद्वत्रिवद्दिग्वद्वोमदृषभवत् तृतीयस्याह्नो रूपँ सप्तदशस्य स्तोमस्य जागतस्य छन्दसो वैरूपस्य साम्नः॥३॥ राजन्व-ज्जनद्वत्सूर्य्यवद्विराडनुतोदवच्चतुर्थस्याह्नो रूपमेकविँशस्य स्तोमस्यानुष्टुभस्य छन्दसो वैराजस्य साम्नः ॥४॥ चित्रवच्छिशुमत् पङ्क्तिः शक्वरी द्यूनाक्षरा गोमदृषभववज्र्य भिमत्पञ्चमस्याह्नो रूपं त्रिणवस्य स्तोमस्य पाङ्क्तस्य छन्दसः शक्वरीणाँ साम्नः ॥५॥ परिवत्प्रतिवत्सप्तपदा द्विपदा वि नाराशँसा गोमदृषभवत् षष्ठस्याह्नो रूपं त्रयस्त्रिँशस्य स्तोमस्य सर्व्वेषां छन्दसां रूपँ रेवतीनाँ साम्नः॥६॥ यस्मादेषा समाना सती षडह विभक्तिर्न्नानारूपा तस्माद्विरूपः सँवत्सरः ॥७॥ विरूपमेनमनुप्रजायते य एवँ वेद॥८॥इति षष्ठःखण्डः॥१०/६॥

अग्ग्न इति प्रथमस्याह्नो रूपमग्निविभक्तेरग्निमिति द्वितीयस्याग्निनेति तृतीयस्याग्निनिरिति चतुर्थस्य ॥१॥ देवा वै श्रियमैच्छँस्तान्न प्रथमेऽहन्यविन्दन्न द्वितीये न तृतीये ताञ्चतुर्थेऽहन्यविन्दन् विन्दते श्रियँ य एवँ वेदाग्ग्नेरिति पञ्चमस्य तेनो श्रीः प्रत्युपोदितेत्याहुः ॥२॥ अप्रतिवाद्येनं भ्रातृव्यो भवति य एवँ वेद ॥३॥ अग्ग्न इति षष्ठस्य येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति ॥४॥ यस्मादेषा समाना सत्यग्नि-विभक्तिर्न्नानारूपा तस्माद्यथर्त्वादित्यस्तपति ॥५॥ इति सप्तमः खण्डः॥१०/७॥

इन्द्रेति प्रथमस्याह्नो रूपमिन्द्रविभक्तेरिन्द्रमिति द्वितीय-स्येन्द्रेणेति तृतीयस्येन्द्र इति चतुर्थस्येन्द्रादिति पञ्चमस्येन्द्रेति षष्ठस्य येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति यस्मादेषा समाना

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सतीन्द्रविभक्तिर्न्नानारूपा तस्माद्यथर्त्त्वोषधयः पच्यन्ते ॥१॥ इत्यष्टमः खण्डः॥१०/८॥

यदृचा प्रस्तौति तत्प्रथमस्याह्नो रूपँ स्वरविभक्ते-र्य्यत्पुरस्तात् स्तोमं तद्द्वितीयस्य यदुभयतः स्तोभं तत्तृतीयस्य यदनुतुन्नं तच्चतुर्थस्य यदभ्यारब्धं तत्पञ्चमस्य यदिहकारेणा-भ्यस्यं तत्षष्ठस्याह्नो रूपम् ॥१॥ स्वराणाँ यस्मादेषा समाना सती स्वरविभक्तिर्न्नानारूपा तस्माद्यथर्त्तु वायुः पवते ॥२॥ इति नवमः खण्डः ॥१०/९॥

पदनिधनं प्रथमस्याह्नो रूपं निधनविभक्तेर्ब्बहिर्णिधनं द्वितीयस्य दिङ्निधनं तृतीयस्येनिधनञ्चतुर्थस्याथकारणिधनं पञ्चमस्य यदि हकारेणाभ्यस्तं तत् षष्ठस्याह्नो रूपं निधनानाँ यस्मादेषा समाना सती निधनविभक्तिर्न्नानारूपा तस्मादिमे लोकाः सह सन्तो ना नैव ॥१॥ इति दशमः खण्डः ॥१०/१०॥

द्रवदिडं प्रथमस्याह्नो रूपमिडा विभक्तेरूर्ध्वेडं द्वितीयस्य परिष्टुब्धेडं पञ्चमस्य यदि हकारेणाभ्यस्तं तत् षष्ठस्याह्नो रूपमिडानां यस्मादेषा समाना सतीडा विभक्तिर्न्नानारूपा तस्मात्समानाः सन्तः पशवो नाना रूपाः ॥१॥ इत्येकादशः खण्डः ॥१०/११॥

भारद्वाजायना वै सत्रमासत तानपृच्छन् किं प्रथमेनाह्ना कुरुतेति प्रै वै मेति किं द्वितीयेनेत्यव समेवाकुर्म्महीति किं तृतीयेनेति पर्य्येवाप्सवामहीति किं चतुर्थेनेति सतैव सदप्यदध्मेति किं पञ्चमेनेति प्राणानेव विच्छिन्दन्त ऐमेति किं षष्ठेनेतीदमेवागच्छामेति ॥१॥ यस्य पदेन प्रस्तौत्यथ स्वारमभि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वा व तेन देवाः पशूनपश्यन् यत्पुरस्तात् स्तोभमथ स्वारमुदेव तेनासृजन्त यदुभयतः स्तोभमथ स्वारमेभ्य एव तेन लोकेभ्यो देवाः पशुभ्योऽन्नाद्यं प्रायच्छन् यदनुतुन्नमथ स्वारमुदेव तेनाशिक्षन्यस्य मध्ये निधनमथ स्वारं गर्भँस्तेनादधत ता निहवता स्वारेण प्राजनयन् ॥२॥ इमँ वाव देवा लोकं पदनिधनेनाभ्यजयन्नमुं बहिर्णिधनेनान्तरिक्षं दिङ्निधनेनामृ-तत्वमीनिधनेनागच्छन् ब्रह्मवर्च्चसमथ निधनेनावारुन्धतास्मिन्नेव लोक इह निधनेन प्रत्यतिष्ठन् ॥३॥ इमँ वाव देवा लोकं द्रवदिडेनाभ्यजयन्नमुमूर्ध्वेडेनान्तरिक्षं परिष्टुब्धेडेन प्रतिष्ठा-मिडाभिरैडेनावारुन्धत प्रतिष्ठायाध्यर्द्धेडेन व्यजयन्तास्मिन्नेव लोक इहेडेन प्रत्यतिष्ठन् ॥४॥ न वाक् सँवत्सरमतिवदतीडैव सँवत्सरमतिवदति गर्भेण सँवत्सरे पर्य्यावृत्य प्रजायते तेनातिवदति ॥५॥ ता वा एताश्चतस्रः षडहं पराच्य इडा अतियन्त्येषा नू तैषा विषूच्येषा प्रतीच्येतद्वीडम् ॥६॥ सँवत्सरोऽग्निर्व्वाक् सँवत्सरो यदग्निर्व्विभज्यते वाचमेव तद्विभजन्ति ॥७॥ द्वे द्वे अक्षरे विभजन्ति द्वौ द्वौ हि मासावृतुरथो मासानामेव तद्रूपं क्रियते ॥८॥ षडहानि विभजन्ति षड़ृतव ऋतूनां धृत्या ऋतूनां प्रतिष्ठित्या अथो ऋतूनामेव तद्रूपं क्रियते षड्पुरुषा यानग्निरनु विह्रियते ॥९॥ यदिदं बहुधाग्निर्व्विह्रियते यदसावादित्यः सर्व्वाः प्रजाः प्रत्यङ् तस्मादेते एव देवते विभक्तिमानशाते नातोऽन्या काचन ॥१०॥ इति द्वादशः खण्डः॥१०/१२॥ **इति दशमोऽध्यायः**

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथैकादशोऽध्यायः

स्तोमो युज्यते सन्त्रियेभ्योऽहर्भ्यः प्लवतीभिश्चोपवतीभिश्च ॥१॥ यत्प्लवत्य उपवतीभ्यः पूर्व्वा युज्यन्ते ब्रह्म तत्पूर्व्वं क्षत्राद्युज्यते ब्रह्म हि पूर्व्वं क्षत्रात् ॥२॥ मनस्तत्पूर्व्वँ वाचो युज्यते मनो हि यद्धि मनसाभिगच्छति तद्वाचा वदति ॥३॥ बृहत्तत्पूर्व्वँ रथन्तराद्युज्यते बृहद्धि पूर्व्वँ रथन्तराद्विजित्या तु वै रथन्तरं पूर्व्वँ योगमानशे ॥४॥ सम्भार्य्यास्तृचा भवन्ति यथाशिष्टान्वहिष्ठान् सम्भरेदेवमेवैतान् सम्भरन्ति गत्यै॥५॥ नव भवन्ति नवाहस्य युक्त्या ऋचर्च्चैवाह र्य्युनक्ति यथा प्रार्थस्य शम्या अवदध्यादेवमेवैतन्नवाहस्य शम्या अवदधाति गत्यै ॥६॥ त्रिवृदेव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय ॥७॥ इति प्रथमः खण्डः ॥११/१॥

उभाभ्याँ वै रूपाभ्यां बहिष्पवमान्यो युज्यन्ते यत्सामा स्तोमो भवति तदाज्येषु ॥१॥ निराहावन्त्या ज्यानि भवन्ति युक्तमेव तैराह्वयति ॥२॥ अग्ग्न आयाहि वीतय आ नो मित्रावरुणा आयाहि सुषमा हि त इन्द्राग्ग्नी आगतँ सुतमिति राथन्तरमेव तद्रूपं निर्द्योतयति स्तोम इति॥३॥ इति द्वितीयः खण्डः ॥११/२॥

प्र सोमासो विपश्चित इति गायत्री भवति प्रेत्या अभि द्रोणानि बभ्रव इत्यभिक्रान्त्यै सुता इन्द्राय वायव इति सँस्कृत्यै प्र सोम देववीतय इति प्रेत्यै प्र तु द्रवेति प्रेत्यै प्र वा एतेनाह्ना यन्ति ॥१॥ गायत्रं भवति ॥२॥ यदेव गायत्रस्य ब्राह्मणम् ॥३॥ आश्वं भवति ॥४॥ अश्वो वै भूत्वा प्रजापतिः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रजा असृजत स प्राजायत बहुरभवत्प्रजायते बहुर्भवत्याश्वेन तुष्टुवानः॥५॥ एकाक्षरं निधनमुपयन्ति रथन्तरस्यानतिवादाय ॥६॥ अनतिवाद्येनं भ्रातृव्यो भवति य एवँ वेद ॥७॥ सोम साम भवति ॥८॥ यथा वा इमा अन्या ओषधय एवँ सोम आसीत्स तपोऽतप्यत स एतत्सोमसामापश्यत्तेन राज्यमाधिपत्यमगच्छद्यशोऽभवद्राज्यमाधिपत्यं गच्छति यशो भवति सोमसाम्ना तुष्टुवानः॥९॥ यौधाजयं भवति यदेव यौधाजयस्य ब्राह्मणम्॥१०॥औशनँ यदौशनस्य स्तोमः॥११॥ इति तृतीयः खण्डः ॥११/३॥

अभि त्वा शूर नो नुम इत्यभीति रथन्तरस्य रूपँ राथन्तरँ ह्येतदहः॥१॥ कया नश्चित्र आभुवदिति कवत्यस्तेन प्राजापत्याः को हि प्रजापतिः प्रजापतेराप्त्यै ॥२॥ तँ वो दस्म मृतीषहँ वसोर्म्मन्दानमन्धसोऽभिवत्सं न स्वसरेषु धेनव इत्यभीति रथन्तरस्य रूपँ राथन्तरँ ह्येतदहः ॥३॥ इन्द्रं गीर्भिर्हवामह इति हवन्त एवैनम् ॥४॥ तरोभिर्वो विदद्वसुमिति स्तोमो वै तरो यज्ञो विदद्वसुः स्तोमेन वै यज्ञो युज्यते यत्तरोभिर्वो विदद्वसुमित्याह यज्ञमेव तद्युनक्ति ॥५॥ रथन्तरं भवति ब्रह्म वै रथन्तरं ब्रह्म प्रायणीयमहर्ब्रह्मण एव तद् ब्रह्माक्रम्य प्रयन्ति ॥६॥ इयँ वै रथन्तरमस्यामेव प्रतिष्ठाय सत्रमासते ॥७॥ वामदेव्यं भवति पशवो वै वमदेव्यं पशूनामवरुध्यै प्राजापत्यँ वै वामदेव्यं प्रजापतावेव प्रतिष्ठाय सत्रमासते ॥८॥ नौधसं भवति ब्रह्म वै नौधसं ब्रह्म प्रायणीयमहर्ब्रह्मण एव तद् ब्रह्माक्रमन्ते ॥९॥ कालेयं भवति समानलोके वै कालेयञ्च

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रथन्तरञ्चेयँ वै रथन्तरं पशवः कालेयमस्याञ्चैव पशुषु च प्रतिष्ठाय सत्रमासते ॥१०॥ द्रवदिडं तथा ह्येतस्याह्नो रूपँ स्तोमः॥११॥ इति चतुर्थः खण्डः॥११/४॥

प्र सोमासो मदच्युत इति गायत्री भवति मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति अया पवस्व देवयुरित्येति रथन्तरस्य रूपँ राथन्तरँ ह्येतदहः पवते हर्य्यतो हरिरिति बृहतो रूपं बृहदेव तदेतस्मिन्नहनि युनक्ति तद्युक्तँ श्व आरभन्ते प्रसुन्वानायान्धस इति प्रवत्यो भवन्ति प्रणिनीषेण्य-मिव ह्येतदहरभि प्रियाणि पवते च नोहित इत्यभीति रथन्तरस्य रूपँ राथन्तरँ ह्येतदहः ॥१॥ यज्ञा यज्ञा वो अग्नय इत्यग्निर्व्वै यज्ञो यज्ञ एव तद्यज्ञं प्रतिष्ठापयति ॥२॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥३॥ सँहितं भवति द्व्यक्षर णिधनं प्रतिष्ठायै प्रतिष्ठायैव सत्रमासते ॥४॥ सफं भवति ॥५॥ सफेन वै देवा इमान् लोकान् समाप्नुवन् यत्समाप्नुवन् तत्सफस्य सफत्वमिमानेवैतेन लोकान् समाप्य सत्रमासते ॥६॥ आक्षारं भवति ॥७॥ अष्टौ वा एताः कामदुघा आसँ स्तासामेका समशीर्य्यत सा कृषिरभवदृध्यतेऽस्मै कृषौ य एवँ वेद ॥८॥ तासु देवासुरा अस्पर्द्धन्त ते देवा असुरान् कामदुघाभ्य आक्षारेणानुदन्त नुदते भ्रातृव्यं कामदुघाभ्य आक्षारेण तुष्टुवानः ॥९॥ एभ्यो वै लोकेभ्यो रसोऽपाक्रामत्तं प्रजापतिराक्षारेणा-क्षारयत् यदाक्षारयत्तदाक्षारस्याक्षारत्वम् ॥१०॥ तस्माद्यः पुरा पुण्यो भूत्वा पश्चात्पापीयान् स्यादाक्षारं ब्रह्मसाम कुर्व्वीता-त्मन्येवेन्द्रियँ वीर्य्यँ रसमाक्षारयति॥११॥जनुषैकच्चौं भवतोऽह्नो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धृत्यै यद्वा एतस्याह्नोऽधृतं तदेताभ्यां दाधार ॥१२॥ गौरीवितं भवति ॥१३॥ गौरीवितिर्व्वा एतच्छाक्त्यो ब्राह्मणोऽतिरिक्तमपश्यत्तद्गौरीवितमभवत् ॥१४॥ अतिरिक्तँ वा एतदतिरिक्तेन स्तुवन्ति यद्गौरीवितेनाहीनाञ्छवस्तनवद्भवत्यपि प्रजाया उपक्लृप्तम् ॥१५॥ वृषा वा एतद्वाजिसाम वृषभो रेतोधा अद्य स्तुवन्ति श्वः प्रजायते ॥१६॥ अनुष्टुभि छन्दसां क्रियतेऽनुष्टुब्भि छन्दसाँ योनिः स्वायामेव तद्योनौ रेतो धत्ते प्रजात्यै ॥१७॥ प्रजायते बहुर्भवति य एवँ वेद ॥१८॥ ह्युदासं भवत्येतौ वा उदासौ स्वर्ग्गस्य लोकस्यावसानदर्शौ पूर्व्वेण पूर्व्वमहः सँस्थापयन्त्युत्तरेणोत्तरमहरभ्यति वदन्ति ॥१९॥ तद्यथादः पूर्व्वेद्युः स्पष्टं तृणोदकमन्ववस्यन्तो यन्त्येवमेव ताभ्याँ स्वर्ग्गँ ल्लोकमन्ववस्यन्तो यन्ति ॥२०॥ गौतमं भवति ॥२१॥ सामार्षेयवत् स्वर्ग्गाय युज्यते स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः ॥२२॥ यदु चैवानुष्टुभस्य मध्ये निधनस्य ब्राह्मणं तदु चैतस्य ॥२३॥ कावं भवति ॥२४॥ लोकबिन्दुसाम विन्दते लोकं कावेन तुष्टुवानः ॥२५॥ स्वारमु स्वरेण स्वरेण हि देवेभ्योऽन्ततोऽन्नाद्यं प्रदीयते स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्रयच्छति ॥२६॥ यज्ञायज्ञीयं भवति ॥२७॥ वागयज्ञायज्ञीयँ वाचि यज्ञः प्रतिष्ठितो वाच्येव तद्यज्ञमन्ततः प्रतिष्ठापयन्ति तँ वाचोऽधि श्व आरभन्ते ॥२८॥ त्रिवृदेव स्तोमो भवति तेजसे ब्रह्मवर्च्वसाय ॥२९॥ इति पञ्चमः खण्डः ॥११/५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवस्व वाचो अग्रिय इति द्वितीयस्याह्नः प्रतिपद्भवति ॥१॥ पवस्वेति वै राथन्तरँ रूपमग्रिय इति बार्हतमुभे रूपे समारभते द्विरात्रस्याविस्रँसाय ॥२॥ पवस्वेन्दो वृषा सुत इत्यनुरूपो भवति वृषण्वद्वा एतदैन्द्रं त्रैष्टुभमहर्य्यत् द्वितीयं तदेव तदभिवदति ॥३॥ पूर्व्वमुचैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्व्वरूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वम् ॥४॥ अनुरूप एनं पुत्रो जायते य एवँ वेद ॥५॥ स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥६॥ वृषण्वन्तस्तृचा भवन्तीन्द्रियस्य वीर्य्यस्यावरुध्यै ॥७॥ तृच उत्तमो भवति ॥८॥ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥९॥ पञ्चदश एव स्तोमो भवति ॥१०॥ ओजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्य्यं पञ्चदशः ॥११॥ इति षष्ठः खण्डः ॥११/६॥

उभाभ्याँ रूपाभ्यां बहिष्पवमान्यो युज्यन्ते यत्सामा स्तोमो भवति तदाज्येषु ॥१॥ निराहोपस्थितान्याज्यानि भवन्ति ॥२॥ अग्निं दूतँ वृणीमहे मित्रँ वयँ हवामह इन्द्रमिद्गाथिनो बृहदिन्द्रो अग्ना नमो बृहदिति बार्हतमेव तद्रूपं निर्द्योतयति स्तोमः ॥३॥ इति सप्तमः खण्डः ॥११/७॥

वृषा पवस्व धारयेति गायत्री भवत्यह्नो धृत्यै ॥१॥ वृषण्वत्यस्त्रिष्टुभो रूपेण त्रैष्टुभँ ह्येतदहः ॥२॥ पुनानस्सोम धारयेति धृत्यै ॥३॥ वृषा शोणो अभि कनिक्रदद्गा इति ॥४॥ वृषण्वत्यस्त्रिष्टुभो रूपेण समृद्धा वृषण्वद्वा एतदैन्द्रं त्रैष्टुभ-महर्य्यत् द्वितीयं तदेव तदभिवदति ॥५॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥६॥ यौक्ताश्वं भवति ॥७॥ युक्ताश्वो वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आङ्गिरसः शिशू जातौ विपर्य्यहरत्तस्मान्मन्त्रोपाक्रामत्स तपोऽतप्यत स एतद्यौक्ताश्वमपश्यत्तं मन्त्र उपावर्त्तत तद्वाव स तर्ह्यकामयत कामसनि साम यौक्ताश्वं काममेवैतेनावरुन्धे ॥८॥ आयास्ये भवतः ॥९॥ अयास्यो वा आङ्गिरस आदित्यानां दीक्षितानामन्नमाश्नात्तँशुगाच्छर्त् स तपोऽतप्यत स एते आयास्ये अपश्यत्ताभ्याँ शुचमपहतापशुचँ हत आयास्याभ्यां तुष्टुवानः ॥१०॥ एभ्यो वै लोकेभ्यो वृष्टिरपाक्रामत्तामयास्य आयास्याभ्यामच्यावयत् च्यावयति वृष्टिमायास्याभ्यां तुष्टुवानः ॥११॥ अन्नाद्यँ वाव तदेभ्यो लोकेभ्योऽपाक्रामत्तदयास्य आयास्याभ्यामच्यावयत् च्यावयत्यन्नाद्यमायास्याभ्यां तुष्टुवानः॥१२॥ वासिष्ठं भवति ॥१३॥ वसिष्ठो वा एतेन वैडवः स्तुत्वाञ्जसा स्वर्गँल्लोकमपश्यत्स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानःस्तोमः॥१४॥ इत्यष्टमःखण्डः॥११/८॥

त्वामिद्धि हवामह इति त्वमिति बृहतो रूपं बार्हतँ ह्येतदहः॥१॥ अभिप्रवः सुराधसमिति युञ्जते वै पूर्व्वेणाह्ना ह्येतेन प्रयन्ति ॥२॥ त्वामिदाह्यो नर इत्यद्य चैव ह्यश्च समारभते द्विरात्रस्याविस्रँसाय ॥३॥ बृहद्भवति वर्ष्म वै बृहद्वर्ष्म द्वितीयमहर्व्वर्ष्मण एव तद्वर्ष्माक्रमन्ते ॥४॥ श्येतं भवति साम्नोर्व्विवाहो यज्ञस्य सन्तत्यै ॥५॥ माधुच्छन्दसं भवति सामार्षेयवत् स्वर्गाय युज्यते स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥६॥ ऊद्ध्र्वेडं तथा ह्येतस्याह्नो रूपँ स्तोमः ॥७॥ इति नवमः खण्डः ॥११/९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्ते मदो वरेण्य इति गायत्री भवति ॥१॥ मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति ॥२॥ पवस्व मधुमत्तम इति पवन्त इव ह्येतेनाह्ना मधुमत्तम इत्यन्नँ वै मध्वन्नाद्यमेव तद्यजमाने दधाति ॥३॥ इन्द्रमच्छ सुता इम इतीन्द्रियस्य वीर्य्यस्यावरुध्यै ॥४॥ अयं पूषा रयिर्भग इति ॥५॥ अनुष्टुभः सत्यस्त्रिष्टुभो रूपेण त्रैष्टुभँ ह्येतदहः ॥६॥ वृषा मतीनां पवते विचक्षण इति जगत्यः सत्यस्त्रिष्टुभो रूपेण त्रैष्टुभँ ह्येतदहः ॥७॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥८॥ हाविष्मतं भवति ॥९॥ हविष्माँश्च वै हविष्कृच्चाङ्गिरसावास्तां द्वितीयेऽहनि हविष्मानराध्नोन्नवमेऽहनि हविष्कृत् ॥१०॥ अयँ हविष्मानित्येव जातमहर्ज्जातँ सोमं प्राह देवेभ्यः साम्नैवास्मा आशिष-माशास्ते साम हि सत्याशीः ॥११॥ शङ्कु भवत्यह्नो धृत्यै यद्वा अधृतं शङ्कुना तद्दाधार ॥१२॥ तदु सीदन्तीयमित्याहुरेतेन वै प्रजापतिरूद्ध्र्व इमाँल्लोकानसीदद्यदसीदत्तत्सीदन्तीयस्य सीदन्तीयत्वमूद्ध्र्व इमाँल्लोकान् सीदति सीदन्तीयेन तुष्टुवानः ॥१३॥ सुज्ञानं भवति ॥१४॥ स्वर्व्वद्वै राथन्तरँ रूपँ स्वर्णिधनं बार्हतम् ॥१५॥ स्वर्णिधनं भवति तथा ह्येतस्याह्नो रूपम् ॥१६॥ प्लवौ वा एतावुपोहन्ते स्वर्ग्गस्य लोकस्य समष्ट्यै ॥१७॥ गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥१८॥ क्रौञ्चं भवति ॥१९॥ वाग्वै क्रौञ्चँ वाग्द्वादशाहो वाच्येव तद्वाचा स्तुवते यज्ञस्य प्रभूत्यै ॥२०॥ यामं भवति ॥२१॥ एतेन वै यमोऽनपजय्यममुष्य लोकस्याधिपत्यमाश्नुतानपजय्यममुष्य लोकस्याधिपत्यमश्नुते यामेन तुष्टुवानः ॥२२॥ एतेन वै यमी

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यमँ स्वर्गँल्लोकमगमयत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः स्तोमः ॥२३॥ इति दशमः खण्डः ॥११/१०॥

एह्यूषु ब्रवाणि त इत्ये हि वत्यो भवन्ति तृतीयस्याह्न उपहवाय सन्तत्यै ॥१॥ अपच्छिदिव वा एतद्यज्ञकाण्डँ यदुक्थानि यदेति स लोमत्वाय ॥२॥ एवा ह्यसि वीरयुरिति समानँ वदन्तीदमित्थमसदिति ॥३॥ इन्द्रँ विश्वा अवीवृधन्नि-त्यवर्द्धन्त ह्येतर्हि यजमानमेवैतया वर्द्धयन्ति ॥४॥ साकमश्वं भवत्युक्थानामभिजित्या अभिक्रान्त्यै ॥५॥ एतेन ह्यग्र उक्थान्यभ्यजयन्नेतेनाभ्यक्रामन् ॥६॥ आमहीयवं भवति क्लृप्तिश्चान्नाद्यञ्च समानँ वदन्तीषु क्रियत इदमित्थमसदिति ॥७॥ क्षत्रँ वा एतदहरभि निवदति यत्पञ्चदशं यद्गायत्रीषु ब्रह्मसाम भवति ब्रह्म चैव तत्क्षत्रञ्च सयुजी करोति ब्रह्मैव क्षत्रस्य पुरस्तान्निदधाति ब्रह्मणे क्षत्रञ्च विशञ्चानुगे करोति ॥८॥ ब्रह्म वै पूर्व्वमहः क्षत्रं द्वितीयँ यद्गायत्रीषु ब्रह्मसाम भवति ब्रह्म तद्यशसार्द्धयति ब्रह्म हि गायत्री ॥९॥ तदु समानँ वदन्तीषु क्रियते स समृद्ध्यै ॥१०॥ आष्टादँष्ट्रे भवतः ॥११॥ ऐयाहा इति वा इन्द्रो वृत्रमहन्नैयादोहो वेति न्यगृह्णाद्वार्त्रघ्ने सामनी वीर्य्यवती॥१२॥ ओज एवैताभ्याँ वीर्य्यमवरुन्धे॥१३॥ पञ्चदश एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्य्यं पञ्चदशः ॥१४॥ इत्येकादशः खण्डः ॥११/११॥

इत्येकादशोऽध्यायः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वादशोऽध्यायः

दविद्युतत्या रुचेति तृतीयस्याह्नः प्रतिपद्भवति ॥१॥ दविद्युतती वै गायत्री परिष्टोभन्ती त्रिष्टुब्गवाशीर्ज्जगती त्रीणि रूपाणि समारभते त्रिरात्रस्याऽविस्रँसाय ॥२॥ एते असृग्रमिन्दव इत्यनुरूपो भवति ॥३॥ एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितॄँस्तदेव तदभिवदति ॥४॥ पूर्व्वमुचैव तद्रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते य एवँ वेद ॥५॥ स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥६॥ राजा मेधाभिरीयते पवमानो मनावध्यन्तरिक्षेण यातव इति ॥७॥ अन्तरिक्षदेवत्यस्तृचो भवत्यन्तरिक्षदेवत्यमेतदहर्य्यत्तृतीयं तदेव तदभिवदति ॥८॥ पञ्चर्च्चो भवति पञ्चपदा पङ्क्तिः पाङ्क्तमन्नमन्नाद्यस्यावरुध्यै ॥९॥ तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युपयन्ति ॥१०॥ सप्तदश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥११॥ इति प्रथमः खण्डः ॥१२/१॥

अग्निनाग्निः समिध्यत इत्याग्नेयमाज्यं भवति ॥१॥ पूर्व्वे एव तदहनी समिद्धे तृतीयमहरभिसमिन्धे ॥२॥ मित्रँ हुवे पूत दक्षमिति राथन्तरम्मैत्रावरुणम् ॥३॥ हुव इति वै राथन्तरँ रूपम् ॥४॥ रथन्तरमेतत्परोक्षँ यद्वै रूपँ राथन्तरमेव तद्रूपं निद्योतयति ॥५॥ इन्द्रेण सँहि दृक्षु स इत्यैन्द्रम् ॥६॥ समिव वा इमे लोका ददृशिरेऽन्तरिक्षदेवत्यमेतदहर्य्यत्तृतीयं तदेव तदभिवदति ॥७॥ ता हुवे ययोरिदमिति राथन्तरमैन्द्राग्नम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥८॥ हुव इति वै राथन्तरँ रूपँ रथन्तरमेतत्परोक्षँ यद्वैरूपँ राथन्तरमेव तद्रूपं निद्द्योतयति स्तोमः ॥९॥ इति द्वितीयः खण्डः ॥१२/२॥

उच्चा ते जातमन्धस इति गायत्री भवति ॥१॥ उद्वद्वा एतदहर्य्यत्तृतीयं तदेव तदभिवदति॥२॥ अन्धस्वती भवत्यहर्व्वा अन्धोऽह्न आरम्भः ॥३॥ अभि सोमास आयव इति ॥४॥ अभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोस्सह रूपमुपैत्युभौ हि वर्णावेतदहः ॥५॥ तिस्रो वाच ईरयति प्र वह्निरिति तृतीयस्याह्नो रूपं तेन तृतीयमहरारभन्ते ॥६॥ त्रिष्टुभः सत्यो जगत्यो रूपेण जागतँ ह्येतदहः ॥७॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥८॥ वैष्टम्भं भवति ॥९॥ अहर्व्वा एतदव्लीयत तद्देवा वैष्टम्भैर्व्यष्टभ्नुवँस्तद्वैष्टम्भस्य वैष्टम्भत्वम् ॥१०॥ दिश इति निधनमुपयन्ति दिशां धृत्यै ॥११॥ पौरुमद्गं भवति ॥१२॥ अहर्व्वा एतदव्लीयमानं तद्रक्षाँस्यन्वसचन्त तस्माद्देवाः पौरुमद्गेन रक्षाँस्यपाघ्नन्नप पाप्मानँ हते पौरुमद्गेन तुष्टुवानः ॥१३॥ देवाश्च वासुराश्चास्पर्धन्त ते देवा असुराणां पौरुमद्गेन पुरोमज्जयन्यत्पुरोऽमज्जयँस्तस्मात्पौरुमद्गं पाप्मानमे- वैतेन भ्रातृव्यं मज्जयति ॥१४॥ गौतमं भवति ॥१५॥ यदेव गौतमस्य ब्राह्मणम्॥१६॥उभयतः स्तोत्रं तथा ह्येतस्याह्नो रूपम् ॥१७॥अन्तरिक्षं भवति ॥१८॥अन्तरिक्षदेवत्यमेतदहर्य्य त्तृतीय- मन्तरिक्ष एव तदन्तरिक्षेण स्तुवते प्रतिष्ठायै ॥१९॥ आष्कार- णिधनं काण्वं भवति ॥२०॥ असिति वै राथन्तरँ रूपँ हसिति बार्हतं तृतीयमेव तद्रूपमुपयन्ति समृद्ध्यै ॥२१॥ अङ्गिरसाँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सङ्क्रोशो भवति ॥२२॥ एतेन वा अङ्गिरसः सङ्क्रोशमानाः स्वर्गँल्लोकमायन्स्वर्ग्गस्य लोकस्यानुख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः स्तोमः॥२३॥ इति तृतीयः खण्डः ॥१२/३॥

यद्याव इन्द्र ते शतमिति शतवत्यो भवन्ति ॥१॥ शतवद्वै पशूनाँ रूपँ सहस्रवत्पशूनामेवैताभी रूपमवरुन्धे॥२॥ वयङ्घ्त्वा सुतावन्त इति सतो बृहत्यो वर्षीयश्छन्द आक्रमतेऽनपभ्रँशाय ॥३॥ तरणिरित्सिषासति वाजं पुरन्ध्या युजा व इन्द्रं पुरुहूतं न मे गिरेत्यावदक्षरमुद्धतमिव वै तृतीयमहर्य्यदेतदावदक्षरं भवत्यहरेवैतेन प्रतिष्ठापयति ॥४॥ पञ्चनिधनँ वैरूपं पृष्ठं भवति दिशां धृत्यै ॥५॥ पञ्चपदा पङ्क्तिः पाङ्क्तमन्नमन्नाद्य-स्यावरुध्यै ॥६॥ दिशाँ वा एतत्साम यद्वैरूपं दिशो ह्येवैतेनाभिवदति॥७॥अथ यत्पञ्चनिधनं तेनर्त्तूनां पञ्च ह्यृतवः ॥८॥ ऋतुभिश्च वा इमे लोका दिग्भिश्चावृता स्तेष्वेवोभयेषु यजमानं प्रतिष्ठापयति यजमानँ वा अनुप्रतितिष्ठन्तमुद्गाता प्रतितिष्ठति य एवँ विद्वान् वैरूपेणोद्गायति ॥९॥ दिग्वद्भवति भ्रातृव्यस्यापनुत्यै ॥१०॥ दिशँ विशमिति निधनमुपयन्ति दिशां धृत्यै ॥११॥ हसित्युपरिष्टाद्दिशां निधनमुपयन्ति तेन बार्हतम् ॥१२॥ राथन्तरो वा अयँ लोको बार्हतोऽसावुभे एव तद् बृहद्रथन्तरयो रूपेणापराध्नोति ॥१३॥ अनड्वाहौ वा एतौ देवयानौ यजमानस्य यद्बृहद्रथन्तरे तावेव तद्युनक्ति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥१४॥ अश्ववद्भवति प्रजात्यै ॥१५॥ यथा मण्डूक आट् क्रोत्येवं निधनमुपयन्त्ययातयामतायै ॥१६॥ द्वादशवैरूपाणि भवन्ति द्वादशमासाः सँवत्सरः सँवत्सर एव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतितिष्ठति ॥१७॥ विरूपः सँवत्सरो विरूपमन्नमन्नाद्यस्याव-रुद्ध्यै ॥१८॥ महावैष्टम्भं ब्रह्मसाम भवत्यन्नाद्यस्यावरुद्ध्यै ॥१९॥ यदा वै पुरुषोऽन्नमत्यथान्तरतो विष्टब्धः ॥२०॥ दिश इति निधनमुपयन्ति दिशां धृत्यै ॥२१॥ सतो बृहतीषु स्तुवन्ति पूर्व्वयोरह्नोः प्रत्युद्यमाय ॥२२। रौरवमच्छावाकसाम भवति ॥२३॥ अग्निर्व्वै रूरो रुद्रोऽग्निः ॥२४॥ अग्निर्व्वा एतस्य पशूनपक्रमयति यस्य पशवोऽपक्रामन्त्यग्निरेव तस्य पशून-भिक्रमयति यस्य पशवोऽभिक्रामन्ति ॥२५॥ अभ्यभ्येवास्य पशवः क्रामन्ति य एवँ विद्वान् रौरवेण स्तुवते ॥२६॥ परिष्टुब्धेडं तथा ह्येतस्याह्नो रूपँ स्तोमः॥२७॥ इति चतुर्थः खण्डः ॥१२/४॥

तिस्रो वाच उदीरत इति तृतीयस्याह्नो रूपं तेन तृतीयमहरारभन्ते ॥१॥ उद्वद्वा एतत् त्रिवृदहर्य्यत्तृतीयं तदेव तदभिवदति ॥२॥ आ सोता परिषिञ्चतेति परिवत्यो भवन्ति ॥३॥ अन्तो वै तृतीयमहस्तस्यैताः पर्य्याप्त्यै ॥४॥ सखाय आ निषीदतेत्युद्धतमिव वै तृतीयमहर्य्यदाह निषीदतेत्यहरेवैतेन प्रतिष्ठापयति ॥५॥ सुतासो मधुमत्तमा इत्यनुष्टुभः सत्यो जगत्यो रूपेण जागतँ ह्येतदहः ॥६॥ पवित्रं ते विततं ब्रह्मणस्पत इति ॥७॥ विततमिव वा इदमन्तरिक्षमन्तरेमे अन्तरिक्षदेवत्यमेतदहर्य्यत्तृतीयं तदेव तदभिवदति ॥८॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥९॥ पाष्ठौहं भवति ॥१०॥ पष्ठवाड्वा एतेनाङ्गिरसश्चतुर्थस्याह्नो वाचँ वदन्तीमुपा श्रृणोत्स हो वागिति निधनमुपैत्तदस्याभ्युदितं तदहरवसत् ॥११॥ वाचः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

साम भवति ॥१२॥ वाग्वै द्वादशाहो वाच्येव तद्वाचा स्तुवते यज्ञस्य प्रभूत्यै ॥१३॥ निष्किरीयाः सत्रमासत ते तृतीयमहर्न्न प्राजानँस्तानेतत्साम गायमानान् वागुपाप्लवत्तेन तृतीयमहः प्राजानँस्तेऽब्रुवन्नियँ व नस्तृतीयमहरदीदृशदिति तृतीय-स्यैवैषाह्नो दृष्टिः ॥१४॥ शौक्तं भवति ॥१५॥ शुक्तिर्व्वा एतेनाङ्गिरसोऽञ्जसा स्वर्ग्गँल्लोकमपश्यत्स्वर्ग्गस्य लोकस्यानु ख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः॥१६॥गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥१७॥ त्वाष्ट्रीसाम भवति ॥१८॥ इन्द्रँ वा अक्ष्यामयिणं भूतानि स्वापयँस्तमेतेन त्वाष्ट्र्योस्वापयँ स्तद्वाव तास्तर्ह्यकामयन्त ॥१९॥ कामसनि साम त्वाष्ट्रीसाम काममेवैतेनावरुन्धे॥२०॥ इन्द्रो वृत्राद्बिभ्यद्गां प्राविशत्तं त्वाष्ट्र्यो ऽब्रुवञ्जनयामेति तमेतैः सामभिरजनयञ्जायामहा इति वै सत्रमासते जायन्त एव ॥२१॥ अरिष्टं भवति ॥२२॥ देवाश्च वा असुराश्चास्पर्द्धन्त यं देवानामघ्नन्नस समभवद्यमसुराणाँ सँसोऽ भवत्ते देवास्तपोऽतप्यन्त त एतदरिष्टमपश्यँस्ततो यं देवाना मघ्नन् सँसोऽभवद्यमसुराणां न स समभव दनेनारिषामेति तदरिष्टस्यारिष्टत्वमरिष्ट्या एवारिष्टमन्ततः क्रियते ॥२३॥ त्रीडं भवति त्रिरात्रस्य धृत्यै ॥२४॥ द्रवन्तीमिडामुत्तमामुपयन्ति चतुर्थस्याह्नःसन्तत्यै स्तोमः॥२५॥ इतिपञ्चमः खण्डः॥१२/५॥

प्रमँहिष्ठीयं गायतेति ॥१॥ यद्गायतेति महस एव तद्रूपं क्रियते ॥२॥ तं ते मदं गृणीमसीति मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति ॥३॥ श्रुधी हवं तिरश्च्या इति श्रित्या एव ॥४॥ प्रमँहिष्ठीयं भवति ॥५॥ प्रमँहिष्ठीयेन वा इन्द्रो वृत्राय

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वज्ज्रं प्रावर्त्तयत्तमस्तृणुत भ्रातृव्यवान् प्रमँहिष्ठीयेनोक्थानि प्रणयेत स्तृणुते भ्रातृव्यँ वसीयाँ आत्मना भवति ॥६॥ हारिवर्ण्णं भवति ॥७॥ इन्द्रश्च वै नमुचिश्चासुरः समदधातां न नौ नक्तन्न दिवाहनन्नाद्र्द्रेण न शुष्केणेति तस्य व्युष्टायामनुदित आदित्येऽपां फेनेन शिरोऽच्छिनदेतद्वै न नक्तं न दिवा यत् व्युष्टायामनुदित आदित्य एतन्नाद्र्द्रन्न शुष्कँ यदपां फेनस्तदेनं पापीयाँ वाचँ वदन्दन्ववर्त्तत वीरहन्न द्रुहो द्रुह इति तन्नर्च्चा न साम्नापहन्तुमशक्नोत् ॥८॥ तद्धारिवर्ण्णस्यैव निधनेनापाहत ॥९॥ अपशुचँ हते हारिवर्णस्य निधनेन श्रियञ्च हरश्चोपैति तुष्टुवानः ॥१०॥ तैरश्च्यं भवति ॥११॥ अङ्गिरसः स्वर्गँल्लोकँ यन्तो रक्षाँस्यन्वसचन्त तान्येतेन तिरश्च्याङ्गिरसस्तिर्य्यङ् पर्य्यवैद्यत्तिर्य्यङ् पर्य्यवैत्तस्मात्तैरश्च्यं पाप्मा वा व स तानसचत तं तैरश्च्येनापाघ्नताप पाप्मानँ हते तैरश्च्येन तुष्टुवानः॥१२॥ सप्तदश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥१३॥ इति षष्ठः खण्डः॥१२/६॥

प्र त आश्विनीः पवमान धेनव इति चतुर्थस्याह्नः प्रतिपद्भवति ॥१॥ आप्ते त्रिरात्रे गायत्र्यो रूपेण द्वितीयं प्रयन्ति प्रेति वै गायत्र्या रूपम् ॥२॥ जगती प्रतिपद्भवति जागतमेत-दहर्य्यत्तृतीयञ्जगत्या एव तज्जगतीमभि सङ्क्रामन्ति ॥३॥ यदतोऽन्या प्रतिपत्स्यात् प्रतिकूलँ वानुकूलँ वा स्यात् ॥४॥ पवमानो अजीजनदित्यनुरूपो भवति ॥५॥ जनद्वद्वा एतदहर्य्य-च्चतुर्थमन्नाद्यञ्जनयति विराजञ्जनयत्येकविँशँ स्तोमञ्जनयति ॥६॥ पूर्व्वमुचैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्वँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रूपमपरेण रूपेणानुवदति तदनुरूपस्यानु रूपत्वमनुरूप एनं पुत्रो जायते य एवँ वेद ॥७॥ स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥८॥ षड्चौ भवत ऋतूनां धृत्यै ॥९॥ तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥१०॥ एकविँश एव स्तोमो भवति प्रतिष्ठायै प्रतितिष्ठति ॥११॥ इति सप्तमः खण्डः ॥१२/७॥

जनस्य गोपा अजनिष्ट जागृविरित्याग्नेयमाज्यं भवति ॥१॥ जनद्वद्वा एतदहर्य्यच्चतुर्थमन्नाद्यञ्जनयति विराजञ्जनयत्येकविँशँ स्तोमञ्जनयति ॥२॥ अयँ वा मित्रावरुणेति बार्हतं मैत्रावरुणम्॥३॥ बृहदेतत्परोक्षँ यद्वैराजं बार्हतमेव तद्रूपं निर्द्योतयति ॥४॥ इन्द्रो दधीचो अस्थभिरिति दाधीचस्तृचो भवति॥५॥दध्यङ्वा आङ्गिरसो देवानां पुरोधानीय आसीदन्नँ वै ब्रह्मणः पुरोधान्नाद्यस्यावरुध्यै ॥६॥ इयँ वामस्य मन्मन इत्यैन्द्राग्नम् ॥७॥ इन्द्राग्नी पूर्व्यस्तुतिरभ्राद्वृष्टिरिवा जनीत्यानुष्टुभी वै वृष्टिरानुष्टुभमेतदहर्य्यच्चतुर्थँसमीच्यौ विराजौ दधात्यन्नाद्याय स्तोमः॥८॥ इत्यष्टमः खण्डः ॥१२/८॥

पवस्व दक्ष साधन इति गायत्री भवति सिद्ध्यै ॥१॥ यत्पवस्वेति तद्बृहतो रूपं बार्हतँ ह्येतदहः ॥२॥ तवाहँ सोम रारण सख्य इन्दो दिवे दिवे पुरूणि बभ्रो निचरन्ति मामव परिधीँ रतिताँ इहीति ॥३॥ अति ह्यायञ्छकुना इव पप्तिमेत्यति ह्यपतत्॥४॥ पुनानो अक्रमीदभीति ॥५॥ गायत्र्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभाँल्लोके क्रियन्ते ॥६॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥७॥ चतुर्णिधनमाथर्व्वणं भवति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतूरात्रस्य धृत्यै ॥८॥ चतुष्पदानुष्टुभानुष्टुभमेतदहर्य्यच्चतुर्थम् ॥९॥ भेषजँ वाथर्व्वणानि भेषजमेव तत्करोति ॥१०॥निधनकामं भवति ॥११॥ एकँ वा अन्येन निरुक्तेन निधनेन कामँसनो-त्यथैतन्निधनकामँ सर्व्वेषां कामानामवरुध्यै ॥१२॥ आष्टादँष्ट्रं भवति॥१३॥यदेवाष्टादँष्ट्रस्य ब्राह्मणम्॥१४॥ आभीशवं भवत्यह्नो धृत्यै ॥१५॥ यदा अधृतमभीशुना तद्दाधार ॥१६॥ अनुतुन्नं गायति तथा ह्येतस्याह्नो रूपम् ॥१७॥ चतुर्णिधन माङ्गिरसं भवति चतूरात्रस्य धृत्यै ॥१८॥ स्वः पृष्ठं तथा ह्येतस्याह्नो रूपम्॥१९॥ सत्रासाहीयं भवति ॥२०॥ यद्वा असुराणामसोढ-मासीत्तद्देवाः सत्रासाहीयेनासहन्त सत्रैना न सक्ष्महीति तत्सत्रासाहीयस्य सत्रासाहीयत्वम् ॥२१॥ सत्रा भ्रातृव्यँ सहते सत्रासाहीयेन तुष्टुवानः॥२२॥ गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥२३॥ वृषण्वत्यो गायत्र्यो भवन्ति तदु त्रैष्टुभाद्रूपान्नयन्ति स्तोमः ॥२४॥ इति नवमः खण्डः ॥१२/९॥

पिबा सोममिन्द्र मन्दतु त्वा यन्ते सुषाव हर्य्यश्वाद्रिः सोतुर्बाहुभ्याँ सुयतो नार्व्वेत्यायतमिव वै चतुर्थमहस्तस्यैव यत्यै॥१॥ विश्वाः पृतना अभिभूतरन्नरइत्यतिजगती वर्षीयश्छन्द आक्रमतेऽनपभ्रँशाय ॥२॥ अपभ्रँश इव वा एष यज्ज्यायस-श्छन्दसः कनीयश्छन्द उपैति यदेषा चतुर्थेऽहन्यतिजगती क्रियतेऽनपभ्रँशाय ॥३॥ यो राजा चर्षणीनामिति ॥४॥ राज्ये ह्येतर्हि वाचोऽगच्छन् राज्यमेवैतया यजमानं गमयन्ति ॥५॥ छन्दोभिर्व्वै देवा आदित्यँ स्वर्गँल्लोकमहरन् स नाध्रियत तँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वैराजस्य निधनेनादृँहँस्तस्मात् पराङ्चार्व्वाङ्चादित्यस्तपति पराङ्चार्व्वाङ्चेकारः॥६॥ प्रस्तावं प्रस्तुत्य विष्टम्भान्विष्टभ्नोति मुखत एव तदन्नाद्यं धत्ते मुखँ हि साम्नः प्रस्तावः ॥७॥ दशकृत्वो विष्टभ्नोति दशाक्षरा विराड् वैराजमन्नमन्नाद्य स्यावरुध्यै ॥८॥ त्रिँशत्कृत्वो विष्टभ्नोति भूयसोऽन्नाद्यस्याव-रुध्यै ॥९॥ वैराजँ साम भवति विराट्सु स्तुवन्ति वैराजा विष्टम्भाः समीचीर्व्विराजो दधात्यन्नाद्याय॥१०॥ अनुतुन्नं गायति रेतो धेयायानुतुन्नाद्धि रेतो धीयते ॥११॥ दक्षिणा ऊरावुद्गातु-रग्निं मन्थन्ति दक्षिणतो हि रेतः सिच्यते ॥१२॥ उपाकृते हिङ्कृते मन्थन्ति जातमभि हिङ्करोति ॥१३॥ तस्माज्जातं पुत्रं पशवोऽभि हिङ्कुर्व्वन्ति ॥१४॥ तस्मै जातायामीमाँसन्त गार्हपत्ये प्रहरामा३ आग्ग्नीध्रा ३ आहवनीया ३ इति ॥१५॥ आहवनीये प्रहरन्त्येतदायतनो वै यजमानो यदाहवनीयः स्वमेव तदायतनं ज्योतिष्मत्करोति ॥१६॥ ज्योतिष्मान् ब्रह्मवर्च्चसी भवति य एवँ वेद ॥१७॥ अभिजुहोति शान्त्यै ॥१८॥ आज्येनाभिजुहोति तेजो वा आज्यं तेज एव तदात्मन्धत्ते ॥१९॥ प्रेद्धो अग्ग्ने दीदिहि पुरो न इति विराजाभिजुहोत्यन्नँ विराडन्नाद्यस्यावरुध्यै ॥२०॥ त्रैशोकं ब्रह्मसाम भवति ॥२१॥ अतिजगतीषु स्तुवन्त्यह्न उत्क्रान्त्या उद्वा एतेनाह्ना क्रामन्ति ॥२२॥ दिवेति निधनमुपयन्ति पाप्मनोऽपहत्या अप पाप्मानँ हते त्रैशोकेन तुष्टुवानः ॥२३॥ भरद्वाजस्य पृश्न्यच्छावाक साम भवति ॥२४॥ अन्नँ वै देवाः पृश्नीति वदन्त्यन्नाद्यस्यावरुध्यै ॥२५॥ इडाभिरैडं तथा ह्येतस्याह्नो रूपँ स्तोमः॥२६॥ इति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दशमः खण्डः॥१२/१०॥

परि प्रिया दिवः कविरिति परिवत्यो भवन्त्यन्तो वै चतुर्थमहस्तस्यैताः पर्य्याप्त्यै ॥१॥ त्वँ ह्यङ्ग दैव्येति त्वमिति बृहतो रूपं बार्हतँ ह्येतदहः ॥२॥ सोमः पुनान ऊर्म्मिणाव्यँ वारँ विधावति अग्रे वाचः पवमानः कनिक्रददिति ॥३॥ अग्रँ ह्येतर्हि वाचोऽगच्छन्नग्रमेवैतया यजमानं गमयन्ति ॥४॥ पुरो जिती वो अन्धस इति विराजौ वैराजँ ह्येतदहः ॥५॥ सोमः पवते जनिता मतीनामिति प्रातस्सवने षोडशिनं गृहीतं तृतीयसवने प्रजनयन्ति ॥६॥ त्रिष्टुभः सत्यो जगत्यो रूपेण तस्माज्जगतीनाँल्लोके क्रियन्ते ॥७॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥८॥ और्ण्णायवं भवति ॥९॥ अङ्गिरसो वै सत्रमासत तेषामाप्तः स्पृतः स्वर्ग्गो लोक आसीत्पन्थानं तु देवयानं न प्राजानँस्तेषाङ्कल्याण आङ्गिरसो ध्यायमुदव्रजत् स ऊर्ण्णायुं गान्धर्व्वमप्सरसां मध्ये प्रेङ्खयमाणमुपैत्स इयामिति याँ यामभ्यदिशत् सैनमकामयत तमभ्यवदत्कल्याणा ३ इत्याप्तो वै वः स्पृतः स्वर्ग्गो लोकः पन्थानं तु देवयानं न प्रजानीथेदँ साम स्वर्ग्यं तेन स्तुत्वा स्वर्गँल्लोकमेष्यथ मा तु वोचो ऽहमदर्शमिति ॥१०॥ स ऐत्कल्याणः सोऽब्रवीदाप्तो वै नः स्पृतः स्वर्ग्गो लोकः पन्थानं तु देवयानान्न प्रजानीम इदँ साम स्वर्ग्यं तेन स्तुत्वा स्वर्ग्गल्लोकमेष्याम इति कस्तेऽवोचदित्यहमेवादर्शमिति तेन स्तुत्वा स्वर्गँल्लोकमायन्न हीयत कल्याणोऽनृतँ हि सोऽवदत्स एषः श्वित्रः ॥११॥ स्वर्ग्यँ वा एतत्साम स्वर्ग्गलोकः पुण्यलोको भवत्यौर्ण्णायवेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तुष्टुवानः ॥१२॥ बृहत्कं भवति ॥१३॥ सामार्षेयेण प्रशस्तं त्वँ हीत्यन्नाद्य स्यावरुध्यै हीति वा अन्नं प्रदीयते षोडशिनमु चै वै तेनोद्यच्छन्ति ॥१४॥ आतीषादीयं भवति ॥१५॥ आयुर्व्वा आतीषादीयमायुषोऽवरुध्यै॥१६॥ आतमितोर्न्निधनमुपयन्त्यायुरेव सर्व्वमाप्नुवन्ति ॥१७॥ नानदं भवति ॥१८॥ ज्यायोऽभ्यारम्भ मतिहाय पञ्चममहः षष्ठस्याह्न आरम्भस्तेन षष्ठमहरारभन्ते सन्तत्यै ॥१९॥ षोडशाक्षरेण प्रस्तौति षोडशिनमुचैवैतेनो-द्यच्छन्ति ॥२०॥ आन्धीगवं भवति ॥२१॥ पद्या वा अन्या विराडक्षर्य्यान्यास्माल्लोकात्पद्यया विराजान्नाद्यमवरुन्धेऽमुष्मा-दक्षर्य्ययोभयोरनयोर्ल्लोकयोरन्नाद्यमवरुन्ध आन्धीगवेन तुष्टुवानः ॥२२॥ वात्सप्रं भवति ॥२३॥ एतस्मिन्वै वैराजं प्रतिष्ठितं प्रतितिष्ठति वात्सप्रेण तुष्टुवानः ॥२४॥ वत्सप्री-र्भालन्दनः श्रद्धां नाविन्दत स तपोऽतप्यत स एतद्वात्सप्र-मपश्यत्स श्रद्धामविन्दत श्रद्धाँ विन्दामहा इति वै सत्रमासते विन्दते श्रद्धाम्॥२५॥ ईनिधनं तथा ह्येतस्याह्नो रूपं निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः॥२६॥ इत्येकादशःखण्डः ॥१२/११॥

अग्निँ वो वृधन्तमिति ॥१॥ अवर्द्धन्त ह्येतर्हि यजमान-मेवैतया वर्द्धयन्ति ॥२॥ वयमुत्वामपूर्व्व्येत्यपूर्व्वाँ ह्येतर्हि प्रजापतेस्तनूमगच्छन्नपूर्व्वमेवैतया यजमानं गमयन्ति ॥३॥ इममिन्द्र सुतं पिव ज्येष्ठममर्त्त्यं मदमिति ज्यैष्ठ्याँ ह्येतर्हि वाचोऽगच्छन् ज्यैष्ठ्यमेवैतया यजमानं गमयन्ति ॥४॥ सैन्धुक्षितं भवति ॥५॥ सिन्धुक्षिद्वै राजन्यर्षिर्ज्योगपरुद्धश्चरन् स एतत्सैन्धुक्षितमपश्यत् सोऽवागच्छत् प्रत्यतिष्ठदवगच्छति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतितिष्ठति सैन्धुक्षितेन तुष्टुवानः ॥६॥ सौभरं भवति बृहत स्तेजः॥७॥ पन्नमिव वै चतुर्थमहस्तदेतेन बृहतस्तेजसो त्तभ्नोति सौभरेण ॥८॥ वसिष्ठस्य प्रियं भवति ॥९॥ एतेन वै वसिष्ठ इन्द्रस्य प्रेमाणमगच्छत् प्रेमाणं देवतानां गच्छति वासिष्ठेन तुष्टुवानःस्तोमः॥१०॥ इति द्वादशः खण्डः॥१२/१२॥

इन्द्रश्च बृहच्च समभवतां तमिन्द्रं बृहदेकया तन्वात्यतिरिच्यत तस्या अबिभेदनयामाभिभविष्यतीति सोऽब्रवीत् षोडशी तेऽयँ यज्ञक्रतुरस्त्विति स षोडश्यभव-त्तदस्य जन्म ॥१॥ अतिश्रिया भ्रातृव्यँ रिच्यते यो गायत्रीषु द्विपदासु बृहता षोडशिना स्तुते ॥२॥ उप नो हरिभिः सुतमित्येता वै गायत्र्यो द्विपदा एतासु स्तोतव्यम् ॥३॥ इन्द्रः प्रजापतिमुपाधावद् वृत्रँ हनानीति तस्मा एतामनुष्टुभमपहरसं प्रायच्छत्तया नास्तृणुत यदस्तृतो व्यनदत्तन्नानदस्य नानदत्वम् ॥४॥ तं पुनरुपाधावत्तस्मै सप्तानाँ होत्राणाँ हरो निर्म्माय प्रायच्छत्तमस्तृणुत ॥५॥ स्तृणुते तँ यन्तुस्तूर्षते य एवँ वेद ॥६॥ तस्माद्धरिवतीषु स्तुवन्ति हरिवतीः शँसन्ति हरिवतीषु ग्रहो गृह्यते हरो ह्यस्मै निर्म्माय प्रायच्छत् ॥७॥ एकविँशा-यतनो वा एष यत् षोडशी सप्त हि प्रातस्सवने होत्रा वषट्कुर्व्वन्ति सप्त माध्यन्दिने सवने सप्त तृतीयसवने ॥८॥ गौरीवितं भवति ॥९॥ गौरीवितिर्व्वा एतच्छाक्त्यो ब्रह्मणोऽ-तिरिक्तमपश्यत्तद्गौरीवितमभवदतिरिक्तँ वा एतदतिरिक्तेन स्तुवन्ति यद्गौरीवितेन षोडशिनँ श्वस्तनवान् भवत्यपि प्रजाया उपक्लृप्तः ॥१०॥ विशालँ लिबुजया भीत्याभ्यधादिति होवाचोपोदिति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गर्गोपालेयोऽनुष्टुभिनानदमकगर्गौरीवितेन षोडशिनमस्तोष्टाञ्जसा श्रियमुपागान्न श्रिया अवपद्यत इति ॥११॥ एष वै विशालँ लिबुजया भूत्याभिदधाति योऽनुष्टुभि नानदं कृत्वा गौरीवितेन षोडशिना स्तुतेञ्जसा श्रियमुपैति न श्रिया अवपद्यते ॥१२॥ शक्वरीषु षोडशिना स्तुवीत यः कामयेत वज्री स्यामिति ॥१३॥ वज्रो वै षोडशी वज्रः शक्वर्यो वज्रेणैवास्मै वज्रँ स्पृणोति वज्री भवति ॥१४॥ अनुष्टुप्सु षोडशिना स्तुवीत यः कामयेत न मा वागतिवदेदिति ॥१५॥ वज्रो वै षोडशी वागनुष्टुब्वज्रेणैवास्मै वाचँ स्पृणोति नैनँ वागतिवदति ॥१६॥ असा वि सोम इन्द्र त इत्येतासु स्तोतव्यम् ॥१७॥ विराट्स्वन्नाद्यकामः षोडशिना स्तुवीत वज्रो वै षोडशी वैराजमन्नँ वज्रेणैवास्मा अन्नँ स्पृणोत्यन्नादो भवति ॥१८॥ प्र वो महे महे वृधे भरध्वमित्येतासु स्तोतव्यम् ॥१९॥ त्रयस्त्रिँश दक्षरा वा एता विराजो यदेकविँशतिः प्रतिष्ठा सा यद्द्वादश प्रजातिः सा ॥२०॥ प्रतिष्ठाय प्रजायते नो चान्तस्थायाञ्जीयते य एवँ वेद ॥२१॥ अथ वा एता एकपदास्त्र्यक्षरा विष्णोश्छन्दो भुरिजः शक्वर्य्यः॥२२॥ एताभिर्वा इन्द्रो वृत्रमहन् क्षिप्रँ वा एताभिः पाप्मानँ हन्ति क्षिप्रँ वसीयान् भवति ॥२३॥ चतुस्त्रिँशदक्षराः सँस्तुतो भवति त्रयस्त्रिँशद्देवताः प्रजापति-श्चतुस्त्रिँशो देवतानां प्रजापतिमेवोपयन्त्यरिष्ट्यै ॥२४॥ हिरण्यँ सम्प्रदायँ षोडशिना स्तुवते ज्योतिष्मानस्य षोडशी भवति ॥२५॥ अश्वः कृष्ण उपतिष्ठति साम्येक्ष्याय भ्रातृव्यलोकमेव स विधमँस्तिष्ठति ॥२६॥ एकाक्षरँ देवानामवमं छन्दआसीत्सप्ता

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्षरं परमं नवाक्षरमसुराणामवमं छन्द आसीत् पञ्चदशाक्षरं परमं देवाश्च वा असुराश्चास्पर्द्धन्त तान् प्रजापति रानुष्टुभो भूत्वान्तरातिष्ठत्तं देवासुरा व्यह्वयन्त स देवानुपावर्त्तत ततो देवा अभवन् परासुराः ॥२७॥ भवत्यात्मना परास्य भ्रातृव्यो भवति य एवँ वेद ॥२८॥ ते देवा असुराणामेकाक्षरेणैव पञ्चदशाक्षरमवृञ्जत द्व्यक्षरेण चतुर्दशाक्षरं त्र्यक्षरेण त्रयोदशाक्षरञ्चतुरक्षरेण द्वादशाक्षरं पञ्चाक्षरेणैकादशाक्षरँ षडक्षरेण दशाक्षरँ सप्ताक्षरेण नवाक्षरमष्टाभिरेवाष्टाववृञ्जत ॥२९॥ एवमेव भ्रातृव्याद्भूतिँ वृङ्क्ते य एवँ वेद ॥३०॥ अपरुद्ध यज्ञ इव वा एष यत्षोडशी कनीयस्विन इव वै तर्हि देवा आसन्भूयस्विनोऽसुराः कनीयस्वी भूयस्विनं भ्रातृव्यँ वृङ्क्ते य एवँ वेद ॥३१॥ यस्मादन्यो न परोऽस्ति जातो य आबभूव भुवनानि विश्वा प्रजापतिः प्रजया सँविदानस्त्रीणि ज्योतीँषि सचते स षोडशीत्युद्गाता ग्रहमवेक्षते ॥३२॥ ज्योतिष्मानस्य षोडशी भवति य एवँ वेद ॥३३॥ एकविँश एव स्तोमो भवति प्रतिष्ठायै प्रतितिष्ठति ॥३४॥ इति त्रयोदशः खण्डः॥ १२/१३॥

इति द्वादशोऽध्यायः

पूर्व्वार्धः समाप्तः

---===०===---

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ त्रयोदशोऽध्यायः

गोवित् पवस्व वसुविद्धिरण्यविदिति पञ्चमस्याह्नः प्रतिपद्भवति ॥१॥ गोविद्वा एतद्वसुविद्धिरण्यविद्यच्छक्वर्य्यः॥२॥ पशवश्शक्वर्य्यः सर्व्वं पशुभिर्व्विन्दते ॥३॥ त्वँ सुवीरो असि सोम विश्वविदित्येष वाव सुवीरो यस्य पशवस्तदेव तदभिवदति ॥४॥ तास्ते क्षरन्तु मधुमद् घृतं पय इति मधुमद्वै घृतं पयः पशवः क्षरन्ति तदेव तदभिवदति ॥५॥ पवमानस्य विश्वविदित्यनुरूपो भवति ॥६॥ विश्वमेव तद्वित्तमभि वदति विश्वँ हि पशुभिर्व्विन्दते ॥७॥ प्र ते सर्ग्गा असृक्षतेति सृष्टानीव ह्येतर्ह्यहानि॥८॥ पूर्व्वमुचैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्व्वँ रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते य एवँ वेद स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै॥९॥ सप्तर्च्चौ भवतः छन्दसां धृत्यै ॥१०॥ चतुर्ऋचो भवति प्रतिष्ठायै ॥११॥ तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुष्ट्यै त्रिवृद्वा एष पुष्टः ॥१२॥ इति प्रथमः खण्डः ॥१३/१॥

तव श्रियो वर्षस्येव विद्युत इत्याग्नेयमाज्यं भवति ॥१॥ श्रीर्व्वै पशवः श्रीः शक्वर्य्यस्तदेव तदभिवदति ॥२॥ अग्नेश्चिकित्त उषसामिवेतय इतीतानीव ह्येतर्ह्यहानीति ॥३॥ आ ते यतन्ते रथ्यो यथा पृथगित्येव ह्येतर्ह्यहानि यतन्ते ॥४॥ पुरूरुणा चिद्ध्यस्त्यवो नूनँ वाँ वरुणेति मैत्रावरुणम् ॥५॥ यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तदवयजति ॥६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्तिष्ठन्नोजसा सहेत्यैन्द्रम् ॥७॥ पञ्च वा ऋतव उत्थानस्य रूपमोजसा सहेत्योजसैव वीर्य्येण सहोत्तिष्ठन्ति॥८॥ इन्द्राग्नी युवा मिम इति राथन्तरमैन्द्राग्नम् ॥९॥ रथन्तरमेतत्परोक्षँ यच्छक्वर्य्यो राथन्तरमेव तद्रूपं निद्द्योतयति स्तोमः ॥१०॥ इति द्वितीयः खण्डः ॥१३/२॥

अर्षा सोम द्युमत्तम इति विष्णुमत्यो गायत्र्यो भवन्ति ॥१॥ ब्रह्म वै गायत्री यज्ञो विष्णुर्ब्रह्मण्येव तद्यज्ञं प्रतिष्ठापयति ॥२॥ सोम उष्वाणस्तोतृभिरिति सिमानाँ रूपँ स्वेनैवैता-स्तद्रूपेण समर्द्धयति ॥३॥ यत्सोम चित्रमुक्थ्यमिति गायत्र्यः सत्यस्त्रिष्टुभो रूपेण तस्मात् त्रिष्टुभाँल्लोके क्रियन्ते ॥४॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥५॥ यण्वं भवति पशवो वै यण्वं पशूनामवरुद्ध्यै ॥६॥ सन्ततं गायति यज्ञस्य सन्तत्यै ॥७॥ अध्यर्द्धेडं तथा ह्येतस्याह्नो रूपम् ॥८॥ शाकलं भवति॥९॥एतेन वै शकलः पञ्चमेऽहनि प्रत्यतिष्ठत् प्रतितिष्ठति शाकलेन तुष्टुवानः॥१०॥ वार्शं भवति ॥११॥ वृशो वै जानस्त्र्यरुणस्य त्रैधात्वस्यैक्ष्वाकस्य पुरोहित आसीत्स ऐक्ष्वाकोऽधावयत् ब्राह्मणकुमारँ रथेन व्यच्छिनत् स पुरोहित मब्रवीत्तव मा पुरोधायामिदमीदृगुपागादिति तमेतेन साम्ना समैरयत्तद्वाव स तर्ह्यकामयत कामसनि साम वार्शं काममेवै तेनावरुन्धे ॥१२॥ अध्यर्द्धेडं तथा ह्येतस्याह्नो रूपम् ॥१३॥ मानवं भवति ॥१४॥ एतेन वै मनुः प्रजातिं भूमानमगच्छत् प्रजायते बहुर्भवति मानवेन तुष्टुवानः ॥१५॥ आनूपं भवति ॥१६॥ एतेन वै वध्र्यश्व आनूपः पशूनां भूमानमाश्नुत पशूनां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भूमानमश्नुत आनूपेन तुष्टुवानः ॥१७॥ वाम्रं भवति ॥१८॥ सामार्षेयेण प्रशस्तँ यँ वै गाँ यमश्वँ यं पुरुषं प्रशाँसन्ति वाम इति तं प्रशाँसन्त्यहरेवैतेन प्रशाँसन्ति ॥१९॥ अध्यर्द्धेडं तथा ह्येतस्याह्नो रूपम् ॥२०॥ त्रिणिधनमाग्नेयं भवति प्रतिष्ठायै ॥२१॥ अग्निः सृष्टो नोददीप्यत तं प्रजापतिरेतेन साम्नोपाध मत्स उददीप्यत दीप्तिश्च वा एतत्साम ब्रह्मवर्च्चसञ्च दीप्तिञ्चैवैतेन ब्रह्मवर्च्चसञ्चावरुन्धे ॥२२॥ शैशवं भवति ॥२३॥ शिशुर्व्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत् स पितॄन् पुत्रका इत्यामन्त्रयत तं पितरोऽब्रुवन्न धर्म्मं करोषि यो नः पितॄन् सतः पुत्रका इत्यामन्त्रयस इति सोऽब्रवीदहँ वाव वः पितास्मि यो मन्त्रकृदस्मीति तं देवेष्वपृच्छन्त ते देवा अब्रुवन्नेष वाव पिता यो मन्त्रकृदिति तद्वै स उदजयदुज्जयति शैशवेन तुष्टुवानः ॥२४॥ गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥२५॥ विष्णुमत्यो गायत्र्यो भवन्ति तदु त्रैष्टुभाद्रूपान्नयन्ति स्तोमः ॥२६॥ इति तृतीयः खण्डः ॥१३/३॥

इन्द्रः प्रजापतिमुपाधावद्वृत्रँ हनानीति तस्मा एतच्छन्दोभ्य इन्द्रियँ वीर्य्यं निर्म्माय प्रायच्छदेतेन शक्नुहीति तच्छक्वरीणाँ शक्वरीत्वँ सीमानमभिनत्तत्सिमामहन्यमकरोत्तन्महन्या महान् घोष आसीत् तन्महानाम्न्यः ॥१॥ दिशः पञ्चपदा दाधारर्त्तून् षट्पदा छन्दाँसि सप्तपदा पुरुषं द्विपदा ॥२॥ द्व्योपशाः सँस्तुता भवन्ति तस्माद् द्व्योपशाः पशवः॥३॥ इडे अभितोऽथकारं तस्माच्छृङ्गे तीक्ष्णीयसी स्तूपात् ॥४॥ उपक्षुद्रा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गायति तस्मादुपक्षुद्राः पशवः॥५॥ असँश्लिष्टा गायति तस्मादसँश्लिष्टाः पशवः ॥६॥ नानारूपा गायति तस्मान्नाना-रूपाः पशवः ॥७॥ आपो वै क्षीररसा आसँस्ते देवाः पापवसीयसादबिभयुर्य्यदप उपनिधाय स्तुवते पापवसीयसो विधृत्यै ॥८॥ विधृतिः पापवसीयसो भवति य एवँ वेद ॥९॥ गायत्रमयनं भवति ब्रह्मवर्च्चसकामस्य स्वर्णिधनं मधुना-मुष्मिँल्लोक उपतिष्ठते त्रैष्टुभमयनं भवत्योजस्कामस्याथ-कारणिधनमाज्येनामुष्मिँल्लोक उपतिष्ठते जागतमयनं भवति पशुकामस्येडानिधनं पयसामुष्मिँल्लोक उपतिष्ठते ॥१०॥ अञ्जसार्य्यो माल्यः शक्वरीः प्रारौत्सीदिति होवाचालम्मं पारिजानतँ रजनः कौणेयो यद्येनाः प्रतिष्ठापँ शक्ष्यतीत्येतद्वा एतासामञ्जयति एतत्प्रतिष्ठिता य आभिः क्षिप्रं प्रस्तुत्य क्षिप्रमुद्गायति ॥११॥ शक्वरीभिः स्तुत्वा पुरीषेण स्तुवते ॥१२॥ पशवो वै शक्वर्य्यो गोष्ठः पुरीषं गोष्ठमेव तत् पशुभ्यः पर्य्यस्यन्ति तमेवैनान् प्रवर्त्तयन्त्यविस्रँसाय ॥१३॥ इन्द्रो मदाय वा वृध इत्यवर्द्धन्त ह्येतर्हि ॥१४॥ तासु बार्हद्गिरम् ॥१५॥ स्वादोरित्था विषूवत इति विषुवान् वै पञ्चममहस्तासु रायोवाजीयम् ॥१६॥ इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तेषां त्रय उदशिष्यन्त पृथुरश्मिर्ब्बृहद्गिरी रायोवाजस्तेऽब्रुवन् को न इमान् पुत्रान् भरिष्यतीत्यहमितीन्द्रोऽब्रवीत्तानधिनिधाय परिचार्य्यं चरन् वर्द्धयँस्तान्वर्द्धयित्वाब्रवीत् कुमारका वरान् वृणीध्वमिति क्षत्रं मह्यमित्यब्रवीत् पृथुरश्मिस्तस्मा एतेन पार्थुरश्मेन क्षत्रं प्रायच्छत् क्षत्रकाम एतेन स्तुवीत क्षत्रस्यैवास्य प्रकाशो भवति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ब्रह्मवर्च्चसं मह्यमित्यब्रवीत् बृहद्गिरिस्तस्मा एतेन बार्हद्गिरेण ब्रह्मवर्च्चसं प्रायच्छत् ब्रह्मवर्च्चसकाम एतेन स्तुवीत ब्रह्मवर्च्चसी भवति पशून् मह्यमित्यब्रवीद्रायोवाजस्तस्मा एतेन रायोवाजीयेन पशून् प्रायच्छत् पशुकाम एतेन स्तुवीत पशुमान् भवति ॥१७॥ पार्थुरश्मँ राजन्याय ब्रह्मसाम कुर्य्यात् बार्हद्गिरं ब्राह्मणाय रायोवाजीयँ वैश्याय स्वेनैवैनाँस्तद्रूपेण समर्द्धयति स्तोमः ॥१८॥ इति चतुर्थः खण्डः ॥१३/४॥

असाव्यँशुर्म्मदायेति गायत्री भवति मदवद्वै रसवत्तृतीय-सवनं मदमेव तद्रसं दधाति ॥१॥ अभि द्युम्नं बृहद्यश इत्यभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोस्सह रूपमुपैत्युभौ हि वर्ण्णावेतदहः॥२॥ प्राणा शिशुर्म्महीनामिति सिमानाँ रूपं मह्यो हि सिमाः स्वेनैवैनास्तद्रूपेण समर्द्धयति ॥३॥ पवस्व वाजसातय इति वैष्णव्योऽनुष्टुभो भवन्ति ॥४॥ यज्ञो वै विष्णुर्य्यदत्र नापि क्रियते तद्विष्णुना यज्ञेनापि करोति ॥५॥ इन्दुर्व्वाजी पवते गोन्योघा इति सिमानाँ रूपँ स्वेनैवैनास्तद्रूपेण समर्द्धयति ॥६॥ त्रिष्टुभः सत्यो जगत्यो रूपेण तस्माज्जगतीनाँल्लोके क्रियन्ते ॥७॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥८॥ सन्तनि भवति पञ्चमस्याहः सन्तत्यै ॥९॥ वाग्वा एषा प्रतता यद्द्वादशाहस्तस्या एष विषुवान्यत् पञ्चममहस्तामेवैतेन सन्तनोति ॥१०॥ च्यावनं भवति ॥११॥ प्रजातिर्व्वै च्यावनं प्रजायते बहुर्भवति च्यावनेन तुष्टुवानः ॥१२॥ एभ्यो वै लोकेभ्यो वृष्टिरपाक्रामत्तां प्रजापति श्च्यावनेनाच्यावयद्यदच्यावयत्तच्यावनस्य च्यावनत्वं च्यावयति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृष्टिं च्यावनेन तुष्टुवानः ॥१३॥ क्रोशं भवति ॥१४॥ एतेन वा इन्द्र इन्द्रक्रोशे विश्वामित्रजमदग्नी इमा गाव इत्याक्रोशत् पशूनामवरुध्यै क्रोशं क्रियते ॥१५॥ गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥१६॥ ऋषभः शाक्वरो भवति ॥१७॥ पशवो वै शक्वर्य्यः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥१८॥ पार्थं भवति ॥१९॥ एतेन वै पृथुर्व्वैन्य उभयेषां पशूनामाधिपत्यमाश्नुतोभयेषां पशूनामाधिपत्यमश्नुते पार्थेन तुष्टुवानः॥२०॥ अष्टेडःपदस्तोभो भवति ॥२१॥ इन्द्रो वृत्राय वज्रमुदयच्छत्तँ षोडशभिर्भोगैः पर्य्यभुजत्स एतं पदस्तोभमपश्यत्तेनापावेष्टयदपावेष्टयन्निव गायेत् पाप्मनोऽपहत्यै ॥२२॥ पाप्मा वाव स तमगृह्णात्तं पदस्तोभेनापाहतापपाप्मानँ हते पदस्तोभेन तुष्टुवानः ॥२३॥ पदोरुत्तममपश्यत्तत्पदस्तोभस्य पदस्तोभत्वम् ॥२४॥ द्वादश निधनो भवति प्रतिष्ठायै ॥२५॥ दाशस्पत्यं भवति ॥२६॥ याँ वै गां प्रशँसन्ति दाशस्पत्येति तां प्रशँसन्त्यहरेवैतेन प्रशँसन्ति ॥२७॥ निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥२८॥

इति पञ्चमः खण्डः ॥१३/५॥

आते अग्न इधीमहीति ॥१॥ अपच्छिदिव वा एतद्यज्ञ-काण्डँ यदुक्थानि यदेति सलोमत्वायैव ॥२॥ इन्द्राय साम गायतेति पूर्णाः ककुभस्तेनानशनायुको भवति ॥३॥ पुरुषो वै ककुप्पुरुषमेव तन्मध्यतः प्रीणाति ॥४॥ असावि सोम इन्द्र त इति सिमानाँ रूपँ स्वेनैवैनाँ स्तद्रूपेण समर्द्धयति ॥५॥ सञ्जयं भवति ॥६॥ देवाश्च वा असुराश्च समदधत यतरे नः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सञ्जयँस्तेषां नः पशवोऽसानिति ते देवा असुरान् सञ्जयेन समजयन् यत्समजयँ स्तत्स्मात्सञ्जयं पशूना मवरुध्यै सञ्जयं क्रियते ॥७॥ सौमित्रं भवति ॥८॥ दीर्घजिह्वी वा इदँ रक्षो यज्ञहा यज्ञियानवलिहत्यचरत्तामिन्द्रः कयाचन मायया हन्तुं नाशँसताथ ह सुमित्रः कुत्सः कल्याण आस तमब्रवीदिमामच्छा ब्रूष्वेति तामच्छा ब्रूत सैनमब्रवीन्नाहैवतन्नु शुश्रुव प्रियमिव तु मे हृदस्येति तामज़पयत्ताँ सँस्कृतेऽहतां तद्वाव तौ तर्ह्यकामयेतां कामसनि साम सौमित्रं काममेवैतेना वरुन्धे ॥९॥ सुमित्रः सन् क्रूरमकरित्येनँ वागभ्यवदत्तँ शुगार्च्छत्स तपोऽतप्यत स एतत्सौमित्रमपश्यत्तेन शुचमपाहत शुचँ हते सौमित्रेण तुष्टुवानः॥१०॥ महावैश्वामित्रं भवति ॥११॥ पाप्मानँ हत्वा यदमहीयन्त तन्महावैश्वामित्रस्य महावैश्वामित्रम् ॥१२॥ हया इहया ओहा ओहेति पशूनेवैतेन न्यौहन्त ॥१३॥ त्रीडं भवति त्रिरात्रस्य धृत्यै ॥१४॥ द्रवन्तीमिडामुत्तमामुपयन्ति षष्ठस्याह्नः सन्तत्यै ॥१५॥ त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुष्ट्यै त्रिवृद्वा एष पुष्टः ॥१६॥ इति षष्ठः खण्डः॥१३/६॥

ज्योतिर्य्यज्ञस्य पवते मधु प्रियमिति षष्ठस्याह्नः प्रतिपद्भवति ॥१॥ ज्योतिर्व्वै गायत्री छन्दसां ज्योती रेवती साम्नां ज्योतिस्त्रयस्त्रिँशःस्तोमानां ज्योतिरेव तत्सम्यक् सन्दधात्यपि ह पुत्रस्य पुत्रो ज्योतिष्मान् भवति ॥२॥ मधु प्रियमिति पशवो वै रेवत्यो मधुप्रियं तदेव तदभिवदति ॥३॥ मदिन्तमो मत्सर इन्द्रियो रस इतीन्द्रियँ वै वीर्य्यँ रसः पशवस्तदेव तदभिवदति ॥४॥ असृक्षत प्रवाजिन इत्यनुरूपो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति ॥५॥ सृष्टानीव ह्येतर्ह्यहानि ॥६॥ पूर्व्वमुचैव तद्रूप-मपरेण रूपेणानुवदति यत्पूर्व्वरूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते य एवँ वेद स्तोत्रीयानुरूपौ तृचौ भवतः प्राणापानानामवरुध्यै ॥७॥ दशर्च्चौ भवतो दशाक्षरा विराड्वैराजमन्नमन्नाद्यस्यावरुध्यै ॥८॥ उत्तरो दशर्च्चो भवति सोदर्क्क इन्द्रियस्य वीर्य्यस्य रसस्यानतिक्षाराय ॥९॥ यत्र वै देवा इन्द्रियँ वीर्य्यँ रसमपश्यँस्तदनु न्यतुदन् ॥१०॥ चतुर्र्ऋचो भवति प्रतिष्ठायै ॥११॥ ध्वस्रे वै पुरुषन्ती तरन्त पुरुमीढाभ्याँ वैददश्विभ्याँ सहस्राण्यदिच्छतां तावैक्षेतां कथं नाविदमात्तमप्रतिगृहीतँ स्यादिति तौ प्रत्यैतां ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे तरत्स मन्दी धावतीति ततो वै तत्तयोरात्तमप्रतिगृहीतमभवत् ॥१२॥ आत्तमस्याप्रतिगृहीतं भवति य एवँ वेद ॥१३॥ विनाराशँसो भवत्युभयस्यान्नाद्यस्यावरुध्यै मानुषस्य च दैवस्य च॥१४॥ तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥१५॥ त्रयस्त्रिँश एव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः॥१६॥ इति सप्तमः खण्डः ॥१३/७॥

इमँ स्तोममर्हते जातवेदस इत्याग्नेयमाज्यं भवति सोदर्क्कमिन्द्रियस्य वीर्य्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियँ वीर्य्यँ रसमपश्यँस्तदनु न्यतुदन् ॥१॥ प्रति वाँ सूर उदित इति सूरवन्मैत्रावरुणम् ॥२॥ अन्तो वै सूरोऽन्त एतत् षष्ठमहरह्नामन्त एव तदन्ते न स्तुवते प्रतिष्ठायै ॥३॥ भिन्धि विश्वा अपद्विष इत्यैन्द्रँ सोदर्क्कमिन्द्रियस्य वीर्य्यस्य रसस्या-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नतिक्षाराय यत्र वै देवा इन्द्रियँ वीर्य्यँ रसमपश्यँस्तदनु न्यतुदन्॥४॥यज्ञस्य हि स्थ ऋत्विजेत्यैन्द्राग्गनँ सोदर्कमिन्द्रि-यस्य वीर्य्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियँ वीर्य्यँ रसमपश्यँस्तदनु न्यतुदन् स्तोमः॥५॥ इत्यष्टमः खण्डः ॥१३/८॥

इन्द्रायेन्दो मरुत्वत इति मरुत्वत्यो गायत्र्यो भवन्ति ॥१॥ मरुत्वद्धि माध्यन्दिनँ सवनम् ॥२॥ मृज्यमानः सुहस्त्येति सिमानाँ रूपम् ॥३॥ समानँ वै सिमानाञ्च रूपँ रेवतीनाञ्च सिमाभ्यो ह्यधिरेवत्यः प्रजायन्ते ॥४॥ एतमुत्यं दशक्षिप इत्यादित्या आदित्या वा इमाः प्रजास्तासामेव मध्यतः प्रतितिष्ठति ॥५॥ गायत्र्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभाँ ल्लोके क्रियन्ते ॥६॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥७॥ इषोवृधीयं भवति ॥८॥ पशवो वा इषोवृधीयं पशूनामवरुध्या इषे वै पञ्चममहर्व्वृधे षष्ठमवर्द्धन्त ह्येतर्हि यजमानमेवैतेन वर्द्धयन्ति ॥९॥ क्रौञ्चं भवति ॥१०॥ क्रुङेष्यमहरविन्ददेष्यमिव वै षष्ठमहरेवैतेन विन्दन्ति ॥११॥ वाजदावर्य्यो भवन्ति ॥१२॥ अन्नँ वै वाजोऽन्नाद्यस्यावरुध्यै यदा हि वा अन्नमथ गौरथाश्वोऽथ पुरुषो वाजी ॥१३॥ रेवत्यो भवन्ति प्रतिष्ठायै ॥१४॥ षण्णिधना षड्रात्रस्य धृत्यै ॥१५॥ आपो वै रेवत्यस्ता यत्पृष्ठं कुर्य्युरपशुर्य्यजमानः स्यात्पशूनस्य निर्द्दहेयुर्य्यत्र वा आपो वीवर्त्तन्ते तदोषधयो जायन्तेऽथ यत्रावतिष्ठन्ते निर्म्मृतुकास्तत्र भवन्ति तस्मात्पवमाने कुर्व्वन्ति पराचा हि पवमानेन स्तुवते ॥१६॥ मेथी वा इषोवृधीयँ रज्जुः क्रौञ्चँ वत्सो वाजदावर्य्यो रेवत्यो मातरो यदेतान्येवँ सामानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रियन्त एवमेव प्रत्तां दुग्धे ॥१७॥ औक्ष्णोरन्ध्रे भवतः ॥१८॥ उक्ष्णोरन्ध्रो वा एताभ्यां काव्योऽञ्जसा स्वर्गँल्लोकमपश्यत् स्वर्ग्गस्य लोकस्यानुख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः ॥१९॥ वाजजिद्भवति सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वँ वा एते वाजं जयन्ति ये षष्ठमहरागच्छन्ति ॥२०॥ अन्नँ वै वाजोऽन्नाद्यस्यावरुध्यै ॥२१॥ वरुणसाम भवति ॥२२॥ एतेन वै वरुणो राज्यमाधिपत्यमगच्छद्यशोऽभवद्राज्यमाधिपत्यं गच्छति यशो भवति वरुणसाम्ना तुष्टुवानः ॥२३॥ अङ्गिरसां गोष्ठो भवति॥२४॥ पशवो वै रेवत्यो गोष्ठमेव तत्पशुभ्यः पर्य्यस्यन्ति तमेवैनान् प्रवर्त्तयन्त्यविस्रँसाय ॥२५॥ इहवद्वामदेव्यं भवति ॥२६॥ एतेन वै वामदेवोऽन्नस्य पुरोधामगच्छदन्नँ वै ब्रह्मणः पुरोधान्नस्यावरुध्यै ॥२७॥ गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥२८॥ इन्द्रवत्यो गायत्र्यो भवन्ति तदु त्रैष्टुभाद्रूपान्नयन्ति स्तोमः ॥२९॥ इति नवमः खण्डः ॥१३/९॥

यातयामान्यन्यानि छन्दाँस्ययातयामा गायत्री तस्माद् गायत्रीषु स्तुवन्ति ॥१॥ सुरूपकृलुमूतय इत्यभ्यारम्भेण षट्पदाः षष्ठस्याह्नो रूपं तेन षष्ठमहरारभन्ते सन्तत्यै ॥२॥ उभे यदिन्द्र रोदसी इति षट्पदाः षष्ठस्याह्नो रूपं तेन षष्ठमहरारभन्ते सन्तत्यै ॥३॥ रेवतीषु वारवन्तीयं पृष्ठं भवति ॥४॥ अपाँ वा एष रसो यद्रेवत्यो रेवतीनाँ रसो यद्वारवन्तीयँ सरसा एव तद्रेवतीः प्रयुङ्क्ते यद्वारवन्तीयेन पृष्ठेन स्तुवते॥५॥ रेवद्वा एतद्रैवत्यँ यद्वारवन्तीयमस्य रेवान् रेवत्यो जायते ॥६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रेवान् भवति य एवँ वेद ॥७॥ केशिने वा एतद्दाल्भ्याय सामाविरभवत्तदेनमब्रवीदगातारो मा गायन्ति मा मयोङ्गासिषु-रिति कथं त आगा भगव इत्यब्रवीदागेयमेवास्म्यागायन्निव गायेत्प्रतिष्ठायै तदलम्मं पारिजानतं पश्चादक्षं शयानमेतामागां गायन्तमजानत्तमब्रवीत् पुरस्त्वादधा इति तमब्रुवन् कोऽन्वयं कस्मा अलमित्यलन्नु वै मह्यमिति तदलम्मस्यालम्मत्वम् ॥८॥ इहे हेति गायेत्प्रतिष्ठायै ॥९॥ ऋषभो रैवतो भवति ॥१०॥ पशवो वै रैवत्यः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥११॥ श्येनो भवति ॥१२॥ श्येनो ह वै पूर्व्वप्रेतानि वयाँस्याप्नोति पूर्व्वप्रेतानीव वै पूर्व्वाण्यहानि तेषामाप्त्यै श्येनः क्रियते ॥१३॥ श्येनो वा एतदहः सम्पारयितुमर्हति स हि वयसामाशिष्ठस्तस्यानप-हननाय सम्पारणायैतत् क्रियतेऽन्तो हि षष्ठञ्चाहः सप्तमञ्च ॥१४॥ ब्रह्मवादिनो वदन्ति यद् बृहदायतनानि पृष्ठान्यथैते द्वे गायत्र्यौ द्वे जगत्यौ क्व तर्हि बृहत्यो भवन्तीति ॥१५॥ ये द्वे जगत्योः पदे ते गायत्र्या उप सम्पद्येते तत् सर्व्वा बृहत्यो भवन्त्यायतने पृष्ठानि यातयत्यायतनवान् भवति॥१६॥ षट्पदासु स्तुवन्ति षड्रात्रस्य धृत्यै ॥१७॥ सप्तपदया यजति सप्तम-स्याहः सन्तत्यै स्तोमः॥१८॥ इति दशमः खण्डः॥१३/१०॥

परिस्वानो गिरिष्ठा इति परिवत्यो गायत्र्यो भवन्ति सर्व्वस्य पर्य्याप्त्यै ॥१॥ स सुन्वेयो वसूनामिति पशवो वै वसु पशूनामवरुध्यै ॥२॥ तँ वः सखायो मदायेति वालखिल्याः ॥३॥ वालखिल्यावेतौ तृचौ षष्ठे चाहनि सप्तमे च ॥४॥ यदेतौ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वालखिल्यौ तृचौ भवतोऽह्नोरेव व्यतिषङ्गाया व्यविस्रँसाय सन्तत्यै ॥५॥ सोमाः पवन्त इन्दव इत्यनुष्टुभो निभसदो भवन्ति प्रतिष्ठायै ॥६॥ अया पवा पवस्वैना वसूनीति त्रिष्टुभस्सत्यो जगत्यो रूपेण तस्माज्जगतीनाँल्लोके क्रियन्ते ॥७। गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥८॥ वैदन्वतानि भवन्ति ॥९॥ विदन्वान्वै भार्ग्गव इन्द्रस्य प्रत्यहँ स्तँ शुगाच्छ्र्छत् स तपोऽतप्यत स एतानि वैदन्वतान्यपश्यत्तैः शुचमपाहताप-शुचँ हते वैदन्वता स्तुष्टुवानः ॥१०॥ भरद्वाजस्य लोम भवति पशवो वै लोम पशूनामवरुध्यै ॥११॥ तदुदीर्घमित्याहुरायुर्व्वै दीर्घमायुषोऽवरुध्यै ॥१२॥ कार्णश्रवसं भवति श्रृण्वन्ति तुष्टुवानम् ॥१३॥ कर्णश्रवा वा एतदाङ्गिरसः पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां पुष्ट्यै ॥१४॥ गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥१५॥ मधुश्चुन्निधनं भवति ॥१६॥ परमस्यान्नाद्यस्यावरुध्यै परमँ वा एतदन्नाद्यँ यन्मधु ॥१७॥ प्रजापतेर्व्वा एतौ स्तनौ यद् घृतश्चुन्निधनञ्च मधुश्चुन्निधनञ्च यज्ञो वै प्रजापतिस्तमेताभ्यां दुग्धे यं कामं कामयते तं दुग्धे ॥१८॥ क्रौञ्चे भवतः ॥१९॥ क्रुङ्ङ्क्ष्यमहरविन्ददेष्यमिव वै षष्ठमहरहरेवैताभ्याँ विन्दन्ति ॥२०॥ श्नौष्ठं भवति ॥२१॥ श्नुष्टिर्व्वा एतेनाङ्गिरसोऽञ्जसा स्वर्गँ ल्लोकमपश्यत् स्वर्ग्गस्य लोकस्यानुख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः॥२२॥अग्नेर्व्वा एतद्वैश्वानरस्य साम दीदिहीति निधनमुपयन्ति दीदायेव ह्यग्निर्व्वैश्वानरः॥२३॥ निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः॥२४॥इत्येकादशःखण्डः ॥१३/११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ब्रह्मवादिनो वदन्ति प्रायणतो द्विपदाः कार्य्या ३ उदयनता ३ इति ॥१॥ उदयनत एव कार्य्याः पुरुषो वै द्विपदाः प्रतिष्ठायै ॥२॥ वाचा वै सर्व्वँ यज्ञं तन्वते तस्मात्सर्व्वाँ वाचं पुरुषो वदति सर्व्वा ह्यस्मिन् सँस्तुता प्रतितिष्ठति ॥३॥ गूर्द्दो भवति ॥४॥ गौपायनानाँ वै सत्रमासीनानां किरातकुल्यावसुरमाये अन्तः परिध्यसून् प्राकिरतां ते अग्ने त्वं नो अन्तमः इत्यग्निमुपासीदँस्तेनासूतर्ह्यकामयन्त नस्पृणवँ स्तद्भाव ते कामसनि साम गूर्द्दः काममेवैतेनावरुन्धे ॥५॥ गोतमस्य भद्रं भवति ॥६॥ आशिषमेवास्मा एतेनाशास्ते साम हि सत्याशीः ॥७॥ एतेन वै गोतमो जेमानं महिमानमगच्छत् तस्माद्ये च पराञ्चो गोतमाद्ये चार्व्वाञ्चस्त उभये गोतम ऋषयो ब्रुवते ॥८॥ उद्वँशपुत्रो भवति ॥९॥ यद्वा उद्वँशीयं तदुद्वँशपुत्रः ॥१०॥ अर्द्धेडामतिस्वरति॥११॥ तस्मादूधर्द्धारा अतिक्षरन्तीडायामन्ततः पशुषु प्रतितिष्ठति क्लृप्त उपरिष्टादृक्साम च विमुच्येते ॥१२॥ अभ्युस्वरेण सप्तममहः स्वरति सन्तत्यै ॥१३॥ ऊहुषीव वा एतर्हि वाग्यदा षडहः सन्तिष्ठते न बहु वदेन्नान्यं पृच्छे-न्नान्यस्मै प्रब्रूयात् ॥१४॥ मधु वाशयेद् घृतँ वा यथोहुषो वहं प्रत्यनक्ति तथा तत् ॥१५॥ त्रयस्त्रिँश एव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः ॥१६॥ इति द्वादशः खण्डः ॥१३/१२॥

इति त्रयोदशोऽध्यायः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ चतुर्दशोऽध्यायः

आप्यन्ते वा एतत्स्तोमाश्छन्दाँसि यत्षडह आप्यते ॥१॥ आप्ते षडहे छन्दाँसि स्तोमान् कृत्वा प्रयन्ति ॥२॥ प्र काव्यमुशनेव ब्रुवाण इति गायत्र्या रूपेण प्रयन्ति ॥३॥ इयँ वै गायत्र्यस्यामेव प्रतिष्ठाय प्रयन्ति ॥४॥ त्रिष्टुप् प्रतिपद्भवति ॥५॥ ओजो वीर्य्यं त्रिष्टुबोजस्येव वीर्य्ये पराक्रम्य प्रयन्ति ॥६॥ स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै ॥७॥ हरिवत्यो भवन्ति छन्दोमानामयातयामतायै ॥८॥ द्वादशर्च्चौ भवतः ॥९॥ द्वादशमासाः सँवत्सरः सँवत्सरमेव तत्पूर्व्वस्मै षडहाय प्रत्युद्यच्छन्ति सवीवधतायै ॥१०॥ चतुर्व्विँशतिर्भवन्ति चतुर्व्विँशतिरर्द्धमासाः सँवत्सरः सँवत्सरमेव तत्पूर्व्वस्मै षडहाय प्रत्युद्यच्छन्ति सवीवधतायै ॥११॥ दृत ऐन्द्रोत इति हो वाचाभिप्रतारी काक्षसेनिर्य्ये महावृक्षस्याग्रं गच्छन्ति क्व ते ततो भवन्ति प्र राजन् पक्षिणः पतन्त्यवापक्षाः पद्यन्ते ॥१२॥ ये वै विद्वाँसस्ते पक्षिणो येऽविद्वाँसस्तेऽपक्षास्त्रिवृत् पञ्चदशावेव स्तोमौ पक्षौ कृत्वा स्वर्ग्गँल्लोकं प्रयन्ति ॥१३॥ चतुर्व्विँश एव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय ॥१४॥ इति प्रथमः खण्डः ॥१४/१॥

मूर्द्धानं दिवो अरतिं पृथिव्या इत्याग्गनेयमाज्यं भवति ॥१॥ मूर्द्धा वा एष दिवो यस्तृतीयस्त्रिरात्रः ॥२॥ वैश्वानरमृत आजातमग्गिनमिति वैश्वानर इति वा अग्गनेः प्रियं धाम प्रियेणैवैनं तद्धाम्ना परोक्षमुपशिक्षति ॥३॥ प्र वो मित्राय गायतेति द्यावापृथिवीयं मैत्रावरुणं द्यावापृथिवी वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मित्रावरुणयोः प्रियं धाम प्रियेणैवैनौ तद्धाम्ना परोक्षमुपशिक्षति ॥४॥ इन्द्रायाहि चित्रभानवित्यार्भवमैन्द्रमृभवो वा इन्द्रस्य प्रियं धाम प्रियेणैवैनं तद्धाम्ना परोक्षमुपशिक्षति ॥५॥ तमीडिष्व यो अर्च्चिषेत्यनिरुक्तमैन्द्राग्नं देवतानामनभिधर्षायोत्तमार्द्धे निराह देवतानामप्रणाशाय स्तोमः॥६॥ इति द्वितीयः खण्डः ॥१४/२॥

वृषा पवस्व धारयेति गायत्री भवत्यह्नो धृत्यै ॥१॥ वृषण्वत्यस्त्रिष्टुभारूपेण त्रैष्टुभँ ह्येतदहः ॥२॥ पुनानः सोम धारयेति धृत्यै ॥३॥ प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतमिति प्रवत्यो भवन्ति प्रणिनीषेण्यमिव ह्येतदहः ॥४॥ जगत्यः सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभाँल्लोके क्रियन्ते ॥५॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥६॥ सन्तनि भवति सप्तमस्याह्नः सन्तत्यै ॥७॥ यथा वै व्योकसौ वि प्रद्रवत एवमेते षष्ठञ्चाहः सप्तमञ्च वि प्रद्रवतस्तौ यथा समानीय सँयुज्यादेवमेवैते एतेन साम्ना सँयुनक्ति ॥८॥ सौपर्ण्णं भवति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥९॥ यज्ञो वै देवेभ्योऽपाक्रामत्स सुपर्ण्णरूपं कृत्वा चरत्तं देवा एतैः सामभिरारभन्त यज्ञ इव वा एष यच्छन्दोमा यज्ञस्यैवैष आरम्भः ॥१०॥ रोहितकूलीयं भवत्याजिजित्यायै ॥११॥ एतेन वै विश्वामित्रो रोहिताभ्याँ रोहितकूल आजिमजयत् ॥१२॥ विश्वामित्रो भरतानां मनस्सत्यायात्सौदन्तिभिर्न्नामजनतयाँ शं प्रास्यते मां माँ यूयँ वस्त्रिकाञ्जयायेमानि मह्यँ यूयं पूरयाय यदीमाविदँ रोहितावश्माचितं कूलमुद्वहात इति स एते सामनी

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपश्यत्ताभ्याँ युक्त्वा प्रासेधत्स उदजयत् ॥१३॥ आजिर्व्वा एष प्रततो यद्द्वादशाहस्तस्यैते उज्जित्यै ॥१४॥ कण्वरथन्तरं भवति ॥१५॥ तेजो वा एतद्रथन्तरस्य यत्कण्वरथन्तरँ सरसमेव तद्रथन्तरं प्रयुङ्क्ते यत्कण्वरथन्तरेण सप्तमेऽहनि स्तुवते ॥१६॥ जामि द्वादशाहस्यास्तीति ह स्नाहोग्रदेवो राजनिर्ब्बार्हितँ षष्ठमहर्ब्बार्हितँ सप्तमँ यत्कण्वरथन्तरं भवति तेनाजामि ॥१७॥ गौङ्गवं भवति ॥१८॥ अग्निरकामयतान्नादः स्यामिति स तपोऽतप्यत स एतद्गौङ्गवमपश्यत्तेनान्नादोऽभवद्यदन्नँ वित्वा गर्द्दद्यदगङ्गूयत्तद् गौङ्गवस्य गौङ्गवत्वमन्नाद्यस्यावरुध्यै गौङ्गवं क्रियते ॥१९॥ यत्सामदेवता प्रशँसति तेन यजमानाः सत्याशिषः सत्याशिषोऽसामेति वै सत्रमासते सत्याशिष एव भवन्ति ॥२०॥ आयास्यं भवति तिरश्चीननिधनं प्रतिष्ठायै ॥२१॥ आयास्यो वा आङ्गिरस आदित्यानां दीक्षितानामन्नमाश्नात् स व्यभ्रँशत स एतान्यायास्यान्यपश्यत्तैरात्मानँ समश्रीणाद्विभ्रष्टमिव वै सप्तममहर्य्यदेतत्साम भवत्यहरेव तेन सँश्रीणाति ॥२२॥ प्रवद्भार्ग्गवं भवति ॥२३॥ प्रवता वै देवाः स्वर्ग्गँल्लोकं प्रायन्नुद्वतो दायन् ॥२४॥ निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥२५॥ इति तृतीयः खण्डः ॥१४/३॥

वयं घत्वा सुतावन्त इति सतो बृहत्यो वर्षीयश्छन्द आक्रमतेऽनपभ्रँशाय ॥१॥ नकिष्टं कर्म्मणा नशदिति बृहत्यः सत्योऽभ्यारम्भेण जगत्यः ॥२॥ अपभ्रँश इव वा एष यज्ज्यायसस्स्तोमात्कनीयाँसँस्तोममुपयन्ति यदेता अभ्यारम्भेण जगत्यो भवन्त्यह्न एव प्रत्युत्तम्भाय ॥३॥ अभिनिधनं काण्वं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति ॥४॥ अभिनिधनेन वा इन्द्रो वृत्राय वज्रं प्राहरत्तमस्तृणुतस्तृणुते भ्रातृव्यमभिनिधनेन तुष्टुवानः ॥५॥ वैखानसं भवति ॥६॥ वैखानसा वा ऋषय इन्द्रस्य प्रिया आसँस्तान्रहस्युर्देवमलिम्लुङ् मुनिमरणेऽमारयत्ते देवा अब्रुवन् क्व तर्षयोऽभूवन्निति तान् प्रैषमैच्छत्तान्नाविन्दत्स इमाँल्लोकानैकधारेणापुनात्तान्मुनिमरणेऽविन्दत्तानेतेन साम्ना समैरयत्तद्वाव स तर्ह्यकामयत कामसनि साम वैखानसं काममेवैतेनावरुन्धे स्तोमः ॥७॥ इति चतुर्थः खण्डः ॥१४/४॥

यस्ते मदो वरेण्य इति गायत्री भवति मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति ॥१॥ एषस्य धारया सुत इति ककुभः सत्योऽभ्यारम्भेण त्रिष्टुभः ॥२॥ अपभ्रंश इव वा एष यत् ज्यायसः स्तोमात्कनीयाँसँ स्तोममुपयन्ति यदेता अभ्यारम्भेण त्रिष्टुभो भवन्त्यह्न एव प्रत्युत्तम्भाय ॥३॥ सखाय आ निषीदतेति वालखिल्यावाल खिल्यावेतौ तृचौ षष्ठे चाहनि सप्तमे च यदेतौ वालखिल्यौ तृचौ भवतोऽह्नोरेव व्यतिषङ्गायां व्यवस्रँसाय सन्तत्यै ॥४॥ पुरोजिती वो अन्धस इति विराडन्नँ विराडन्नाद्यस्यावरुध्यै ॥५॥ प्रवाज्यक्षारित्यक्षरपङ्क्तिः स्तोमानां प्रभूतिः॥६॥ अथो एतध्येवैतर्हि छन्दो यातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ॥७॥ ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाँस्याप्यन्ते किं छन्दसश्छन्दोमा इत्येतच्छन्दसो यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥८॥ ये सोमासः परावतीति परावतमिव वा एतर्हि यज्ञो गतस्तमेवैतेनान्विच्छन्ति ॥९॥ गायत्र्यस्सत्यो जगत्यो रूपेण

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्माज्जगतीनाँल्लोके क्रियन्ते ॥१०॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥११॥ दक्षणिधनं भवति ॥१२॥ प्रजापतिः प्रजा असृजत ता अस्मात्सृष्टा अबला इवाच्छदयँस्तास्वेतेन साम्ना दक्षायेत्योजो वीर्य्यमदधाद्यदेतत् साम भवत्योज एव वीर्य्यमात्मन्धत्ते ॥१३॥ शार्क्करं भवति ॥१४॥ इन्द्रँ सर्व्वाणि भूतान्यस्तुवन् स शर्क्करँ शिशुमारर्षिमुपेत्याब्रवीत् स्तुहि मेति सोऽपः प्रस्कन्दन्नब्रवी देतावतोऽहं त्वाँ स्तुयामिति तस्मादपाँ वेगमवेजयत स हीन इवामन्यत स एतत्सामापश्यत्तेनापो नु समाश्नुत तद्वाव स तर्ह्यकामयत कामसनि साम शार्क्करं काममेवैतेनावरुन्धे ॥१५॥ प्लवो भवति ॥१६॥ समुद्द्रं वा एते प्रस्नान्तीत्याहुर्य्ये द्वादशाहमुपयन्तीति यो वा अप्लवः समुद्द्रं प्रस्नाति न स तत उदेति यत्प्लवो भवति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥१७॥ अति विश्वानि दुरिता तरेमेति यदेवैषां दुष्टुतं दुश्शस्तं तदेतेन तरन्ति॥१८॥ एकादशाक्षरणिधनो भवत्येकादशाक्षरा त्रिष्टुबोजो वीर्य्यं त्रिष्टुबोजस्येव वीर्य्ये प्रतितिष्ठति ॥१९॥ गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥२०॥ कार्त्तयशं भवति ॥२१॥ हीति निधनमुपयन्ति पाप्मनोऽपहत्यै ॥२२॥ अप पाप्मानँ हते कार्त्तयशेन तुष्टुवानः ॥२३॥ सौहविषं भवति ॥२४॥ सुहविर्व्वा एतेनाङ्गिरसोऽञ्जसा स्वर्गँल्लोकमपश्यत् स्वर्ग्गस्य लोकस्यानुख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः॥२५॥ ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाँस्याप्यन्ते किं छन्दसश्छन्दोमा इति पुरुषश्छन्दस इति ब्रूयात्पुरुषो वै पाङ्क्तः पुरुषो द्विपदा छन्दोमानामयात-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यामतायै ॥२६॥ जराबोधीयं भवत्यन्नाद्यस्यावरुध्यै ॥२७॥ अन्नँ वै जराबोधीयं मुखं गायत्री मुख एव तदन्नं धत्तेऽन्नमत्ति ॥२८॥ अन्नादो भवति य एवँ वेद ॥२९॥ गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥३०॥ इडान्ताः पावमाना भवन्ति पशवो वा इडाः पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः ॥३१॥ इति पञ्चमः खण्डः ॥१४/५॥

आ ते वत्सो मनो यमदित्यपच्छिदिव वा एतद्यज्ञकाण्डँ यदुक्थानि यदेति सलोमत्वायैव ॥१॥ त्वं न इन्द्राभरेति पूर्णाः ककुभः॥२॥ अपभ्रँश इव वा एष यज्ज्यायसः स्तोमात् कनीयाँसँ स्तोममुपयन्ति यदेताः पूर्ण्णाः ककुभो भवत्यनप-भ्रँशाय ॥३॥ यदिन्द्र चित्र म इह नास्ति त्वा दातमद्रिवो राधस्तन्नो विदद्वस उभया हस्त्याभरेति राद्धिमेवैते नावरुन्धे ॥४॥ वात्सं भवति ॥५॥ वत्सश्च वै मेधातिथिश्च काण्वावास्तां तं वत्सं मेधातिथिराक्रोशदब्राह्मणोऽसि शूद्रापुत्र इति सोऽब्रवीदृते नाग्निँ व्ययावयतरो नौ ब्रह्मीयानिति वात्सेन वत्सो व्यैन्मैधातिथेन मेधातिथिस्तस्य न लोम च नौषत्तद्वाव स तर्ह्यकामयत कामसनि साम वात्सं काममेवैतेनावरुन्धे ॥६॥ सौश्रवसं भवति ॥७॥ उपगुर्व्वै सौश्रवसः कुत्सस्यौर-वस्य पुरोहित आसीत्स कुत्सः पर्य्यशपद्य इन्द्रं यजाता इति स इन्द्रः सुश्रवसमुपेत्याब्रवीद्यजस्व माशनायामि वा इति तमयजत स इन्द्रः पुरोडाशहस्तः कुत्समुपेत्याब्रवीदयक्षत मा क्व ते परिशप्तमभूदिति कस्त्वा यष्टेति सुश्राव इति स कुत्स

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

औरव उपागाः सौश्रवसस्योद्गायत औदुम्बर्य्या शिरोऽच्छिनत्स सुश्रवा इन्द्रमब्रवीत्त्वत्तनाद्वै मेदमीदृगुपागादिति तमेतेन साम्ना समैरयत्तद्वाव स तर्ह्यकामयत कामसनि साम सौश्रवसं काममेवैतेनावरुन्धे ॥८॥ वीङ्कं भवति ॥९॥ च्यवनो वै दाधीचो ऽश्विनोः प्रिय आसीत्सोऽजीर्य्यत्तमेतेन साम्नाप्सु व्यैङ्कयतां तं पुनर्य्युवानमकुरुतां तद्वाव तौ तर्ह्यकामयेतां कामसनि साम वीङ्कं काममेवैतेनावरुन्धे ॥१०॥ चतुर्व्विँश एव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय ॥११॥ इति षष्ठः खण्डः॥१४/६॥

शिशुं जज्ञानँ हर्य्यतं मृजन्तीत्यष्टमस्याह्नः प्रतिपद्भवति ॥१॥ शिशुरिव वा एष सप्तमेनाह्ना जायते तमष्टमेनाह्ना मृजन्ति ॥२॥ स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै ॥३॥ हरिवत्यो भवन्ति छन्दोमानामयात यामतायै ॥४॥ नवर्च्चा भवन्ति ॥५॥ नव वै प्राणाः पशव श्छन्दोमाः पशुष्वेव तत्प्राणान्दधाति ॥६॥ पञ्चर्च्चो भवति पञ्चपदा पङ्क्तिः पाङ्क्तमन्नमन्नाद्यस्यावरुध्यै ॥७॥ वाणवान् भवत्यन्तो वै वाणोऽन्त एतदष्टममहामन्त एव तदन्तेन स्तुवते प्रतिष्ठायै ॥८॥ त्रयस्तृचा भवन्ति प्राणापानानाँ सन्तत्यै ॥९॥ चतुश्चत्वारिँश एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठ त्योजो वीर्य्यं त्रिष्टुप्॥१०॥ इति सप्तमःखण्डः ॥१४/७॥

अग्निँ वो देवमग्निभिस्सजोषा इत्याग्नेयमाज्यं भवति ॥१॥ अग्निभिरित्येव पूर्व्वाण्यहानि समिद्धान्यष्टममहरभि-समिन्धे ॥२॥ मित्रँ वयँ हवामह इति बार्हतं मैत्रावरुणम् ॥३॥ उग्रगाधमिव वा एतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसँव्याथाय ॥४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तमिन्द्रँ वाजयामसीत्यैन्द्रम् ॥५॥ अष्टमेन वै देवा अह्नेन्द्रमवा-जयन्नवमेन पाप्मानमघ्नन्नहरेवैतेन वाजयन्ति ॥६॥ इन्द्रे अग्ग्ना नमो बृहदिति बार्हतमैन्द्राग्ग्नम् ॥७॥ उग्रगाधमिव वा एतद्यच्छन्दोमा स्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमानामसँव्याथाय स्तोमः ॥८॥ इत्यष्टमः खण्डः ॥१४/८॥

अध्वर्य्यो अद्रिभिः सुतमिति गायत्री भवत्यह्नो धृत्यै ॥१॥ गायत्र्यः सत्यस्त्रिष्टुभो रूपेण त्रैष्टुभं ह्येतदहः ॥२॥ अभिसोमास आयव इत्यभीति रथन्तरस्य रूपं बृहदिति बृहत उभयोः सहरूपमुपैत्युभौ हि वर्ण्णावेतदहः ॥३॥ धर्त्ता दिवः पवते कृत्व्यो रस इत्यधृत इव वा एष त्र्यहो यद्धर्त्तेति धृत्या एव ॥४॥ जगत्यस्सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभाँल्लोके क्रियन्ते ॥५॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥६॥ वैरूपं भवति ॥७॥ पशवो वै वैरूपं पशूनामवरुध्यै विरूपः सँवत्सरो विरूपमन्नमन्नाद्यस्यावरुध्यै ॥८॥ आशुभार्ग्गवं भवति ॥९॥ अहर्व्वा एतदव्लीयत तद्देवा आशुनाभ्यधिन्वँ स्तदाशो-राशुत्वम् ॥१०॥ मार्ग्गीयवं भवति ॥११॥ देवँ वा मृगयुरिति वदन्त्येतेन वै स उभयेषां पशूनामाधिपत्यमाश्नुतोभयेषां पशूनामाधिपत्यमश्नुते मार्ग्गीयवेण तुष्टुवानः ॥१२॥ सौमित्रं भवति ॥१३॥ यदेव सौमित्रस्य ब्राह्मणम् ॥१४॥ ऐढतं भवति ॥१५॥ इढन्वा एतेन काव्योऽञ्जसा स्वर्गँल्लोकमपश्यत् स्वर्ग्गस्य लोकस्यानुख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः ॥१६॥ साकमश्वं भवति यदेव साकमश्वस्य ब्राह्मणम् ॥१७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तदु धुराँ सामेत्याहुः प्राणा वै धुरः प्राणानामवरुध्यै ॥१८॥ विलम्बसौपर्ण्णं भवति ॥१९॥ आत्मा वा एष सौपर्ण्णानाँ यदष्टमेऽहनि पक्षावेतावभितो भवतो ये सप्तमनवमयोर्व्वीव वा अन्तरात्मा पक्षौ लम्बते यदन्तरात्मा पक्षौ विलम्बते तस्माद्विलम्बसौपर्णम् ॥२०॥ स्वर्ग्गस्य लोकस्य समष्ट्यै सौपर्ण्णं क्रियते ॥२१॥ द्विहिङ्कारँ वामदेव्यं भवत्यन्नाद्यस्यावरुध्यै ॥२२॥ द्वितीयँ ह्येतद्रूपँ यच्छन्दोमाः ॥२३॥ पशवो वै वामदेव्यं पशवश्छन्दोमाः पशुष्वेव तत् पशून्दधाति ॥२४॥ गायत्रपार्श्वं भवति ॥२५॥ अहर्व्वा एतदव्लीयत तद्देवा गायत्रपार्श्वेन समतन्वँस्तस्माद्गायत्रपार्श्वम् ॥२६॥ त्रिरात्रो यद्व्यशीर्य्यत तमेतैः सामभिरभिषज्यन् गायत्रपार्श्वेनोपायच्छन् सन्तनिना समतन्वन् सङ्कृतिना समस्कुर्व्वन् प्रतिष्ठितौ पूर्व्वौ त्रिरात्रावप्रतिष्ठित एष यदेतान्येवँ सामानि क्रियन्त एतस्यैव प्रतिष्ठित्यै ॥२७॥ पौरुहन्मनं भवति ॥२८॥ पुरुहन्मा वा एतेन वैखानसोऽञ्जसा स्वर्गँल्लोकमपश्यत् स्वर्ग्गस्य लोकस्यानुख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः ॥२९॥ अभ्याघात्यं भवत्यभ्याघात्यसामानो हि छन्दोमाः॥३०॥ द्वैगतं भवति ॥३१॥ द्विगद्वा एतेन भार्ग्गवाद्विः स्वर्ग्गँ ल्लोकमगच्छदागत्य पुनरगच्छत् द्वयोः कामयोरवरुध्यै द्वैगतं क्रियते ॥३२॥ हारायणं भवति ॥३३॥ इन्द्रस्तेजस्कामो हरस्कामस्तपोऽतप्यत स एतद्धारायणमपश्यत्तेन तेजो हरोऽवारुन्ध तेजस्वी हरस्वी भवति हारायणेन तुष्टुवानः ॥३४॥ अच्छिद्रं भवति ॥३५॥ यद्वा एतस्याहश्छिद्रमासीत्तद्देवा अच्छिद्रेणाप्यौहँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्तदच्छिद्रस्याच्छिद्रत्वम् ॥३६॥ बार्हदुक्थं भवति ॥३७॥ बृहदुक्थो वा एतेन वाम्नेयोऽन्नस्य पुरोधामगच्छदन्नँ वै ब्राह्मणः पुरोधान्नाद्यस्यावरुध्यै ॥३८॥ उद्वद्भार्गवं भवति ॥३९॥ प्रवता वै देवाः स्वर्गँल्लोकं प्रायन्नुद्वतो दायन् ॥४०॥ निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः॥४१॥ इति नवमः खण्डः॥१४/९॥

क ईँ वेद सुते सचेति सतो बृहत्यः॥१॥ अपभ्रंश इव वा एष यस्सप्तमेऽहनि सतो बृहत्यो भवन्ति नाष्टमे तस्मादष्टमे कार्य्या अनपभ्रँशाय ॥२॥ तदाहुः शिथिलमिव वा एतच्छन्दो यत्सतो बृहत्येषा वै प्रतिष्ठिता बृहती या पुनः पदा यदिन्द्र प्रागपागुदगिति दिशाँ विमर्शः प्रतिष्ठित्यै ॥३॥ तासु नैपातिथं ब्रह्मसाम ॥४॥ सामार्षेयवत् स्वर्गाय युज्यते स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥५॥ उभयँ श्रृणवच्च न इति ॥६॥ यच्च पृष्ठानि यानि चैतान्यहानि तेषामुभयेषाँ सन्तत्यै ॥७॥ तासु वैयश्वम् ॥८॥ व्यश्वो वा एतेनाङ्गिरसोऽञ्जसा स्वर्गँल्लोक-मपश्यत् स्वर्ग्गस्य लोकस्यानुख्यात्या एतत् पृष्ठानामन्ततः क्रियते स्तोमः ॥९॥ इति दशमः खण्डः ॥१४/१०॥

पवस्व देव आयुषगिन्द्रं गच्छतु ते मद इति गायत्री भवति मदवद्वै रसवत्तृतीयसवनं मदमेव तद्रसं दधाति ॥१॥ अभिद्युम्नं बृहद्यश इत्यभीतिरथन्तरस्य रूपं बृहदिति बृहत उभयोः सहरूपमुपैत्युभौ हि वर्ण्णावेतदहः॥२॥ प्राणा शिशुर्म्महीनामिति प्राणवत्यो भवन्ति प्राणानेव तद्यजमाने दधाति ॥३॥ अभी नो वाजसातममित्यभीतिरथन्तरस्य रूपँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

राथन्तरँ ह्येतदहः ॥४॥ पवस्व सोम महान्त्समुद्र इत्यक्षर पङ्क्तिः स्तोमानां प्रभूतिरथो एतद्ध्येवैतर्हि छन्दो यातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाँस्याप्यन्ते किं छन्दसश्छन्दोमा इत्येतच्छन्दसो यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥५॥ हिन्वन्ति सूरमुस्रय इति गायत्र्यः सत्यो जगत्यो रूपेण तस्माज्जगतीनाँ ल्लोके क्रियन्ते ॥६॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥७॥ स्वाशिरामर्क्को भवति ॥८॥ अन्नँ वा अर्क्कोऽन्नाद्यस्यावरुध्यै प्राणा वै स्वाशिरः प्राणानामवरुध्यै ॥९॥ सुरूपं भवति ॥१०॥ पशवो वै सुरूपं पशूनामवरुध्यै ॥११॥ भासं भवति भाति तुष्टुवानः॥१२॥ पदनिधनँ राथन्तरँ ह्येतदहः ॥१३॥ स्वर्भानुर्वा आसुर आदित्यं तमसा विध्यत् स न व्यरोचत तस्यात्रिर्भासेन तमोऽपाहन् स व्यरोचत यद्वै तद्भा अभवत्तद्भासस्य भासत्वम् ॥१४॥ तम इव वा एतान्यहानि यच्छन्दोमा स्तेभ्य एतेन साम्ना विवासयति ॥१५॥ काक्षीवतं भवति ॥१६॥ कक्षीवान्वा एतेनौशिजः प्रजाति भूमानमगच्छत् प्रजायते बहुर्भवति काक्षीवतेन तुष्टुवानः ॥१७॥ आसितं भवति ॥१८॥ असितो वा एतेन दैवलस्त्रयाणाँल्लोकानां दृष्टिमपश्यत्त्रयाणां कामानामवरुध्या आसितं क्रियते ॥१९॥ ऐषिरं भवति ॥२०॥ प्रजातिर्वा ऐषिराणि प्रजायते बहुर्भवत्यैषिरेण तुष्टुवानः ॥२१॥ त्रैतं भवति प्रतिष्ठायै ॥२२॥ पदनिधनँ राथन्तरँ राथन्तरँ ह्येतदहः ॥२३॥ नाथविन्दु साम विन्दते नाथं नाथविन्दून्येतान्यहानि यच्छन्दोमा नाथमेवैतैर्व्विन्दते ॥२४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥२५॥ कौत्सं भवति ॥२६॥ एतेन वै कुत्सोऽन्धसो विपानमपश्यत्स ह स्म वै सुरादृतिनोपवसथं धावयत्युभयस्यान्नाद्यस्यावरुध्यै कौत्सं क्रियते ॥२७॥ शुद्धाशुद्धीयं भवति ॥२८॥ इन्द्रो यतीन् सालावृकेयेभ्यःप्रायच्छत्तमश्लीला वागभ्यवदत्सोऽशुद्धोऽमन्यत स एतच्छुद्धाशुद्धीयमपश्यत्तेनाशुद्ध्यच्छुद्ध्यति शुद्धाशुद्धीयेन तुष्टुवानः ॥२९॥ क्रौञ्चं भवति यदेव क्रौञ्चस्य ब्राह्मणं यद्द्वितीयेऽहनि ॥३०॥ रयिष्ठं भवति ॥३१॥ पशवो वै रयिष्ठं पशूनामवरुध्यै ॥३२॥ औदलं भवति ॥३३॥ उदलो वा एतेन वैश्वामित्रः प्रजातिं भूमानमगच्छत् प्रजायते बहुर्भवत्यौदलेन तुष्टुवानः ॥३४॥ धर्म्म भवति धर्म्मस्य धृत्यै ॥३५॥ ब्रह्मवादिनो वदन्ति यत्षडहे स्तोमाश्छन्दाँस्याप्यन्ते किं छन्दसश्छन्दोमा इति पुरुषश्छन्दस इति ब्रूयात्पुरुषो वै पाङ्क्तः पुरुषो द्विपदाश्छन्दोमानामयातयामतायै ॥३६॥ विशोविशीयं भवति ॥३७॥ अग्निरकामयत विशोविशोऽतिथिः स्याँ विशोविश आतिथ्यमश्नुवीयेति स तपोऽतप्यत स एतद्विशो विशीयमपश्यत्तेन विशोविशोऽतिथिरभवत् विशो विश आतिथ्यमाश्नुते विशो विशोऽतिथिर्भवति विशोविश आतिथ्यमश्नुते विशोविशीयेन तुष्टुवानः ॥३८॥ गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥३९॥ इडान्ताः पवमाना भवन्ति पशवो वा इडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः ॥४०॥

इत्येकादशः खण्डः॥१४/११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रेष्ठँ वो अतिथिमित्यातिथ्यस्यैव तद्रूपं क्रियते ॥१॥ एन्द्र नो गधि प्रियेतीन्द्रियस्य वीर्य्यस्यावरुध्यै ॥२॥ पुरां भिन्दुर्य्युवा कविरमितौजा अजायत इन्द्रो विश्वस्य कर्म्मणो धर्त्ता वज्री पुरुष्टुत इति धृत्या एव ॥३॥ औशनं भवति ॥४॥ उशना वै काव्योऽकामयत यावानितरेषां काव्यानाँ ल्लोक-स्तावन्तँ स्पृणुयामिति स तपोऽतप्यत स एतदौशनमपश्यत्तेन तावन्तँलोकमस्पृणोद्यावानितरेषां काव्यानामासीत्तद्वाव स तर्ह्यकामयत कामसनि सामौशनं काममेवैतेनावरुन्धे ॥५॥ साँवर्त्तं भवति ॥६॥ देवानाँ वै यज्ञँ रक्षाँस्यजिघाँसँस्तान्येतेन इन्द्रः सँवर्त्तमुपावपद्यत् सँवर्त्तमुपावपत्तस्मात् साँवर्त्तं पाप्मा वाव स तानसचत तँ साँवर्त्ते नापाघ्नताप पाप्मानँ हते साँवर्त्तेन तुष्टुवानः ॥७॥ मारुतं भवति ॥८॥ मासा वै रश्मयो मरुतो रश्मयो मरुतो वै देवानां भूयिष्ठा भूयिष्ठा असामेति वै सत्रमासते भूयिष्ठा एव भवन्त्यृतुमन्ति पूर्व्वाण्यहान्यनृतव-श्छन्दोमा यदेतत्साम भवति तेनैतान्यहान्यृतुमन्ति भवन्ति ॥९॥ चतुश्चत्वारिँश एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्य्यं त्रिष्टुप् ॥१०॥ इति द्वादशः खण्डः ॥१४/१२॥ **इति चतुर्दशोऽध्यायः**

अथ पञ्चदशोऽध्यायः

अक्रान् समुद्द्रः प्रथमे विधर्म्मन्निति नवमस्याह्नः प्रतिपद्भवति ॥१॥ परमँ वा एतदहर्व्विधर्म्म विधर्म्म वा एतदन्यैरहभिरहर्य्यन्नवमं ज्येष्ठँ हि वरिष्ठम् ॥२॥ मत्सि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वायुमिष्टये राधसे न इति वारुण्येषा भवति यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तदवयजति ॥३॥ स्तोत्रीयस्तृचो भवति प्राणापानानामवरुध्यै॥४॥ दशर्च्चो भवति दशाक्षरा विराट् वैराजमन्नमन्नाद्यस्यावरुध्यै ॥५॥ सप्रभृतयो भवन्तीन्द्रियस्य वीर्य्यस्य रसस्यानतिक्षाराय यत्र वै देवा इन्द्रियँ वीर्य्यँ रसमपश्यँस्तदनु न्यतुदन् ॥६॥ अष्टर्च्चो भवति ॥७॥ अष्टाशफाः पशवः शफशस्तत्पशूनाप्नोति अष्टाक्षरा गायत्री तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमवरुन्धे ॥८॥ षड़ृचा भवन्त्यृतूनां धृत्यै ॥९॥ चत्वारः षड़ृचा भवन्ति चतुर्व्विँशतिरर्द्धमासाः सँवत्सरः सँवत्सर एव प्रतितिष्ठति ॥१०॥ स वानुत्तमः षड़ृचो भवत्युभयस्य परोक्षप्रत्यक्षस्यावरुध्यै ॥११॥ तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥१२॥ अष्टाचत्वारिँश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥१३॥ इति प्रथमः खण्डः ॥१५/१॥

अगन्म महा नमसा यविष्ठमित्याग्नेयमाज्यं भवति ॥१॥ गच्छन्तीव वा एते ये नवममहर्ग्गच्छन्ति ॥२॥ यो दीदाय समिद्धस्स्वे दुरोण इति दीदायेव ह्येष यो नवभिरहर्भिस्तुष्टुवानः स्वाहुतमिति स्वाहुतो ह्येष यो नवभिरहर्भिराहुतो विश्वतः प्रत्यञ्चमिति विश्वतो ह्येष प्रत्यङ् ॥३॥ त्वँ वरुण उत मित्रो अग्न इति वारुण्येका भवति यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तदवयजति ॥४॥ मित्रँ हुवे पूत दक्षमिति राथन्तरं मैत्रावरुणम् ॥५॥ उग्रगाधमिव वा एतद्यच्छन्दोमास्तद्यथाद उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

व्यतिषजति छन्दोमानामसँव्याथाय ॥६॥ महाँ इन्द्रो य ओजसेत्यैन्द्रमष्टमेन वै देवा अह्नेन्द्रमवजयन्नवमेन पाप्मान-मघ्नन्नहरेवैतेन महयन्ति ॥७॥ ता हुवे ययोरिदमिति राथन्तरमैन्द्राग्ग्नम्॥८॥ उग्रगाधमिव वा एतद्यच्छन्दोमास्तद्यथात उग्रगाधे व्यतिषज्य गाहन्त एवमेवैतद्रूपे व्यतिषजति छन्दोमाना -मसँव्याथाय स्तोमः॥९॥ इति द्वितीयः खण्डः॥१५/२॥

पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षतेति हरिवत्यो गायत्र्यो भवन्ति छन्दोमानामयातयामतायै ॥१॥ पवमानस्य जिघ्नत इति वै बृहतो रूपँ हरेश्चन्द्रा असृक्षतेति जगत्या उभयोः सह रूपमुपैति साम्नश्च छन्दसश्च ॥२॥ परीतो षिञ्चता सुतमिति परिवत्यो भवन्त्यन्तो वै नवममहस्तस्यैताः पर्य्याप्त्यै ॥३॥ असावि सोमो अरुषो वृषा हरिरिति जगत्यस्सत्यस्त्रिष्टुभो रूपेण तस्मात्त्रिष्टुभाँल्लोके क्रियन्ते ॥४॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥५॥ भरद्वाजस्यादारसृद्भवति ॥६॥ दिवोदासँ वै भरद्वाज पुरोहितं नाना जनाः पर्य्ययन्त स उपासीददृषे गातुं मे विन्देति तस्मा एतेन साम्ना गातुमविन्दद्गातुविद्वा एतत्सामानेन दारे नासृन्मेति तददारसृतोऽदारसृत्वँ विन्दते गातुं न दारे धावत्यदारसृता तुष्टुवानः ॥७॥ सुरूपं भवति यदेव सुरूपस्य ब्राह्मणम् ॥८॥ हरिश्रीनिधनं भवति ॥९॥ पशवो वै हरिश्रियः पशूनामवरुध्यै श्रियञ्च हरश्चोपैति तुष्टुवानः ॥१०॥ सैन्धुक्षितं भवति यदेव सैन्धुक्षितस्य ब्राह्मणम् ॥११॥ गतनिधनं बाभ्रवं भवति गत्यै ॥१२॥ बभ्रुर्व्वा एतेन कौम्भ्योऽञ्जसा स्वर्गँल्लोकमपश्यत्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वर्ग्गस्य लोकस्यानुख्यात्यै स्वर्ग्गाल्लोकान्न च्यवते तुष्टुवानः ॥१३॥ इडानाँ संक्षारो भवति ॥१४॥ पशवो वा इडा प्रशव-श्छन्दोमाः पशुष्वेव तत्पशून्दधाति ॥१५॥ ऋषभः पवमानो भवति ॥१६॥ पशवो वै छन्दोमाः पशुष्वेव तन्मिथुनमप्यर्ज्जति प्रजात्यै न ह वा अनृषभाः पशवः प्रजायन्ते ॥१७॥ पृष्ठं भवति ॥१८॥ पृष्ठँ वा एतदह्नाँ यन्नवमं पृष्ठ एव तत्पृष्ठेन स्तुवते प्रतिष्ठायै ॥१९॥ कौल्मलबर्हिषं भवति ॥२०॥ कुल्मल बर्हिर्व्वा एतेन स्वर्ग्गँल्लोकमपश्यत् प्रजातिं भूमानमगच्छत् प्रजायते बहुर्भवति कौल्मलबर्हिषेण तुष्टुवानः ॥२१॥ अर्क्कपुष्पं भवति ॥२२॥ अन्नँ वै देवा अर्क्क इति वदन्ति रसमस्य पुष्पमिति सरसमेवान्नाद्यमवरुन्धेऽर्क्कपुष्पेण तुष्टुवानः ॥२३॥ दैर्घश्रवसं भवति ॥२४॥ दीर्घश्रवा वै राजन्य ऋषिज्ज्योगप-रुद्धोऽशनायँश्चरन् स एतद्दैर्घश्रवसमपश्यत्तेन सर्व्वाभ्यो दिग्भ्यो ऽन्नाद्यमवारुन्ध सर्व्वाभ्यो दिग्भ्योऽन्नाद्यमवरुन्धे दैर्घश्रवसेन तुष्टुवानः ॥२५॥ वैयश्वं भवति यदेव वैयश्वस्य ब्राह्मणम् ॥२६॥ अभीशवँ यदाभीशवस्येति ॥२७॥ देवस्थानं भवति प्रतिष्ठायै सङ्कृति भवति सँस्कृत्यै ॥२८॥ अहर्व्वा एतदव्लीयत तद्देवा देवस्थाने तिष्ठन्तः सङ्कृतिना समस्कुर्व्वँस्तत् सङ्कृतेः सङ्कृतित्वं देवस्थानेन वै देवाः स्वर्ग्गे लोके प्रत्यतिष्ठन् स्वर्ग्गे लोके प्रतितिष्ठामेत्येतत् ॥२९॥ वरुणाय देवता राज्याय नातिष्ठन्त स एतद्देवस्थानमपश्यत्ततो वै तास्तस्मै राज्याया-तिष्ठन्त तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय ॥३०॥ क्षत्रस्यैवास्य प्रकाशो भवति प्रतितिष्ठति य एवँ वेद ॥३१॥ भर्ग्ग एव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भर्ग्गेण तुष्टुवानो भवति यशो यशसा ॥३२॥ वासिष्ठं भवति यदेव वासिष्ठस्य ब्राह्मणम् ॥३३॥ दीर्घतमसोऽर्क्को भवत्यन्नँ वा अर्क्कोऽन्नाद्यस्यावरुध्यै ॥३४॥ सामराजं भवति साम्राज्यमाधिपत्यं गच्छति सामराज्ञा तुष्टुवानः ॥३५॥ तदु सँवदित्याहुः सँवता वै देवाः स्वर्ग्गँल्लोकं प्रायन्नुद्वतोदायन् ॥३६॥ निधनान्ताः पवमाना भवन्त्यह्नो धृत्यै स्तोमः ॥३७॥ इति तृतीयः खण्डः ॥१५/३॥

श्रायन्त इव सूर्य्यमिति सूर्य्यवत्यो भवन्ति ॥१॥ आदित्यदेवत्यँ ह्येतदहरन्तो वै सूरोऽन्त एवन्नवममह्नामन्त एव तदन्तेन स्तुवते प्रतिष्ठायै ॥२॥ यत इन्द्र भयामहे ततो नो अभयं कृधि मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहीति द्विषश्चैव मृधश्च नवमेनाह्ना विहत्य दशमेनाह्नोत्तिष्ठन्ति ॥३॥ श्रायन्तीयं भवति ॥४॥ श्रीर्व्वै श्रायन्तीयँ श्रीर्न्नवममहः श्रियमेव तच्छ्रियां प्रतिष्ठापयति ॥५॥ समन्तं भवति ॥६॥ समन्तेन पशुकामः स्तुवीत पुरोधाकामः समन्तेन स्तुवीत ॥७॥ आग्ग्नेयी पृथिव्याग्ग्नेयो ब्राह्मण ऐन्द्री द्यौरैन्द्रो राजन्योऽन्तरिक्षेण द्यावापृथिवी समन्ते अन्तरिक्षेणैवैनँ समन्तं करोति विन्दते पशून् प्रपुरोधामाप्नोति य एवँ विद्वान् समन्तेन स्तुते स्तोमः ॥८॥ इति चतुर्थः खण्डः ॥१५/४॥

त्वँ सोमासि धारयुरिति गायत्री भवत्यह्नो धृत्यै त्वमिति बृहतो रूपं बार्हतँ ह्येतदहः॥१॥ त्वँ ह्यङ्ग दैव्येति त्वमिति बृहतो रूपं बार्हतँ ह्येतदहः॥२॥ पवस्व देव वीतय इति बृहतो रूपं बार्हतँ ह्येतदहः॥३॥ परित्यँ हर्य्यतँ हरिमिति परिवत्यो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवन्त्यन्तो वै नवममहस्तस्यैताः पर्य्याप्त्यै ॥४॥ पवस्व सोम महे दक्षायेत्यक्षरपङ्क्तिः स्तोमानां प्रभूतिरथो एतद्ध्येवैतर्हि छन्दोऽयातयाम यदक्षरपङ्क्तिस्तेन छन्दोमा अयातयामानः क्रियन्ते ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाँस्याप्यन्ते किं छन्दसश्छन्दोमा इत्येतच्छन्दसो यदेता अक्षरपङ्क्तय इति ब्रूयात् ॥५॥ उपोषु जातमप्तुरमिति गायत्र्यस्सत्यो जगत्यो रूपेण तस्माज्जगतीनाँ लोके क्रियन्ते ॥६॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥७॥ आश्वसूक्तं भवति ॥८॥अग्निँ वै पूर्व्वैरहर्भिराजुहोत्यथैतदादित्यदैवत्यमहः शुक्र आहुत इत्यसौ वा आदित्यः शुक्रस्तमेवैतेनाजुहोति ॥९॥ शाम्मदं भवति ॥१०॥ शम्मद्वा एतेनाङ्गिरसोऽञ्जसा स्वर्गँल्लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गाल्लोकान्न च्यवते तुष्टुवानः ॥११॥ दावसुनिधनं भवति ॥१२॥ आशिषमेवास्मा एतेनाशास्ते साम हि सत्याशीः ॥१३॥ दावसुर्व्वा एतदाङ्गिरसः पशुकामः सामापश्यत्तेन सहस्रं पशूनसृजत यदेतत्साम भवति पशूनां पुष्ट्यै॥१४॥ प्रतीचीनेडं काशीतं भवति ॥१५॥ पराचीभिर्व्वा अन्याभिरिडाभी रेतो दधदेत्यथैतत्प्रतीचीनेडङ्काशीतं प्रजात्यै तस्मात्पराञ्चो गर्भाः सम्भवन्ति प्रत्यञ्चः प्रजायन्ते तंस्मादुतेऽवाचीनबिलेभ्यो नावपद्यन्त एतेन ह्येव ते धृताः॥१६॥ हाविष्कृतं भवति प्रतिष्ठायै कृतानुवाद एव सः ॥१७॥ सौपर्ण्णं भवति यदेव सौपर्ण्णस्य ब्राह्मणम् ॥१८॥ वैश्वमनसं भवति ॥१९॥ विश्वमनसँ वा ऋषिमध्यायमुद् व्रजितँ रक्षोऽगृह्णात्त- मिन्द्रोऽचायदृषिँ वै रक्षोऽग्रहीदिति तमभ्यवददृषे कत्वैष इति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्थाणुरिति ब्रूहीति रक्षोऽब्रवीत्स स्थाणुरित्यब्रवीत्तस्मै वा एतेन प्रहरेत्यस्मा इषीकां वज्रं प्रयच्छन्नब्रवीत्तेनास्य सीमानमभिनत् सैषेन्द्रेण तेषीका पाप्मा वाव स तमगृह्णात्तँ वैश्वमनसेनापाहताप पाप्मानँ हते वैश्वमनसेन तुष्टुवानः ॥२०॥ गौरीवितं भवति यदेव गौरीवितस्य ब्राह्मणम् ॥२१॥ निहवो भवत्यन्नाद्यस्यावरुध्यै ॥२२॥ हीति वा अन्नं प्रदीयत ईत्यग्निरन्नमत्ति ॥२३॥ ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन् स वसिष्ठोऽकामयत कथमिन्द्रं प्रत्यक्षं पश्येयमिति स एतन्निहवमपश्यत्ततो वै स इन्द्रं प्रत्यक्षमपश्यत् स एनमब्रवीद् ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिता भरताः प्रजनिष्यन्तेऽथ मान्येभ्य ऋषिभ्यो मा प्रवोच इति तस्मा एतान् स्तोम भागानव्रवीत्ततो वै वसिष्ठ पुरोहिता भरताः प्राजायन्त सेन्द्रँ वा एतत्साम यदेतत्साम भवति सेन्द्रत्वाय ॥२४॥ यद्वाहिष्ठीयं भवति ॥२५॥ ब्रह्म यशसँ वा एतानि सामान्यृचा श्रोत्रीयाणि ब्रह्म यशसी भवति यद्वाहिष्ठीयेन तुष्टुवानः ॥२६॥ आसितं भवति यदेवासितस्य ब्राह्मणम् ॥२७॥ साध्रं भवति सिद्ध्यै ॥२८॥ आकूपारं भवति ॥२९॥ आकूपारो वा एतेन कश्यपो जेमानं महिमानमगच्छ ज्जेमानं महिमानं गच्छत्याकूपारेण तुष्टुवानः ॥३०॥ विधर्म्म भवति धर्म्मस्य विधृत्यै ॥३१॥ ब्रह्मवादिनो वदन्ति यत् षडहे स्तोमाश्छन्दाँस्याप्यन्ते किं छन्दसश्छन्दोमा इति पुरुषच्छन्दस इति ब्रूयात् पुरुषो वै पाङ्क्तः पुरुषो द्विपदा छन्दोमानामयातयामतायै ॥३२॥ श्रुध्यं भवति ॥३३॥ पशवो वै श्रुध्यं पशूनामवरुध्यै ॥३४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रजापतिः पशूनसृजत तेऽस्मात्सृष्टा अपाक्रामँस्तानेतेन साम्ना श्रूधिया एहि येत्यन्वह्वयत्त एनमुपावर्त्तन्त यदेतत्साम भवति पशूनामुपावृत्यै ॥३५॥ उपैनं पशव आवर्त्तन्ते य एवँ वेद ॥३६॥ गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्च्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्तीडान्ताः पवमाना भवन्ति पशवो वा इडा पशवश्छन्दोमाः पशुष्वेव तत्पशून्दधाति स्तोमः ॥३७॥ इति पञ्चमः खण्डः ॥१५/५॥

आग्नेयीषु पूर्व्वेषामह्नामुक्थानि प्रणयन्त्यथैतस्याह्न आग्नेय्यैन्द्र्यां प्रणयन्त्युभयोरेव रूपयोः प्रतितिष्ठति ॥१॥ ऐध्मवाहं भवति ॥२॥ आग्नेय्यैन्द्रीषु स्तुवन्ति ब्रह्म चैव तत्क्षत्रञ्च सयुजी करोति ब्रह्मैव क्षत्रस्य पुरस्तान्निदधाति ब्रह्मणे क्षत्रञ्च विशञ्चानुगे करोति ॥३॥ त्रैककुभं भवति ॥४॥ ओजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्य्यं त्रैककुभम्॥५॥ उद्वँशीयं भवति यदेवोद्वँशीयस्य ब्राह्मणम् ॥६॥ अष्टाचत्वारिँश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ॥७॥ इति षष्ठःखण्डः ॥१५/६॥

गायत्रँ वै सप्तममहस्त्रैष्टुभमष्टमञ्जागतं नवममथैतदानुष्टुभमहर्य्यद्दशमम् ॥१॥ तदाहुर्य्यदनुष्टुभँ स्तोम्यां प्रत्यक्षमुपेयुः परां परावतँ यजमानो गच्छेन्न प्रतितिष्ठेदिति या वै चतुर्व्विँशतिर्ग्गायत्र्यस्ता अष्टादशानुष्टुभोऽनुष्टुभमेव तत् स्तोम्यां परोक्षमुपयन्ति प्रतिष्ठायै प्रतितिष्ठति ॥२॥ प्रजापतिँ वा एतेनाह्ना परिवेविषति तन्न व्यववद्यँ यद्वै श्रेष्ठे परिविष्यमाणोऽवदत्यन्नाद्यस्य सोऽवग्रहत्तस्मान्न व्यववद्यमन्नाद्यस्यानवग्राहाय ॥३॥ तदु व्यववद्यँ यथा श्रेष्ठाय बलिँ ह्रियमाणं पन्थानं पर्य्यवनुदति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गत्यै तथा तत् ॥४॥ यावत्यनुष्टुप्तावतीँ वाचँ सम्पाद्य विब्रूयुस्तद्वनतिरिक्तँ स्वस्यो चैव यज्ञस्यारिष्ट्यै ॥५॥ अभि वा एते देवा नारोहन्तीत्याहुर्य्ये दशभिरहर्भिः स्तुवत इति पञ्चानामह्नामनुरूपैः प्रत्यवयन्ति यथाभ्यारुह्य प्रत्यवरोहेत्तथा तन्नवर्च्चो भवति या एवामूः प्रयञ्छम्या अवदधाति ता एता उदस्यति ॥६॥ वारुण्येका भवति यद्वै यज्ञस्य दुरिष्टं तद्वरुणो गृह्णाति तदेव तदवयजत्यादित्यैका भवतीयँ वा अदितिरस्यामेव प्रतितिष्ठति ॥७॥ चतुर्व्विँश एव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय ॥८॥ इति सप्तमः खण्डः ॥१५/७॥

सुषमिद्धो न आवहेत्याप्रिय आज्यानि भवन्ति ॥१॥ प्रजापतिः प्रजा असृजत स दुग्धो रिरिचानोऽमन्यत स एतान्याप्रिय आज्यान्यपश्यत्तैरात्मानमाप्रीणात् दुग्ध इव वा एष रिरिचानो यो दशभिरहर्भिस्तुष्टुवानो यदेतान्याप्रिय आज्यानि भवन्त्यात्मानमेवैतैराप्रीणाति ॥२॥ यदद्य शूर उदित इति सूरवन्मैत्रावरुणमन्तो वै सूरोऽन्त एतद्दशममह्नामन्त एव तदन्तेन स्तुवते प्रतिष्ठाया उत्वा मन्दन्तु सोमा इत्युद्वदैन्द्रमुत्थानस्य रूपम् ॥३॥ इन्द्राग्नी आगतँ सुतमिति येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति स्तोमः॥४॥ इत्यष्टमः खण्डः ॥१५/८॥

उच्चा ते जातमन्धस इत्युद्वत्यो गायत्र्यो भवन्त्युत्थानस्य रूपम् ॥१॥ पुनानः सोम धारयेति पन्थानमेव तत्पर्य्यवयन्ति ॥२॥ आ जागृविर्व्विप्र ऋतं मतीनामिति यदाप्ते प्रवतीः कुर्य्युरतिपद्येरन्यदावत्यो भवन्त्यंनतिपादाय ॥३॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥४॥ आमहीयवं भवति क्लृप्तिश्चा-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्नाद्यञ्च क्लृप्तिञ्चैवैतेनान्नाद्यञ्चाभ्युत्तिष्ठन्ति ॥५॥ आजिगं भवत्याजि जित्यायै ॥६॥ आजिर्व्वा एष प्रततो यद्द्वादशाहस्तस्यैतदुज्जित्यै॥७॥ आभीकं भवत्यभिक्रान्त्यै॥८॥ अङ्गिरसस्तपस्तेपानाः शुचमशोचँस्त एतत्सामापश्यँ स्तानभीकेऽभ्यवर्षत्तेन शुचमशयन्त यदभीकेऽभ्यवर्षत्तस्मादाभीकँ यामेव पूर्व्वैरहर्भिः शुचँ शोचन्ति तामेतेनात्र शमयित्वोत्तिष्ठन्ति ॥९॥ उत्सेधो भवति ॥१०॥ उत्सेधेन वै देवाः पशूनुदसेधन्निषेधेन पर्य्यगृह्णन्॥११॥अन्तरोत्सेधनिषेधौ यज्ञायज्ञीयम्॥१२॥ पशवोऽन्नाद्यँ यज्ञायज्ञीयं पशूनेव तदन्नाद्यमुत्सेधनिषेधाभ्यां परिगृह्णाति ॥१३॥ माध्यन्दिने वै पवमाने देवा यज्ञायज्ञीयेन यज्ञँ सँस्थाप्य स्वर्गँल्लोकमारोहँस्तद्य एवँ वेद माध्यन्दिन एवैतत्पवमाने यज्ञायज्ञीयेन यज्ञँ सँस्थाप्य स्वर्गँल्लोकमारोहति ॥१४॥ अथ परोक्षमनुष्टुभँ सम्पद्यतेऽहरेषा वै प्रत्यक्षमनुष्टुप्यद्यज्ञायज्ञीयं तद्यत्तृतीयसवने कुर्य्युः प्रत्यक्षमनुष्टुभमृच्छेयुस्तस्मान्माध्यन्दिने कुर्व्वन्ति तेन परोक्षमनुष्टुभमुपयन्ति ॥१५॥ गौरीवितं भवति ॥१६॥ एतद्वै यज्ञस्य श्वस्तनँ यद्गौरीवितमेतदायतनो यजमानो यन्मध्यन्दिनो यद्गौरीवितं मध्यन्दिने भवति श्वस्तनमेव तद्यजमान आत्मन्धत्ते स्तोमः॥१७॥ इति नवमः खण्डः ॥१५/९॥

कया नश्चित्र आ भुवदिति कवयत्यस्तेन प्राजापत्याः को हि प्रजापतिः प्रजापतेराप्त्यै ॥१॥ मा चिदन्यद्विशँसतेत्युत्थानमेतदाशिषो ह्येतर्हि ॥२॥ उदुत्ये मधु मत्तमा इत्युद्वत्य उदयनीयेऽहन्येतदाशिषो ह्येवैतर्हि ॥३॥ तरोभिर्व्वो विदद्वसुमिति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्तोमो वै तरो यज्ञो विदद्वसुः स्तोमेन वै यज्ञो युज्यते यत्तरोभिर्व्वो विदद्वसुमित्याह यज्ञमेव तद्युनक्ति ॥४॥ वामदेव्य-स्यर्क्षु रथन्तरं पृष्ठं भवति ॥५॥ गायत्री वै रथन्तरस्य योनिः स्वायामेव तद्योनौ रथन्तरं प्रतिष्ठापयति ॥६॥ तेजो वै गायत्री छन्दसां तेजो रथन्तरँ साम्नां तेजश्चतुर्व्विँशस्तोमानां तेज एव तत्सम्यक् सन्दधात्यपि ह पुत्रस्य पुत्रस्तेजस्वी भवति ॥७॥ अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौत्यष्टाशफाँस्तत्पशूनवरुन्धे ॥८॥ द्व्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद्यजमानो यजमान-मेव यज्ञे पशुषु प्रतिष्ठापयति॥९॥गायत्रँ वै रथन्तरं गायत्रच्छन्दो यद्गायत्रीषु रथन्तरं भवति तेन स्वायां जनतायामृध्नोतीमे वै लोका गायत्री यद्गायत्रीषु रथन्तरं भवतीमानेव तल्लोकान् समाप्योत्तिष्ठन्ति॥१०॥मैधातिथं भवति॥११॥ एतेन वै मेधातिथिः काण्वो विभिन्दुकाद्व्यूध्नीर्ग्गा उदसृजत पशूनामवरुध्यै मैधातिथं क्रियते ॥१२॥ अभीवर्त्तो ब्रह्मसाम भवत्येकाक्षर-णिधनः प्रतिष्ठायै ॥१३॥ एकाक्षरा वै वाग्वाच्येव प्रतिष्ठायो-त्तिष्ठन्ति॥१४॥ कालेयमच्छावाकसाम भवति॥१५॥ समानलोके वै कालेयञ्च रथन्तरञ्चेयँ वै रथन्तरं पशवः कालेयमस्या-ञ्चैव पशुषु च प्रतिष्ठायोत्तिष्ठन्ति स्तोमः ॥१६॥ इति दशमः खण्डः ॥१५/१०॥

स्वादिष्ठया मदिष्ठयेति गायत्री भवति मदवद्वै रसवत्तृतीय-सवनं मदमेव तद्रसं दधाति ॥१॥ गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् ॥२॥ सँहितं भवति द्व्यक्षरणिधनं प्रतिष्ठायै प्रतिष्ठायैवोत्तिष्ठन्ति ॥३॥ सफं भवति ॥४॥ सफेन वै देवा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इमाँल्लोकान् समाप्नुवन्यत्समाप्नुवँस्तत्सफस्य सफत्वमिमानेवैतेन लोकान् समाप्योत्तिष्ठन्ति ॥५॥ रोहितकूलीयं भवति यदेव रोहितकूलीयस्य ब्राह्मणम् ॥६॥ श्यावाश्वान्धीगवे भवतः समीच्यै विराजौ दधात्यन्नाद्याय ॥७॥ पिपीलिकमध्यासु स्तुवन्ति ॥८॥ इन्द्रो वृत्रँ हत्वा नास्तृषीति मन्यमानः परां परावतमगच्छत् स एतामनुष्टुभँ व्यौहत्तां मध्ये व्यवासर्प्पदिन्द्रगृहे वा एषोभये यजतेऽभय उत्तिष्ठति य एवँ विद्वानेतासु स्तुवते ॥९॥ यज्ञायज्ञीयनिधनँ सौहविषं भवति यज्ञायज्ञीयादेव तत्तृतीयसवनेन यन्ति ॥१०॥ वाजजिद्भवति ॥११॥ सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वँ वा एते वाजं जयन्ति ये दशममहरागच्छन्त्यन्नँ वै वाजोऽन्नाद्यस्यावरुध्यै ॥१२॥ दशाक्षरन्निधनमुपयन्ति दशरात्रस्य धृत्यै दशाक्षरा विराट् वैराजमन्नमन्नाद्यस्यावरुध्यै ॥१३॥ सूर्य्यवतीषु स्तुवन्त्यन्तो वै सूरोऽन्त एतद्दशममहामन्त एव तदन्तेन स्तुवते प्रतिष्ठायै ॥१४॥ उपवत्यो भवन्ति प्रतिष्ठायै परिवत्यो भवन्ति सर्व्वस्य पर्य्याप्त्यै ॥१५॥ चतुर्व्विँश एव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय ॥१६॥ इत्येकादशः खण्डः ॥१५/११॥

विराट्सु वामदेव्यमग्निष्टोमसाम भवति शान्त्यै क्लृप्त्यै ॥१॥ सद्वै वामदेव्यँ साम्नाँ सद्विराट् छन्दसाँसत्त्रयस्त्रिँशः स्तोमानाँ सतामन्तान् सन्धायोत्तिष्ठन्त्यपि ह पुत्रस्य पुत्रः सत्वमश्नुते ॥२॥ ब्रह्मवादिनो वदन्ति यतस्सत्रादुदस्थाता ३ स्थिता ३ दिति यद्यत इति ब्रूयुरप्रतिष्ठाना अप्रजसो भविष्यन्तीत्येनान् ब्रूयाद्यत् स्थितादिति ब्रूयुः स्थायुकैषाँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रीर्भविष्यति न वसीयाँसो भविष्यन्तीत्येनान् ब्रूयात् पूर्ण्णादेव पूर्ण्णमभ्युदस्थामेति ब्रूयुः ॥३॥ एते वै पूर्ण्णात् पूर्ण्णमभ्युत्तिष्ठन्ति ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति ॥४॥ अन्तरिक्षँ वै वामदेव्यमन्तरिक्षेणेदँ सर्व्वं पूर्ण्णम् ॥५॥ एष वै समृद्धः स्तोमो यत्त्रयस्त्रिँशस्त्रयस्त्रिँशदक्षरासु समृद्धावेव प्रतितिष्ठन्ति ॥६॥ सर्व्वेषाँ वा एतारछन्दसाँ रूपँ यत्त्रिपदास्तेन गायत्र्यो यदेकादशाक्षराणि पदानि तेन त्रिष्टुभो यद्द्वादशाक्षरं पदं तेन जगत्यो यत्त्रयस्त्रिँशदक्षरास्तेन विराजस्तेनैव चानुष्टुभो न ह्येकस्मादक्षराद्विराधयन्ति ॥७॥ त्रयस्त्रिँश एव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः॥८॥ इति द्वादशः खण्डः॥ १५/१२॥ **इति पञ्चदशोऽध्यायः**

अथ षोडशोऽध्यायः

प्रजापतिर्व्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत् सोऽस्मिन्नन्धे तमसि प्रासर्प्पत् स ऐच्छत् स एतमभ्यपद्यत ततो वै तस्मै व्यौच्छद् व्युष्टिर्व्वा एष आह्रियते यद्वै तज्ज्योतिरभवत् तद्ज्योतिषो ज्योतिष्ट्वम् ॥१॥ एष वाव प्रथमो यज्ञानाँ य एतेनानिष्ट्वाथान्तेन यजते कर्त्तपत्यमेव तज्जीयते प्र वा मीयते ॥२॥ यथा वा इदमग्नेर्ज्जातादग्नयो विह्रियन्त एवमेतस्मादध्यन्ये यज्ञा विह्रियन्ते ॥३॥ यो हि त्रिवृदन्यँ यज्ञक्रतुमापद्यते स तं दीपयति यः पञ्चदशः स तं यः सप्तदशः स तं य एकविँशः स तम् ॥४॥ एतत्तद्यदाहुरेको यज्ञ इत्येतद्धि सर्व्वे ज्योतिष्टोमा भवन्ति॥५॥ अस्थूरिर्व्वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवनं वहतस्त्रिवृत्पञ्चदशौ प्रातस्सवनं पञ्चदशसप्तदशौ माध्यन्दिनँ सवनँ सप्तदशैकविँशौ तृतीयसवनम् ॥६॥ या मितदक्षिणैव स्यादेष एव कार्य्य इयँ वै ज्योतिरियममितस्य यन्त्रिकैषा वा एतँ यन्तुमर्हति॥७॥तस्य नवतिशतँ स्तोत्रीयास्तासाँ या अशीतिशतं ताः षट्त्रिँशिन्यो विराजः षड़ृतव ऋतुष्वेव विराजा प्रतितिष्ठति ॥८॥ अथ या दशैषा वा आत्मन्या विराडेतस्याँ वा इदं पुरुषः प्रतिष्ठितः॥९॥ गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्चैतस्यामेव विराजि प्रतितिष्ठति ॥१०॥ तस्य द्वादशँ शतं दक्षिणाः ॥११॥ वीरहा वा एष देवानाँ यः सोममभिषुणोति याः शतँ वैरं तद्देवानवदयतेऽथ या दशदशप्राणाः प्राणाँस्ताभि स्स्पृणोति यैकादश्यात्मानं तया या द्वादशी सैव दक्षिणा ॥१२॥ श्लेष्म वा एतद्यज्ञस्य यद्दक्षिणा न वा अश्लेष्मा रथो वहत्यथ यथा श्लेष्मवता यं कामं कामयते तमभ्यश्नुत एवमेतेन दक्षिणावता यं कामं कामयते तमभ्यश्नुते ॥१३॥ शुभो वा एता यज्ञस्य यद्दक्षिणा यद्दक्षिणवता यजते शुभमेवास्मिन्दधाति॥१४॥ इति प्रथमः खण्डः ॥१६/१॥

अथैष गौः ॥१॥ गवा वै देवा असुरानेभ्यो लोकेभ्योऽनुदन्तैभ्यो लोकेभ्यो भ्रातृव्यं नुदते य एवँ वेद ॥२॥ यद्वै तद्देवा असुरानेभ्यो लोकेभ्यो गो वयँ स्तद्गोर्गोत्वम् ॥३॥ गोवयति पाप्मानं भ्रातृव्यँ य एवँ वेद ॥४॥ तस्य पञ्चदशं बहिष्पवमानँ वज्ज्रो वै पञ्चदशो वज्ज्रमेव तत्पुरस्तान्निदधाति तेन विराजते ॥५॥ पशुस्तोमो वा एष एवमिव वै पशुः समाहितः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शिरः स्थवीयोऽणीयस्यो ग्रीवा पार्श्वाभ्याँ वरीयाँ सक्थिभ्याँ वरिष्ठः॥६॥ यत् पञ्चदशं बहिष्पवमानं भवति त्रिवृन्त्याज्यानि सप्तदशमाध्यन्दिनं सवनमेकविँशं तृतीयसवनँ रूपेणैवैनं तत् समर्द्धयति॥७॥ एका सँस्तुतानाँ विराजमतिरिच्यते तस्मात्पशोः पश्चाददतिरिक्तम् ॥८॥ इति द्वितीयः खण्डः ॥१६/२॥

अथैष आयुः ॥१॥ आयुषा वै देवा असुरानायुवतायुते भ्रातृव्यँ य एवँ वेद ॥२॥ स्वर्ग्गकामो यजेत ॥३॥ ऊर्ध्वाः स्तोमा यन्त्यनपभ्रँशाय ॥४॥ एतेनैवामयाविनँ याजयेदतिरात्रः कार्य्यः ॥५॥ स गायत्रीँ सम्पद्यते प्राणो गायत्र्यायुरेष आयुश्चैवास्मिन् प्राणञ्चोभे समीची दधाति ॥६॥ स्वर्ग्या वा एते स्तोमा यत् ज्योतिर्भवति ज्योतिरेवास्मै स पुरस्ताद्धर- त्यथैष गौरेकया विराजमतिरिक्त आरम्भणमेव तदथैष आयुरेकस्या विराज ऊन आसाद एव सोऽथो ऊनातिरिक्तौ स्तोमौ मिथुनौ प्रजात्यै ॥७॥ एते वै त्रिकद्रुकाः स्तोमा एतैर्व्वा इन्द्रः सर्व्वाँस्तृप्तिमतृप्यत ॥८॥ तृप्यति प्रजया पशुभिर्य्य एवँ वेद ॥९॥ इति तृतीयः खण्डः ॥१६/३॥

प्रजापतिः प्रजा असृजत ता अस्मै श्रैष्ठ्याय नातिष्ठन्त स आसां दिशां प्रजानाञ्च रसं प्रवृह्य स्रजं कृत्वा प्रत्यमुञ्चत ततोऽस्मै प्रजाः श्रैष्ठ्यायातिष्ठन्त ॥१॥ तिष्ठन्तेऽस्मै समानाः श्रैष्ठ्याय य एवँ वेद ॥२॥ सोऽकामयतेन्द्रो मे प्रजायाँ श्रेष्ठः स्यादिति तामस्मै स्रजं प्रत्यमुञ्चत्ततो वा इन्द्राय प्रजाः श्रैष्ठ्यायातिष्ठन्त तच्छिल्पं पश्यन्त्यो यत्पितर्य्यपश्यत् ॥३॥ तस्माद्यः पुत्राणां दायं धनतममिवोपैति तं मन्यन्तेऽयमेवेदं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भविष्यतीति ॥४॥ ततो वा इदमिन्द्रो विश्वमजयद्यद्विश्वमजयत्तस्माद्विश्वजित् ॥५॥ सोऽकामयत यन्मेऽनभिजितं तदभिजयेयमिति स एतमभिजित मपश्यत्तेनानभिजितमभ्यजयत् ॥६॥ यदभिजिद्भवत्यनभिजित स्याभिजित्यै ॥७॥ तौ वा एताविन्द्रस्तोमौ वीर्य्यवन्तौ शिल्पँ वा एतौ नाम स्तोमा वास्ताम् ॥८॥ पश्यते गृहे शिल्पँ य एवँ वेद ॥९॥ न वै यमौ नाम स्तोमौ स्तो यो यमाभ्याँ यजेतैताभ्याँ यजेत समृध्यै ॥१०॥ पुनरभ्यावर्त्तँ स्तोमा भवन्ति पुनरभ्यावर्त्तँ ह्येताभ्यामिन्द्रोऽजितमजयत् ॥११॥ त्रीँस्त्रिवृदभिजितः प्रणयति त्रीन् पञ्चदशस्त्रीन्त्सप्तदशस्त्रीनेकविँशस्ते द्वादश सम्पद्यन्ते द्वादशमासाः सँवत्सरः सँवत्सरः प्रजापतिः प्रजापतिमेवाप्नोति ॥१२॥ इति चतुर्थः खण्डः ॥१६/४॥

उप त्वा जामयो गिर इत्युपवती प्रतिपद्भवति स्तोमस्य रूपम् ॥१॥ प्राणैर्व्वा एष व्यृध्यत इत्याहुर्य्यः सर्व्वं ददाति सर्व्वान् स्तोमान् सर्व्वाणि पृष्ठान्युपैतीति यद्वायव्या भवति प्राणानाँ समृध्यै ॥२॥ सरस्वतश्च सरस्वत्याश्चोत्तरे भवतः ॥३॥ मिथुनँ वा एतद्यत् सरस्वाँश्च सरस्वती च मिथुनमेवास्य यज्ञमुखे दधाति प्रजननाय ॥४॥ सावित्री चतुर्थी भवति ॥५॥ दुष्करँ वा एष करोति यः सर्व्वं ददाति यत्सावित्री भवति सवितृप्रसूतं मे कर्म्मासदिति सवितृप्रसूतमेवास्य कर्म्म भवति ॥६॥ ब्राह्मणस्पत्या पञ्चमी भवति ॥७॥ ब्रह्म वै ब्रह्मणस्पति ब्रह्मैवास्य यज्ञमुखे दधाति ॥८॥ आग्निपावमानी षष्ठी भवति ॥९॥ अग्निरेवैनं निष्टपति पवमानः पुनाति पूतमेवैनँ यज्ञियं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठान्युपनयति ॥१०॥ यन्ति वा एते पथ इत्याहुर्य्ये सम्भार्य्याः कुर्व्वते ॥११॥ पावमान उत्तमस्तृचो भवति तेन पथो नयन्ति ॥१२॥ स तु वै पृष्ठैः स्तुवीतेत्याहुर्य्य एतानि बहिष्पवमाने युञ्ज्यादिति ॥१३॥ उपवती प्रतिपद्भवत्युप वै रथन्तरँ रथन्तरमेवास्मै तया युनक्ति ॥१४॥ सरस्वतो द्वितीया भवति स्वर्ग्गो लोकः सरस्वान् स्वर्ग्गो लोको बृहद् बृहदेवास्मै तया युनक्ति ॥१५॥ सरस्वत्यास्तृतीया भवति वाग्वै सरस्वती वाग्वैरूपँ वैरूपमेवास्मै तया युनक्ति ॥१६॥ सावित्री चतुर्थी भवति प्रजापतिर्व्वै सविता प्रजापतिर्व्वैराजँ वैराजमेवास्मै तया युनक्ति ॥१७॥ ब्राह्मणस्पत्या पञ्चमी भवति ब्रह्म वै ब्रह्मणस्पतिर्ब्रह्म शक्वर्य्यः शक्वरीरेवास्मै तया युनक्ति ॥१८॥ आग्गिनपावमानी षष्ठी भवति गायत्री वै रेवती गायत्रच्छन्दा अग्गनी रेवतीरेवास्मै तया युनक्ति ॥१९॥ न चत्वारि षड्भ्यो विभवन्ति यदनिरुक्तानि तेन विभवन्ति ॥२०॥ सर्व्वाणि स्वाराण्याज्यानि तज्जामि नानादेवत्यैः स्तुवन्त्यजामितायै ॥२१॥ सुषमिद्धो न आवहेत्याप्रिय आज्यानि भवन्ति ॥२२॥ प्रजापतिः प्रजा असृजत स दुग्धो रिरिचानोऽमन्यत स एतान्याप्रिय आज्यान्यपश्यत्तैरात्मानमाप्रीणात् दुग्ध इव वा एष रिरिचानो यः सर्व्वं ददाति यदाप्रिय आज्यानि भवन्त्यात्मानमेव तैराप्रीणाति ॥२३॥ एतर्हि तु वै पृष्ठानि यथायतनं कल्पन्त इत्याहुर्य्यद्रथन्तरं प्रथमं बृहदुत्तमं मध्य इतराणीति ॥२४॥ जामि वा एतद्यज्ञे क्रियत इत्याहुर्य्यत्सर्व्वाणि निधनवन्ति सह क्रियन्त इति यदन्तरा सोमा यन्त्यन्तरोक्थानि शस्यन्तेऽन्तरा
CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वषट्कुर्व्वन्ति तेनाजामि ॥२५॥ व्यत्यासमिडाश्च निधनानि चाहुस्तेनाजामि ॥२६॥ च्यवन्ते वा एतद्देवत्यः स्वादायतनादित्याहुर्य्यत् त्रयस्त्रिँशात् स्तोमाद्यन्तीति यद्गायत्र्यो भवन्ति तेनायतनान्न च्यवन्ते याहि का च गायत्री सा रेवती ॥२७॥ इति पञ्चमः खण्डः ॥१६/५॥

पशुभिर्व्वा एष व्यृध्यत इत्याहुर्य्यः सर्व्वं ददाति तच्छवीं परिधत्ते पशुभिरेव समृध्यते ॥१॥ रोहिणी छवी भवत्येतद्वै पशूनां भूयिष्ठँ रूपँ यद्रोहितँ साक्षादेवैनानवरुन्धे ॥२॥ अरण्ये तिस्रो वसत्यारण्यं ताभिरन्नाद्य मवरुन्धे ॥३॥ उदुम्बरे वसत्यूर्ग्गुदुम्बर ऊर्ज्जमेवावरुन्धे ॥४॥ खनित्रेण जीवत्यवृत्तिमपजयति ॥५॥ उभयतः क्ष्णुदभ्रिर्भवत्युभयत एवास्मा अन्नाद्यँ रदत्यस्माच्च लोकादमुष्माच्च ॥६॥ निषादेषु तिस्रो वसत्यस्याँ वा एते परीत्ताय देवास्यामन्नाद्यं तदवरुन्धे ॥७॥ जने तिस्रो वसति जन्यं ताभिरन्नाद्यमवरुन्धे ॥८॥ समानजने तिस्रः समानजन्यं ताभिः॥९॥ द्वादशैता रात्रयो भवन्ति द्वादशमासाः सँवत्सरः सँवत्सरमन्वन्नाद्यं प्रजायते तदेवाप्त्वावरुन्धे ॥१०॥ सँवत्सरं न याचेदामाद्यमिव वा एतद्यः सद्यो दत्तं प्रत्यात्ति सद्यो वै देवानाँ सँवत्सरः ॥११॥ नोदीयमानं प्रतिनुदेदन्नाद्यस्याप्रतिनोदाय ॥१२॥ उष्णीषम्बिभर्त्ति शिल्पत्वाय ॥१३॥ न मृन्मयेन पिबेदाहुतिर्व्वा एषा यद् ब्राह्मणस्य मुखं न वै मृन्मयमाहुतिमानशेऽथ यदमृन्मयो भवति स्व एव मुख आहुतिञ्जुहोति ॥१४॥ इति षष्ठः खण्डः ॥१६/६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पञ्चविँशोऽग्निष्टोमः ॥१॥ सर्व्वजिता वै देवाः सर्व्वमजयन् सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वमेवैतेनाप्नोति सर्व्वञ्जयति ॥२॥ तस्य महाव्रतं पृष्ठम् ॥३॥ अर्क्क्यँ शस्यते ॥४॥ चतुर्व्विँशतिः सँवत्सरस्यार्द्धमासाः सँवत्सरः पञ्चविँशोऽन्नँ व्रतँ सँवत्सरादेतेऽन्नाद्यमवरुन्धे ॥५॥ अन्नादो भवति य एवँ वेद ॥६॥ एतेन वै गौराङ्गिरसः सर्व्वं पाप्मानमतरत्सर्व्वं पाप्मानं तरत्येतेन स्तोमेन तुष्टुवानः ॥७॥ इति सप्तमः खण्डः ॥१६/७॥

अथैष ज्योतिः ॥१॥ पराङ्वै त्रिरात्रोऽर्व्वाङग्निष्टोमो यस्त्रिरात्रे विभ्रँशते न तस्मिन् पुनरस्त्यथ योऽग्निष्टोमे प्रायश्चित्तिमत्तदपि ह्येतेनैकविँशतिदक्षिणेन पुनर्य्यजेत यस्मिन् ह्येव यज्ञक्रतौ विभ्रँशते सैव तस्य प्रायश्चित्तिः ॥२॥ उपसदि सहस्रं प्रातरनुवाकमन्वाह तदसौ लोकः सहस्रँ दक्षिणास्तदन्तरिक्षँ सहस्रमेतान्यक्षराणि तदयँल्लोक एषु लोकेषु प्रतितिष्ठति य एवँ वेद ॥३॥ ऋक्था वा अन्यत् सहस्रमित्याहुरक्षरेस्था अन्यदिति यत् त्रिरात्रे दीयते तदृक्था अथ यदग्निष्टोमे तदक्षरेस्था ॥४॥ यत्सहस्राक्षरासु ब्रह्मसाम भवति सहस्रस्यैव सा प्रतिष्ठुतिः ॥५॥ यावद्वै सहस्रं गाव उत्तराधरा इत्याहुस्तावदस्माल्लोकात् स्वर्ग्गो लोक इति तस्मादाहुः सहस्रयाजी वा इमाँल्लोकान् प्राप्नोति ॥६॥ पशुभिर्व्वा एष व्यृध्यत इत्याहुर्य्यः सद्यः सहस्रं ददातीति पङ्क्तिषु ब्रह्मसाम भवति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञ एष पशुषु प्रतितिष्ठति ॥७॥ त्रिवृतं स्तोमँ सम्पद्यते विराजं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

छन्दः॥८॥ प्राणो वै त्रिवृदन्नँ विराण्नवैव प्राण ऋतेऽन्नात्पारयति नान्नमृते प्राणात्प्राणेषु चैवान्नाद्ये च प्रतितिष्ठति ॥९॥ इत्यष्टमः खण्डः॥१६/८॥

अथैष सर्व्वज्योतिः सर्व्वस्याप्तिः सर्व्वस्य जितिः सर्व्वमेवैतेनाप्नोति सर्व्वञ्जयति ॥१॥ परमो वा एष यज्ञः परमँ सहस्रं परमतां गच्छति य एवँ वेद ॥२॥ तस्य द्विशताः स्तोत्रीया अन्तो वै वाचो द्विशतमन्तः सहस्रमन्त एव तदन्तं प्रतिष्ठापयति ॥३॥ कृतस्तोमो वा एष सर्व्वमेवैतेनाप्नोति सर्व्वञ्जयति सर्व्वँ हि कृतेन जयति ॥४॥ विराजँ सम्पद्यतेऽन्नँ विराडन्नाद्यमेवावरुन्धे ॥५॥ एकविँशोऽ ग्निष्टोमो भवति प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥६॥ इति नवमः खण्डः ॥१६/९॥

अथैष विश्वज्योतिरुक्थ्यः॥१॥ पशवो वा उक्थानि पशवो विश्वज्योतिर्व्विश्व एव ज्योतौ पशुषु प्रतितिष्ठति ॥२॥ अहर्भिर्व्वै त्रिरात्र इमाँल्लोकानाप्नोति सवनैरेष उत्तरमुत्तरं त्रिरात्रस्याह-र्व्वर्षीय उत्तरमुत्तरमेतस्य सवनँ वर्षीयस्तेन त्रिरात्रमाप्नोत्युत्तर उत्तर एषाँल्लोकानां ज्यायाँस्तेनेमाँल्लोकानाप्नोति ॥३॥ अस्थूरिर्व्वा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवनँ वहतः ॥४॥ त्रिवृत्पञ्चदशौ प्रातस्सवनँ सप्तदशपञ्चविँशौ माध्यन्दिनँ सवनं चतुर्व्विँशैकविँशौ तृतीयसवनम् ॥५॥ यद्वै युक्ते सन्तत आधीयते वहति तद्यथा युक्ते सन्तत आदध्यादेव-मेतस्मिन् सहस्रमाधीयते ॥६॥ उभे बृहद्रथन्तरे भवतः॥७॥ इयँ वै रथन्तरं द्यौर्बृहदेवास्माल्लोकाद्गायत्येवामुष्मादुभयो-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रनयोर्ल्लोकयोः प्रतितिष्ठति ॥८॥ अनुष्टुभ्याथर्व्वणं भवति ॥९॥ भेषजँ वै देवानामथर्व्वाणो भेषज्यायैवारिष्ट्यै ॥१०॥ उद्वँशीय-मुक्थानामन्ततो भवति सर्व्वेषाँ वा एतत् पृष्ठानाँ रूपँ सर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥११॥ उक्थो भवति पशवो वा उक्थानि पशवः सहस्रं पशुष्वेव तत्पशून्दधाति ॥१२॥ इति दशमः खण्डः॥१६/१०॥

यो वा अग्निष्टोमे त्रिरात्रं प्रोतँ विद्यात्सोऽग्निष्टोमे सहस्रं दद्यात् त्रिरात्रायतनँ हि सहस्रम् ॥१॥ उपास्मै गायता नर उपोषु जातमप्तुरं पवस्व वाचो अग्रिय इति प्रतिपदो भवन्त्येतद्वै त्रिरात्रमकः ॥२॥ पवमाने रथन्तरं करोति पवमानस्यान्त्यँ वामदेव्यं बृहत् पृष्ठम् ॥३॥ इयँ वै रथन्तरमन्तरिक्षँ वामदेव्यं द्यौर्ब्बृहदिमे लोकास्त्रिरात्रो यदेतानि सामानि सध्र्यञ्चि करोतीमानेव तल्लोकान् सन्दधाति तेन त्रिरात्रमाप्नोति ॥४॥ ककुभं प्राचीमुदूहति ॥५॥ पुरो ह्येतया सत्या पशु वीर्य्यङ्करोति ॥६॥ तस्यामिडानाँ संक्षारः पुरुषो वै ककुप् पशव इडानाँ संक्षार आत्मन्येव तत्पशून् प्रतिष्ठापयति ॥७॥ प्रत्नं पीयूषं पूर्व्यँ यदुक्थमिति सतो बृहत्यो भवन्ति ॥८॥ सतो बृहत्यो वै देवा इमाँल्लोकान् व्याप्नुवन्निमानेवैताभिर्ल्लोकान् व्याप्नोति ॥९॥ ता वा एता गायत्र्यो यत्त्रिपदास्तेन गायत्र्यस्ता वा एता जगत्यो यद्द्वादशाक्षराणि पदानि तेन जगत्यस्ता वा एता बृहत्यो यत् षट्त्रिँशदक्षरास्तेन बृहत्यः सर्व्वेषाँ वा एताश्छन्दसाँ रूपँ सर्व्वाणि रूपाणि पशूनामवरुन्धे ॥१०॥ एतद्वै प्रत्यक्षं महाव्रतन्तस्य गायत्रँ शिरो बृहद्रथन्तरे पक्षौ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वमदेव्यमात्मा यज्ञायज्ञीयं पुच्छं दक्षिणा एवाक्र्व्यमेष वाव प्रत्यक्षं महाव्रतेन स्तुते य एतेन यजते ॥११॥ तस्य बृहत्पृष्ठं पङ्क्तिषु ब्रह्मसाम तदाहुश्छन्दो व्याधीयते यद् बृहत्पृष्ठं भवति पङ्क्तिषु ब्रह्म सामेति ॥१२॥ श्रायन्तीयमेव कार्य्यन्न छन्दो व्याधीयते ॥१३॥ एषः सहस्रस्य प्रतिष्टुतिः॥१४॥ सहस्रमन्य-मभितिष्ठतीत्याहुः सहस्रमन्योऽन्वातिष्ठतीति ॥१५॥ ककुभं प्राचीमुदूहत्यथा यदेषा द्विपदा ककुभो लोके क्रियते सहस्र-स्यैव सोऽन्वास्थायः ॥१६॥ अनुष्टुभँ सम्पद्यते वागनुष्टुब्वाक् त्रिरात्रस्तेन त्रिरात्रमाप्नोति॥१७॥ इत्येकादशः खण्डः ॥१६/११॥

आदित्याश्चाङ्गिरसश्चादीक्षन्त ते स्वर्ग्गे लोकेऽस्पर्धन्त तेऽङ्गिरस आदित्येभ्यः श्वः सुत्यां प्राब्रुवँस्त आदित्या एतमपश्यँस्तँ सद्यः परिक्रीयायास्यमुद्गातारँ वृत्वा तेन स्तुत्वा स्वर्ग्गँल्लोकमायन्न हीयन्ताङ्गिरसः॥१॥ भ्रातृव्यवान्यजेत ॥२॥ भवत्यात्मना परास्य भ्रातृव्यो भवति य एवँ वेद ॥३॥ तस्मा अमुमादित्यमश्वँ श्वेतं कृत्वा दक्षिणामानयँ स्तं प्रतिगृह्य व्यभ्रँशत स एतान्यायास्यान्यपश्यत्तैरात्मानँ समश्रीणात् ॥४॥ यदायास्यानि भवन्ति भेषजायैव शान्त्यै॥५॥ स्वर्ग्गकामो यजेत ॥६॥ बृहतीँ सम्पद्यते बृहत्या वै देवाः स्वर्ग्गँल्लोकमायन् स्वर्ग्गमेवैतेन लोकमाप्नोति ॥७॥ पशुकामो यजेत ॥८॥ पशवो वै बृहती पशुष्वेव प्रतितिष्ठति ॥९॥ इति द्वादशःखण्डः॥१६/१२॥

एतस्यैवैकविँशमग्निष्टोमसाम कृत्वामयाविनँय्याजयेत् ॥१॥ प्राणो वै त्रिवृत्प्राणा आदित्यः प्राणैरेष व्यृध्यते य आमयावी प्राणैरेवैनँ समर्द्धयति ॥२॥ विराजँ सम्पद्यतेऽप वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतस्मादन्नाद्यं क्रामति य आमयाव्यन्नँ व्विराडन्नाद्यमेवास्मिन् दधाति ॥३॥ एकविँशोऽग्निष्टोमो भवत्य प्रतिष्ठितो वा एष य आमयावी प्रतिष्ठैकविँशः प्रत्येवतिष्ठति ॥४॥ एतेनैवान्नाद्यकामो वा प्रतिष्ठाकामो वा यजेतान्नँ विराट् प्रतिष्ठैकविँशोऽत्त्यन्नं प्रतितिष्ठति ॥५॥ उर्व्वरा वेदिर्भवत्येतद्वा अस्या वीर्य्यवत्तमँ वीर्य्येणैव यज्ञँ समर्द्धयति ॥६॥ खल उत्तरवेदिरत्र हि स रसः समवैति सरसमेव यज्ञङ्करोति ॥७॥ खलेवाली यूपो भवत्येतया हि तँ रसमुत्कृषन्ति ॥८॥ त्रिवत्सः साण्डः सोमक्रयणः सेन्द्रत्वाय ॥९॥ सर्व्वा दिशोऽश्वरथाः सोमप्रवाका विधावन्ति ॥१०॥ सर्व्वाभ्य एवास्मै दिग्भ्योऽन्नाद्य मवरुन्धे ॥११॥ योजने चतुर्व्वाहिणा प्राच्यान्दिशि प्राहैवमिव वा अध्वानो विमितायैवाध्वनो मात्रा तान्धावयन्ति त्रैपदे प्रष्ठिवाहिनोदीच्यां गव्यूतौ द्व्योगेन प्रतीच्यां क्रोशे स्थूरिणा दक्षिणैतद्वै दिशाँ रूपँय्यदेव दिशाँ रूपं तेन यज्ञँ समर्द्धयति ॥१२॥ सक्षीरदृतयो रथा भवन्ति ततो यन्नवनीतमुदियात्तदा ज्येऽपि कार्य्यँ सद्यस्त्वाय ॥१३॥ इति त्रयोदशः खण्डः ॥१६/१३॥

अथैषोऽङ्गिरसामनुक्रीः ॥१॥ एतेन वा अङ्गिरस आदित्यानाप्नुवन् यो हीन आनुजावर इव स्यात् स एतेन यजेताप्नोति पूर्व्वेषां प्रहामाप्नुवन् ह्येतेनाङ्गिरस आदित्यान् ॥२॥ तस्य चतुर्व्विँशौ पवमानौ ॥३॥ चतुर्व्विँशत्यक्षरा गायत्री गायत्र्या वै देवा इमाँल्लोकान् व्याप्नुवन्निमानेवैतेन .लोकान् व्याप्नोति॥४॥ तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चस-मवरुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते॥५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात्प्रजायते ॥६॥ विराजँ सम्पद्यतेऽन्नँ विराडन्नाद्य मेवावरुन्धे ॥७॥ एकविँशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठति॥८॥ इति चतुर्दशः खण्डः॥१६/१४॥

अथैष विश्वजिच्छिल्पः ॥१॥ शिल्पँ वा एष स्तोमानां पश्यति गृहे शिल्पँय्य एवँव्वेद ॥२॥ तस्याष्टादशौ पवमानौ ॥३॥ चक्रीवान्वा एष यज्ञः कामाय यं कामं कामयते तमेतेनाभ्यश्नुते यत्र हि चक्रीवता कामयते तदभ्यश्नुते ॥४॥ स्वर्ग्गकामो यजेत ॥५॥ स्वर्ग्गो लोकः पृष्ठानि स्वर्ग्गमेवैतेन लोकमाप्नोति ॥६॥ तेजो ब्रह्मवर्च्चसं पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिँस्तेजो ब्रह्मवर्च्चसं दधाति ॥७॥ अन्नं पशवः पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिन्नन्नाद्यं पशून् दधाति ॥८॥ तदाहुर्न्नाना लोकानि पृष्ठानि यदेकस्मिन् यज्ञक्रतौ समवरुध्यन्त ईश्वरो वा यजमानोऽप्रतिष्ठातोरिति ॥९॥ एकविँशँ होतुः पृष्ठं भवति प्रतिष्ठा वा एकविँशो मध्य एव यज्ञस्य प्रतितिष्ठत्येकविँशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥१०॥ द्वावेतावेकविँशौ भवतो द्विपाद्यजमानो यजमानमेव यज्ञे पशुषु च प्रतिष्ठापयति ॥११॥ इति पञ्चदशःखण्डः ॥१६/१५॥

अथैष एकत्रिकः प्रजापतेरुद्भित् ॥१॥ एतेन वै प्रजापतिरेषाँ ल्लोकानामुदभिनत् ॥२॥ कृतस्तोमो वा एष उद्भिन्नँ ह्येव कृतस्य ॥३॥ यदेकया स्तुवन्त्येको वै प्रजापतिः प्रजापतिमेवाप्नोत्यथ यत्तिसृभिस्त्रय इमे लोका एष्वेव लोकेषु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतितिष्ठति ॥४॥ ता उ चतस्रः सम्पद्यन्ते चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठति ॥५॥ गायत्रीँ सम्पद्यते तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमवरुन्धे ॥६॥ प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥७॥ अया रुचा हरिण्या पुनान इत्यार्भवः पवमानः ॥८॥ सर्व्वेषाँ वा एषा छन्दसाँ रूपँ सर्व्वेष्वेव छन्दस्स्वार्भवं पवमानं प्रतिष्ठापयति ॥९॥ तस्यां गायत्रपार्श्वन्न गायत्रादेति न साम्नो न निधनात् ॥१०॥ इति षोडशः खण्डः ॥१६/१६॥ **इति षोडशोऽध्यायः**

अथ सप्तदशोऽध्यायः

देवा वै स्वर्ग्गँल्लोकमायँस्तेषां दैवा अहीयन्त व्रात्यां प्रवसन्तस्त आगच्छन् यतो देवाः स्वर्ग्गँल्लोकमायँस्तेन तँस्तोमं छन्दोऽविन्दन्येन तानाप्स्यँस्ते देवा मरुतोऽब्रुवन्नेतेभ्यस्तँ स्तोमं तच्छन्दः प्रयच्छत् येनास्मानाप्नवानिति तेभ्य एतँ षोडशँ स्तोमं प्रायच्छत् परोक्षमनुष्टुभं ततो वै ते तानाप्नुवन् ॥१॥ हीना वा एते हीयन्ते ये व्रात्यां प्रवसन्ति न हि ब्रह्मचर्य्यं चरन्ति न कृषिन्न वणिज्याँ षोडशो वा एतत् स्तोमः समाप्तुमर्हति ॥२॥ मरुत्स्तोमो वा एष यानि क्षुद्राणि छन्दाँसि तानि मरुताम् ॥३॥ ककुभं प्राचीमुदूहत्यथ यदेषा द्विपदा ककुभो लोके क्रियते रूपेणैवैनाँस्तत्समर्द्धयति ॥४॥ अधा हीन्द्र गिर्व्वण इति विषमं छन्दो विषम इव वै व्रातः सर्व्वानेवैतान् समान् करोति ॥५॥ तासु द्यौतानम् ॥६॥ द्युतानो मारुतस्तेषां गृहपतिरासीत्त एतेन स्तोमेनायजन्त ते सर्व्व

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आर्ध्नुवन् यदेतत् साम भवत्यृध्या एव ॥७॥ यन्निरुक्तँ विघनमुपेयुर्गृहपतिरेवर्ध्नुयादपेतरान् आध्नीताथ यदनिरुक्त-मुपयन्ति सर्व्वानेवैतानृद्धौ भूतौ प्रतिष्ठापयति ॥८॥ गरगिरो वा एते ये ब्रह्माद्यं जन्यमन्नमदन्त्यदुरुक्तवाक्यं दुरुक्तमाहुरदण्ड्यं दण्डेन घ्नन्तश्चरन्त्यदीक्षिता दीक्षितवाचँ वदन्ति षोडशो वा एतेषाँस्तोमः पाप्मानं निर्हन्तुमर्हति यदेते चत्वारः षोडशा भवन्ति तेन पाप्मानोऽधि निर्म्मुच्यन्ते ॥९॥ देवो वो द्रविणोदा इत्यग्निष्टोमसाम कार्य्यं देवतास्वेवैनान् प्रतिष्ठापयति ॥१०॥ अथो खल्वाहुरदर्शि गातु वित्तम इत्येव सतो बृहतीषु कार्य्यँ विषमा इव वै व्रातः सर्व्वानेवैतान् सतो बृहतः करोति ॥११॥ तदाहुः शिथिलमिव वा एतत् छन्दश्चराचरँय्यत्सतोबृहती देवो वो द्रविणोदा इत्येव कार्य्यम् ॥१२॥ एषा वै प्रतिष्ठिता बृहती या पुनः पदा तद्यत्पदं पुनरारभते तस्मात्पुत्रो मातरमध्येति ॥१३॥ उष्णीषश्च प्रतोदश्च ज्याह्लोडश्च विपथश्च फलकास्तीर्ण्णः कृष्णशँव्वासः कृष्णवलक्षे अजिने रजतो निष्कस्तद् गृहपतेः ॥१४॥ वलूकान्तानि दामतूषाणीतरेषां द्वे द्वे दामनी द्वे द्वे उपानहौ द्विषँ हितान्यजिनानि ॥१५॥ एतद्वै व्रात्यधनँय्यस्मा एतद्ददति तस्मिन्नेव मृजानायन्ति॥१६॥त्रयस्त्रिँशता त्रयस्त्रिँशता गृहपतिमभिसमायन्ति त्रयस्त्रिँशद्धि देवा आर्ध्नुवन् ऋध्या एव ॥१७॥ इति प्रथमः खण्डः ॥१७/१॥

अथैष षट्षोडशी ये नृशँसा निन्दिताः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ॥१॥ अभिपूर्व्वेण वा एते पाप्मना गृहीता ये नृशँसा निन्दिताः सन्तो व्रात्यां प्रवसन्ति यत् षट्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षोडशानि स्तोत्राणि भवन्ति तेन पाप्मनोऽधि निर्म्मुच्यन्ते ॥२॥ यदेकविँशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविँशो मध्यत एव यज्ञस्य प्रतितिष्ठन्ति ॥३॥ उक्थो भवति पशवो वा उक्थानि पशवो नृशँसमग्रं परिणयन्ति पशुभिरेवैनानग्रं परिणयति ॥४॥ इति द्वितीयः खण्डः॥१७/२॥

अथैष द्विषोडशी ये कनिष्ठाः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ॥१॥ हीना वा एते हीयन्ते ये कनिष्ठाः सन्तो व्रात्यां प्रवसन्ति यत्त्रिवृतः पवमाना भवन्ति मुखँ वै त्रिवृत् स्तोमानां मुखत एवैतान् यज्ञस्य परिणयति ॥२॥ यद् वै षोडशे स्तोत्रे भवतस्तेन पाप्मनोऽधिनिर्म्मुच्यन्ते ॥३॥ एकविँशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठन्ति ॥४॥ इति तृतीयः खण्डः ॥१७/३॥

अथैष शमनीचा मेढ्राणाँ स्तोमो ये ज्येष्ठाः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ॥१॥ अग्रादग्रँ रोहन्त्यूर्ध्वाः स्तोमा यन्त्यनपभ्रँशाय ॥२॥ एतेन वै शमनीचा मेढ्रा अयजन्त तेषां कुषीतकः सामश्रवसो गृहपति रासीत्तान् लुशाकपिः खार्ग्गलिरनुव्याहरदवाकीर्षत कनीयाँसौ स्तोमावुपागुरिति तस्मात्कौषीतकीनां न कश्चनातीव जिहीते यज्ञावकीर्णा हि ॥३॥ इति चतुर्थः खण्डः ॥१७/४॥

इन्द्रो वै त्रिशिरसं त्वाष्ट्रमहँस्तमश्लीला वागभ्यवदत् सोऽग्निमुपाधावत् स एतदग्निस्तोत्रमपश्यत्तदात्मन्यधिविधाय तेनैनमयाजयत्तेनास्याश्लीलाँ वाचमपाहन् ॥१॥ अपाश्लीलाँ वाचँ हते य एवँव्वेद ॥२॥ योऽपूत इव स्यादग्निष्टुता यजेता-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ग्निनैवास्य पाप्मानमपहत्य त्रिवृता तेजो ब्रह्मवर्च्चसं दधाति ॥३॥ तदाहुर्य्यत्त्रिवृद्भवत्येकस्मादेवाङ्गात् पाप्मानमपहन्ति मुखादेवेति ॥४॥ ज्योतिष्टोम एव कार्य्यः ॥५॥ यत्त्रिवृद्भवति यदेवास्य मुखतोऽपूतं तत्तेनापहन्ति यत् पञ्चदशो यदेवास्योरस्तो बाह्वोरपूतं तत्तेनापहन्ति यत्सप्तदशो यदेवास्य मध्यतोऽपूतं तत्तेनापहन्ति यदेकविँशो यदेवास्य पदोरष्ठीवतोरपूतं तत्तेनापहन्ति ॥६॥ वैश्वानरँ वा एष प्रविशतीत्याहुर्य्योऽग्निष्टुता यजत इति वारवन्तीयमग्निष्टोमसाम कार्य्यं तस्य यदपूतं तदग्निः क्षापयत्यथेतरः शुचिः पूत उदेति ॥७॥ इति पञ्चमः खण्डः ॥१७/५॥

त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वग्निष्टोमसाम ॥१॥ ब्रह्मवर्च्चसकामो यजेत ॥२॥ तेजो वै त्रिवृद् ब्रह्मवर्च्चसँ यद्वायव्यास्वग्निष्टोमसाम भवत्युपैवेनं तद्धमति ॥३॥ यथा हिरण्यं निष्टपेदेवमेनमग्निष्टुन्निष्टपति॥४॥ इति षष्ठःखण्डः॥१७/६॥

एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो यजेत ॥१॥ जरत्कक्षो वा एष योऽपशुर्य्यथा वै जरत्कक्षे पशवो न रमन्त एवमेतस्मिन् पशवो न रमन्ते योऽपशुर्य्यदा वै जरत्कक्षमग्निर्दहत्यथैनमभि वर्षत्यथास्मिन्नोषधयो जायन्तेऽथ वै तस्मिन् पशवो रमन्ते ॥२॥ रमन्तेऽस्मिन् पशवो य एवँ वेद ॥३॥ यदेवास्या पशव्यं तदग्निष्टुन्निर्दहति यदग्निष्टुन्निर्दहति तदद्भी रेवतीभिः शमयति ॥४॥ इति सप्तमः खण्डः ॥१७/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ज्योतिष्टोमेनाग्निष्टुता यज्ञविभ्रष्टो यजेत ॥१॥ यस्मिन् वा यज्ञक्रतौ विभ्रँशेत ॥२॥ अग्निर्व्वा एतस्य हव्यमत्ति यो यज्ञे विभ्रँशते न देवता हव्यं गमयत्यग्नि मेवैकधध्र्नोति ॥३॥ यद्वै सँशीर्य्यतेऽथान्यन्निष्कुर्व्वन्ति न तेन तद्याति यदा वाव तन्निष्कुर्व्वन्त्यथ तद्याति येष्वेव स्तोमेषु विभ्रँशते यस्मिन् यज्ञक्रतौ तैरेव यजेत येष्वेव स्तोमेषु विभ्रँशेत यस्मिन् यज्ञक्रतौ तेष्वेव प्रतितिष्ठति ॥४॥ इत्यष्टमः खण्डः ॥१७/८॥

सप्तदशेनाग्निष्टुतान्नाद्यकामो यजेत ॥१॥ अन्नँ वै सप्तदशोऽग्निरन्नाद्यस्य प्रदाताग्निरेवास्मा अन्नाद्यं प्रयच्छति ॥२॥ अन्नादो भवति य एवँ वेद ॥३॥ सर्व्वस्सप्तदशो भवति प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवाप्नोति॥४॥इतिनवमःखण्डः ॥१७/९॥

त्रिवृदग्निष्टोमस्तस्यानिरुक्तं प्रातस्सवनम् ॥१॥ प्रजापतिः प्रजा असृजत ता अस्मात्सृष्टा अपाक्रामन् स एतदनिरुक्तं प्रातस्सवनमपश्यत्तेनासां मध्यं व्यवैत्ता एनमुपावर्त्तन्त पर्य्येनमाविशन्॥२॥ ग्रामकामो यजेत यदेतदनिरुक्तं प्रातस्सवनं भवति मध्यमेवासाँ व्यवैत्युपैनमा वर्त्तन्ते पर्य्येनँ विशन्ति ॥३॥ स एष प्रजापतेरपूर्व्वो नास्मात् पूर्व्वो भवति य एवँ वेद ॥४॥ इति दशमः खण्डः ॥१७/१०॥

त्रिवृदग्निष्टोमः ॥१॥ तस्य प्रातस्सवने सन्नेषु नाराशँसे-ष्वेकादशदक्षिणा व्यादिशत्यश्वद्वादशा माध्यन्दिने ता उभयोरपाकरोत्येकादशतृतीयसवने तावशायामपाकरोति ॥२॥ त्रयस्त्रिँशदेता दक्षिणा भवन्ति ॥३॥ त्रयस्त्रिँशद्देवता देवता एवाप्नोत्यश्वश्चतुस्त्रिँशो दक्षिणानां प्रजापतिश्चतुस्त्रिँशो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवतानां प्रजापतिमेवाप्नोति ॥४॥ स एष बृहस्पतिसवो बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति स एतेनायजत स देवानां पुरोधामगच्छत् ॥५॥ गच्छति पुरोधाँय्य एवँव्वेद ॥६॥ स एष स्थपतिसवो यँ स्थापत्यायाभिषिञ्चेरन् स एतेन यजेत ॥७॥ गच्छति स्थापत्यँय्य एवँ वेद ॥८॥ कृष्णाजिनेऽध्यभिषिच्यत एतद्वै प्रत्यक्षं ब्रह्मवर्च्चसं ब्रह्मवर्च्चस एवाध्यभिषिच्यते ॥९॥ आज्येनाभिषिच्यते तेज आज्यं तेज आत्मन्धत्ते ॥१०॥ इत्येकादशः खण्डः ॥१७/११॥

त्रिवृदग्निष्टोमः स सर्व्वस्वारो यः कामयेत अनामयतामुँल्लोकमियामिति स एतेन यजेत ॥१॥ प्राणो वै त्रिवृत्प्राणः स्वरः प्राणानेवास्य बहिर्णिरादधाति ताजक् प्रमीयते ॥२॥ त्रिवृद्वै स्तोमानां क्षेपिष्ठो यत्रिवृद्भवत्याशीयः सङ्गच्छाता इत्यनन्तो वै स्वरोऽनन्तोऽसौ लोकोऽनन्तमेवैनँ स्वर्गँल्लोकं गमयति॥३॥ अभिवत्यः प्रवत्यो भवन्त्यस्मादेवैनँ लोकात्स्वर्गँल्लोकं गमयन्ति ॥४॥ आर्भवपवमाने स्तूयमान औदुम्बर्य्या दक्षिणा प्रावृतो निपद्यते तदेव सङ्गच्छते ॥५॥ स एष शुनस्कर्ण्णस्तोम एतेन वै शुनस्कर्णो बाष्किहोऽयजत तस्मा-च्छुनस्कर्ण्णस्तोम इत्याख्यायन्ते ॥६॥ इति द्वादशःखण्डः॥१७/१२॥

त्रिवृदग्निष्टोमो वैश्वदेवस्य लोकः॥१॥ आग्ग्नेयी प्रतिपद्वैश्वदेवः पशुर्ब्बार्हस्पत्यानूबन्ध्या ॥२॥ न यूपं मिन्वन्ति नोत्तरवेदिन्निवपन्ति ॥३॥ परिधौ पशुं नियुञ्जन्ति ॥४॥ पञ्चाशद्दक्षिणा ॥५॥ अहतँ वसानोऽवभृथादुदेति चतुरो मासो न माँसमश्नाति न स्त्रियमुपैति ॥६॥ ततश्चतुर्षु मासेषु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वरुणप्रघासानाँल्लोके द्विदिवः ॥७॥ वारुणी प्रतिपन्मारुतः पशुः ॥८॥ कवती प्रतिपद्वारुणः पशुः ॥९॥ मैत्रावरुण्यनूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिँ वपन्ति यूपे पशून्नियुञ्जन्ति ॥१०॥ शतं दक्षिणा अहतँ वसानोऽवभृथादुदेति चतुरो मासो न माँसमश्नाति न स्त्रियमुपैति ॥११॥ ततश्चतुर्षु मासेषु साकमेधानाँल्लोके त्रिरात्रः ॥१२॥ अनीकवती प्रतिपदाग्नेयः पशुर्म्मारुती प्रतिपदैन्द्राग्नः पशुर्व्वैश्वकर्म्मणी प्रतिपदेका-दशिनी पशवः सौर्य्यानूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिँ वपन्ति यूपे पशून्नियुञ्जन्ति पञ्चाशच्छतं दक्षिणा ॥१३॥अहतँ वसानोऽवभृथादुदेति चतुरो मासो न माँसमश्नाति न स्त्रियमुपैति ॥१४॥ ततश्चतुर्षु मासेषु शुनासीर्य्यस्य लोके ज्योतिष्टोमोऽग्निष्टोमः॥१५॥ उपवती प्रतिपद्वायव्यः पशुराश्वि न्यनूबन्ध्या मिन्वन्ति यूपं न्युत्तरवेदिँ वपन्ति यूपे पशुं नियुञ्जन्ति द्वादशँ शतं दक्षिणा ॥१६॥ अग्निः सँवत्सरः सूर्य्यः परिवत्सरश्चन्द्रमा इडावत्सरो वायुरनुवत्सरोऽग्निँ सँवत्सरँ वैश्वदेवेनाप्नोति सूर्य्यं परिवत्सरँ वरुणप्रघासै-श्चन्द्रमसमिदावत्सरँ साकमेधैर्व्वायुमनुवत्सरँ शुनासीर्य्येण ॥१७॥हविर्य्यज्ञैर्व्वै देवा इमँ लोकमभ्यजयन्नन्तरिक्षं पशुमद्भिः स्तोमैरमुमिमानेव लोकानाप्नोत्येतेषु लोकेषु प्रतितिष्ठति य एवँ वेद ॥१८॥ इति त्रयोदशः खण्डः॥१७/१३॥

यदाग्निहोत्रं जुहोत्यथ दशगृहमेधिन आप्नोत्येकया रात्र्या यदा दशसँवत्सरानग्निहोत्रं जुहोत्यथ दर्शपूर्ण्णमास-याजिनमाप्नोति यदा दशसँवत्सरान् दर्शपूर्ण्णमासाभ्याँ यजते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऽथाग्निष्टोमयाजिनमाप्नोति यदा दशभिरग्निष्टोमैर्य्यजतेऽथ सहस्रयाजिनमाप्नोति यदा दशभिः सहस्रैर्य्यजतेऽथायुत-याजिनमाप्नोति यदा दशभिरयुतैर्य्यजतेऽथ प्रयुतयाजिनमाप्नोति यदा दशभिः प्रयुतैर्य्यजतेऽथ नियुत याजिनमाप्नोति यदा दशभिर्न्नियुतैर्य्यजतेऽथार्बुदयाजिनमाप्नोति यदा दशभिरर्ब्बुदै-र्य्यजतेऽथ न्यर्ब्बुदयाजिनमाप्नोति यदा दशभिर्न्यर्ब्बुदै-र्य्यजतेऽथ निखर्व्वकयाजिनमाप्नोति यदा दशभिर्न्निखर्व्वकै-र्य्यजतेऽथ बद्धयाजिनमाप्नोति यदा दशभिर्बद्धैर्य्यजते-ऽथाक्षितयाजिनमाप्नोति यदा दशभिरक्षितैर्य्यजतेऽथ गौर्भवति यदा गौर्भवत्यथाग्निर्भवति यदाग्निर्भवत्यथ सँवत्सरस्य गृहपतिमाप्नोति ॥१॥ यदा सँवत्सरस्य गृहपतिर्भवत्यथ वैश्वदेवस्य मात्रामाप्नोत्यतो वा इतरे परस्तरां परस्तरमेव सर्व्वे ॥२॥ एतानेव लोकानाप्नोत्येताँल्लोकाञ्जयते य एवँ वेद ॥३॥ इति चतुर्द्दशः खण्डः ॥ १७/१४॥ **इति सप्तदशोऽध्यायः**

अथाष्टादशोऽध्यायः

सप्तदशोऽग्निष्टोमः ॥१॥ देवाश्च वा असुराश्च प्रजापतेर्य्याः पुत्रा आसँ स्तेऽसुरा भूयाँसो बलीयाँस आसन् कनीयाँसो देवास्ते देवाः प्रजापतिमुपाधावन् स एतमुपहव्य-मपश्यत् ॥२॥ स ऐक्षत यन्निरुक्तमाहरिष्या म्यसुरा मे यज्ञँ हनिष्यन्तीति सोऽनिरुक्तमाहरत् ॥३॥ स उत्तमे स्तोत्रे देवो वो द्रविणोदा इति देवानभिपर्य्यावर्त्तत ॥४॥ ततो देवा अभवन् परासुराः ॥५॥ भवत्यात्मना परास्य भ्रातृव्यो भवति य एवँ वेद

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥६॥ अथो खल्वाहुर्यज्ञायज्ञा वो अग्नय इत्येव कार्य्यम् ॥७॥ अग्निर्व्वै सर्व्वा देवतास्तेन न देवतानां काञ्चनान्तरोति ॥८॥ इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्त मश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत्तस्मा एतमुपहव्यं प्रायच्छत्तँ विश्वेदेवा उपाह्वयन्त यदुपाह्वयन्त तस्मादुपहव्यः ॥९॥ अभिशस्यमानँ-य्याजयेत् ॥१०॥ देवता वा एतं परिव्रजन्ति यमनृतमभिशँसन्ति देवता एवास्यान्नमादयन्ति ॥११॥ तस्य पूतस्य स्वदितस्य मनुष्या अन्नमदन्ति ॥१२॥ ग्रामकामो यजेत ॥१३॥ मारुती भवति मरुतो वै देवानाँ विशो विशमेवास्मा अनु नियुनक्त्य-नपक्रामुकास्माद्विड्भवति ॥१४॥ पशुकामो यजेत पौषी भवति ॥१५॥ पशवो वै पूषा पशूनेवावरुन्धे ॥१६॥ वैश्वदेवी भवति विश्वे ह्येनं देवा उपाह्वयन्त॥१७॥ बृहत्सामा भवति ॥१८॥ प्रजापतिर्ह्येनमिन्द्राय प्रायच्छत् ॥१९॥ अश्वः श्यावो दक्षिणा ॥२०॥ स ह्यनिरुक्तः॥२१॥ स ब्रह्मणे देयः ॥२२॥ब्राह्मा वा ऋत्विजामनिरुक्तः स्वेनैवैनं तद्रूपेण समर्द्धयति ॥२३॥ यावद्ध वै कुमारे सद्यो जात एनो नास्मिँस्तावच्च नैनो भवति य एवँ वेद ॥२४॥ इति प्रथमःखण्डः॥१८/१॥

सप्तदशोऽग्निष्टोमः॥१॥ तस्य द्वादशदीक्षोपसदः ॥२॥ स्वर्ग्गकामो यजेत ॥३॥ द्वादशमासाः सँवत्सरः सँवत्सर स्वर्ग्गो लोकः स्वर्ग्गमेवैतेन लोकमाप्नोति ॥४॥ घृतव्रतो भवति ॥५॥ देवव्रतँ वै घृतं देवव्रतेनैव देवता अप्येति ॥६॥ उत्तरेणोत्तरेण काण्डेनोपैत्युत्तर उत्तर एषाँल्लोकानां ज्यायान् स्वर्ग्गस्य लोकस्य समष्ट्यै ॥७॥ बृहत्सामा भवति बृहता वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवाः स्वर्ग्गँल्लोकमायन् स्वर्ग्गमेवैतेन लोकमाप्नोति ॥८॥ ऋतमुक्त्वा प्रसर्प्पन्त्यृतेनैवैनँ स्वर्ग्गँल्लोकं गमयन्ति ॥९॥ सोमचमसो दक्षिणा देवतायैव देवता अप्येति ॥१०॥ औदुम्बरो भवत्यूर्ग्गुदुम्बर ऊर्ज्जमेवावरुन्धे ॥११॥ सगोत्राय ब्रह्मणे देयः सोमपीथस्याविदोहाय ॥१२॥ सर्व्वः सप्तदशो भवति ॥१३॥ द्वादशमासाः पञ्चर्त्तवस्स वै सँवत्सरस्सँवत्सरः स्वर्ग्गो लोकस्स्वर्ग्गमेवैतेन लोकमाप्नोति ॥१४॥ इति द्वितीयःखण्डः ॥१८/२॥

सप्तदशोऽग्निष्टोमः ॥१॥ तस्य दीक्षणीयायामिष्टौ द्वादशमानँ हिरण्यं ददाति चतुर्व्विँशतिमानं प्रायणीयायां द्वे चतुर्व्विँशतिमाने आतिथ्यायां चत्वारि चतुर्व्विँशतिमानानि प्रातः प्रथमायामुपसद्यष्टौ चतुर्व्विँशतिमाना न्यपराह्णे प्रथमायामुपसदि षोडशचतुर्व्विँशतिमानानि प्रातर्म्मध्यमायामुपसदि द्वात्रिँशतं चतुर्व्विँशतिमानान्यपराह्णे मध्यमायामुपसदि चतुष्षष्टिं चतुर्व्विँशतिमानानि प्रातरुत्तमायामुपसद्यष्टाविँशतिशतं चतुर्व्विँशतिमानान्यपराह्णे उत्तमायामुपसदि द्वे अष्टाविँशतिशतमाने अग्नीषोमीयस्य पशोर्व्वपायां चत्वार्य्यष्टा विँशतिशतमानानि प्रातः पशोर्व्वपायामष्टावष्टाविँशतिशतमानानि प्रातः सवने सन्नेषु नाराशँसेषु षोडशाष्टाविँशतिशतमानानि माध्यन्दिने सवनेऽनडुच्छतं च रुक्मो होतुः स्रगुद्गातुर्द्वात्रिँशतमष्टाविँशतिशतमानानि तृतीयसवनेषु सन्नेषु नाराशँसेषु चतुष्षष्टिमष्टाविँशतिशतमानान्युदयनीयायामिष्टौ अष्टाविँशतिशत मष्टाविँशतिशतमानानि वशाया वपायाम् ॥२॥ एष वा अनडुहो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

लोकमाप्नोति य एवँ वेद॥३॥एष वै ज्योतिष्मन्तं पुण्यँल्लोक-ञ्जयति य एवँ विद्वानेतेन यजते ॥४॥इतितृतीयःखण्डः॥१८/३॥

सप्तदशोऽग्निष्टोमः ॥१॥ तस्य प्रातस्सवनीयान् सोमान् प्रतिदूहा श्रीणाति श्रृतेन मध्यन्दिने दध्ना तृतीयसवने ॥२॥ पशुकामो यजेत ॥३॥ यत्सर्व्वाणि सवनान्याशीर्व्वन्ति भवन्त्यनुसवनमेवैनं पशुभिः समर्द्धयति प्रजात्वस्य मीलितेव भवति शुक्रिये हि सवने पयसा श्रीणाति ॥४॥ वैश्यँ याजयेत् ॥५॥ एतद्वै वैश्यस्य समृद्धँ यत्पशवः पशुभिरेवैनँ समर्द्धयति ॥६॥ तस्य कण्वरथन्तरं पृष्ठम् ॥७॥ सदोविशीयं ब्रह्मसाम ॥८॥ पशवो वै कण्वरथन्तरं पशवः सदोविशीयमभि-पूर्व्वानेवास्मिन्पशून्दधाति ॥९॥ सर्व्वस्सप्तदशो भवति ॥१०॥ द्वादशमासाः पञ्चर्त्तवः स वै सँवत्सरः सँवत्सरं पशवोऽनु प्रजायन्ते तानेवाप्त्वावरुन्धे ॥११॥ इति चतुर्थःखण्डः ॥१८/४॥

सप्तदश उक्थ्यः ॥१॥ इन्द्रो वृत्रमहन् स विष्वङ्वीर्य्येण व्यार्च्छत्तस्मै देवाः प्रायश्चित्तिमैच्छँस्तं न किञ्चनाधिनो-त्तन्तीव्रसोम एवाधिनोत् ॥२॥ सोमातिपवितँ याजयेत् ॥३॥ छिद्र इव वा एष यँ सोमोऽतिपवते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥४॥ राजानमपरुद्धँय्याजयेत् ॥५॥ विड्वा एतमतिपवते यो राजापरुध्यते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥६॥ ग्रामकामो यजेत ॥७॥ ग्रामो वा एतमतिपवते योऽलं ग्रामाय सन् ग्रामं न विन्दते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥८॥ प्रजाकामो यजेत प्रजा वा एतमतिपवते योऽलं प्रजायाः सन् प्रजां न विन्दते यत्तीव्र-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोमेन यजते पिहित्या एवाच्छिद्रतायै ॥९॥ पशुकामो यजेत पशवो वा एतमतिपवन्ते योऽलं पशुभ्यः सन् पशून्न विन्दते यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥१०॥आमयाविनँ याजयेत् प्राणा वा एतमतिपवन्ते य आमयावी यत्तीव्रसोमेन यजते पिहित्या एवाच्छिद्रतायै ॥११॥ शतमाशिरं दुहन्ति तीव्रयन्त्येवैनम् ॥१२॥ तत्ता उ एव दक्षिणाः ॥१३॥ अभ्यभिसोमानुन्नयन्ति तीव्र एनं धिनवदित्युभावध्वर्य्यू सर्व्वे चमसाध्वर्य्यवोऽच्छावाकाय प्रतिगृणन्ति तीव्रयन्त्येवैनम् ॥१४॥ तदभक्षयन्त ऋत्विजश्चमसानवजिघ्रन्ति तीव्रयन्त्येवैनं तत्तानच्छावाकस्य स्तोत्रे भक्षयन्ति तीव्रयन्त्येवैनम् ॥१५॥ तद्यत् सवनानि व्यवभक्षयेयुरपक्रामुका यजमानाच्छ्रीः स्यात् सकृत्सकृत् सवनानामसम्भेदाय ॥१६॥ रथन्तरँ साम भवति ॥१७॥ इयँ वै रथन्तरमस्याँ वा एष न प्रतितिष्ठति यो न प्रतितिष्ठत्यस्यामेवैनं प्रतिष्ठापयति ॥१८॥ श्रायन्तीयं ब्रह्मसाम भवत्येतदेवास्मिञ्छ्रीणाति ॥१९॥ यज्ञायज्ञीयमनुष्टुभि भवति ॥२०॥ वागनुष्टुप् वाचो रसो यज्ञायज्ञीयँ वाच्येवास्य रसं दधाति ॥२१॥ विशोविशीयमग्निष्टोमसाम भवत्येतदेवास्मिन् सर्व्वं प्रतिष्ठापयति ॥२२॥ उद्वँशीयमुक्थानामन्ततो भवति सर्व्वेषाँ वा एतत्पृष्ठानाँ रूपँ सर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥२३॥ उक्थ्यो भवति पशवो वा उक्थानि पशुष्वेव प्रतितिष्ठति ॥२४॥ इति पञ्चमः खण्डः ॥१८/५॥

सप्तदश उक्थ्य षोडशिमान् सप्तदशी ॥१॥ यावान्वै प्रजापतिरूर्ध्वस्तावाँस्तिर्य्यक् ॥२॥ यावन्त इमे लोका

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऊर्ध्वास्तावन्तस्तिर्य्यञ्चः ॥३॥ वाजपेययाजी वाव प्रजापति-माप्नोति ॥४॥ यत्सप्तदशस्तोत्राणि तेनोर्ध्वमाप्नोति यत्सर्व्वः सप्तदशस्तेन तिर्य्यञ्चम् ॥५॥ तस्य नाना वीर्य्याणि सवनानि ॥६॥ अनिरुक्तं प्रातस्सवनँ वाजवन्माध्यन्दिनँ सवनं चित्रवत्तृतीयसवनम् ॥७॥ यदनिरुक्तं प्रातस्सवनं भवत्यनिरुक्तो वै प्रजापतिः प्रजापतिमेवाप्नोति यद्वाजवन्माध्यन्दिनँ सवनमन्नँ वै वाजोऽन्नाद्यस्यावरुध्यै यच्चित्रवत् तृतीयसवनँ स्वर्ग्गस्य लोकस्य समष्ट्यै ॥८॥ वियोनिर्व्वाजपेय इत्याहुः प्राजापत्य-स्सनिरुक्त सामेति यदनिरुक्तँ प्रातस्सवनं तेन सयोनिः ॥९॥ रथन्तरँ साम भवत्याशीय उज्झित्यै ॥१०॥ इयँ वै रथन्तर-मस्यामेवाध्यभिषिच्यते ॥११॥ तस्माद्वाजपेययाज्यप्रत्यवरोही ॥१२॥ अस्याँ हि सोऽध्यभिषिच्यते ॥१३॥ अभीवर्त्तो ब्रह्मसाम भवति ब्रह्मणो वा एष ऋषभ ऋषभतामेवैनं गमयति ॥१४॥ यज्ञायज्ञीयमनुष्टुभि भवति वागनुष्टुब्वाचो रसो यज्ञायज्ञीयँ वाच्येवास्य रसं दधाति ॥१५॥ वारवन्तीयमग्निष्टोमसाम भवतीन्द्रियस्य वीर्य्यस्य परिगृहीत्यै ॥१६॥ उद्वँशीयमुक्थाना-मन्ततो भवति सर्व्वेषाँ वा एतत् पृष्ठानाँ रूपँ सर्व्वेष्वेव रूपेषु प्रतितिष्ठति ॥१७॥ गौरीवितँ षोडशिसाम भवति ॥१८॥ अतिरिक्तं गौरीवितमतिरिक्तः षोडश्यतिरिक्त एवातिरिक्तं दधाति ॥१९॥ तदाहुर्ज्जामि वा एतद्यज्ञे क्रियते यदुद्वँशीयाद् गौरीवितेन स्तुवते स्वारात् स्वारेणेति ॥२०॥ न जाम्यस्ति सवनँ सन्तिष्ठते ॥२१॥ उक्थँ शस्यते वषट्कारोऽन्तरा तेनाजामि ॥२२॥ अपच्छिदिव वा एतद्यज्ञकाण्डँ यत् षोडशी तेनाजामि ॥२३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यज्ञारण्ये सन्तिष्ठत इत्याहुरत्युक्थान्येत्यति षोडशिनं न रात्रिं प्राप्नोतीति ॥२४॥ विष्णोः शिपिविष्टवतीषु बृहदुत्तमं भवति ॥२५॥ एषा वै प्रजापतेः पशुष्ठा तनूर्य्यच्छिपिविष्टः प्राणो बृहत् प्राण एव पशुषु प्रतितिष्ठति ॥२६॥ बृहता स्तुवन्ति बृहदमुँ ल्लोकमाप्तुमर्हति तमेवाप्नोति ॥२७॥ इति षष्ठःखण्डः॥१८/६॥

प्रजापतिरकामयत वाजमाप्नुयाँ स्वर्ग्गँल्लोकमिति स एतँ वाजपेयमपश्यद्वाजपेयो वा एष वाजमेवैतेन स्वर्ग्गँ ल्लोकमाप्नोति ॥१॥ शुक्रवत्यो ज्योतिष्मत्यः प्रातस्सवने भवन्ति तेजो ब्रह्मवर्च्चसं ताभिरवरुन्धे ॥२॥ वाजवत्यो माध्यन्दिने भवन्ति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥३॥ अन्नवत्यो गणवत्यः पशुमत्यस्तृतीयसवने भवन्ति भूमानं ताभिरवरुन्धे ॥४॥ सर्व्वः सप्तदशो भवति प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवाप्नोति ॥५॥ हिरण्यस्रज ऋत्विजो भवन्ति महस एव तद्रूपं क्रियते ॥६॥ एष मेऽमुष्मिँल्लोके प्रकाशोऽसदिति ॥७॥ ज्योतिर्व्वै हिरण्यं ज्योतिरेवास्मिन् दधाति ॥८॥ आजिन्धावति यजमानमुज्जापयन्ति स्वर्ग्गमेवैनन्तल्लोकमुज्जापयन्ति ॥९॥ नाकँ रोहति स्वर्ग्गमेव तल्लोकँ रोहति ॥१०॥ सरजसे रोहति मनुष्यलोकादेवैनमन्तर्द्दधति ॥११॥ वाजिनाँ साम ब्रह्मा रथचक्रेऽभिगायति वाजो वै स्वर्ग्गो लोकः स्वर्ग्गमेवैनं तल्लोकमुज्जापयति ॥१२॥ विष्णोः शिपिविष्टवतीषु बृहदुत्तमं भवति स्वर्ग्गमेव तल्लोकँ रूढ्वा ब्रध्नस्य विष्टपमभ्यतिक्रामति ॥१३॥ इति सप्तमःखण्डः॥१८/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निष्टोमं प्रथममाहरति यज्ञमुखँ वा अग्निष्टोमो यज्ञमुखमेवारभ्य सवमाक्रमते ॥१॥ अथैषोऽभिषेचनीयः॥२॥ तस्य द्वात्रिँशाः पवमाना द्वात्रिँशदक्षरानुष्टुब्वागनुष्टुब्व्यावती वाक् तयैव सूयते ॥३॥ तदाहुः सँशर इव वा एष छन्दसाँय्यद्विषमा स्तोमा अयथापूर्व्वमिति ॥४॥ यत्समाः पवमानास्तेनासँशर-स्तेन यथापूर्व्वम् ॥५॥ आत्मना वा अग्निष्टोमेनर्ध्नोत्यात्मना पुण्यो भवत्यथ यदुक्थानि पशवो वा उक्थानि विडुक्थानि यदुक्थानि भवन्त्यनु सन्तत्या एव ॥६॥ वायो शुक्रो अयामित इति वायव्या प्रतिपद्भवति वाग्वै वायुर्व्वाचमेवास्य यज्ञमुखे युनक्ति तयाभिषिच्यते सर्व्वस्या एव वाचः सूयते सर्व्वा एनँ वाचो राजेति वदन्ति ॥७॥ सम्भार्य्या भवन्ति पृष्ठान्येव ताभिर्य्युनक्ति यन्नानादेवत्यास्तेन युनक्ति वीर्य्यँ वै पृष्ठानि वीर्य्य एवाध्यभिषिच्यते ॥८॥ यन्ति वा एते यज्ञमुखादित्याहुर्य्ये सम्भार्य्याः कुर्व्वत इति ॥९॥ यत् पवस्व वाचो अग्रिय इति तेन यज्ञमुखान्नयन्ति ॥१०॥ दविद्युतत्या रुचेति छन्दसाँ रूपं छन्दाँस्येवास्य यज्ञमुखे युनक्ति तैरभिषिच्यते ॥११॥ एतमुत्यं दश क्षिप इत्यादित्या आदित्या वा इमाः प्रजास्तासामेव मध्यतः सूयते ॥१२॥ पवस्वेन्दो वृषा सुत इति वृषण्वत्यो भवन्ति त्रिष्टुभो रूपँ वीर्य्यँ वै त्रिष्टुप् वीर्य्य एवाध्यभिषिच्यते ॥१३॥ उत्ते शुष्मास ईरत इत्युद्वत्यो भवन्त्युद्वद्वा अनुष्टुभो रूपमानुष्टुभो राजन्यस्तस्मादुद्वत्यो भवन्ति ॥१४॥ पवमानस्य ते कव इति प्राणानां क्लृप्त्यै ॥१५॥ अध क्षपा परिष्कृत इत्यनुष्टुप् प्रथमानुष्टुबुत्तमा वाग्वा अनुष्टुप् वाचैव प्रयन्ति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वाचमभ्युद्यन्ति ॥१६॥ छिन्नमिव वा एतद्यदेकर्च्चा यदेता-वानुष्टुभौ तृचावभितो भवतो बहवः पुर एतारो भवन्ति बहवः पश्चापिनः ॥१७॥ सौर्य्यानुष्टुबुत्तमा भवति स्वर्गस्य लोकस्य समष्ट्यै ॥१८॥ इत्यष्टमः खण्डः ॥१८/८॥

वरुणस्य वै सुषुवाणस्य भर्गोऽपाक्रामत्स त्रेधापतद्भृगु-स्तृतीयमभवच्छ्रायन्तीयं तृतीयमपस्तृतीयं प्राविशत् ॥१॥ यद्भार्गवो होता भवति तेनैव तदिन्द्रियँ वीर्य्यमाप्त्वावरुन्धे यत् श्रायन्तीयं ब्रह्मसाम भवति तेनैव तदिन्द्रियँ वीर्य्यमाप्त्वावरुन्धे यत् पुष्करस्रजं प्रतिमुञ्चते तेनैव तदिन्द्रियँ वीर्य्यमाप्त्वावरुन्धे ॥२॥ दशमी भवति ॥३॥ दशचमसा दशचमसाध्वर्य्यवो दश दश चमसमभयन्त्यादशमात् पुरुषादन्वाख्याय प्रसर्प्पन्ति दश समृद्धो ह्येष यज्ञ एनँ वाव ते तद्यज्ञमन्वैच्छन्य एतेन यजत एतदेवेन्द्रियँ वीर्य्यमाप्त्वास्मिन् दधाति ॥४॥ सर्व्वस्सप्तदशो भवति द्वादश मासाः पञ्चर्त्तवः स वै सँवत्सरः सँवत्सरा-देवेन्द्रियँ वीर्य्यमाप्त्वावरुन्धे ॥५॥ इन्द्रो वृत्रमहँस्तस्येयं चित्राण्युपैद् रूपाण्यसौ नक्षत्राणामवकाशेन पुण्डरीकं जायते यत् पुष्करस्रजं प्रतिमुञ्चते वृत्रस्यैव तद्रूपं क्षत्रं प्रतिमुञ्चते ॥६॥द्वादशपुष्करा भवति द्वादशमासाः सँवत्सरः सँवत्सरेऽन्त-र्भूतञ्च भव्यञ्च भूतेन चैवैनं भव्येन च समर्द्धयति ॥७॥ स्रगुद्गातुस्सौर्य्य उद्गाता न वै तस्मै व्यौच्छदथो व्येवास्मै वासयति ॥८॥ रुक्मो होतुराग्नेयो होताथो अमुमेवास्मा आदित्यमुन्नयति ॥९॥ प्राकाशावध्वर्य्योर्य्यमा विवह्यध्वर्य्यू अथो चक्षुषी एवास्मिन् दधाति॥१०॥ अश्वः प्रस्तोतुः प्राजापत्योऽश्वः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राजापत्यः प्रस्तोताथो प्रेव ह्यश्वः प्रोथति प्रेव प्रस्तोता स्तौति ॥११॥ धेनुः प्रतिहर्त्तुः पय एवास्मिन् दधाति ॥१२॥ वशा मैत्रावरुणस्य वशं मा नयादिति ॥१३॥ ऋषभो ब्राह्मणाच्छँसिनो वीर्य्यँ वा ऋषभो वीर्य्यमेवास्मिन् दधाति ॥१४॥ वासः पोतुः पवित्रत्वाय ॥१५॥ वरासी नेष्टुरनुलम्बेव ह्येषा होत्रा ॥१६॥ स्थूरियवाचितमच्छावाकस्य स्थूरिरिव ह्येषा होत्राथो निर्व्वरुणत्वायैव यवा न वैतर्हि सदस्यां दक्षिणा अभ्यभवन्नथो अस्य त एव तेनाभीष्टाः प्रीता भवन्ति ॥१७॥ अनड्वानग्नीधो युक्त्यै ॥१८॥ अजः सुब्रह्मण्यायै ॥१९॥ वत्सतर्य्युन्नेतुः साण्डस्त्रिवत्सो ग्रावस्तुतो मिथुनत्वाय ॥२०॥ द्वादशषष्ठौ ह्यो गर्भिण्यो ब्रह्मणो द्वादशमासाः सँवत्सरः सँवत्सर एव प्रतितिष्ठत्यथ यद्गर्भिण्यो वाग्वै धेनुर्म्मन्त्रो गर्भो वाच्ये वास्य मन्त्रं दधात्यामन्त्रणीयो भवत्यथ यद्धेनुभव्या द्वादशपयाँसि तान्येवास्मिन् दधाति तस्मादाहुः पयस्वी राजा पुण्य इति ॥२१॥ इति नवमः खण्डः ॥१८/९॥

यो वै सवादेति नैनँ सव उपनमत्यथ यः सामभ्य एति पापीयान् सुषुवाणो भवति ॥१॥ सम्भार्य्या भवन्ति पृष्ठान्येव ताभिर्य्युनक्ति ॥२॥ एतानि वाव सामानि यत्पृष्ठानि ॥३॥ यत्सम्भार्य्या भवन्ति तदेव सामभ्यो नैति ॥४॥ यानि देवराज्ञाँ सामानि तैरमुष्मिँल्लोक ऋद्ध्नोति यानि मनुष्यराज्ञां तैरस्मिन्नुभयोरनयोर्ल्लोकयोर्ऋद्ध्नोति देवलोके च मनुष्यलोके च ॥५॥ साम त्रिष्टुभ्यध्यभिषिच्यते वीर्य्यँ वै साम त्रिष्टुप् वीर्य्य एवाध्यभिषिच्यते ॥६॥ एकादश राजसामानि भवन्त्येका-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दशाक्षरा त्रिष्टुबोजो वीर्य्यं त्रिष्टुबोजस्येव वीर्य्येऽध्यभिषिच्यते ॥७॥ यत्त्रिवृतमभिषेचनीये कुर्य्युर्ब्रह्म क्षत्रायापि दध्युर्य्यत्त्रि-वृतमुद्धरन्ति ब्रह्म तत् क्षत्रादुद्धरन्ति तस्माद्धरतां प्रतिदण्डा ब्राह्मणा न हि ते त्रिवृतमभिषेचनीये कुर्व्वन्ति ॥८॥ एकविँशोऽभिषेचनीयस्योत्तमः सप्तदशो दशपेय एकविँशः केशवपनीयस्य प्रथमः क्षत्रँ वा एकविँशो विट्सप्तदशः क्षत्रेणैवास्मै विशमुभयतः परिगृह्णात्यनपक्रामुका स्माद्विड्भवति ॥९॥ यद्वै राजसूयेनाभिषिच्यते यत् स्वर्ग्गँल्लोकमारोहति स यदिमँल्लोकन्नोपावरोदति जनँ वा गच्छेदुद्वामाद्ये द्यदेषो ऽर्व्वाचीनस्तोमः केशवपनीयो भवत्यस्य लोकस्यानुद्धानाय यथा शाखायाः शाखामालम्भमुपावरोहेदेवमेतेनेमँल्लोक-मुपावरोहति प्रतिष्ठायै ॥१०॥ इति दशमः खण्डः॥१८/१०॥

इन्द्रो वृत्रमहन् स विष्वङ्वीर्य्येण व्यभ्रँशत स एतच्छ्रायन्तीयमपश्यत्तेनात्मानँ समश्रीणादिन्द्रियेण वा एष वीर्य्येण व्यृध्यते यो राजसूयेनाभिषिच्यते वृत्रँ हि हन्ति यच्छ्रायन्तीयं ब्रह्मसाम भवति पुनरेवात्मानँ सँश्रीणाति ॥१॥ यज्ञायज्ञीयमनुष्टुभि भवति वाचा वा एष व्यृध्यते यो राजसूयेना भिषिच्यते वृत्रँ हि हन्ति वागनुष्टुब्वाचो रसो यज्ञायज्ञीयँ वाच्येवास्य रसं दधाति ॥२॥ वारवन्तीयमग्निष्टोमसाम भवतीन्द्रियेण वा एष वीर्य्येण व्यृध्यते यो राजसूयेनाभिषिच्यते वृत्रँ हि हन्ति यद्वारवन्तीयमग्निष्टोमसाम भवतीन्द्रियस्य वीर्य्यस्य परिगृहीत्यै ॥३॥ अश्रयन्वाव श्रायन्तीयेनावारयन्त वारवन्तीयेनेन्द्रियस्य वा एषा वीर्य्यस्य परिगृहीतिः ॥४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अप्रतिष्ठितो वा एष यो राजसूयेनाभिषिच्यते यदा वा एतेन द्विरात्रेण यजतेऽथैव प्रतिष्ठा ॥५॥ यावन्ति सँवत्सरस्याहोरात्राणि तावत्य एताः स्तोत्रीयास्सँवत्सर एव प्रतितिष्ठति ॥६॥ अग्निष्टोमः पूर्वमहरतिरात्र उत्तरं नानैवाहोरात्रयोः प्रतितिष्ठति ॥७॥ अमावास्यायां पूर्व्वमहरुदृष्ट उत्तरं नानैवार्द्धमासयोः प्रतितिष्ठति पौर्ण्णमास्यां पूर्व्वमहर्व्यष्टकायामुत्तरं नानैव मासोः प्रतितिष्ठति तदाहुर्य्य एव समानपक्षे पुण्याहनी स्यातां तयोरेव कार्य्यँ समृद्ध्यै ॥८॥ अपशव्यो द्विरात्र इत्याहुर्द्वे ह्येते छन्दसी गायत्रञ्च त्रैष्टुभञ्च जगतीमन्तर्य्यन्तीति न तेन जगती कृता यत्तृतीयसवने क्रियते ॥९॥ यदा वा एषा हीनस्याहर्भजते साह्नस्य वा सवनमथैव जगती कृता त्रैशोकमुत्तरस्याह्नो ब्रह्मसाम भवति वैखानसमच्छावाक साम यच्छुक्रिये सवने क्रियेते तेनैव जगती कृता तेन पशव्यः ॥१०॥ व्युष्टिर्व्वा एष द्विरात्रो व्येवास्मै वासयति ॥११॥ इत्येकादशःखण्डः ॥१८/११॥

इत्यष्टादशोऽध्यायः

अथैकोनविँशोऽध्यायः

अथैष राट् ॥१॥ यो राज्य आशँसमानो राज्यं न प्राप्नुयात्स एतेन यजेत राजैवैनँ राजानं करोति तं तु वैराजेति वदेयुर्य्यँ राजा राजानं कुर्य्याद्राजैवैनँ राजानं करोति ॥२॥ छन्दोऽन्ये यज्ञस्सम्पद्यन्ते स्तोममेष वीर्य्यँ वै स्तोमो वीर्य्य एवाध्यभिषिच्यते ॥३॥ अष्टावेकविँशाः सँस्तुतो भवत्यष्टौ वै वीरा राष्ट्रँ समुद्यच्छन्ति राजभ्राता च रजपुत्रश्च पुरोहितश्च

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महिषी च सूतश्च ग्रामणी च क्षत्ता च सङ्ग्रहीता चैते वै वीरा राष्ट्रँ समुद्यच्छन्त्येतेष्वेवाध्यभिषिच्यते ॥४॥ क्षत्रँ वा एकविँशः प्रतिष्ठा क्षत्रस्येवास्य प्रकाशो भवति प्रतितिष्ठति य एवँ वेद ॥५॥ इति प्रथमःखण्डः॥१९/१॥

अथैष विराडन्नाद्यकामो यजेत ॥१॥ परोक्षमन्ये यज्ञा विराजँ सम्पद्यन्ते प्रत्यक्षमेष विराजँ सम्पन्नः ॥२॥ प्रत्यक्षमेतेनान्नाद्यमवरुन्धे अन्नादो भवति य एवँ वेद ॥३॥ सर्व्वो दशदशी भवति दशाक्षरा विराड्वैराजमन्नमन्नाद्य-स्यावरुध्यै ॥४॥ ता उ पञ्चपञ्च भवन्ति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञ एव पशुषु प्रतितिष्ठति ॥५॥ एतेनैव प्रतिष्ठाकामो यजेत दशभिर्व्वा इदं पुरुषः प्रतिष्ठितोऽस्यामेव प्रतितिष्ठति ॥६॥ इति द्वितीयः खण्डः॥१९/२॥

अथैष औपशदः॥१॥ गन्धर्व्वाप्सरसाँ स्तोमः प्रजाकामो यजेत गन्धर्व्वाप्सरसो वै मनुष्यस्य प्रजाया वाप्रजस्ताया वेशते तेषामत्र सोमपीथस्तान् स्वेन भागधेयेन प्रीणाति तेऽस्मै तृप्ताः प्रीताः प्रजां प्रयच्छन्ति ॥२॥ एकैका स्तोत्रीयोपजायते प्रजामेवास्मा उप जनयति ॥३॥ ककुभं प्राचीमुदूहति पुरुषो वै ककुब्गार्भ एव स मध्यतो धीयते ॥४॥ अथ यदेषा द्विपदा ककुभो लोके क्रियते गर्भमेव तद्धि तं प्रजनयति ॥५॥ च्यावनं भवति प्रजातिर्व्वै च्यावनम् ॥६॥ प्रजायते बहुर्भवति य एवँ वेद ॥७॥ वसिष्ठस्य जनित्रे भवतो वसिष्ठो वा एते पुत्रहतः सामनी अपश्यत् स प्रजया पशुभिः प्राजायत यदेते सामनी भवतः प्रजात्यै ॥८॥ द्वे सँस्तुतानाँ विराजमतिरिच्येते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वे स्त्रिया ऊने प्रजननाय प्रजननमेव तत्क्रियते प्रजात्यै ॥९॥ इति तृतीयः खण्डः ॥१९/३॥

अथैष पुनस्तोमः ॥१॥ यो बहुप्रतिगृह्य गरगीरिव मन्येत स एतेन यजेत ॥२॥ यैकादशी यदेव पूर्व्ववयसे बहुप्रतिगृह्णाति यद्गरं गिरति यदनन्नमत्ति प्रातस्सवनाय तन्निहरति ॥३॥ अथ या द्वादशी यदेवोत्तरवयसे बहुप्रतिगृह्णाति यद्गरं गिरति यदनन्नमत्ति तृतीयसवनाय तन्निहरति ॥४॥ वैराजो वै पुरुषः स मध्यतोऽशुद्धो मध्यत एवैनं पाप्मनो मुञ्चति ॥५॥ शुद्धाशुद्धीये भवतः ॥६॥ इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत् सोऽशुद्धोऽमन्यत स एते शुद्धाशुद्धीये अपश्यत् ताभ्यामशुद्ध्यत् ॥७॥ यदेव बहुप्रतिगृह्णाति यदनन्नमत्ति यदशुद्धो मन्यते तदेताभ्याँ शुद्ध्यति ॥८॥ गौषूक्तञ्चाश्वसूक्तञ्च भवतः ॥९॥ गौषूक्तिश्चाश्वसूक्तिश्च बहुप्रतिगृह्य गरगिरावमन्येतां तावेते सामनी अपश्यतां ताभ्यां गरं निरघ्नाताँ यदेव बहु प्रतिगृह्णाति यद्गरं गिरति यदनन्नमत्ति तदेताभ्यां निर्हते ॥१०॥ पञ्चदशस्तोत्राणि भवन्त्योजो वीर्य्यं पञ्चदशः पाप्मन एवैनं मुक्त्वौजसा वीर्य्येण समर्द्धयति ॥११॥ इति चतुर्थःखण्डः॥१९/४॥

अथैष चतुष्टोमः॥१॥पशुकामो यजेत ॥२॥ यच्चतसृभिर्ब्बहिष्पवमानं भवति चतुष्पादाः पशवः पशूनेवावरुन्धे ॥३॥ यदष्टाभिराज्यान्यष्टाशफाः पशवः शफशस्तत् पशूनाप्नोति ॥४॥ यत् द्वादशो माध्यन्दिनः पवमानो द्वादशमासाः सँवत्सरः सँवत्सरं पशवोऽनु प्रजायन्ते तानेवावरुन्धे ॥५॥ यत् षोडशानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठानि षोडशकलाः पशवः कलाशस्तत्पशूनाप्नोति ॥६॥ यद्विँश आर्भवः पाङ्क्तत्वमेषां तदाप्नोति ॥७॥ यच्चतुर्व्विँशोऽग्निष्टोमश्चतुर्व्विँशत्यक्षरा गायत्री तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमवरुन्धे ॥८॥ प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥९॥ एकँ साम बहूनि छन्दाँसि तस्मादेको बहून् पोषान् पुष्यति ॥१०॥ आत्मा वा अग्निष्टोमः पशवश्छन्दाँसि आत्मन्येव तत्पशून् प्रतिष्ठापयति नोक्थो नाग्निष्टोमो न हि ग्राम्याः पशवो नारण्याः॥११॥ इति पञ्चमः खण्डः ॥१९/५॥

अथ यस्य चत्वारि स्तोत्राणि चतसृभिश्चत्वार्य्यष्टाभिश्चत्वारि द्वादशभिश्चत्वारि षोडशभिस्स गां नातिवदति ॥१॥ षोडशकलाः पशवः कलाशस्तत्पशूनाप्नोति ॥२॥ उक्थः षोडशिमान् भवति पशवो वा उक्थानि वज्रः षोडशी वज्रेणैवास्मै पशून् परिगृह्णात्यनपक्रामुका अस्मात्पशवो भवन्ति नोक्थो नातिरात्रो न हि ग्राम्याः पशवो नारण्याः ॥३॥ इति षष्ठः खण्डः ॥१९/६॥

असुराणाँ वै बलस्तमसा प्रावृतोऽश्मापिधानश्चासीत्तस्मिन् गव्यँ वस्वन्तरासीत्तं देवा नाशक्नुवन् भेत्तुं ते बृहस्पतिमब्रुवन्निमान्न उत्सृजेति स उद्भिदैव बलँ व्यच्यावयद्बलभिदा भिनत्तानुत्सेधेनैवोदसृजन्निषेधेन पर्य्यगृह्णात् ॥१॥ पशुकामो यजेत ॥२॥ यदुद्भिदा यजते बलमेवास्मै विच्यावयति यद्बलभिदा बलमेवास्मै भिनत्ति॥३॥ उत्सेधनिषेधौ ब्रह्मसामनी भवत उत्सेधेनैवास्मै पशूनुत्सिद्ध्य निषेधेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परिगृह्णाति ॥४॥ यज्ञ इन्द्रमवर्द्धयदिति ब्रह्मण आज्यँ रूपेण समृद्धम् ॥५॥ सप्ति सप्तदशौ भवतो यत्सप्तभिः स्तुवन्ति सप्तग्राम्याः पशवः पशूनेवावरुन्धे सप्तपदा शक्वरी पशवः शक्वरी पशूनेवावरुन्धेऽथ यत्सप्तदशभिः प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवाप्नोति ॥६॥ गायत्रीँ सम्पद्यते तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमवरुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते॥७॥इतिसप्तमःखण्डः॥१९/७॥

अथैषोऽपचितिरपचितिकामो यजेतापचित्यैवास्मा अपचितिँ विन्दति ॥१॥ तस्य चतुर्व्विँशौ पवमानौ चतुर्व्विँशत्यक्षरा गायत्री तेजो ब्रह्मवर्च्चसं गायत्री तेजसैवास्मै ब्रह्मवर्च्चसेनापचितिं विन्दति ॥२॥ उभे बृहद्रथन्तरे भवत उभाभ्यामेवास्मै बृहद्रथन्तराभ्यामपचितिँ विन्दति ॥३॥ भर्ग्गयशसी भवतो भर्ग्गेणैवास्मै भर्ग्गो दधाति यशसा यशः ॥४॥ उभये स्तोमा युग्मन्तश्चायुजश्चोभयैरेवास्मै स्तोमैरपचितिँ विन्दति ॥५॥ तदाहुर्व्विलोमान स्तोमा ईश्वरा यजमानँ विक्षेतो र्व्युह्यति यन्तीति ॥६॥ एकविँशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥७॥इत्यष्टमःखण्डः॥१९/८॥

अथैष सर्व्वस्तोमोऽपचितिरपचितिकामो यजेत सर्व्वैरेवास्मै स्तोमैरपचितिँ विन्दति ॥१॥ विराजँ सम्पद्यत एष वा अपचितो योऽन्नादोऽन्नँ विराडन्नाद्यमेवास्मिन् दधाति ॥२॥ उभे बृहद्रथन्तरे भवतो भर्ग्गयशसी भवत उभये स्तोमा-श्छन्दोमाश्च पृष्ठ्याश्च उभयैरेवास्मै स्तोमैरपचितिँ विन्दति ॥३॥ तस्य छन्दोमाः पृष्ठानि पशवो वै छन्दोमा अन्नं पृष्ठान्यभि-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पूर्व्वमेवास्मिन्नन्नाद्यं पशून्दधाति यच्छन्दोमवाँस्तेन द्वादशाह-याजिनमाप्नोति ॥४॥ तदाहुर्न्नानालोकाः स्तोमाश्छन्दोमाश्च पृष्ठ्याश्च यदेकस्मिन् यज्ञक्रतौ समवरुध्यन्त ईश्वरा यजमानो ऽप्रतिष्ठातोरिति ॥५॥ एकविँशोऽग्निष्टोमो भवति प्रतिष्ठा वा एकविँशः प्रतिष्ठामेव तदभ्यायन्ति ॥६॥ इति नवमःखण्डः ॥१९/९॥

पक्षी वा एष स्तोमः ॥१॥ पक्ष्येष निधीयते ॥२॥ न वा अपक्षः पक्षिणमाप्नोत्यथ यदेष पक्षी पक्षिणि निधीयते तस्मात्पक्षिणः पक्षैः पतन्ति ॥३॥ पक्षी ज्योतिष्मान् पुण्यान् लोकान् सञ्चरति य एवँ वेद ॥४॥ त्रिवृतावभितो भवतस्तेजो ब्रह्मवर्च्चसं त्रिवृत्तेज एव ब्रह्मवर्च्चसमवरुन्धे ॥५॥ अथ पञ्चदशौ वीर्य्यँ वै पञ्चदशो वीर्य्यमेवावरुन्धे ॥६॥ अथ सप्तदशौ पशवो वै सप्तदशः पशूनेवावरुन्धे ॥७॥ अथैकविँशौ प्रतिष्ठा वा एकविँशो मध्यत एव यज्ञस्य प्रतितिष्ठति ॥८॥ अथ त्रिणवाविमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रतितिष्ठति ॥९॥ अथ त्रयस्त्रिँशौ वर्ष्म वै त्रयस्त्रिँशः ॥१०॥ वर्ष्म स्वानां भवति य एवँ वेद ॥११॥ एष वाव ब्रध्नस्य विष्टपो यदेतौ त्रयस्त्रिँशौ मध्यतः सन्धीयेते तेन ब्रध्नस्य विष्टपमारोहति॥१२॥ मध्यतो वा अग्निर्व्वरिष्ठस्तस्मादेते स्तोमा मध्यतो वरिष्ठाः क्रियन्ते ॥१३॥ त्रिवृता प्रैति त्रिवृतोदेति प्राणो वै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति॥१४॥ इति दशमःखण्डः॥१९/१०॥

अथैष ज्योतिः॥१॥ तस्य त्रिवृद्बहि ष्पवमानं पञ्चदशा-न्याज्यानि चतुर्व्विँशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि ॥२॥ प्राणो वै त्रिवृदात्मा पञ्चदशः ॥३॥ मुखं गायत्र्यन्नँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सप्तदशो मुखत एव तदन्नं धत्ते ॥४॥ अन्नमत्यन्नादो भवति य एवँ वेद ॥५॥ माध्यन्दिनेन वै पवमानेन देवाःस्वर्ग्गँल्लोक-मायन्यदेष चतुर्व्विँशो माध्यन्दिनः पवमानो भवति स्वर्ग्गस्य लोकस्याक्रान्त्यै चतुर्व्विँशत्यक्षरा गायत्री तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चसमवरुन्धे प्राणो गायत्री प्रजननं प्राणादेव गायत्र्याः प्रजायते ॥६॥ उभये स्तोमा युग्मन्तश्चायु-जश्च तन्मिथुनं तस्मान्मिथुनात् प्रजायते ॥७॥ पक्षि वा एतच्छन्दः पक्षी ज्योतिष्मान् पुण्यान् लोकान् सञ्चरति य एवँ वेद ॥८॥ मध्यतो वा अग्निर्व्वरिष्ठस्तस्मादेते स्तोमा मध्यतो वरिष्ठाः क्रियन्ते ॥९॥ एका सँस्तुतानाँ विराजमतिरिच्यत एकाकिनमेवैनमन्नाद्यस्याध्यक्षं करोति ॥१०॥ ज्योतिर्व्वा एषोऽग्निष्टोमो ज्योतिष्मन्तं पुण्यँल्लोकं जयति य एवँ विद्वानेतेन यजते ॥११॥ इत्येकादशः खण्डः ॥१९/११॥

अथैष ऋषभः॥१॥ ऋषभो वा एष स्तोमानामृषभतां गच्छति य एवँ वेद ॥२॥ राजन्यँ याजये दृषभो वै पशूना-मधिपती राजन्यो मनुष्याणाँ यो वा अस्ति सोऽधिपतिः॥३॥ अधिपतिः समानानां भवति य एवँ वेद ॥४॥ तस्य सदोविशीयं माध्यन्दिने पवमाने भवति विशमेवास्मै सवनाभ्यां परिगृह्णात्यनपक्रामुकास्माद्विड्भवति ॥५॥ समन्तं भवति समन्तामेवास्मै विशं करोत्यनपक्रामुकास्माद्विड्भवति ॥६॥ उभे बृहद्रथन्तरे भवत इयँ वै रथन्तरं द्यौर्बृहदेवास्मा-ल्लोकाद्गायत्येवामुष्मादुभयोरनयोर्ल्लोकयोः प्रतितिष्ठति ॥७॥ अनुष्टुभि बृहद्भवत्यन्तो वा अनुष्टुप्छन्दसामन्तो बृहत्साम्नामन्तो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

राजन्यो मनुष्याणामन्त एव तदन्तं प्रतिष्ठापयति तस्माद्यो राजन्यानाँ हीयते न स पुनरग्रंपर्य्येति ॥८॥इतिद्वादशःखण्डः॥१९/१२॥

यो वै वाजपेयः स राजसूयो यो राजसूयः स वरुणसवोऽथैष गोसवः स्वाराज्यो यज्ञः ॥१॥ स्वाराज्यं गच्छति य एवँ वेद ॥२॥ प्रजापतिर्हि स्वाराज्यं परमेष्ठी स्वाराज्यम् ॥३॥ परमेष्ठितां गच्छति य एवँ वेद ॥४॥ उभे बृहद्रथन्तरे भवतस्तद्धि स्वाराज्यँ स्वाराज्यं गच्छति य एवँ वेद ॥५॥ अयुतं दक्षिणास्तद्धि स्वाराज्यँ स्वाराज्यं गच्छति य एवँ वेद ॥६॥ प्रतिदुहाभिषिच्यते तद्धि स्वाराज्यँ स्वाराज्यं गच्छति य एवँ वेद ॥७॥ बृहतः स्तोत्रं प्रत्यभिषिच्यते तद्धि स्वाराज्यँ स्वाराज्यं गच्छति य एवँ वेद॥८॥ अनुद्धते दक्षिणत आहवनीयस्याभिषिच्यतेऽस्यामेवानन्तर्हितेऽध्यभिषिच्यते ॥९॥ सर्व्वः षट्त्रिँशस्तेन गोसवः॥१०॥ इति त्रयोदशःखण्डः ॥१९/१३॥

अथैष मरुत्स्तोम एतेन वै मरुतोऽपरिमितां पुष्टिमपुष्यन्नपरिमितां पुष्टिं पुष्यति य एवँ वेद ॥१॥ यद्गणशः स्तोमास्तेन मरुत्स्तोमो गणशो हि मरुतः ॥२॥ एतेनैव त्रीन्याजयेत् ॥३॥ यत्त्रीणि त्रिवृन्ति स्तोत्राणि भवन्ति नाना ब्रह्मवर्च्चसे प्रतितिष्ठन्ति ॥४॥ यत्त्रीणि पञ्चदशानि वीर्य्ये॥५॥ यत्त्रीणि सप्तदशानि नाना पशुषु ॥६॥ यत्त्रीण्येकविँशानि नाना प्रतितिष्ठन्ति ॥७॥ प्रतितिष्ठति य एवँ वेद ॥८॥ इतिचतुर्द्दशःखण्डः॥१९/१४॥

अथैष इन्द्राग्न्योः कुलायः प्रजाकामो वा पशुकामो वा यजेत प्रजा वै कुलायं पशवः कुलायं गृहाः कुलायं कुलायमेव भवति ॥१॥ एतेनैव द्वौ याजयेत् ॥२॥ यत् षट्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिवृन्ति स्तोत्राणि भवन्ति नाना ब्रह्मवर्च्चसे प्रतितिष्ठतो यद्द्वे पञ्चदशे नाना वीर्य्ये यद्द्वे सप्तदशे नाना पशुषु यद्द्वे एकविँशे नाना प्रतितिष्ठतः प्रतितिष्ठति य एवँ वेद ॥३॥ इति पञ्चदशः खण्डः ॥१९/१५॥

अथैष पञ्चदश इन्द्र स्तोम उक्थ्यः ॥१॥ एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्याः प्रजा भवन्ति य एवँ वेद ॥२॥ राजन्यँ याजयेत् ॥३॥ सर्व्वः पञ्चदशो भवत्योजो वीर्य्यं पञ्चदश ओजसैवैनँ वीर्य्येण समर्द्धयति ॥४॥ ऐन्द्रीषु भवन्तीन्द्रियेणैवैनँ वीर्य्येण समर्द्धयति ॥५॥ उक्थ्यो भवति पशवो वा उक्थानि विडुक्थानि विशमेवास्मै पशूननु नियुनक्त्यनपक्रामुकास्माद्विड्भवति ॥६॥ पञ्चदशस्तोत्राणि पञ्चदशानि भवन्त्योजो वीर्य्यं पञ्चदशोऽभि पूर्व्वमेवास्मिन्नोजो वीर्य्यं दधाति॥७॥ इति षोडशः खण्डः॥१९/१६॥

अथैष इन्द्राग्न्योः स्तोम एतेन वा इन्द्राग्नी अत्यन्या देवता अभवतामत्यन्याः प्रजा भवति य एवँ वेद ॥१॥ त्रिवृत् पञ्चदशो भवति ॥२॥ ब्रह्म वै त्रिवृत्क्षत्रं पञ्चदशो ब्रह्मण इव चास्य क्षत्रस्येव च प्रकाशो भवति य एवँ वेद ॥३॥ राजा च पुरोहितश्च यजेयाताम् ॥४॥ गायत्रीञ्च जगतीञ्च सम्पद्यते ॥५॥ तेजो ब्रह्मवर्च्चसं गायत्र्या ब्राह्मणोऽवरुन्धे विशँ राजा जगत्या प्रविशति ॥६॥ पुरोधाकामो यजेत ॥७॥ बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति स एतेनायजत स देवानां पुरोधामगच्छद्गच्छति पुरोधाँ य एवँ वेद ॥८॥ इति सप्तदशः खण्डः ॥१९/१७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथैष विघनः॥१॥ इन्द्रोऽकामयत पाप्मानं भ्रातृव्यँ विहन्यामिति स एतँ विघनमपश्यत्तेन पाप्मानं भ्रातृव्यँ व्यहन् वि पाप्मानं भ्रातृव्यँ हते य एवँ वेद ॥२॥ यत् त्रिवृद्भवति प्राणाँस्तेनावरुन्धे यद्द्वादशः सँवत्सरं तेन यत्पञ्चदशो वीर्य्यं तेन यत्सप्तदशोऽन्नाद्यं तेन यदेकविँशः प्रतिष्ठा तेन यन्नवदशः प्रजननं तेन यच्चतुर्विँशो ब्रह्मवर्च्चसं तेन यत्त्रिणवो वज्त्रं भ्रातृव्याय प्रहरति ॥३॥ पशुकामो यजेत बृहतीँ सम्पद्यते पशवो वै बृहती पशूनेवावरुन्धे ॥४॥ षडेता बृहत्यो भवन्ति षड्तवः सँवत्सरःसँवत्सरं पशवोऽनुप्रजायन्ते तानेवाप्त्वावरुन्धे ॥५॥ इत्यष्टादशः खण्डः॥१९/१८॥

इन्द्रमदेव्यो माया असचन्त स प्रजापतिमुपाधावत्तस्मा एतँ विघनं प्रायच्छत् तेन सर्व्वा मृधो व्यहत यद्व्यहत तद्विघनस्य विघनत्वम् ॥१॥ सर्व्वामृधो विहते य एवँ विद्वान्विघनेन यजते यमेवँ विद्वान्विघनेन याजयति ॥२॥ पशुकामो यजेत पशवो वै बृहती पशुष्वेव प्रतितिष्ठति ॥३॥ इत्येकोनविँशः खण्डः॥१९/१९॥ **इत्येकोनविँशोऽध्यायः**

अथ विँशोऽध्यायः

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदशआर्भव एकविँशोऽग्निष्टोमः सोक्थ्यः पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥१॥ ज्योतिष्टोमेनातिरात्रेणर्द्धिकामो यजेताभिक्रामा वा एष स्तोमानामभिक्रान्त्या अभिक्रान्तेन हि यज्ञस्यर्ध्नोति ॥२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एषोऽग्निष्टोम एष उक्थ्य एषोऽतिरात्रोऽग्निष्टोमेन वै देवा इमँल्लोकमभ्यजयन्नुक्थ्यैरन्तरिक्षँ रात्र्यामुँल्लोकमजयन्नहो रात्राभ्यामभ्यवर्त्तन्त ॥३॥ पराच्यो वा अन्या व्युच्छन्ति प्रतीच्यो ऽन्या एष वाव प्रतीची व्युच्छति याश्विनेन व्युच्छति प्रतीची रेवास्मा उषसो विवासयति ॥४॥ द्वे सँस्तुतानाँ विराजमति रिच्येते एषा वै स्तनवती विराट् यं कामं कामयते तमेतां दुग्धे ॥५॥ त्रिवृता प्रैति त्रिवृतोदेति प्राणो वै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति ॥६॥ इति प्रथमः खण्डः॥२०/१॥

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविँशानि पृष्ठानि त्रिणव आर्भवस्त्रय-स्त्रिँशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथमं द्वे एकविँशे सषोडशिके पञ्चदशी रात्रिस्त्रिवृत्सन्धिः॥१॥ सर्व्वस्तोमेनातिरात्रेण बुभूषन्यजेत सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वमेवैतेनाप्नोति सर्व्वं जयति ॥२॥ यत्त्रिवृद्बहिष्पवमानं भवति तत्त्रिवृतँ स्तोममाप्नोति गायत्रीं छन्दो यत्पञ्चदशा-न्याज्यानि तत्पञ्चदशँ स्तोममाप्नोति त्रिष्टुभं छन्दो यत्सप्तदशो माध्यन्दिनः पवमानस्तत्सप्तदशँ स्तोममाप्नोति जगतीं छन्दो यदेकविँशानि पृष्ठानि तदेकविँशँ स्तोममाप्नोति अनुष्टुभं छन्दो यत्त्रिणव आर्भवस्तत्त्रिणवँ स्तोममाप्नोति पङ्क्तिं छन्दो यत्त्रयस्त्रिँशोऽग्निष्टोमस्तत्त्रयस्त्रिँशँ स्तोम-माप्नोति विराजं छन्दो यदुष्णिक्ककुभौ क्रियेते तदुष्णिक्ककु-भावाप्नोति यद्बृहतीषु सन्धिना स्तुवन्ति तद्बृहतीमाप्नोति यदाश्विनँ शस्यते तत्सर्व्वमेवैतेनाप्नोति सर्व्वं जयति ॥३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राच्यँ वै त्रयस्त्रिँशो यज्ञं प्रभुजति तमध्वर्य्युरेकादशिन्या पुरस्तात्प्रत्युद्यच्छत्येकादशरशना एकादशपशव एकादशयूपा भवन्ति तत्त्रयस्त्रिँशे त्रयस्त्रिँशं प्रतिष्ठापयति ॥४॥ तया समुद्यतया रात्र्या यँ यं कामं कामयते तं तमभ्यश्नुते यँ यं कामं कामयते तं तमभ्यश्नुते य एवँ वेद ॥५॥ इति द्वितीयः खण्डः ॥२०/२॥

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविँशँ होतुः पृष्ठं छन्दोमा इतराणि त्रिणव आर्भवस्त्रयस्त्रिँशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथममथैकविँशमथ सप्तदशमेकविँशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिस्त्रिवृत् प्रथममतिरिक्तस्तोत्रमथ पञ्चदशमथ सप्तदशमथैकविँशम्॥१॥ प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अपाक्रामँस्तानग्निष्टोमेन नाप्नोत्तानुक्थै-र्नाप्नोत्तान् षोडशिना नाप्नोत्तान्रात्र्या नाप्नोत्तान् सन्धिना नाप्नोत्तानाश्विनेन नाप्नोत्तानग्निमब्रवीदिमान्म ईप्सेति तानग्निस्त्रिवृता स्तोमेन जराबोधीयेन साम्ना नाप्नोत्तानिन्द्र-मब्रवीदिमान्म ईप्सेति तानिन्द्रः पञ्चदशेन स्तोमेन सत्रासाहीयेन साम्ना नाप्नोत्तान् विश्वान् देवानब्रवीदिमान्म ईप्सतेति तान्विश्वेदेवाः सप्तदशेन स्तोमेन मार्ग्गीयवेण साम्ना नाप्नुवँस्तान्विष्णुमब्रवीदिमान्म ईप्सेति तान् विष्णुरेकविँशेन स्तोमेनाप्नोद्वारवन्तीयेनावारयतेदँ विष्णुर्व्विचक्रम इति व्यक्रमत ॥२॥ यस्मात्प्रप्रेव पशवो भ्रँशेरन् स एतेन यजेत ॥३॥ एतेन वै देवा जैत्वानि जित्वा यँ यं काममकामयन्त तं तमाप्नुवन् यं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कामं कामयते तमेतेनाप्नोति ॥४॥ तदप्तोर्य्याम्नोऽप्तोर्य्यामत्वम् ॥५॥ इति तृतीयः खण्डः॥२०/३॥

त्रिवृद्बहिष्पवमानं पञ्चदशँ होतुराज्यं नवसप्तदशानि स्तोत्राण्येकविँशोऽग्निष्टोमः सोक्थ्यः पञ्चदशीरात्रिस्त्रिवृत्सन्धिः ॥१॥ नवसप्तदशेनातिरात्रेण प्रजाकामो यजेत नव वै प्राणाः प्रजापतिः सप्तदशः प्राणेभ्य एव तदधि प्रजापतेः प्रजाः प्रजायन्ते ॥२॥ ककुभं प्राचीमुदूहति पुरुषो वै ककुब्गर्भो वा एष मध्यतो धीयते ॥३॥ तस्याँ साकमश्वम् ॥४॥ प्रजापतिः प्रजा असृजत ता न प्रजायन्त स एतत्सामापश्यत्ता अश्वो भूत्वाभ्यजिघ्रत्ताः प्राजायन्त प्रजननँ वा एतत्साम ॥५॥ प्रजायते बहुर्भवति य एवँ वेद ॥६॥ द्विपदां ककुभो लोके करोति गर्भमेव तद्धितं मध्यतः प्रजनयति ॥७॥ अतिरात्रो भवत्यहोरात्रे वा अनुप्रजाः प्रजायन्तेऽहोरात्रे एवानु प्रजया पशुभिः प्रजायते ॥८॥ इति चतुर्थः खण्डः ॥२०/४॥

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानस्सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविँशोऽग्निष्टोमः सप्तदशान्युक्थानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥१॥ विषुवतातिरात्रेण ज्येष्ठं ज्यैष्ठिनेयँ याजयेत विषुवान्वा एष स्तोमानाँ विषुवानेव भवति ॥२॥ यदेक एकविँशो भवत्येकविँशो वा इतोऽसावादित्यो द्वादशमासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविँश आदित्यस्यैवैनं मात्रां गमयति ॥३॥ एष वा उदेति न वा एनमन्यत् ज्योतिषां ज्योतिः प्रत्युदेति ॥४॥ नैनमन्यः स्वेषु प्रत्युदेति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

य एवँ वेद ॥५॥ इति पञ्चमः खण्डः ॥२०/५॥

पञ्चदशं बहिष्पवमानं त्रिवृन्त्याज्यानि सप्तदशं माध्यन्दिनँ सवनमेकविँशं तृतीयसवनँ सोक्थ्यं पञ्चदशी रात्रिस्त्रिवृत्सन्धिर्गोष्टोमेनातिरात्रेण भ्रातृव्यवान्यजेत गवा वै देवा असुरानेभ्यो लोकेभ्योऽनुदन्त रात्र्यानपजय्यमजय न्नेभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्य रात्र्यानपजय्यं जयति ॥१॥ इति षष्ठः खण्डः ॥२०/६॥

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशं माध्यन्दिनँ सवनमेकविँशं तृतीयसवनँ सोक्थं पञ्चदशी रात्रिस्त्रिवृ-त्सन्धिरायुष्टोमेनातिरात्रेण स्वर्ग्गकामो यजेतोर्ध्वाः स्तोमा यन्त्यनपभ्रँशाय यदतिरात्रो भवत्यहोरात्राभ्यामेव स्वर्गँल्लोक-मेति ॥१॥ इति सप्तमः खण्डः॥२०/७॥

त्रिवृद्बहिष्पवमानं पञ्चदशँ होतुराज्यँ सप्तदशं मैत्रावरुणस्य पञ्चदशं ब्राह्मणाच्छँसिनः सप्तदश-मच्छावाकस्यैकविँशो माध्यन्दिनः पवमानस्सप्तदशँ होतुः पृष्ठमेकविँशं मैत्रावरुणस्य त्रिणवं ब्राह्मणाच्छाँसिन एकविँश-मच्छाँवाकस्य त्रिणव आर्भवस्त्रयस्त्रिँशोऽग्निष्टोमः प्रत्यव-रोहीण्युक्थानि त्रिणवं प्रथमं द्वे एकविँशे स षोडशिके पञ्चदशी रात्रिस्त्रिवृत्सन्धिरभिजितातिरात्रेण भ्रातृव्यवान् यजेताभिजिता वै देवा असुरानिमाँल्लोकानभ्यजयन् रात्र्यानपजय्यमजयन्नभिजितैव भ्रातृव्यमिमाँल्लोकानभिजित्य रात्र्यानपजय्यं भवति ॥१॥ इत्यष्टमः खण्डः ॥२०/८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिवृद्बहिष्पवमानं पञ्चदशँ होतुराज्यँ सप्तदशं मैत्रावरुणस्यैकविँशं ब्राह्मणाच्छँसिनः पञ्चदशमच्छावाकस्य सप्तदशो माध्यन्दिनः पवमान एकविँशँ होतुः पृष्ठं त्रिणवं मैत्रावरुणस्य सप्तदशं ब्राह्मणाच्छँसिन एकविँशमच्छावाकस्य त्रिणव आर्भवस्त्रयस्त्रिँशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथमं द्वे एकविँशे सषोडशिके पञ्चदशी रात्रिस्त्रिवृत्सन्धिर्व्विश्वजितातिरात्रेण पशुकामो यजेत ॥१॥ रेतो हि नाभानेदिष्ठीयं पशवो वालखिल्या यन्नाभानेदिष्ठीयं पूर्व्वँ शस्यत उत्तरा वालखिल्या रेतसस्तत्पशवः प्रजायन्ते रूपाणि विकरोति यद्वार्षाकपमृतुषु प्रतितिष्ठति यदेवयामरुत् ॥२॥ इति नवमः खण्डः ॥२०/९॥

त्रिवृतातिरात्रेण ब्रह्मवर्च्चसकामो यजेत तेजो वै त्रिवृत् ब्रह्मवर्च्चसं तेज एव ब्रह्मवर्च्चसमवरुन्धे तेजसि ब्रह्मवर्च्चसे प्रतितिष्ठति पञ्चदशेनातिरात्रेण वीर्य्यकामो यजेतौजो वीर्य्यं पञ्चदश ओज एव वीर्य्यमवरुन्ध ओजसि वीर्य्ये प्रतितिष्ठति सप्तदशेनातिरात्रेणान्नाद्यकामो यजेतान्नँ वै सप्तदशोऽन्नाद्य-मेवावरुन्ध एकविँशेनातिरात्रेण प्रतिष्ठाकामो यजेत प्रतिष्ठा वा एकविँशो यदतिरात्रो भवत्यहोरात्रयोरेव प्रतितिष्ठति ॥१॥ इति दशमः खण्डः ॥२०/१०॥

ज्योतिष्टोमोऽग्निष्टोमः पूर्व्वमहः सर्व्वस्तोमोऽतिरात्र उत्तरम् ॥१॥ तस्य चतुर्व्विँशं बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविँशानि पृष्ठानि त्रिणव आर्भवस्त्रयस्त्रिँशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि त्रिणवं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रथममथैकविँशमथ सप्तदशमेकविँशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥२॥ अङ्गिरसः स्वर्गँल्लोकमायँस्तेषाँ हविष्माँश्च हविष्कृच्चाङ्गिरसावहीयेतां तावागच्छेताँ यतोऽङ्गिरसः स्वर्गँल्लोकमायँस्तावतप्येतां तावेते सामनी अपश्यतां ताभ्यां द्विरात्रमतन्वातां तेन स्वर्गँल्लोकमैताम् ॥३॥ यः पौण्यो हीन इव स्यात्स एतेन यजेताप्नोति पूर्व्वेषां प्रहामाप्नुताँ हि तावङ्गिरसः ॥४॥ प्रजाकामो यजेत द्वितीयँ ह्येतद्यत्प्रजाः स्वर्ग्गकामो यजेत द्वितीयाद्धि लोकात्परं लोकोऽभिप्रक्रम्यो दुराधो द्विरात्र इत्याहुर्य्यदग्निष्टोमः पूर्व्वमहर्भवत्युक्थ्य-मन्तर्य्यन्ति यद्युक्थ्योऽग्निष्टोमम् ॥५॥ यज्ज्योतिरुक्थ्यः पूर्व्वमहर्भवति नाग्निष्टोममन्तर्य्यन्ति नोक्थानि ॥६॥ तदाहुरेषा वाव यज्ञस्य मात्रा यदग्निष्टोमो यदग्निष्टोमः पूर्व्वमहर्भवति यज्ञस्य मात्रां नातिक्रामत्यथोत्तरस्याह्न उक्थेभ्योऽधिरात्रि-मुपयन्ति तेनोक्थान्यनन्तरितानि ॥७॥ चतुर्व्विँशं बहिष्पवमानं भवत्युत्तरस्याह्नश्चतुर्व्विँशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥८॥ उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात्प्रजायते ॥९॥ सर्व्वस्तोमोऽतिरात्रो भवति सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वमेवैतेनाप्नोति सर्व्वं जयति ॥१०॥ इत्येकादशः खण्डः ॥२०/११॥

अथ यस्य ज्योतिरुक्थ्यः पूर्व्वमहर्भवत्यायुरतिरात्र उत्तरम् ॥१॥ तिस्रः पूर्व्वस्याह्नो विराजमतिरिच्यन्ते द्वाभ्यामुत्तर-महर्व्विराज ऊनमूनातिरिक्तँ वा अनुप्रजाः प्रजायन्ते ॥२॥ प्रप्रजया प्रपशुभिर्ज्जायते य एवँ वेद ॥३॥ एका सँस्तुतानाँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विराजमतिरिच्यत एकाकिनमेवैनमन्नाद्यस्याध्यक्षं करोति ॥४॥ एत्तेन वै चित्ररथं कापेया अयाजयँ स्तमेकाकिनमन्नाद्य-स्याध्यक्षमकुर्व्वँ स्तस्माच्चैत्ररथीनामेकः क्षत्रपतिर्ज्जायते ऽनुलम्ब इव द्वितीयः॥५॥ इति द्वादशः खण्डः॥२०/१२॥

अथ यस्य त्रिवृत्पञ्चदशोऽग्निष्टोमः पूर्व्वमहर्भवत्यायु-रतिरात्र उत्तरम्॥१॥ मिथुनाभ्याँ स्तोमाभ्यामुत्तरमहः प्रजनयन्ति तत्प्रजातँश्च आरभन्ते चक्रे वा एते साकँवृती यत् त्रिवृत्पञ्च-दशौ स्तोमौ यं कामं कामयते तमेतेनाभ्यश्नुते यत्र यत्र हि चक्रीवता कामयते तत्तदभ्यश्नुते ॥२॥ अथ यदायुरतिरात्रो भवति प्रतिष्ठित्यै ॥३॥ एतेन वै कपिवनो भौवायन इष्ट्वा रूक्षतामगच्छत् ॥४॥ अरूक्षो भवति य एवँ विद्वानेतेन यजते ॥५॥ इति त्रयोदशःखण्डः॥२०/१३॥

त्रिवृत्प्रातस्सवनं पञ्चदशं माध्यन्दिनँ सवनँ सप्तदशं तृतीयसवनं पञ्चदशं प्रातस्सवनँ सप्तदशं माध्यन्दिनँ सवनमेकविँशं तृतीयसवनँ सोक्थ्यमेक विँशं प्रातस्सवनं त्रिणवं माध्यन्दिनँ सवनं तयस्त्रिँश आर्भवश्चतुस्त्रिँशो ऽग्निष्टोम एकविँशान्युक्थ्यानि स षोडशिकानि षोडशं प्रथमँ रात्रिषाम पञ्चदशीरात्रिस्त्रिवृत्सन्धिः ॥१॥ प्रजापतिर्व्वा इदमेक आसीत्तस्य वागेव स्वमासीद्वाग् द्वितीया स ऐक्षतेमामेव वाचँ विसृजा इयँ वा इदँ सर्व्वँ विभवन्त्येष्यतीति स वाचँ व्यसृजत सेदँ सर्व्वँ विभवन्त्यैत् सोर्ध्वोदातनोद्यथापां धारा सन्ततैवं तस्या एति तृतीयमच्छिनत्तद्भूमिरभवदभूदिव वा इदमिति तद्भूमेर्भूमित्वं केति तृतीयमच्छिनत्तदन्तरिक्ष-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मभवदन्तरेव वा इदमिति तदन्तरिक्षस्यान्तरिक्षत्वँ हो इति तृतीयमूर्ध्वमुदास्यत्तत् द्यौरभवदद्युतदिव वा अद इति तद्दिवो दिवत्वम् ॥२॥ एषा वाव प्रत्यक्षं वाग्यजिह्वाग्रेणैतद्वाचो वदति यदेति मध्येनैतद्वाचो वदति यत्केति सर्व्वयैतद्वाचो रसोऽध्यूर्ध्व उद्वदति यद्धो इति ॥३॥ यदेतानि रूपाण्यन्वहँ व्यज्यन्ते मुखत एव तद्वाचँ विसृजन्ते मुखतो यज्ञियं कर्म्म ॥४॥ प्रजापतिर्व्वा इदमेकाक्षराँ वाचँ सती त्रेधा व्यकरोत्त इमे लोका अभवन् रूक्षा अनुपजीवनाः स ऐक्षत कथमिमे लोका लोम गृह्णीयुः कथमुपजीवनीयाः स्युरिति स एतं त्रिरात्रमपश्यत्तमाहर-त्तेनेमाँल्लोकानन्वातनोत्ततो वा इमे लोका लोमा गृह्णँस्तत उपजीवनीया अभवँ स्त्रिरात्रस्य वा इदं पुष्टं त्रिरात्रस्योदरणँ-य्यदि दमेषु लोकेष्वधि ॥५॥ गच्छति पशूनां भूमानं द्विपदां चतुष्पदाँ य एवँ वेद ॥६॥ प्रजापतिर्य्यद्वाचँ व्यसृजत साक्षरदेवेति प्रथमं क्षेति द्वितीयँ रेति तृतीयँ येन येन वैरूपेण प्रजापतिर्व्वाचँ व्यसृजत तेन तेन रूपेणाज्यानि चारभ्यन्ते ऽहानि चाप्यन्ते ॥७॥ तदाहुर्ब्रह्मवादिनोऽक्षरेस्था वै त्रिरात्र इत्येकाक्षरा वै वाक् त्र्यक्षरमक्षरं त्र्यक्षरः पुरुषः स वा एनँ वेदेत्याहुर्य्य एनं पुरुषसम्मितं वेदेति ॥८॥ इति चतुर्द्दशः खण्डः ॥२०/१४॥

एतेन वै देवा एषु लोकेष्वाध्नुवन्नेतेन स्वगर्ँल्लोकमायन् ॥१॥ वाग्वै त्रिरात्रो वाचो रूपेणाज्यानि चाहानि च विभज्यन्त एकाक्षरा वै वाक् त्र्यक्षरमक्षरमक्षरस्य रूपेण विभज्यन्ते त्रयो गन्धर्व्वास्तेषामेषा भक्तिरग्नेः पृथिवी वायोरन्तरिक्षमसा-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वादित्यस्य द्यौस्त्रयो घर्म्मास उषसँ सचन्ते ॥२॥ अग्निरुषसँ सचते वायुरुषसँ सचतेऽसावादित्य उषसँ सचते ॥३॥ त्रीणि मिथुनानि तान्येषः ॥४॥ मिथुनं द्वे सम्भवतो मिथुनाद्यत्प्रजायते तत्तृतीयम् ॥५॥ इन्द्रो वृत्राय वज्ज्रमुदयच्छत् सोऽब्रवीन्मा मे प्रहार्षीरस्ति वा इदं मयि वीर्य्यं तत्ते प्रदास्यामीति तदस्मै प्रायच्छत्तद्विष्णुः प्रत्यगृह्णात्स द्वितीयँ स तृतीयमुदयच्छत्स एवाब्रवीन्मा मे प्रहार्षीरस्ति वा इदं मयि वीर्य्यं तत्ते प्रदास्यामीति तदस्मै प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादेतद्वाव तदभ्यनूच्यते ॥६॥ उभा जिग्यथुर्न्न पराजयेथे न पराजिग्ये कतरश्च नैनोरिन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रँ वितदैरयेथामिति ॥७॥ एतद्वा आभ्यां तत्सहस्रं प्रायच्छत् ॥८॥ तस्यैषा भक्तिर्य्य आर्षेयो विद्वाँस्तस्मै प्रथमेऽहनि देयँ यथा वा इयमेवँ स प्रतिष्ठितेयं प्रतिष्ठितः सः ॥९॥ येनार्षेयो विद्वाँस्तस्मै द्वितीयेऽहनि देयँ यथा वा अन्तरिक्षमेवँ सोऽन्तरिक्षमित्यन्तरिक्षँ विदुर्व्वेदं तस्य विदुः॥१०॥ य आर्षेयो विद्वाँस्तस्मै तृतीयेऽहनि देयँ यथा वै द्यौरेवँ स द्यौरिति दिवँ विदुर्ब्बन्धु तस्य विदुः ॥११॥ शतान्यन्वहं दीयन्त एषा वाव यज्ञस्य मात्रा यच्छतँ सैव सा विच्छिन्ना दीयते दशतोऽन्वहं दीयन्ते दशाक्षरा विराड् वैराजो यज्ञः सैव सा विच्छिन्ना दीयते ॥१२॥ त्रयस्त्रिँशच्च त्रीणि च शतानि प्रथमेऽहनि देयास्तथा द्वितीये तथा तृतीये ॥१३॥ अथैषा द्विदेवत्या त्रिरूपा ब्रह्मणो द्वे तृतीये तृतीयमग्नीधः ॥१४॥ काम्यासि प्रियासि हव्यासीडेरन्ते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सरस्वति महिविश्रुत एतानि तेऽघ्न्ये नामानि देवेषु नः सुकृतो ब्रूतात् ॥१५॥ इति पञ्चदशःखण्डः ॥२०/१५॥

इदँ वाव प्रथमेनाह्ना व्यकरोद्यदिदमस्यामध्यायत्त-मूलमिदं द्वितीयेन यदिदं प्राणादेजत्यद स्तृतीयेन यद्वर्षति यन्नक्षत्राणि यदमुँल्लोकं भेजे ॥१॥ तदाहुर्ब्रह्मवादिनो महाव्रतँ वा एतद्यदेषा त्रिरात्र इति तस्यै तदेव मुखँ यदेतेषामह्नां बहिष्पवमानँ ये अभितोऽहनी तौ पक्षौ यन्मध्यममहः स आत्माग्निष्टोम सामानि पुच्छम् ॥२॥ यदेवासावुदेति तन्मुखँ ये अभितोऽहनी तौ पक्षौ यन्मध्यममहः स आत्माग्निः पुच्छम् ॥३॥ यदेवासावुदेति तन्मुखँ ये अभितोऽहनी तौ पक्षौ यन्मध्यममहः स आत्मा यदस्तमेति तत्पुच्छम् ॥४॥ एतावान्वाव त्रिरात्रो गायत्रः प्राणास्त्रैष्टुभं चक्षुर्ज्जागतँ श्रोत्रँ सर्व्वमायुरेति य एवँ वेद ॥५॥ तदाहुर्ब्रह्मवादिनः कियँ स्त्रिरात्र इतीयानिति ब्रूयादियद्धयेतदभ्यथो इयानिति ब्रूयादियद्धयेवैत-दभि परा ३ ङर्व्वा ३ ङित्याहुः पराङिति ब्रूयात्पराङ् हि वदति पराङ् पश्यति पराङ् प्राणित्येका ३ द्वा ३ उत्त्रया ३ इत्याहुरेक इति ब्रूयात् समानो ह्येष यत् प्राणोऽपानो व्यानस्तद्यथा अदो मणौ सूत्रमोतमेवमेषु लोकेषु त्रिरात्र ओतः शोभतेऽस्य मुखँ य एवँ वेद ॥६॥ यद्वै त्रिरात्रस्य सलोम तदस्य विलोम यदस्य विलोम तदस्य सलोम तद्यदेतत्परँ सदहरवरं क्रियते यजमानायैव तत्पशून् परिगृह्णाति प्रजननाय न ह्यमुष्मिँल्लोके पशवः प्रजायन्ते ॥७॥ एते वाव छन्दसाँ वीर्य्यवत्तमे यद्गायत्री च त्रिष्टुप् च यदेते अभितो भवतो मध्ये जगती

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वीर्य्यवतीभ्यामेव तच्छन्दोभ्यां पशून् परिगृह्णाति प्रजननाय न ह्यमुष्मिँल्लोके पशवः प्रजायन्ते ॥८॥ असौ वाव त्रिरात्रो यथोदेत्येवं प्रथममहर्य्यथा मध्यन्दिन एवं द्वितीयँ यथास्तमेत्येवं तृतीयं गच्छत्यमुष्य सायुज्यङ्गच्छति सावेश्यँ य एवँ वेद ॥९॥ इति षोडशः खण्डः॥२०/१६॥ **इति विँशोऽध्यायः**

अथैकविँशोऽध्यायः

इन्द्रो मरुतः सहस्रमजिनात् स्वाँ विशँसहस्रमिज्या सृष्टामिति स आगच्छत्सोऽब्रवीदुपमास्मिन् सहस्रे ह्वयेथामिति तमुपाह्वयेताँ स यमोऽपश्यदेकाङ्गाँ सहस्रेऽपि सहस्रस्य पयो बिभ्रतीँ सोऽब्रवीदियमेव ममास्तु सहस्रँ युवाँ विकल्पयेथा-मिति तावब्रूताँ यथा वाव त्वमेतां पश्यस्येवमावमेतां पश्याव इति ॥१॥ तया वा इदँ सहस्रँ विकल्पयामहा इत्यब्रुवँ स्तामुदके प्रावेशयँस्तेऽब्रुवन्नँशा नाहरामहै यस्मै न इयं प्रथमायोदेष्यति इति तेँशानाहरन्त सोमस्य प्रथम ऐदथेन्द्रस्याथ यमस्य ॥२॥ तेऽब्रुवन् सोमाय राज्ञ उदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सा बभ्रुः पिङ्गाक्ष्येकवर्षोदैत्तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयसः सा या सोमक्रयणी सैव सा ॥३॥ तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य पयसः सोमः क्रीतो भवति य एवँ विद्वान् सोमं क्रीणाति यस्मा एवँ विदुषे सोमं क्रीणन्ति ॥४॥ तेऽब्रुवन्निन्द्रायोदेहि तृतीयेन चात्मन स्तृतीयेन च सहस्रस्य पयस इति सा शबली पष्ठौह्युदैत् तृतीयेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चात्मनस्तृतीयेन च सहस्रस्य पयसः सा येन्द्रियैष्या सैव सा ॥५॥ तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य पयस इन्द्रियैष्या दत्ता भवति य एवँ विद्वानिन्द्रियैष्यां ददाति यस्मा एवँ विदुष इन्द्रियैष्यां ददति ॥६॥ तेऽब्रुव न्यमायोदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सा जरती कुष्टा श्रृङ्ग्युदैद्धूम्रावादित्यौ हीर्म्मतो ह्रसीयसी तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयसः सा यानुस्तरणी सैव सा ॥७॥ तृतीयेन चास्य तस्या आत्मनस्तृतीयेन च सहस्रस्य पयसोऽनुस्तरणी कृता भवति य एवँ विद्वाननुस्तरणीं करोति यस्मा एवँ विदुषेऽनुस्तरणीङ्कुर्व्वन्ति नाचकृवान्मन्यते ॥८॥ तदाहुर्ब्रह्मवादिनो न वा अमुष्मिँल्लोके सहस्रयाडलोको ऽस्तीति तद्यावदितः सहस्रस्य गौर्ग्गवि प्रतिष्ठिता तावदस्मा ल्लोकादसौ लोकःसहस्रयाजी वा इमाँल्लोकान् व्याप्नोत्यथो यावत्सहस्रँ योजनान्यथो यावत् सहस्रमाश्वीनान्यथो याव त्सहस्रमहन्यानि तद्गवा गवास्पृणोति समाक्रयणाय वा एता दीयन्ते ॥९॥ सहस्रँ यदसृजत तस्य तार्य्यँ योनिरासीद्यत्तार्य्यं प्रत्यस्य नयति सयोनित्वाय ॥१०॥ इति प्रथमःखण्डः॥२१/१॥

प्रजापतिः प्रजा असृजत ता अस्मान्सृष्टाः पराच्य आयन्नत्स्यति न इति बिभ्यत्यः सोऽब्रवीदुप मा वर्त्तध्वं तथा वै वोऽत्स्यामि यथाद्यमाना भूयस्यः प्रजनिष्यथ इति ताभ्यो वैनं ऋतं ब्रूहीत्यब्रुवँस्ताभ्य ऋतनिधनेनर्त्तमव्रवीदीनिधनेनावय–त्रिणिधनेन प्राजनयदेतैर्ह वा इदँ सामभिर्मृत्युः प्रजा अत्ति च प्रजनयति ॥१॥ अद्यमानस्य भूयो भवति य एवँ वेद ॥२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ज्येष्ठसामानि वा एतानि श्रेष्ठसामानि प्रजापतिसामानि ॥३॥ गच्छति ज्यैष्ठ्यँ श्रैष्ठ्यँ य एवँ वेद ॥४॥ एतैर्व्वै सामभिः प्रजापतिरिमाँल्लोकान् सर्व्वान् कामान् दुग्धे यदाच्यादुग्धे तदाच्यादोहानामाच्यादोहत्वम् ॥५॥ सर्व्वानिमाँल्लोकान् कामान् दुग्धे य एवँ विद्वानेतैस्सामभिः स्तुते ॥६॥ इमे वै लोका एतानि सामान्ययमेवर्त्तनिधनमन्तरिक्षमीनिधनं द्यौस्त्रिणिधनम् ॥७॥ यथा क्षेत्रज्ञः क्षेत्राण्यनुसञ्चरत्येवमिमाँल्लोकाननुसञ्चरति य एवँ वेद ॥८॥ अग्नेर्व्वा एतानि वैश्वानरस्य सामानि यत्र वा एतैरशान्तैः स्तुवन्ति तत्प्रजा देवो घातुको भवत्यग्निमुपनिधाय स्तुवते स्वाया एव तद्देवतायाः साम्येक्षाय नमस्कृत्योद्गायति शान्तैः स्तुवन्ति ॥९॥ इति द्वितीयः खण्डः॥२१/२॥

वाग्वै शबली तस्यास्त्रिरात्रो वत्सस्त्रिरात्रो वा एतां प्रदापयति ॥१॥ तद्य एवँ वेद तस्मा एषा प्रत्ता दुग्धे ॥२॥ योऽलमन्नाद्याय सन्नथान्नं नाद्यात् ॥३॥ बरासीं परिधाय तप्तं पिबन् द्वादशरात्रीरधः शयीत ॥४॥ या द्वादशी स्यात्तस्या उपव्युषँ शबलीहोमँ हुत्वा पुरा वाग्भ्यः सम्प्रवदितोर्य्यत्र ग्राम्यस्य पशोर्न्नाश्रृणुयात्तदरण्यं परेत्य दर्भस्तम्बमालभ्य शबलि शबलीति त्रिराह्वयेद्यदन्यच्छुनश्च गर्द्दभाच्च प्रतिवाश्यते सा समृद्धा ॥५॥ यदि न प्रतिवाश्येत सँवत्सरे पुनराह्वयेत् ॥६॥ शबलि समुद्रोऽसि विश्वव्यचा ब्रह्म देवानां प्रथमजा ऋतस्यान्नमसि शुक्रमसि तेजोऽस्यमृतमसि तां त्वा विद्म शबलि दीद्यानान्तस्यास्ते पृथिवी पादोऽन्तरिक्षं पादो द्यौः पादः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समुद्रः पाद एषासि शबलि तां त्वा विद्म सा न इषमूर्ज्जं धुक्ष्व वसोर्द्धाराँ शबलि प्रजानाँ शचिष्ठा व्रतमनुगेषँ स्वाहा ॥७॥ इति तृतीयः खण्डः ॥२१/३॥

चतुष्टोमोऽग्निष्टोम एकविँश उक्थ्यः सर्व्वस्तोमोऽतिरात्रः ॥१॥ प्रजापतेर्व्वा अक्ष्यश्वयत्तत्परापतत्तदश्वोऽभवत्तदश्वस्याश्वत्वं तद्देवा अश्वमेधेन प्रत्यदधुरेष वाव प्रजापतिँ सर्व्वङ्करोति योऽश्वमेधेन यजते ॥२॥ एष वाव सशरीरः सम्भवत्यमुष्मै लोकाय योऽश्वमेधी ॥३॥ सरघा वा अश्वस्य सक्थ्या बृह-त्तद्देवाश्चतुष्टोमेन प्रत्यदधुर्य्यच्चतुष्टोमो भवत्यश्वस्य सर्व्वत्वाय ॥४॥ यत्तिस्रोऽनुष्टुभश्चतस्रो गायत्रीः करोति तस्मात्त्रिभिस्तिष्ठन् प्रतितिष्ठति सर्व्वान् पलायमानः प्रतिदधाति ॥५॥ अन्तो वा अश्वः पशूनामन्तोऽनुष्टुप् च्छन्दसामन्तो विष्णुर्द्देवतानामन्त-श्चतुष्टोमस्स्तोमानामन्तस्त्रिरात्रो यज्ञानाँ यद्वैष्णव्योऽनुष्टुभः प्रतिपदो भवन्ति चतुष्टोमस्तोमस्त्रिरात्रो यज्ञोऽन्त एव तदन्तं प्रतिष्ठापयति ॥६॥ एकविँशमहर्भवति यस्मिन्नश्व आलभ्यत एकविँशो वा इतोऽसावादित्यो द्वादश मासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविँश आदित्यस्यैवैनं मात्रां गमयति ॥७॥ तस्य महानाम्न्यः पृष्ठं भवन्ति ॥८॥ अन्यदन्यद्वा एताश्छन्दोऽन्योन्य एते पशव आलभ्यन्त एता वा एतँ समाप्नुवन्ति यन्महानाम्न्यः पृष्ठं भवन्त्यश्वस्य सर्व्वत्वाय ॥९॥ पार्थुरश्मं ब्रह्मसाम भवति ॥१०॥ ईश्वरो वा एषोऽयतोऽधृतः परां परावतमेतो रश्मिना वा अश्वो धृतो यत्पार्थुरश्मं ब्रह्मसाम भवत्यश्वस्यैव यत्यै ॥११॥ सर्व्वस्तोमोऽतिरात्रो भवति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वमेवैतेनाप्नोति सर्व्वं जयति ॥१२॥ एकयूपो वैकादशिनी वान्येषाँ यज्ञानां भवत्येकविँशि-न्यश्वमेधस्य खादिरो वा बैल्वो वा पार्णो वान्येषाँ यज्ञानां भवति नैचुदार एकविँशत्यरत्निरश्वमेधस्य नान्येषां पशूनान्तेजन्या अवद्यन्त्यवद्यन्त्यश्वमेधस्य दक्षिणतोऽन्येषां पशूनामवद्यन्त्युत्तरतोऽश्वमेधस्य प्लक्षशाखास्वन्येषां पशूना-मवद्यन्ति वेतसशाखास्वश्वमेधस्य यूपे ग्राम्यान्पशून्नियुञ्ज-न्त्यारोकेष्वारण्यान्धारयन्त्याग्राम्यान् पशून् लभन्ते प्रारण्यान् सृजन्ति ॥१३॥ इति चतुर्थः खण्डः ॥२१/४॥

त्रयस्त्रिवृतोऽतिरात्राः सर्व्वे षोडशिमन्तः ॥१॥ यो राज्य आशँसेत स एतेन यजेत ॥२॥ राजा वा एष स्तोमानाँ राज्यमेवास्मिन्दधाति ॥३॥ यदाक्षाराणि प्रथममहर्भजन्त एकाक्षरा वै वाग्वाचो नतिवादाय ॥४॥ अथ यद्द्व्यक्षर-णिधनमाज्यदोहं भवत्युत्तरयोरह्नोरभिसन्तत्या अन्वहमाज्य-दोहानि भवन्त्यन्वहमेवैनं पशुभिः समर्द्धयन्ति ॥५॥ सर्व्वे षोडशिमन्तो भवन्तीन्द्रियँ वीर्य्यँ षोडशीन्द्रियेणैवैनान् वीर्य्येण समर्द्धयति ॥६॥ इति पञ्चमः खण्डः॥२१/५॥

चतुर्व्विँशाः पवमानास्त्रिवृत्याज्यानि पञ्चदशानि पृष्ठानि सप्तदशोऽग्निष्टोमश्चतुश्चत्वारिँशाः पवमानाः पञ्चदशान्या-ज्यानि सप्तदशानि पृष्ठान्येकविँशोऽग्निष्टोमः सोक्थोऽष्टा-चत्वारिँशाः पवमाना एकविँशान्याज्यानि त्रिणवानि पृष्ठानि त्रयस्त्रिँशोऽग्निष्टोम एकविँशान्युक्थानि सषोडशिकानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिश्छन्दोमपवमानः ॥१॥ पशुकामो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यजेत ॥२॥ पशवो वै छन्दोमा यच्छन्दोमाः पवमाना भवन्ति पशूनेवावरुन्धे ॥३॥ उभये स्तोमा युग्मन्त श्चायुजश्च तन्मिथुनं तस्मान्मिथुनात्प्रजायते ॥४॥ इति षष्ठः खण्डः ॥२१/६॥

त्रिवृत्प्रातस्सवनं पञ्चदशं माध्यन्दिनँ सवनँ सप्तदशं तृतीयसवनं चतुर्व्विँशं प्रातस्सवनं चतुश्चत्वारिँशं माध्यन्दिनँ सवनमष्टाचत्वारिँशं तृतीयसवनँ सोक्थमेकविँशं प्रातस्सवनं त्रिणवं माध्यन्दिनँ सवनं त्रयस्त्रिँशं तृतीयसवनँ सोक्थ्य-मेकविँशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिरन्तर्व्वसुः ॥१॥ इमे लोकास्त्रिरात्रः ॥२॥ अस्तीव वा अयँल्लोकोऽस्तीवासौ छिद्रमिवान्तरिक्षम् ॥३॥ अस्तीव त्रिरात्रस्य प्रथममहरस्तीवोत्तमं छिद्रमिव मध्यतः ॥४॥ पशवो वै छन्दोमा यच्छन्दोमा मध्यतो भवन्त्यपिहित्या एवाच्छिद्रतायै ॥५॥ इति सप्तमःखण्डः ॥२१/७॥

त्रिवृत्प्रातस्सवनं पञ्चदशं माध्यन्दिनँ सवनँ सप्तदशं तृतीयसवनमेकविँशं प्रातस्सवनं त्रिणवं माध्यन्दिनँ सवनं त्रयस्त्रिँशं तृतीयसवनँ सोक्थं चतुर्व्विँशं प्रातस्सवनं चतुश्चत्वारिँशं माध्यन्दिनँ सवनमष्टाचत्वारिँशं तृतीयसवनँ सोक्थ्यमेकविँशःषोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिः पराकः ॥१॥ पराकेण वै देवाः स्वर्गँल्लोकमायन् स्वर्गकामो यजेत पराङेवैतेन स्वर्गँल्लोकमाक्रमते ॥२॥ यद्वा एतस्याकन्तदस्य पराक् तत्पराक्तस्य पराकत्वम् ॥३॥ न वै तत्र जग्मुषे किञ्चनाकम् ॥४॥ नास्मा अकं भवति य एवँ वेद ॥५॥ प्रजायास्त्वक्लृप्तः पराङ् ह्येवैतेन स्वर्गँल्लोकमाक्रमते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तद्यदेकविँशः षोडशी भवति पञ्चदशी रात्रिस्त्रिवृत्सन्धि-स्तेनास्मिँल्लोके प्रतितिष्ठति ॥६॥ इत्यष्टमः खण्डः ॥२१/८॥

अथ नवमः खण्डः ॥ चतुर्व्विँशाः पवमानास्त्रिवृन्त्या-ज्यानि पञ्चदशानि पृष्ठानि सप्तदशोऽग्निष्टोमश्चतुर्व्विँशाः पवमानाः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठान्येकविँशोऽग्नि ष्टोमः सोक्थ्यश्चतुर्व्विँशाः पवमानाः सप्तदशान्याज्यान्येक विँशानि पृष्ठानि त्रिणवोऽग्निष्टोमः सोक्थश्चतुर्व्विँशाः पवमाना एकविँशान्याज्यानि त्रिणवानि पृष्ठानि त्रयस्त्रिँशोऽग्निष्टोम एकविँशान्युक्थ्यानि सषोडशिकानि पञ्चदशी रात्रिस्त्रिवृ त्सन्धिः ॥१॥ अत्रिरकामयत चत्वारो मे वीरा आजायेरन्निति स एतमपश्यत्तस्य चत्वारो वीरा आजायन्तास्य चत्वारो वीरा जायन्ते य एवँ वेद ॥२॥ एकँ स्तोममुत्सृज्यैकमभ्यारभते वीरजननँ वै स्तोमो वीरमेवास्मै तत्प्रजनयति॥३॥ चतुर्व्विँशाः पवमाना भवन्ति चतुर्व्विँशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥४॥ उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात् प्रजायते ॥५॥ अग्निष्टोमः प्रथममहरुक्थ्यो द्वितीयँ षोडशी तृतीयमतिरात्रश्चतुर्थं नाना वीर्य्यतायै ॥६॥ नाना वीर्य्याण्यहानि करोति ॥७॥ गायत्रँ वै प्रथममहस्त्रैष्टुभं द्वितीयं जागतं तृतीयमानुष्टुभं चतुर्थम् ॥८॥ तदाहुर्य्यत् तृतीयेऽहनि षोडशिनं गृह्णीयुस्तृतीयेनाह्नानुष्टुभमाप्नुयुरच्छन्दश्चतुर्थमहः स्यादानुष्टुभो वै षोडशीति ॥९॥ चतुर्थेऽहनि षोडशी ग्रहीतव्यः स्व आयतने षोडशी गृह्यते ॥१०॥ छन्दोभिरहानि नाना वीर्य्याणि करोति ॥११॥ नौधसं प्रथमस्याह्नो ब्रह्मसाम श्यैतं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वितीयस्य श्रायन्तीयं तृतीयस्य त्रैशोकं चतुर्थस्य ॥१२॥ तदाहुरपभ्रँश इव वा एष यत् ज्यायसः छन्दसोऽधि कनीयश्छन्द उपैतीति ॥१३॥ तद्यदेषा चतुर्थेऽहन्यतिजगती क्रियतेऽनपभ्रँशाय ॥१४॥ कालेयं प्रथमस्याह्नोऽच्छावाकसाम माधुच्छन्दसं द्वितीयस्य रौरवं तृतीयस्य समन्तं चतुर्थस्य नाना वीर्य्यतायै नाना वीर्य्याण्यहानि करोति ॥१५॥ अभि त्वा वृषभा सुत इति तृतीयस्याह्नो रथन्तरं कस्तमिन्द्र त्वा वसविति वामदेव्यँ यज्ञा यथा अपूर्व्येति चतुर्थस्याह्नो बृहत् एदु मधोर्म्मदिन्तरमिति वामदेव्यं छन्दसां नाना वीर्य्यतायै नाना वीर्य्याण्यहानि करोति ॥१६॥ इति नवमः खण्डः ॥२१/९॥

त्रिवृत्पञ्चदशोऽग्निष्टोमः प्रथममहः ॥१॥ अथोत्तर-स्याह्नश्चतुर्व्विँशं बहिष्पवमानं पञ्चदशानि त्रीण्याज्यानि सप्तदशमच्छावाकस्यैकविँशो माध्यन्दिनः पवमानः सप्तदशे द्वे पृष्ठे एकविँशे द्वे एकविँशं तृतीयसवनँ सोक्थम् ॥२॥ तृतीयस्याह्न एकविँशं बहिष्पवमानं त्रीणि चाज्यानि पञ्चदशमच्छावाकस्य चतुर्व्विँशो माध्यन्दिनः पवमान एकविँशानि पृष्ठानि त्रिणवं तृतीयसवनं द्वे चोक्थे एकविँशमच्छावाकस्य ॥३॥ चतुर्थस्याह्नश्चतुर्व्विँशाः पवमानाः पञ्चदशँ होतुराज्यँ सप्तदशानि त्रीण्येकविँशानि पृष्ठानि त्रयस्त्रिँशोऽग्निष्टोम एकविँशान्युक्थानि स षोडशिकानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥४॥ जमदग्निः पुष्टिकाम एतमाहरत्स इमान् पोषानपुष्यत् ॥५॥ यदिदमाहुर्न्नवा ऊर्व्वौ पलितौ सञ्जानात इति ॥६॥ तत्सर्व्वानेवैतेन पोषान् पुष्यति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥७॥ जगती छन्दोभिः सम्पद्यते ॥८॥ जगती वै छन्दसां परमं पोषं पुष्टा परममेवैतेन पोषं पुष्यति ॥९॥ पुरोडाशिन्य उपसदो भवन्ति पशवो वै पुरोडाशाः पशुष्वेव प्रतितिष्ठन्ति ॥१०॥ अग्ग्ने वेर्होत्रँ वेरध्वरमापितरँ वैश्वानरमवसेऽकरिन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥११॥ देवावाश्विनौ मधुकशयाद्येमँ यज्ञँ यजमानाय मिमिक्षतमिन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१२॥देव विष्ण उर्वद्यास्मिन्यज्ञे यजमानायाधि विक्रमस्वेन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१३॥ देव सोम रेतोधा अद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१४॥ देव सवितः सुसावित्रमद्यास्मिन्यज्ञे यजमानायासुव स्वेन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१५॥ देव धातः सुधाताद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१६॥ देवा ग्रावाणो मधुमतीमद्यास्मिन्यज्ञे यजमानाय वाचँ वदतेन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१७॥ देव्यनुमतेऽन्वद्येमँ यज्ञँ यजमानाय मन्यस्वेन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१८॥ देव्यदिते स्वादित्यमद्यास्मिन्यज्ञे यजमाना यासुवस्वेन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥१९॥ देव्य आपो नन्नम्यध्वमद्यास्मिन्यज्ञे यजमानायेन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥२०॥ सदस्सदः प्रजावानृभुर्ज्जुषाण इन्द्राय देवेभ्यो जुहुता हविः स्वाहा ॥२१॥ देव त्वष्टः सुरेतोधा अद्यास्मिन्यज्ञे यजमानायैधीन्द्राय देवेभ्यो जुहुता हविःस्वाहा ॥२२॥ आग्ग्नेय एककपाल आश्विनो द्विकपालो वैष्णवस्त्रिकपालः सौम्यश्चतु ष्कपालः सावित्रः पञ्चकपालो धात्रः षट्कपालो मारुतः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सप्तकपालो बार्हस्पत्योऽष्टाकपालो मैत्रो नवकपालो वारुणो दशकपाल ऐन्द्र एकादशकपालो वैश्वदेवो द्वादशकपालः ॥२३॥ इति दशमः खण्डः ॥२१/१०॥

त्रिवृत्प्रातस्सवनं पञ्चदशं माध्यन्दिनँ सवनँ सप्तदशं तृतीयसवनं पञ्चदशं प्रातस्सवनँ सप्तदशं माध्यन्दिनँ सवनमेकविँशं तृतीयसवनँ सोक्थ्यँ सप्तदशं प्रातस्सवन-मेकविँशं माध्यन्दिनँ सवनं त्रिणवं तृतीयसवनँ सोक्थ्यमेक-विँशं प्रातस्सवनं त्रिणवं माध्यन्दिनँ सवनं त्रयस्त्रिँशं तृतीयसवनं प्रत्यवरोहीण्युक्थ्यानि त्रिणवं प्रथमं द्वे एकविँशे सषोडशिके पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥१॥ वसिष्ठः पुत्रहतो हीन इवामन्यत स एतमपश्यत्सोग्रं पर्य्येद्यौ हीन इव मन्येत स एतेन यजेत ॥२॥ यत्स्तोमात् स्तोममभिसङ्क्राम-त्यग्रादेवाग्रँ रोहति वसिष्ठस्य जनित्रे भवतः प्रजात्यै ॥३॥ प्रत्यवरोहीण्युत्तमस्याह्न उक्थानि भवन्ति प्रतिष्ठित्यै ॥११॥ इत्येकादशः खण्डः॥२१/११॥

त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्य एकविँशोऽतिरात्रो विश्वामित्रस्य सञ्जयः ॥१॥ जह्नुवृचीवन्तो राष्ट्र आहिँसन्त स विश्वामित्रो जाह्नवो राजैतमपश्यत् स राष्ट्रमभवदराष्ट्रमितरे ॥२॥ भ्रातृव्यवान्यजेत ॥३॥ भवत्यात्मना परास्य भ्रातृव्यो भवति य एवँ वेद ॥४॥ ज्योतिर्व्वा एष विहृतः ॥५॥ ज्योतिः प्रजानां भवति य एवँ वेद ॥६॥ चतुष्टोमो वा एष चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठति ॥७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकविँशस्तोमा नातियन्ति प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥८॥ इति द्वादशः खण्डः ॥२१/१२॥

द्वे त्रिवृती सवने पञ्चदशमेकं द्वे पञ्चदशे सवने सप्तदशमेकं द्वे सप्तदशे सवने एकविँशमेकं द्वे एकविँशे सवने त्रिणवमेकं द्वे त्रिणवे सवने त्रयस्त्रिँशमेकं प्रत्यवरोहीण्युक्थ्यानि त्रिणवं प्रथमं द्वे एकविँशे सषोडशिके पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥१॥ देवाश्च वा असुराश्चास्पर्द्धन्त ते न व्यजयन्त तेऽब्रुवन्वाचो मिथुनेन विजयामहै यतरेनो वाचो मिथुनं न प्रतिविन्दाँस्ते परा भवानिति ते देवा एक इत्यब्रुवन्नेकेत्यसुरा वाचो मिथुनं प्रत्यविन्दन् द्वाविति देवा अब्रुवन् द्वे इत्यसुरा वाचो मिथुनं प्रत्यविन्दँस्त्रय इति देवा अब्रुवँस्तिस्र इत्यसुरा वाचो मिथुनं प्रत्यविन्दँश्चत्वार इति देवा अब्रुवँश्चतस्र इत्यसुरा वाचो मिथुनं प्रत्यविन्दन् पञ्चेति देवा अब्रुवन्नासुरा अविन्दँस्ततो देवा अभवन् परासुराः ॥२॥ भवत्यात्मना परास्य भ्रातृव्यो भवति य एवँ वेद ॥३॥ सँवत्सरँ वा एषां तद्वीर्य्यमन्नाद्यमवृञ्जत ॥४॥ सँवत्सरँ वीर्य्यमन्नाद्यं भ्रातृव्यस्य वृङ्क्ते य एवँ वेद ॥५॥ पञ्चरात्रो वा एष पाङ्क्तः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषञ्च पशूँश्चाप्नोति ॥६॥ अस्थूरिर्व्वा एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमा वहर्व्वहतो यं कामं कामयते तत्तदभ्यश्नुते ॥७॥ यत्र यत्र ह्यस्थूरिणा कामयते तत्तदभ्यश्नुते ॥८॥ अभ्यासङ्ग्यः पञ्चाहो भवति सन्तत्यै ॥९॥ प्रत्यवरोहीण्युत्तमस्याह्न उक्थानि भवन्ति प्रतिष्ठित्यै ॥१०॥ इति त्रयोदशः खण्डः ॥२१/१३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिवृदग्निष्टोमः पञ्चदश उक्थः सप्तदश उक्थः पञ्चदश उक्थः सप्तदशोऽतिरात्रः पञ्च शारदीयो मरुताँ स्तोमः ॥१॥ यः कामयेत बहु स्यामिति स एतेन यजेत ॥२॥ मरुतो वै देवानां भूयिष्ठा बहुरेव भवति ॥३॥ सप्तदशँ स्तोमा नातियन्ति प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवाप्नोति ॥४॥ अगस्त्यो वै मरुद्भ्य उक्ष्णः प्रौक्षत्तानिन्द्राया बध्नात्ते वज्रमादायाभ्यपतन् स एतत् कयाशुभीयमपश्यत्ते नाशमयत् ॥५॥ यत्कयाशुभीयँ शस्यते शान्त्या एव ॥६॥ सप्तदश पृश्नीनुक्ष्णःपञ्चवर्षान्त्सप्तदश पृश्नीस्त्रिवत्सा अप्रवीतास्तान् पर्य्यग्निकृतान् प्रोक्षितानेतरा लभन्ते प्रेतरान्त्सृजन्ति ॥७॥ततः सँवत्सरे नवनीतपृश्नीररुणा आनयन्ति ताँश्चैवोक्ष्णस्तान् पर्य्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान्त्सृजन्ति ततः सँवत्सरे राजीवा आनयन्ति ताँश्चैवोक्ष्णस्तान् पर्य्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान्त्सृजन्ति ततः सँवत्सरे पिशङ्गीरानयन्ति ताँश्चैवोक्ष्णस्तान् पर्य्यग्निकृतान् प्रोक्षिता-नेतरालभन्ते प्रेतरान्त्सृजन्ति ततः सँवत्सरे सारङ्गीरानयन्ति ताँश्चैवोक्ष्णस्तान् पर्य्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान्त्सृजन्ति ॥८॥ ततःसँवत्सरे सोमा भवन्ति ॥९॥ स्त्रीँस्त्रीनन्वहमालभन्ते पञ्चोत्तमेऽहनि ॥१०॥ अजोऽग्नी-षोमीयः ॥११॥ ऐन्द्रा मारुता उक्षाणो मारुत्यो वत्सतर्य्यः ॥१२॥ यदि रुद्रोऽभिमन्येताग्नये रुद्रवते पुरोडाशमष्टाकपालं निरूप्याथान्यमालभेत ॥१३॥ यदि सँशीर्य्येत भौममेककपालं निरूप्याथान्यमालभेत ॥१४॥ यद्यवसीदेन्नैर्ऋतं चरुं निरूप्याथा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्यमालभेत यद्यप्सु म्रियेतापो नप्त्रीयं चरुं निरूप्याथान्य मालभेत यद्यन्धस्स्यात् सौर्य्यं चरुं निरूप्याथान्यमालभेत ॥१५॥ यदि श्लवणो वा कूटो वा स्याद् बार्हस्पत्यं चरुं निरूप्याथान्यमालभेत ॥१६॥ यदि पलायेत वायव्यं चरुन्निरूप्याथान्यमालभेत ॥१७॥ यदि प्रासहाजयेयुरिन्द्राय प्रसह्वन एकादशकपालन्निरूप्याथान्यमालभेत ॥१८॥ यद्यन्येन मृत्युना म्रियेत प्राजापत्यं द्वादशकपालं निरूप्याथान्यमालभेत ॥१९॥ एतेन वा एकया वा गान्दमो वेतस्वतीष्ट्वा सर्व्वामृद्धिमाद्ध्र्नोत् ॥२०॥ सर्व्वामृद्धिमृध्नोति य एवँ वेद ॥२१॥ इति चतुर्द्दशः खण्डः ॥२१/१४॥

ज्योतिष्टोमोऽग्निष्टोमो गौरुक्थ्यो महाव्रतं गौरुक्थ्य आयुरतिरात्रः ॥१॥ सँवत्सरो वै व्रतं तस्य वसन्त ऋतुर्म्मुखं ग्रीष्मश्च वर्षाश्च पक्षौ शरन्मध्यँ हेमन्तः पुच्छम् ॥२॥ तस्माच्छरदमोषधयोऽभिसम्पच्यन्ते शरद्धि मध्यँ सँवत्सरस्य ॥३॥ अकृतँ वा एते कुर्व्वन्ति ये पुरा सँवत्सरात् व्रतमुपयन्ति ॥४॥ एतद्वै व्रतमाप्तँ यत्पञ्चरात्रे पञ्चह्यृतवः ॥५॥ आप्तेन व्रतेन स्तुते सर्व्वमायुरेति य एवँ वेद ॥६॥ इति पञ्चदशः खण्डः॥२१/१५॥

इत्येकविँशोऽध्यायः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वाविँशोऽध्यायः

पृष्ठ्यः षडहः॥१॥ ऋतवो न प्रत्यतिष्ठँस्त एतेन प्रत्यतिष्ठन् प्रतिष्ठाकामो यजेत प्रत्येवतिष्ठति ॥२॥ षड्वा ऋतव ऋतुष्वे-वैतेन प्रतितिष्ठति पृष्ठ्यः षडहो भवति प्रत्यक्षमृद्ध्यै ॥३॥ प्रत्यक्षँ ह्येतेनर्त्तव आर्ध्नुवन्नृद्ध्या एव॥४॥ इति प्रथमःखण्डः॥२२/१॥

त्रिवृदग्निष्टोमः पञ्चदशउक्थ्यः सप्तदशउक्थो ज्योति-र्गौरायुरतिरात्रः ॥१॥ यः कामयेत सर्व्वमायुरियामिति स एतेन यजेत ॥२॥ यत्त्र्यहः पुरस्ताद्भवति त्रयः प्राणापानव्यानास्त एव तत्सन्धीयन्ते ॥३॥ अथ यज्ज्योति र्गौरायुरतिरात्रो भवति प्रतिष्ठित्यै ॥४॥ इति द्वितीयः खण्डः॥२२/२॥

अभ्यासङ्ग्यः पञ्चाहो विश्वजिदतिरात्रः ॥१॥ अन्यस्मै वै कामाय सत्रमन्यस्मै यज्ञो न तत्सत्रेणाप्नोति यस्मैकँ यज्ञो न तद्यज्ञेनाप्नोति यस्मैकँ सत्रम् ॥२॥ सत्रमिव वा एतद्यदनुलोमं पृष्ठानि यदेकधा पृष्ठानि भवन्त्येकधैवास्मिँ-स्तदोजो वीर्य्यं दधाति ॥३॥ अन्नं पृष्ठान्यन्नाद्यमेवास्मिन्दधाति ॥४॥ पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठति ॥५॥ अभ्यासङ्ग्यः पञ्चाहो भवति सन्तत्यै ॥६। विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥७॥ इति तृतीयः खण्डः ॥ २२/३॥

पृष्ठ्यः षडहो महाव्रतमतिरात्रः॥१॥ सप्तऋषय एतेनार्ध्नुवँ स्तेनर्द्धिस्तस्मादेतेन यजन्त ऋद्ध्या एव ॥२॥ सप्तशिरसि प्राणाः प्राणा इन्द्रियाणीन्द्रियाण्येवैतेनाप्नोति ॥३॥ सप्त ग्राम्याः पशवस्तानेतेनाप्नोति ॥४॥ व्रतँ सप्तमस्याह्नः पृष्ठं भवति तदध्यनाप्तमन्नँ वै व्रतमन्नाद्यमेवैतेनाप्नोति ॥५॥ पृष्ठ्यः षडहो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति प्रत्यक्षमृद्ध्यै ॥६॥ प्रत्यक्षँ ह्येतेन सप्त ऋषय आर्ध्नुवन्नृद्ध्या एव ॥७॥ इति चतुर्थः खण्डः॥२२/४॥

पृष्ठ्यः षडहः सप्तदशं महाव्रतमतिरात्रः ॥१॥ तस्य त्रिवृच्छिरः पञ्चदशौ पक्षौ सप्तदश आत्मैकविँशं पुच्छम् ॥२॥ एतेन वै प्रजापतिः प्रजा असृजत ॥३॥ प्र प्रजया प्र पशुभिर्ज्जायते य एवँ वेद ॥४॥ सप्तदशो वै प्रजापतिर्य्यत् सप्तदशँ व्रतं भवति प्रजापतिमेवाप्नोति ॥५॥ यत्त्रिवृच्छिरो भवति नवप्राणाः प्राणेष्वेव प्रतितिष्ठति ॥६॥ यत्पञ्चदशौ पक्षौ सवीवधत्वाय ॥७॥ सप्तदश आत्मा भवति प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवाप्नोति ॥८॥ एकविँशं पुच्छं भवति प्रतिष्ठित्यै ॥९॥ इति पञ्चमः खण्डः॥२२/५॥

पृष्ठ्यः षडहश्छन्दोमपवमानं महाव्रतमतिरात्रः ॥१॥ पशुकामो यजेत ॥२॥ पशवो वै छन्दोमाः ॥३॥ यच्छन्दोमाः पवमानाः महाव्रतस्य भवन्ति पशूनेवावरुन्धे ॥४॥ उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात् प्रजायते ॥५॥ इति षष्ठः खण्डः॥२२/६॥

अभ्यासङ्ग्यः पञ्चाहोऽथ त्रयस्त्रिँशमहस्तस्य चतुस्त्रिँशोऽग्निष्टोमः सप्तदशं महाव्रतमतिरात्रस्तस्य चतुर्व्विँशं बहिष्पवमानं त्रिवृच्छिरः पञ्चदशौ पक्षौ सप्तदश आत्मैकविँशं पुच्छम् ॥१॥ एतेन वै जमदग्निः सर्व्वान् पोषानपुष्यत्सर्व्वानेवैतेन पोषान्पुष्यति ॥२॥ यदभ्यासङ्ग्यः पञ्चाहः पुरस्ताद्भवति सन्तत्या एव ॥३॥ अथैतत्त्रयस्त्रिँश महस्त्रयस्त्रिँशद्देवता देवता एवाप्नोति ॥४॥ तस्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतुस्त्रिँशोऽग्निष्टोमः प्रजापतिश्चतुस्त्रिँशो देवतानां प्रजापतिमेवाप्नोति ॥५॥ चतुर्व्विँशं बहिष्पवमानं भवति महाव्रतस्य चतुर्व्विँशत्यक्षरा गायत्री प्रजननं गायत्री प्रजात्यै ॥६॥ उभये स्तोमा युग्मन्तश्चायुजश्च तन्मिथुनं तस्मान्मिथुनात् प्रजायते ॥७॥ यत्त्रिवृच्छिरो भवति नवप्राणाः प्राणेष्वेव प्रतितिष्ठति यत् पञ्चदशौ पक्षौ सवीवधत्वाय सप्तदश आत्मा भवति प्रजापतिर्व्वै सप्तदशः प्रजापतिमेवाप्नोत्येकविँशं पुच्छं भवति प्रतिष्ठित्यै ॥८॥ इति सप्तमः खण्डः॥२२/७॥

ज्योतिष्टोमोऽग्निष्टोमो गौरुक्थ्य आयुरुक्थ्योऽभिजिदग्निष्टोमो विश्वजिदग्निष्टोमः सर्व्वजिदग्निष्टोमः सर्व्वस्तोमोऽतिरात्रः ॥१॥ एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्या प्रजा भवति य एवँ वेद ॥२॥ यज्ज्योतिर्गौरायुस्त्र्यहः पुरस्ताद्भवति प्रज्ञातान् स्तोमानुपैतीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठति ॥३॥ अथाभिजिदभिजिता वै देवा इमान् लोकानभ्यजयन्विश्वजिता विश्वमजयन् सर्व्वजिता सर्व्वमजयन् ॥४॥ सर्व्वस्तोमोऽतिरात्रो भवति सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वमेवैतेनाप्नोति सर्व्वंजयति ॥५॥ इत्यष्टमः खण्डः॥२२/८॥

चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानि विश्वजिन्महाव्रतं ज्योतिष्टोमोऽतिरात्रः॥१॥ एतेन वै प्रजापतिः पुरुषमसृजत स सर्व्वस्यान्नाद्यस्याधिपत्यमगच्छत् ॥२॥ सर्व्वस्यान्नाद्यस्याधिपत्यं गच्छति य एवँ वेद ॥३॥ शिरो वा अग्रे सम्भवतः सम्भवति चतुर्द्धा विहितँ वै शिरः प्राणश्चक्षुः श्रोत्रँ वागात्मा वै पृष्ठानि यत्पृष्ठान्युपैति शिर एवात्मानमनु सन्दधाति ॥४॥ एतद्वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुरुषमकस्तस्मा अन्नमेव व्रतमपि दधाति ॥५॥ अथ यत् ज्योतिष्टोमोऽतिरात्रो भवत्यक्लृप्तमस्य क्लृप्त्यै ॥६॥ इति नवमः खण्डः॥२२/९॥

पृष्ठ्यः स्तोमः षडहो विश्वजिदतिरात्रः ॥१॥ अन्यस्मै वा कामाय सत्रमन्यस्मै यज्ञो न तत्सत्रेणाप्नोति यस्मैकँ यज्ञो न तद्यज्ञेनाप्नोति यस्मैकँ सत्रँ सत्रमिव वा एतद्यदनुलोमं पृष्ठानि यदैकधा पृष्ठानि भवत्येकधैवास्मिँस्तदोजो वीर्य्यं दधात्यन्नं पृष्ठान्यन्नाद्यमेवास्मिन् दधाति पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठति ॥२॥ यद्वै मनुष्याणां प्रत्यक्षं तद्देवानां परोक्षमथ यन्मनुष्याणां परोक्षं तद्देवानां प्रत्यक्षम् ॥३॥ एतद्वै परोक्षँ व्रतँ यद्विश्वजित् प्रत्यक्ष मेवैतेनान्नाद्यमवरुन्धे ॥४॥ इति दशमः खण्डः॥२२/१०॥

पृष्ठ्यः षडहो महाव्रतं ज्योतिष्टोमोऽतिरात्रः ॥१॥ एतेन वै देवा देवत्वमगच्छन् ॥२॥ देवत्वं गच्छति य एवँ वेद॥३॥ एतद्वै व्रतमाप्तँ यदष्टरात्रेऽग्निष्टोमो हि व्रतँ सम्पद्यते ॥४॥ अथ यज्ज्योतिष्टोमोऽतिरात्रो भवत्यक्लृप्तस्य क्लृप्त्यै ॥५॥ अष्टरात्रेण वै देवाः सर्व्वमाश्नुवत ॥६॥ सर्व्वमश्नुते य एवँ वेद ॥७॥ इत्येकादशः खण्डः ॥२२/११॥

पृष्ठ्यः षडहो ज्योतिर्गौरायुरतिरात्रो देवा वै मृत्योरबि-भयुस्ते प्रजापतिमुपाधावँस्तेभ्य एतेन नवरात्रेणामृतत्वं प्रायच्छत् ॥१॥ एतद्वाव मनुष्यस्यामृतत्वँ यत्सर्व्वमायुरेति वसीयान्भवति ॥२॥ सर्व्वमायुरेति वसीयान् भवति य एवँ वेद ॥३॥ नवरात्रो वा एष नवप्राणाः प्राणेष्वेव प्रतितिष्ठति ॥४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठ्यः षडहो भवति प्रत्यक्षमृद्ध्या अथ यज्ज्योतिर्गौरायु-रतिरात्रो भवति प्रतिष्ठित्यै ॥५॥ इति द्वादशः खण्डः ॥२२/१२॥

ज्योतिष्टोमोऽग्निष्टोमो गौरुक्थ्य आयुरुक्थ्योऽभ्यासङ्ग्यः पञ्चाहो विश्वजिदतिरात्रः पशुकामो यजेत ॥१॥ यज्ज्योति-र्गौरायुस्त्र्यहः पुरस्ताद्भवति प्रज्ञातान् स्तोमानुपैतीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठति ॥२॥ अथ यदभ्यासङ्ग्यः पञ्चाहो मध्यतो भवति पाङ्क्तः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषञ्च पशूँश्चाप्नोति ॥३॥ विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥४॥ इति त्रयोदशः खण्डः॥२२/१३॥

त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यस्त्रिवृदग्निष्टोमः सप्तदशोऽग्निष्टोम एकविँश उक्थ्यः सप्तदशोऽग्निष्टोम-स्त्रिणवोऽग्निष्टोमस्त्रयस्त्रिँश उक्थ्यास्त्रिणवोऽग्निष्टोमो विश्वजिदतिरात्रः ॥१॥ इन्द्रोऽसुरान् हत्वा कार्य्यञ्च कृत्वा अमन्यत तं देवा एतेन स्तोमेनायाजयन् स पाप्मनो नैर्दश्यमगच्छत् ॥२॥ तस्मादिषुहतो वा दण्डहतो वा दशमीं नैर्द्दश्यं गच्छति ॥३॥ दशदशिनी वा एषा विराडन्नँ विराडन्नाद्यमेवास्मिन् दधाति ॥४॥ अग्निष्टोमेन वै देवा असुरान्निगृह्य मध्यत उक्थ्यैः प्रजया पशुभिः प्राजायन्ताग्नि-ष्टोमेनैव भ्रातृव्यं निगृह्य मध्यत उक्थ्यैः प्रजया पशुभिः प्रजायते॥५॥ त्रिककुब्वा एष यज्ञः॥६॥ त्रिककुप् समानानाञ्च प्रजानाञ्च भवति य एवँवेद॥७॥ इतिचतुर्द्दशःखण्डः॥२२/१४॥

त्रयस्त्रिवृतोऽग्निष्टोमास्त्रयः पञ्चदश उक्थ्यास्त्रयः सप्तदश उक्थ्या एकविँशोऽतिरात्रः कुसुरुबिन्द दशरात्रः ॥१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यः कामयेत बहु स्यामिति स एतेन यजेत ॥२॥ यद्गणशः स्तोमा बहुरेव भवति ॥३॥ सह त्रिवृतः सह पञ्चदशाः सह सप्तदशाः ॥४॥ एकविँशोऽतिरात्रो भवति प्रतिष्ठित्यै ॥५॥ ज्योतिर्व्वा एष विहतः ॥६॥ ज्योतिष्प्रजानां भवति य एवँ वेद ॥७॥ चतुष्टोमो वा एष चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठति ॥८॥ एकविँशँ स्तोमानातियन्ति प्रतिष्ठा वा एकविँशः प्रत्येवतिष्ठति ॥९॥ एतेन वै कुसुरुबिन्द औद्दालकि रिष्ट्वा भूमानमाश्नुत ॥१०॥ भूमानमश्नुते य एवँ वेद ॥११॥ इति पञ्चदशः खण्डः॥२२/१५॥

अभ्यासङ्ग्यः पञ्चाहश्चत्वारश्छन्दोमा विश्वजिदतिरात्रः पशुकामो यजेत ॥१॥ यदभ्यासङ्ग्यः पञ्चाहः पुरस्ताद्भवति पाङ्क्तः पुरुषः पाङ्क्ताः पशवस्तेन पुरुषञ्च पशूँश्चाप्नोति ॥२॥ छन्दोमा मध्यतो भवन्ति ॥३॥ पशवो वै छन्दोमाः पशूनामवरुध्यै ॥४॥ विश्वजिदतिरात्रो भवति विश्वस्याभिजित्यै ॥५॥ इति षोडशः खण्डः॥२२/१६॥

त्रिष्टोमोऽग्निष्टोमो ज्योतिरुक्थ्यस्त्रिष्टोमोऽग्निष्टोमो गौरुक्थ्योऽभिजिदग्निष्टोमो गौरुक्थ्यो विश्वजिदग्निष्टोम आयुरुक्थ्यो विश्वजिदग्निष्टोमस्य सर्व्वस्तोमोऽतिरात्रः॥१॥ देवा वा असुरैर्हन्यमानास्त प्रजापतिमुपाधावँस्तेभ्य एतान्देवपुरं प्रायच्छत्तां प्राविशन् ॥२॥ अभिचार्य्यमाणँ याजयेदेतामेव देवपुरं प्रविशत्यस्तृप्त्यै ॥३॥ इति सप्तदशः खण्डः ॥२२/१७॥

अभ्यासङ्ग्यः षडहस्त्रयश्छन्दोमाश्चतुष्टोमोऽग्निष्टोमो विश्वजिदतिरात्रः ॥१॥ स्वाराज्यो वा एष यज्ञः ॥२॥ स्वाराज्यं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गच्छति य एवँ वेद ॥३॥ प्रजापतिर्हि स्वाराज्यं परमेष्ठी स्वाराज्यम् ॥४॥ परमेष्ठितां गच्छति य एवँ वेद ॥५॥ उभे बृहद्रथन्तरे भवतस्तद्धि स्वाराज्यमयुतं दक्षिणास्तद्धि स्वाराज्यँ षड्विँशस्तोमो भवति स हि स्वाराज्यं चतुष्टोमस्तोमः स ह्यन्तोऽन्तँ श्रिया गच्छति य एवँ वेद ॥६॥ एतेन वै क्षेम धृत्वा पौण्डरीक इष्ट्वा सुदाम्नस्तीर उत्तरे ॥७॥ सर्व्वामृद्धिमाध्नोंत् सर्व्वामृद्धिमृध्नोति य एवँ वेद ॥८॥ इत्यष्टादशः खण्डः ॥२२/१८॥ **इति द्वाविँशोऽध्यायः**

अथ त्रयोविँशोऽध्यायः

अतिरात्रःपृष्ठ्यः षडहः सर्व्वस्तोमोऽतिरात्रश्चत्वार-श्छन्दोमा अतिरात्रः॥१॥ एष वा आप्तो द्वादशाहो यत्त्रयोदश-रात्रयः ॥२॥ समानो ह्येष यत् प्रायणीयश्चोदयनीयश्चातिरात्रौ यं कामं कामयन्ते तमेताभिरभ्यश्नुवते ॥३॥ गृहपतेस्तु वागुपदासुका भवति तद्यन्मध्ये सर्व्वस्तोमोऽतिरात्रो भवति तेन गृहपतेर्व्वागनुपदासुका भवति ॥४॥ एता वा अर्य्यलगृहपतय आरुणि होतारः सुभगा सूपयन्ति ते सर्व्वामृद्धिमाध्नुवन् सर्व्वामृद्धिमृध्नुवन्ति य एता उपयन्ति ॥५॥ इति प्रथमः खण्डः ॥२३/१॥

अतिरात्रो द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥१॥ वाग्वा एषा प्रतायते यदेष द्वादशाहस्ताँ विच्छिन्द्युर्य्यन्मध्ये ऽतिरात्रं कुर्य्युः॥२॥ यदुपरिष्टाद्व्रतमुपयन्ति न वाचँ विच्छिन्द-न्त्याप्नुवन्ति त्रयोदशं मासम् ॥३॥ एता वै प्रतिष्ठिता

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रयोदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥४॥ इति द्वितीयः खण्डः॥२३/२॥

अतिरात्रः पृष्ठ्यः षडहः पृष्ठ्यः षडहस्त्रयस्त्रिँशारम्भणोऽतिरात्रः ॥१॥ कामसनयो वा एता रात्रयः ॥२॥ विराड्ढिदशात्मैकादशी प्रजा द्वादशी पशवस्त्रयोदशी कामाय चतुर्दशी ॥३॥ सर्व्वानिवैताभिः कामानवरुन्धते ॥४॥ एता वाव ब्रध्नस्य विष्टपो यदेतौ त्रयस्त्रिँशौ मध्यतः सन्धीयेते तेन ब्रध्नस्य विष्टपँ रोहन्ति ॥५॥ द्विः पृष्ठान्युपयन्त्यभिपूर्व्वमेवैताभिरन्नाद्यं दधते ॥६॥ पक्षिण्यो वा एता रात्रयो यं कामं कामयन्ते तमेताभिरभ्यश्नुवते ॥७॥ यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुते ॥८॥ त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥९॥ इति तृतीयः खण्डः ॥२३/३॥

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहः पृष्ठ्यः षडह आयुर्गौर्ज्ज्योतिरतिरात्रः ॥१॥ याँस्तल्पे वोदके वा विवाहे वा मीमाँसेरँस्ता एता उपेयुः ॥२॥ यज्ज्योतिर्गौरायुस्त्र्यहः प्रज्ञाताँ स्तोमानुपयन्ति ॥३॥ इमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्ति ॥४॥ अथ यत् पृष्ठ्यः षडहो मध्यतो भवत्येष वाव देवतल्पो देवतल्पमेव तदारोहन्ति तल्प्या भवन्ति ॥५॥ प्रवसीयसस्तल्पमाप्नुवन्ति ॥६॥ अथ यदायुर्गौर्ज्ज्योतिरतिरात्रो येनेतो यन्ति तेन पुनरायन्ति ॥७॥ इति चतुर्थः खण्डः॥२३/४॥

अतिरात्रो गौश्चायुश्च द्वे अहनी द्वादशाहस्य दशाहान्यतिरात्रः॥१॥ यद्गौश्चायुश्च द्वे अहनी भवतो मिथुनौ सोमावुप-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यन्ति प्रजात्यै ॥२॥ अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥३॥ एता वै प्रतिष्ठिता-श्चतुर्द्दशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥४॥ इति पञ्चमः खण्डः॥२३/५॥

अतिरात्रः पृष्ठ्यः षडहो महाव्रतं पृष्ठ्यः षडहस्त्रय-स्त्रिँशारम्भणोऽतिरात्रः ॥१॥ एताभिर्व्वै देवा देवत्वमगच्छन् देवत्वं गच्छन्ति य एता उपयन्ति ॥२॥ एतद्वै देवानाँ सत्रं तदद्यापि देवाः सत्रमासते ॥३॥ पौर्णमास्यतिरात्रोऽथ यानि षडहानि स पृष्ठ्यः षडह एकाष्टका महाव्रतमथ यानि षडहानि स पृष्ठ्यः षडहोऽमावास्यातिरात्रः॥४॥ तस्मात्तर्हि मनुष्याणां न सुतो देवानाँ हि तर्हि सुतः प्रत्यक्षमेवैताभिर्द्देवता अभ्यारोहन्ति ॥५॥ प्रतिनोदात्तभय्यमितरमनुपक्षो दीक्षेरन्नप्रति नोदाय ॥६॥ इति षष्ठः खण्डः ॥२३/६॥

अतिरात्रस्त्रिवृदग्निष्टुदग्निष्टोमो ज्योतिर्ग्गौरायुस्त्र्यहः पृष्ठ्यः षडह आयुर्ग्गौर्ज्ज्योतिरतिरात्रः ॥१॥ क्षत्रँ वा एता रात्रयोऽभिनिर्व्वदन्ति ॥२॥ ब्रह्मवर्च्चसकामा उपेयुः ॥३॥ यत्त्रिवृदग्निष्टुदग्निष्टोमो भवति ब्रह्म तद्यशसार्द्धयति ॥४॥ ब्रह्म वै त्रिवृत् ॥५॥ यज्ज्योतिर्ग्गौरायुस्त्र्यहः प्रज्ञातान् स्तोमानुपयन्तीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्त्यथ यत्पृष्ठ्यः षडहो मध्यतो भवत्यन्नँ वै पृष्ठान्यन्नमेव तन्मध्यतो धीयते तस्मान्मध्ये सदन्नं धिनोत्यथ यदायुर्ग्गौर्ज्ज्योतिरति रात्रो येनेतो यन्ति तेन पुनरायन्ति ॥६॥ इति सप्तमःखण्डः॥२३/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिवृदग्निष्टुदग्निष्टोमो ज्योतिर्गौरायुस्त्र्यहो द्वादशाहस्य दशाहान्यतिरात्रः ॥१॥ अन्यस्मै वै कामाय सत्रमन्यस्मै यज्ञो न तत्सत्रेणाप्नोति यस्मैकँ यज्ञो न तद्यज्ञेनाप्नोति यस्मैकँ सत्रम् ॥२॥ यदन्यतोऽतिरात्रास्तेन यज्ञोऽथ यानि द्वादशाहस्य दशाहानि तेन सत्रम् ॥३॥ उभावेवैताभिः कामाववरुन्धते ॥४॥ इत्यष्टमः खण्डः ॥२३/८॥

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहो द्वादशाहस्य दशाहान्यतिरात्रः प्रजाकामा उपेयुः ॥१॥ एताभिर्व्वै प्रजापतिः प्रजा असृजत प्र प्रजया प्र पशुभिर्ज्जायन्ते य एता उपयन्ति ॥२॥ यज्ज्योतिर्गौरायुस्त्र्यहः प्रज्ञातान् स्तोमानुपयन्तीमानेव लोकानेष्वेव लोकेषु प्रतितिष्ठन्ति ॥३॥ अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥४॥ एता वै प्रतिष्ठिताः पञ्चदशरात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥५॥ इति नवमः खण्डः ॥२३/९॥

एता वाव समहाव्रताः ॥१॥ एताभिर्व्वा इन्द्रः परमाँ विजितिँ व्यजयत परमामेवैताभिर्व्विजितिँ विजयन्ते ॥२॥ पञ्चदशो वै वज्र्रो न वा अगृहीतेन वज्ज्रेण वीर्य्यं करोति या षोडश्यारम्भणमेव तद्गृहीतेन वज्ज्रेण वीर्य्यं करोति ॥३॥ इति दशमः खण्डः ॥२३/१०॥

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहो द्वादशाहस्य दशाहान्यतिरात्रः॥१॥ एताभिर्व्वै प्रजापतिरनन्ताँ श्रियमजय-दनन्ता वा एता यत्पञ्चाहविधाः ॥२॥ यत्पञ्चाहोऽनन्तादेव प्रजायन्ते ॥३॥ अथ यानि द्वादशाहस्य दशाहानि वाचमवि-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

च्छिन्नामुपयन्ति प्रजननाय ॥४॥ एता वै प्रतिष्ठिताः सप्तदश-रात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥५॥ इत्येकादशःखण्डः॥२३/११॥

अतिरात्रोऽभिप्लवः षडहो द्वादशाहस्य दशाहान्यतिरात्रः ॥१॥ देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावँस्तेभ्य एतेनाष्टादशरात्रेणामृतत्वं प्रायच्छत् ॥२॥ एतद्वाव मनुष्यस्यामृ-तत्वँ यत्सर्व्वमायुरेति वसीयान् भवति ॥३॥ सर्व्वमायुर्य्यन्ति वसीयाँसो भवन्ति य एता उपयन्ति ॥४॥ द्विर्व्वा एता नव नव प्राणा अभिपूर्व्वमेवैताभिरायुर्द्दधते ॥५॥ इति द्वादशःखण्डः ॥२३/१२॥

एता एव समहाव्रताः ॥१॥ एताभिर्व्वै वायुरारण्यानां पशूनामाधिपत्यमाश्नुतोभयेषां पशूना माधिपत्यं गच्छति य एता उपयन्ति॥२॥ मृगसत्रँ वा एतत् ॥३॥ एताभिर्व्वा आरण्याः पशवो नाकृताः प्रजायन्ते ॥४॥ अनाकृतमेषां प्रजायते य एता उपयन्ति॥५॥ इति त्रयोदशः खण्डः ॥२३/१३॥

अतिरात्रोऽभिप्लवः षडहोऽभिजिच्च विश्वजिच्च द्वे अहनी द्वादशाहस्य दशाहान्यतिरात्रः ॥१॥ पुरुषकामा उपेयुरेताभिर्व्वै प्रजापतिः पुरुषमसृजत ॥२॥ स सर्व्वस्यान्नाद्यस्याधिपत्य-मगच्छत् सर्व्वस्यान्नाद्यस्याधिपत्यं गच्छन्ति य एता उपयन्ति ॥३॥ पुरुषसत्रँ वा एतत् ॥४॥ विँशो वै पुरुषो दश हि हस्त्या अङ्गुल्यो दशपाद्याः ॥५॥ यदेता विँशती रात्रयो भवन्त्येष्वेवै-ताभिर्ल्लोकेषु पुरुषं प्रतिष्ठापयन्ति ॥६॥ एता वै प्रतिष्ठिता विँशती रात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥७॥ इतिचतुर्द्दशः खण्डः॥२३/१४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अतिरात्रोऽभिप्लवः षडहोऽतिरात्रोऽभिप्लवः षडहो ऽभिप्लवः षडहोऽतिरात्रः पशुकामा उपेयुः ॥१॥ एताभिर्व्वा आदित्याः सप्त ग्राम्यान् पशूनुदसृजन्त पशूनेवैताभिरुत्सृजन्ति ॥२॥ त्रिर्व्वै सप्त सप्तादित्याः ॥३॥ पशव आदित्याः ॥४॥ आदित्या अस्मिँल्लोक ऋद्धा आदित्या अमुष्मिन् ॥५॥ पशवोऽस्मिन् ऋतवोऽमुष्मिन् ॥६॥ उभयोरनयोर्ल्लोकयो-र्ऋध्नुवन्ति देवलोके च मनुष्यलोके च य एता उपयन्ति ॥७॥

इति पञ्चदशः खण्डः ॥२३/१५॥

अतिरात्रः पृष्ठ्यः षडहस्त्रयः स्वरसामानो दिवाकीर्त्य-महस्त्रयः स्वरसामानः पृष्ठ्यः षडहस्त्रयस्त्रिँशारम्भणोऽतिरात्रो ब्रह्मवर्च्चसकामा उपेयुः ॥१॥ स्वर्भानुर्व्वा आसुरः सूर्य्यं तमसाविध्यत्तस्मै देवाः प्रायश्चित्तिमैच्छँस्त एता अविन्दँ-स्ताभिरस्मात्तमोऽपाघ्नन् ॥२॥ अपतमो घ्नते य एता उपयन्ति ॥३॥ सौमपौषं पशुमुपालभ्यमालभेरन् ॥४॥ सोमो वै ब्राह्मणः पशवः पूषा स्वामेव तद्देवतां पशुभिर्व्वहयन्ते त्वचमेवाक्रत ॥५॥ मनोर्ऋचः सामिधेन्यो भवन्ति ॥६॥ मनुर्व्वै यत् किञ्चावदत्तद्भेषजं भेषजतायै ॥७॥ नैदाघीय उपेयुः ॥८॥ तद्ध्येष प्रति तेजिष्ठं तपति ॥९॥ किलासत्वात्तुभयमतिह्येभ्यो ऽपहन्ति ॥१०॥ एता वा उग्रदेवो राजनि रूपैत् स किलासोऽ भवत् ॥११॥ अकिलासो भवति य एवँ विद्वानेता उपैति ॥१२॥

इति षोडशः खण्डः ॥२३/१६॥

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहोऽभिप्लवः षडहो द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्चान्नाद्यकामा उपेयुः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥१॥ पञ्चर्त्तवो द्वादशमासास्त्रय इमे लोका असावादित्य एकविँशोऽन्नं द्वाविँशमेभ्यो लोकेभ्यः सँवत्सरादमुष्मा-दादित्यादन्नाद्यमवरुन्धते य एता उपयन्ति ॥२॥ इति सप्तदशः खण्डः ॥२३/१७॥

अतिरात्रो ज्योतिर्ग्गौरायुर्ग्गौरायुः पञ्चाहोऽभिप्लवः षडहो द्वादशाहस्य दशाहान्यतिरात्रः प्रतिष्ठाकामा उपेयुः ॥१॥ एताभिर्व्वै प्रजापतिरेषु लोकेषु प्रत्यतिष्ठन् ॥२॥ यदेतास्त्रयो-विँशती रात्रयो भवन्ति त्रय इमे लोका एष्वेवैताभिर्ल्लोकेषु प्रतितिष्ठन्ति ॥३॥ एता वै प्रतिष्ठितास्त्रयोविँशती रात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥५॥ इत्यष्टादशःखण्डः ॥२३/१८॥

अतिरात्रः पृष्ठ्यः स्तोमः षडहस्त्रयस्त्रिँशमहरनिरुक्त-मुपहव्यस्य तन्त्रे क्लृप्तन्तस्य कण्वरथन्तरं मध्यन्दिनेऽथ त्रयस्त्रिँशं निरुक्तं त्रिणवं द्वे एकविँशे त्रिणवं त्रयस्त्रिँश-महर्न्निरुक्तं त्रयस्त्रिँशमहरनिरुक्तं पृष्ठ्यः स्तोमः षडहः प्रत्यङ् त्रिवृदहरनिरुक्तं ज्योतिष्टोमोऽग्निष्टोमोऽतिरात्रः ॥१॥ एताभिर्व्वै देवाः स्वर्ग्गे लोके समसीदन् स्वर्ग्गे लोके सीदामेत्येताः ॥२॥ एता वाव ब्रध्नस्य विष्टपो यदेते त्रयस्त्रिँशा मध्यतः सन्धीयन्ते तेन ब्रध्नस्य विष्टपँ रोहन्ति ॥३॥ मध्यतः पृष्ठान्युपयन्त्यन्नँ वै पृष्ठान्यन्नमेव तन्मध्यतो धीयते तस्मान्मध्ये सदन्नं धिनोति ॥४॥ सप्ताहा वा एते ॥५॥ अतो वै प्रजाः प्रजायन्ते ॥६॥ प्र प्रजया प्र पशुभिर्ज्जायन्ते य एता उपयन्ति ॥७॥ अपशव्यँ वा एतत्सत्रँ यदच्छन्दोमँ यत्सप्ताहास्तेन छन्दोमवत्यस्तेन पशव्याः ॥८॥ त्रयस्त्रिँशस्त्रयस्त्रिँशमन्वेति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिवृत् त्रिवृतमग्रादग्रँ रोहन्ति यत्त्रयस्त्रिँशस्त्रयस्त्रिँशमन्वेति प्राणात् प्राणेषु प्रतितिष्ठन्ति ॥९॥ यत्त्रिवृत्त्रिवृतम् ॥१०॥ विलोमानो वा एता रात्रयो यज्ज्योतिरग्निष्टोम उक्थानीयमह र्भवत्यक्लृप्तस्थं क्लृप्त्यै॥११॥ इत्येकोनविँशःखण्डः॥२३/१९॥

अतिरात्रो द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहा-न्यतिरात्रः प्रजाकामा वा पशुकामा वोपेयुः ॥१॥ क्लृप्ताद्वै योनेः प्रजाः पशवः प्रजायन्ते यत् क्लृप्तौ षडहावुपयन्ति क्लृप्तादेव योनेः प्रजया पशुभिः प्रजायन्ते ॥२॥ अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय॥३॥ एता वै प्रतिष्ठिताश्चतुर्व्विँशती रात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥४॥ इति विँशः खण्डः ॥२३/२०॥

एता एव समहाव्रताः ॥१॥ एताभिर्व्वै प्रजापतिः सर्व्वमन्नाद्यमवारुन्ध ॥२॥ चतुर्व्विँशतिः सँवत्सरस्यार्द्धमासाः सँवत्सरः पञ्चविँशोऽन्नँ व्रतँ सँवत्सरादेताभिरन्नाद्यमवरुन्धे य एता उपयन्ति ॥३॥ इत्येकविँशः खण्डः ॥२३/२१॥

अतिरात्रो गौश्चायुश्च द्वे अहनी द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्रः ॥१॥ ऋतवो न प्रत्यतिष्ठँस्ता एताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः प्रत्येवतिष्ठन्ति ॥२॥ षड्वा ऋतव ऋतुष्वेवैताभिः प्रतितिष्ठन्ति ॥३॥ यद्गौश्चायुश्च द्वे अहनी भवतो मिथुनौ स्तोमावुपयन्ति प्रजात्यै ॥४॥ यत्क्लृप्तौ षडहावुपयन्ति क्लृप्त्या एव ॥५॥ अथ यानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥६॥ एता वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतिष्ठिता षड्विँशती रात्रयः प्रतितिष्ठन्ति य एता उपयन्ति ॥७॥ इति द्वाविँशः खण्डः॥२३/२२॥

अतिरात्रो ज्योतिर्ग्गौरायुस्त्र्यहो द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्र ऋद्धिकामा उपेयुः ॥१॥ एताभिर्व्वै नक्षत्राणि सर्व्वामृद्धिमार्ध्नुवन् सर्व्वामृद्धिमृध्नुवन्ति य एता उपयन्ति ॥२॥ यदेतास्सप्तविँशती रात्रयो भवन्ति सप्तविँशतिर्न्नक्षत्राणि नक्षत्रसम्मिता वा एता रात्रयो नक्षत्राणामेवर्द्धिमृध्नुवन्ति ॥३॥ इति त्रयोविँशःखण्डः॥२३/२३॥

एता एव समहाव्रताः पशुकामा उपेयुर्य्यदेता अष्टाविँशती रात्रयो भवन्त्यष्टाशफाः पशवः शफश एवैताभिः पशूनवरुन्धते ॥१॥ इति चतुर्व्विँशः खण्डः॥२३/२४॥

अतिरात्रो ज्योतिर्ग्गौरायुर्ग्गौरायुः पञ्चाहो द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्रः ॥१॥ एताभिर्व्वै प्रजापतिरनन्ताँ श्रियमजयत् ॥२॥ अनन्ता वा एता या एकया न त्रिँशन्नेति वाचोऽनन्तम् ॥३॥ यदेता एकया न त्रिँशद्रात्रयो भवन्त्यनन्तामेवैताभिः श्रियं जयन्ति ॥४॥ इति पञ्चविँशः खण्डः॥२३/२५॥

अतिरात्रस्त्रयोऽभिप्लवाःषडहा द्वादशाहस्य दशाहान्यति–रात्रोऽन्नाद्यकामा उपेयुः॥१॥ परोक्षमन्यानि सत्राणि विराजँ सम्पद्यन्ते प्रत्यक्षमेता विराजँ सम्पन्नाः ॥२॥ प्रत्यक्षमेताभि–रन्नाद्यमवरुन्धते य एता उपयन्ति ॥३॥ इति षड्विँशः खण्डः ॥२३/२६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एता एव समहाव्रता एताभिर्व्वै प्रजापतिरभिपूर्व्वमन्नाद्य-मवारुन्ध ॥१॥ अन्नँ विराडन्नँ व्रतम् ॥२॥ अभिपूर्व्वमेवैताभि-रन्नाद्यमवरुन्धते ॥३॥ इति सप्तविँशः खण्डः॥२३/२७॥

अतिरात्रो गौश्चायुजश्च द्वे अहनी त्रयोऽभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः॥१॥ अनुष्टुब्वा एता रात्रयः ॥२॥ द्वात्रिँशदक्षरानुष्टुप् ॥३॥ वागनुष्टुप् ॥४॥ चतुष्पादाः पशवः ॥५॥ वाचा पशून्दाधार ॥६॥ एताभी रात्रीभिः ॥७॥ तस्मात्ते वाचा सिद्धा वाचाऽऽहूता आयान्ति ॥८॥ इत्यष्टाविँशः खण्डः॥२३/२८॥ **इति त्रयोविँशोऽध्यायः**

अथ चतुर्व्विँशोऽध्यायः

अतिरात्रस्त्रयः पञ्चाहा विश्वजिदतिरात्र एकः पञ्चाहो द्वादशाहस्य दशाहान्यतिरात्रः ॥१॥ प्रजापतिः प्रजा असृजत ता न प्रत्यतिष्ठँस्ता एताभिः प्रत्यतिष्ठन्निमे लोका न प्रत्यतिष्ठँस्त एताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः प्रत्येवतिष्ठन्ति ॥२॥ अरूपेण वा एताः सरूपा अरूपेण प्रजाः सरूपा अरूपेणेमे लोकाः सरूपा यद्रथन्तरस्य लोकं बृहदापद्यते बृहतो रथन्तरमरूपेणैवैभ्यस्तत्सरूपं प्रजनयन्ति ॥३॥ लुप्यते वा एतत् षष्ठमहर्य्यत् पञ्चाहानुपयन्ति नर्त्तवः कल्पन्ते यत्पृष्ठ्यः षडहस्तेन षष्ठमहर्न्न लुप्यते तेनर्त्तवः कल्पन्ते ॥४॥ अथ यानि द्वादशाहस्य दशाहानि तेन पञ्चाहेभ्यो न यन्ति ॥५॥ ऊधर्व्वा अन्तरिक्षँ स्तनावभितोऽनेन वा एष देवेभ्यो दुग्धेऽमुना प्रजाभ्यः ॥६॥ इदँ वा अन्तरिक्षँ वियदिमौ स्तनावभितः ॥७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तदभ्यनूक्ता ॥८॥ त्रिँशति त्रयः परो ये देवा बर्हिरासतव्यं न ह द्वितातनेति ॥९॥ऊधर्व्वै मध्यतोऽतिरात्रः स्तनावभितः॥१०॥ यदेषोऽनतिरात्रः स्यादूधः प्रतिहरेत्॥११॥ तस्मादतिरात्रः कार्य्य ऊधसोऽप्रति हाराय ॥१२॥ त्रयस्त्रिँशद्देवता एताभिरार्ध्नुवँ-स्तेनर्द्धिस्तस्मादेताभिर्य्यजन्त ऋद्ध्या एव ॥१३॥ नाना ब्रह्मसामान्युपयन्त्यह्नां नाना वीर्य्यतायै नानैव वीर्य्याण्यवरुन्धते ॥१४॥ इति प्रथमः खण्डः ॥२४/१॥

अतिरात्रोऽभिप्लवः षडहोऽतिरात्रोऽभिप्लवः षडहोऽतिरात्रो ऽभिप्लवः षडहो द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥१॥ आदित्याश्चाङ्गिरसश्चैतत्सत्रँ समदधतादित्यानामेकविँशति-रङ्गिरसां द्वादशाह आदित्या अस्मिँल्लोक ऋद्धा आदित्या अमुष्मिन्नङ्गिरसोऽस्मिन्नङ्गिरसोऽमुष्मिन् द्वयँ सत्रँ यावद्द्वयेन सत्रेणर्ध्नुवन्ति तावत्येतासामृद्धिः॥२॥ इति द्वितीयः खण्डः॥२४/२॥

अतिरात्रस्त्रयः पञ्चाहा विश्वजिदतिरात्रस्त्रयः पञ्चाहा अतिरात्रः ॥१॥ अपशव्यँ वा एतत्सत्रँ यदच्छन्दोमँ यद्विश्वजिति छन्दोमानुपयन्ति तेन छन्दोमवत्यस्तेन पशव्याः ॥२॥ पक्षिण्यो वा एता रात्रयो यं कामं कामयन्ते तमेताभिरभ्यश्नुवते यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुवते ॥३॥ त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत् स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥४॥ इति तृतीयः खण्डः॥२४/३॥

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहस्त्रयोऽभिप्लवाः षडहा द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्चर्द्धिकामा उपेयुः॥१॥ एताभिर्व्वै प्रजापतिः सर्व्वामृद्धिमार्ध्नोत्सर्व्वामृद्धिमृध्नुवन्ति य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एता उपयन्ति ॥२॥ यदेता श्चतुस्त्रिँशद्रात्रयो भवन्ति. त्रयस्त्रिँशद्देवताः प्रजापतिश्चतुस्त्रिँशो देवतानां प्रजापतेरेवर्द्धि-मृध्नुवन्ति ॥३॥ इति चतुर्थः खण्डः॥२४/४॥

अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पञ्चाहस्त्रयोऽभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः ॥१॥ यदेताः पञ्चत्रिँशद्रात्रयो भवन्ति पाङ्क्ताः पशवः पशूनेवै-ताभिरवरुन्धते ॥२॥ इति पञ्चमःखण्डः॥२४/५॥

अतिरात्रश्चत्वारोऽभिप्लवाः षडहा द्वादशाहस्य दशाहा-न्यतिरात्रः पशुकामा उपेयुः ॥१॥ एताभिर्व्वै देवा आदित्यम-स्तभ्नुवन्नादित्यलोकं जयन्ति य एता उपयन्ति ॥२॥ बृहती वा एता रात्रयः स्वाराज्यं छन्दसां बृहती यो वै पशूनां भूमानं गच्छति स स्वाराज्यं गच्छति प्र स्वाराज्य माप्नुवन्ति य एता उपयन्ति ॥३॥ इति षष्ठः खण्डः ॥२४/६॥

एता एव समहाव्रताः॥१॥ एताभिर्व्वै प्रजापतिरुभौ कामाववारुन्धान्नँ व्रतं पशवो बृहत्युभाववैताभिः कामाववरुन्धे ॥२॥ इति सप्तमः खण्डः ॥२४/७॥

अतिरात्रो गौश्चायुश्च द्वे अहनी चत्वारोऽभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुः ॥१॥ यदेता अष्टात्रिँशद्रात्रयो भवन्त्यष्टाशफाः पशवः शफश एवैताभिः पशूनवरुन्धते ॥२॥ इत्यष्टमः खण्डः॥२४/८॥

अतिरात्रो ज्तोतिर्गौरायुस्त्र्यहश्चत्वारोऽभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः ॥१॥ एताभिर्व्वै प्रजापतिरनन्ताँ श्रियमजयदनन्ता वा एता या एकया न चत्वारिँशन्नेति वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वाचोऽनन्तम् ॥२॥ यदेता एकया न चत्वारिँशद्रात्रयो भवन्त्य-नन्तामेवैताभिः श्रियं जयन्ति ॥३॥ इति नवमःखण्डः ॥२४/९॥

एता एव समहाव्रताः ॥१॥ सर्व्वा वा एता विराजो दशिनी प्रथमा विँशिनी द्वितीया त्रिँशिनी तृतीयैषा वै परमा विराट् यच्चत्वारिँशद्रात्रयः पङ्क्तिर्व्वै परमा विराट् ॥२॥ परमायामेव विराजि प्रतितिष्ठन्ति ॥३॥ इति दशमःखण्डः ॥२४/१०॥

अतिरात्रस्त्रीणि त्रिवृन्त्यहान्यग्निष्टोममुखान्यतिरात्रो दशपञ्चदशा उक्थ्याः षोडशिमद्दशममहरतिरात्रो द्वादशसप्त-दशा उक्थ्याः अतिरात्रः पृष्ठ्यः षडहोऽतिरात्रो द्वादशैकविँशा उक्थ्या अतिरात्रः ॥१॥ प्रजापतिः प्रजा असृजत ता अविधृता असञ्जानाना अन्योन्यामादँस्तेन प्रजापतिरशोचत्स एता अपश्यत्ततो वा इदँ व्यावर्त्तत गावो गावोऽभवन्नश्वा अश्वाः पुरुषाः पुरुषा मृगा मृगाः ॥२॥ वि पाप्माना वर्त्तन्ते य एता उपयन्ति ॥३॥ यदतिरात्रा अन्तरा विधृत्यै तस्मान्नेतर इतरस्मिन् रेतो दधाति ॥४॥ यत् पृष्ठ्याः स्तूमाः सँसृष्टास्तस्मादजावयः पशूनाँ सह चरन्ति तस्मादु गर्द्दभो वडवायाँ रेतो दधाति ॥५॥ अपशव्यँ वा एतत्सत्रँ यदच्छन्दोमँ यत्सन्धिषामसु छन्दाँस्युपयन्ति तेन छन्दोमवत्य स्तेन पशव्याः॥६॥ गायत्रीषु जराबोधीयमुष्णिक्षु श्रुदध्यमनुष्टुप्सु नानदं बृहतीषु रथन्तरं पङ्क्तिषु रायोवाजीयं त्रिष्टुप्स्वौशनं जगतीषु कावम् ॥७॥ ऊर्ध्वानि छन्दाँस्युपयन्त्यनपभ्रँशाय ॥८॥ प्राणो वै स्वरो यत् स्वरावन्ततो भवतस्तस्मात् द्वावन्ततः प्राणौ ॥९॥ इत्येकादशः खण्डः॥२४/११॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अतिरात्रौ द्वावभिप्लवौ षडहौ गौश्चायुश्चातिरात्रौ द्वावभिप्लवौ षडहावभिजिच्च विश्वजिच्चातिरात्रावेकोऽभिप्लवः षडहः सर्व्वस्तोमश्च नव सप्तदशश्चातिरात्रो द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥१॥ आदित्यानाँ यमातिरात्राः ॥२॥ यमेवैषाँ श्रीर्भवति य एता उपयन्ति ॥३॥ एताभिर्व्वा आदित्या द्वन्द्वमार्ध्नुवन्मित्रश्च वरुणश्च धाताचार्य्यमा चाँशश्च भगश्चेन्द्रश्च विवस्वाँश्चैतासामेव देवतानामृद्धिमृध्नुवन्ति य एता उपयन्ति॥४॥ तदभ्यनूक्ता ॥५॥ अष्टौ पुत्रासो अदितेर्य्ये जातास्तन्वं परि देवाँ उपप्रैत् सप्तभिः परा मार्त्ताण्डमास्यदिति ॥६॥ आदित्या अस्मिँल्लोक ऋद्धा आदित्या अमुष्मिन्नुभयोर्ल्लोकयोर्ऋध्नुवन्ति देवलोके च मनुष्यलोके च य एता उपयन्ति ॥७॥ इति द्वादशः खण्डः॥२४/१२॥

अतिरात्रश्चत्वारोऽभिप्लवाः षडहाः सर्व्वस्तोमोऽतिरात्रो द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्रः॥१॥ प्रजापतिः प्रजा असृजत स रूक्षोऽभवत्तँ रूक्षं नाजानन् स आचाङ्क्ताभिचाङ्क्तः ॥२॥ य आत्मानं नेव जानीरँस्त एता उपेयुर्य्यदा चाञ्जतेऽभिचाञ्जते शुभमेवात्मन्दधत्ते जानन्त्येनान् ॥३॥ गौर्ग्गुलवेन प्रातस्सवने सौगन्धिकेन माध्यन्दिने सवने पैतुदारवेण तृतीयसवने ॥४॥ अग्निर्व्वै देवानाँ हौत्रमुपैष्यञ्छरीरमधूनुत तस्य यन्माँसमासीत्तद् गुग्गुल्वभवद्यत्स्नावतत्सुगन्धि तेजनँ यदस्थि तत् पीतुदार्व्वेतानि वै देवसुरभीणि देवसुरभिभिरेव तदभ्यञ्जते ॥५॥ इति त्रयोदशः खण्डः ॥२४/१३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अतिरात्रश्चतुर्व्विँशं प्रायणीयमहस्त्रयोऽभिप्लवाः षडहा अभिजित्त्रयः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानो विश्वजिदेकोऽभिप्लवः षडह आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च सँवत्सरसम्मिता यावती सँवत्सरस्यर्द्धिस्तावत्येतासामृद्धिः ॥१॥ तदाहुर्य्यच्चतु-र्व्विँशमहः प्रायणीयं कुर्य्युः सँवत्सरमारभ्य न समापयेयुरिति त्रिवृदेव कार्य्यं प्राणा वै त्रिवृत् प्राणानेवोपयन्ति ॥२॥ अथो खल्वाहुश्चतुर्व्विँशमेव कार्य्यँ समृद्ध्यै ॥३॥ अथैते स्वरसामानः शिरो वै दिवाकीर्त्त्यं प्राणाः स्वरसामानो यद्दिवाकीर्त्त्यमभितः स्वरसामानो भवन्ति शिरस्येव तत् प्राणा धीयन्ते ॥४॥ अथ यावन्त्यौ प्राणौ तौ विश्वजिदभिजितावथैते गो आयुषी मिथुनौ स्तोमावुपयन्ति प्रजात्यै ॥५॥ अथैतानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननाय ॥६॥ अथैतद्व्रतमन्नँ वै न वा अन्यत्र मुखादन्नं धिनोति यदुपरिष्टाद् व्रतमुपयन्ति मुखत एव तदन्नाद्यं धीयते तस्मान्मुखे सदन्नं धिनोति ॥७॥ अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥८॥ इति चतुर्द्दशः खण्डः॥२४/१४॥

अतिरात्रो नव त्रिवृन्त्यहान्यग्निष्टोममुखषडहोऽथ यानि त्रीण्यहान्यग्निष्टोमावभित उक्थ्यं मध्यतो नव पञ्चदशाहा-न्यग्निष्टोममुखः षडहोऽथ यानि त्रीण्यहान्यग्निष्टोमावभित उक्थ्यं मध्यतो नव सप्तदशान्यहान्यग्निष्टोममुखः षडहोऽथ यानि त्रीण्यहान्यग्निष्टोमावभित उक्थ्यं मध्यतो नवैकविँशा-न्यहान्यग्निष्टोममुखः षडहोऽथ यानि त्रीण्यहान्यग्निष्टोमा-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वभित उक्थ्यं मध्यतो द्वादशाहस्य दशाहानि महाव्रतञ्चाति-रात्रश्च ॥१॥ एताभिर्व्वै सविता सर्व्वस्य प्रसवमगच्छत् ॥२॥ सर्व्वस्य प्रसवं गच्छन्ति य एता उपयन्ति ॥३॥ यद्गणशः स्तोमा बहव एव भवन्ति सह त्रिवृतःसह पञ्चदशाः सह सप्तदशाः सहैकविँशाः सवितुर्व्वा एताः ककुभः ॥४॥ ककुभः समानानाञ्च प्रजानाञ्च भवन्ति य एता उपयन्ति ॥५॥ इति पञ्चदशः खण्डः ॥२४/१५॥

अतिरात्रश्चत्वारोऽभिप्लवाः षडहा महाव्रतं द्वावभिप्लवौ षडहौ द्वादशाहस्य दशाहान्यतिरात्रः॥१॥ ऋतवो न प्रत्यतिष्ठँस्त एताभिः प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः ॥२॥ प्रत्येव तिष्ठन्ति षड्वा ऋतव ऋतुष्वेवैताभिः प्रतितिष्ठन्ति यत्क्लृप्तान् षडहानुपयन्ति क्लृप्त्या एव ॥३॥ अथैतद्व्रतमन्नँ वै व्रतन्नवा अन्यत्र मध्यादन्नं धिनोति यद्व्रतं मध्यत उपयन्ति मध्यत एव तदन्नाद्यं धीयते तस्मान्मध्ये सदन्नं धिनोति ॥४॥ यत्क्लृप्तौ षडहावुपयन्ति क्लृप्त्या एव ॥५॥ अथैतानि द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननायाथैतौ प्रायणीयो-दयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥६॥ इति षोडशः खण्डः ॥२४/१६॥

अतिरात्रः षडभिप्लवाः षडहा द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥१॥ एताभिर्व्वा इन्द्राग्गनी अत्यन्या देवता अभवतामत्यन्याः प्रजा भवन्ति य एता उपयन्ति ॥२॥ इन्द्राग्गनी वै देवानामोजिष्ठा ओजिष्ठा भवन्ति य एता उपयन्ति ॥३॥ यत्क्लृप्तान् षडहानुपयन्ति क्लृप्त्या एवाथैतानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वादशाहस्य दशाहानि वाचमविच्छिन्नामुपयन्ति प्रजननायाथैतद् व्रतमथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥४॥ इति सप्तदशः खण्डः ॥२४/१७॥

अतिरात्रश्चतुर्व्विँशं प्रायणीयमहस्त्रयोऽभिप्लवाः षडहाः पृष्ठ्यः षडहोऽभिजित् त्रयस्स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानो विश्वजित्पृष्ठ्यः षडहस्त्रयस्त्रिँशारम्भण एको-ऽभिप्लवः षडह आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च तदेतदेकषष्टिरात्रं देवानाँ व्रात्यानाम् ॥१॥ दैवा वै व्रात्याः सत्रमासत बुधेन स्थपतिना ते ह वा अनिर्य्याच्य वरुणँ राजानं देवयजनं दिदीक्षुस्तान् ह वा वरुणो राजानु व्याजहारान्तरेमि वो यज्ञियाद्भागधेयान्न देवयानं पन्थानं प्रज्ञास्यथेति तस्मात्तेभ्यो न हविर्गृह्णन्ति न ग्रहम् ॥२॥ अथ ह वै तर्हि नौषधीषु पय आसीन्न क्षीरे सर्प्पिर्न्न माँसे मेदो न त्वचि लोमनि न वनस्पतिषु पलाशानि तद्यत एतदेकषष्टिरात्रं दैवा व्रात्या उपायँस्ततो वै तानि तान्येतैर्व्वीर्यैः समसृजन्त तेजस्वन्त्येवासन् पयस्वन्ति ॥३॥ तदेष श्लोकोऽभ्यनूच्यत ॥४॥ किमकर्त्तेति यत्पुत्रान् मुहुर्दैवाँ अपृच्छत मही बुधस्यासीद्दीक्षा स क्षीरे सर्प्पिराहरत् ॥५॥ महीं दीक्षाँ सौमायनो बुधो यदुदयच्छदनन्दत्सर्वमाप्नोन्मन्माँसे मेदोऽधा इति ॥६॥ दरिद्रा आसन् पशवः कृशाः सन्तो व्यस्थकाः सौमायनस्य दीक्षायाँ समसृजन्त मेदसेति ॥७॥ तद्य एतदेकषष्टिरात्रमुपेयुस्ते देवयजनमध्यवसाय गार्हपत्य आहुतिं जुहुयुर्द्देव वरुण देवयजनं नो देहि स्वाहेति ते दत्ते देवयजनेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यजन्ते ॥८॥ ते सर्वामृद्धिमार्ध्नुवन् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥९॥ इत्यष्टादशः खण्डः॥२४/१८॥

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहश्चतुर्द्दशाभिप्लवाः षडहा द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥१॥ देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावँस्तेभ्य एतेन शतरात्रेणामृतत्वं प्रायच्छदेतद्वाव मनुष्यस्यामृतत्वँ यत् सर्व्वमायुरेति वसीयान् भवति सर्व्वमायुर्य्यन्ति वसीयाँसो भवन्ति य एतदुपयन्ति ॥२॥ अभिप्रयायमभिषुण्वन्त्यभिक्रान्त्यै समानत्राभिषुण्वन्ति प्रतिष्ठित्यै ॥३॥ इत्येकोनविँशः खण्डः ॥२४/१९॥

अतिरात्रश्चतुर्व्विँशं प्रायणीयमहश्चत्वारोऽभिप्लवाः षडहाः पृष्ठ्यः षडहः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयोऽभिप्लवाः षडहाः पृष्ठ्यः षडहोऽभिजित्त्रयः स्वरसामानो दिवाकीर्त्त्यमहस्त्रयः स्वरसामानो विश्वजित् पृष्ठ्यः षडहस्त्रयस्त्रिँशारम्भणस्त्रयोऽभिप्लवाः षडहाः पृष्ठ्यः षडहस्त्रयस्त्रिँशारम्भणश्चत्वारोऽभिप्लवाः षडहाः स मासः स द्वितीयः स तृतीयः स चतुर्थस्त्रयोऽभिप्लवाः षडहाः आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥१॥ इति विँशः खण्डः ॥२४/२०॥ **इति चतुर्व्विँशोऽध्यायः**

अथ पञ्चविँशोऽध्यायः

अतिरात्रश्चतुर्व्विँशं प्रायणीयमहर्द्वौ त्रिवृत्पञ्चदशौ षडहौ पृष्ठ्यः षडहो द्वौ त्रिवृत्पञ्चदशौ षडहौ स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयस्त्रिवृत्पञ्चदशाः षडहाः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठ्यः षडहस्त्रिवृद्बृहस्पतिस्तोमस्त्रयःस्वरसामानो दिवाकीर्त्य-महस्त्रयः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडहस्त्रयस्त्रिँशारम्भण एकःपञ्चदशस्त्रिवृत्षडहो द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृत उद्भिच्च बलभिच्च द्वे अहनी द्वौ पञ्चदशस्त्रिवृतौ षडहौ पृष्ठ्यःषडहो द्वौ पञ्चदश-स्त्रिवृतौ षडहौ स मासः स द्वितीयः स तृतीयः स चतुर्थः पञ्चदशस्त्रिवृत्षडहः पृष्ठ्यः षडहः पञ्चदशस्त्रिवृत्षडहो गौश्चायुश्च द्वे अहनी छन्दोम दशाहो अष्टाचत्वारिँशं प्रथम-महरथ चतुश्चत्वारिँशं चत्वारिँशँ षट्त्रिँशं द्वात्रिँशं त्रिँशं द्वे अष्टाविँशे पञ्चविँशं चतुर्व्विँशं महाव्रतञ्चातिरात्रश्च ॥१॥ आदित्यानां मध्ये पृष्ठ्यम् ॥२॥ मध्ये पृष्ठ्येन वा अदित्याः स्वर्गँल्लोकमाक्रमन्त यन्मध्ये पृष्ठान्युपयन्ति स्वर्ग्गस्य लोकस्याक्रान्त्यै ॥३॥ अन्नँ वै पृष्ठान्यन्नमेव तन्मध्यतो धीयते तस्मान्मध्ये सदन्नं धिनोति ॥४॥ पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठन्ति ॥५॥ चक्रे वा एते साकं बृतीयत्त्रिवृत्पञ्चदशौ स्तोमौ यं कामं कामयन्ते तमेतेनाभ्यश्नुवते यत्र यत्र हि चक्रीवता कामयते तत्तदभ्यश्नुवते ॥६॥ अथैष त्रिवृद्बृहस्पति-स्तोम एतेन वै बृहस्पतिर्द्देवानां पुरोधामगच्छत् पुरोधाकामा उपेयुर्ग्गच्छन्ति पुरोधां पुर एतान्दधते॥७॥ अथैते स्वरसामानः शिरो वै दिवाकीर्त्त्यं प्राणाः स्वरसामानो यद्दिवाकीर्त्त्यमभितः स्वरसामानो भवन्ति शिरस्येव तत्प्राणा धीयन्ते ॥८॥ अथैष पञ्चदश इन्द्रस्तोम उक्थ्य एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्याः प्रजा भवन्ति य एतदुपयन्ति ॥९॥ अथैतानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृतो मध्यतः पाप्मनो मुच्यन्त एष वाव देवतल्पो देवतल्पमेव तदारोहन्ति तल्प्या भवन्ति प्रवसीयसस्तल्पमाप्नुवन्ति ॥१०॥ अथैतावुद्भि-द्बलभिदावेताभ्याँ वै बृहस्पतिर्देवेभ्यः पशूनुदसृजत्पशूनेवै-ताभ्यामुत्सृजन्ते ॥११॥ अथैते गोआयुषी मिथुनौ स्तोमावुप-यन्ति प्रजात्यै ॥१२॥ अथैष छन्दोमदशाहश्छन्दसां दोहो ऽर्वाञ्चि छन्दाँस्युपयन्ति तस्मादर्वाञ्चो भुञ्जन्तः पशव उपतिष्ठन्ते ॥१३॥ अथैतद् व्रतमन्नँ वै व्रतं न वा अन्यत्र मुखादन्नं धिनोति यदुपरिष्ठा त्व्रतमुपयन्ति मुखत एव तदन्नाद्यं धीयते तस्मान्मुखे सदन्नं धिनोति ॥१४॥ अथैतौ प्रायणीयो-दयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥१५॥ इति प्रथमः खण्डः॥२५/१॥

अतिरात्रश्चतुर्विँशं प्रायणीयमहः पृष्ठ्यः षडहश्चत्वार-स्त्रिवृतोऽभिप्लवाः षडहाः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयस्त्रिवृतोऽभिप्लवाः षडहाः पृष्ठ्यः षडहस्त्रिवृद्बृहस्पतिस्तोमस्त्रयः स्वरसामानो दिवाकीर्त्यमह-स्त्रयः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडहस्त्रयस्त्रिँशारम्भण एकस्त्रिवृदभिप्लवः षडहो द्वादशाहस्य दशाहानि व्यूढा अग्निष्टोमास्त्रिवृत उद्भिच्च बलभिच्च द्वे अहनी चत्वारस्त्रिवृतोऽभिप्लवाः षडहाः पृष्ठ्यः षडहः स मासः स द्वितीयः स तृतीयः स चतुर्थो द्वौ त्रिवृतावभिप्लवौ षडहौ पृष्ठ्यः षडह आयुश्च गौश्च द्वे अहनी छन्दोमदशाह-श्चतुर्विँशं प्रथममहर्द्वे अष्टाविँशे त्रिँशं द्वात्रिँशँ षट्त्रिँश-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ञ्चत्वारिँशञ्चतुश्चत्वारिँशमष्टाचत्वारिँशञ्चतुर्व्विँशं महाव्रत ञ्चातिरात्रश्चाङ्गिरसां पुरस्तात्पृष्ठम् ॥१॥ पुरस्तात्पृष्ठ्येन वा अङ्गिरसः स्वर्गँल्लोकमाक्रमन्त यत्पुरस्तात्पृष्ठान्युपयन्ति स्वर्गस्य लोकस्याक्रान्त्यै॥२॥ अन्नँ वै पृष्ठान्यन्नमेव तन्मुखतो धीयते तस्मान्मुखे सदन्नं धिनोति पशवः पृष्ठानि पशुष्वेव प्रतितिष्ठन्ति ॥३॥ यदन्यच्चक्राभ्याँ साकँवृद्भ्यां तत्समानमा-छन्दोम दशाहात् ॥४॥ अथैष छन्दोम दशाहश्छन्दसां दोह ऊर्ध्वानि छन्दाँस्युपयन्त्यनपभ्रँशायैष वाव देवयानः पन्थाः प्रदेवयानं पन्थानमाप्नुवन्ति य एतदुपयन्त्यथैतद्व्रतम् ॥५॥ अथैतौ प्रायणीयोदयनीयावतिरात्रौ येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति ॥६॥ इति द्वितीयःखण्डः ॥२५/२॥

अतिरात्रस्त्रिवृता मासं पञ्चदशेन मासँ सप्तदशेन मासमेकविँशेन मासं त्रिणवेन मासस्त्रयस्त्रिँशेन मासं महाव्रतं त्रयस्त्रिँशेन मासं त्रिणवेन मासमेकविँशेन मासँ सप्तदशेन मासं पञ्चदशेन मासं त्रिवृता मासमतिरात्रः ॥१॥ ऋतवो न प्रत्यतिष्ठँस्त एतेन प्रत्यतिष्ठन् प्रतिष्ठाकामा उपेयुः प्रत्येवतिष्ठन्ति षड्वा ऋतव ऋतुष्वेवैतेन प्रतितिष्ठन्ति ॥२॥ यद्व्रतं मध्यत उपयन्ति मध्यत एव तदन्नाद्यं धीयते तस्मान्मध्ये सदन्नं धिनोति ॥३॥ पक्षि वा एतत्सत्रायणँ यं कामं कामयन्ते तमेतेनाभ्यश्नुवते यत्र यत्र हि पक्षी कामयते तत्तदभ्यश्नुते ॥४॥ त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति प्राणा वै त्रिवृत्स्तोमानां प्राणैरेव प्रयन्ति प्राणेषु प्रतितिष्ठन्ति ॥५॥ एतद्धै दृतिवातवन्तौ खाण्डव उपेतो विषुवति वातवानुत्तिष्ठति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समापयति दृतिस्तस्मात्तनीयाँसो वातवता भूयाँसो दार्त्तेयाः ॥६॥ इति तृतीयः खण्डः ॥२५/३॥

मासं दीक्षिता भवन्ति ते मासि सोमं क्रीणन्ति तेषां द्वादशोपसद उपसद्भिश्चरित्वा सोममुपनह्य मासमग्निहोत्रं जुह्वति मासं दर्शपूर्णमासाभ्यां यजन्ते मासँ वैश्वदेवेन मासँवरुणप्रघासैर्म्मासँ साकमेधैर्म्मासँ शुनासीर्य्येण त्रिवृता मासँ पञ्चदशेन मासँ सप्तदशेन मासमेकविँशेन मासं त्रिणवेन मासमष्टादशस्त्रयस्त्रिँशान्यहानि द्वादशाहस्य दशाहानि महाव्रतञ्चातिरात्रश्च ॥१॥ अग्निहोत्रं दशहोता दर्शपूर्ण्णमासौ चतुर्होता चातुर्म्मास्यानि पञ्चहोता सौम्योऽध्वरः सप्तहोता ॥२॥ एते वाव सर्व्वेण यज्ञेन यजन्ते य एतदुपयन्ति सर्व्व एव भवन्ति ॥३॥ ते सर्व्वे कुण्डपायिनोऽत्सरुकैश्चमसैर्भक्षयन्ति ॥४॥ यो होता सोऽध्वर्य्युः स पोता य उद्गाता स नेष्टा सोऽच्छावाको यो मैत्रावरुणःस ब्रह्मा स प्रतिहर्त्ता यः प्रस्तोता स ब्राह्मणाच्छाँसी स ग्रावस्तुद्यः प्रतिप्रस्थाता सोऽग्नीत्स उन्नेता गृहपतिर्गृहपतिःसुब्रह्मण्यस्सुब्रह्मण्यः ॥५॥ इति चतुर्थः खण्डः ॥२५/४॥

सँवत्सरं दीक्षिताः भवन्ति सँवत्सरमुपसद्भिश्चरन्ति सँवत्सरं प्रसुतो भवति ॥१॥ तत्सँवत्सरं दीक्षिता भवन्ति तप एव तेन तप्यन्ते यत्सँवत्सरमुपसद्भिश्चरन्ति पुनत एव तेन यत्सँवत्सरं प्रसुतो भवति देवलोकमेव तेनापि यन्ति ॥२॥ एतेन वै तपश्चितो देवाः सर्व्वामृद्धिमार्ध्नुवन् सर्व्वामृद्धि-मृध्नुवन्ति य एतदुपयन्ति ॥३॥ इति पञ्चमः खण्डः ॥२५/५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रयस्त्रिवृतः सँवत्सरास्त्रयः पञ्चदशास्त्रयः सप्तदशास्त्रय एकविँशाः प्रजापतेर्द्वादशसँवत्सरम् ॥१॥ एतेन वै प्रजापतिः सर्व्वस्य प्रसवमगच्छत्सर्व्वस्य प्रसवं गच्छति य एतदुपयन्ति ॥२॥ यत्त्रयस्त्रिवृतः सँवत्सरा भवन्ति तेजो ब्रह्मवर्च्चसं त्रिवृत्तेज एव ब्रह्मवर्च्चसमवरुन्धते यत्त्रयः पञ्चदशा ओजो वीर्य्यं पञ्चदश ओज एव वीर्य्यमवरुन्धते यत्त्रयः सप्तदशा अन्नँ वै सप्तदशोऽन्नाद्यमेवावरुन्धते यत्त्रय एकविँशाः प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठति ॥३॥ एतेन वै नैमिशीयाः सर्व्वामृद्धिमार्ध्नुवन् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति॥४।ते ह सप्तदशेभ्य एवाध्युत्तस्थुस्त उ होचुर्य्यो नः प्रजायामृध्यातै स एतत्सत्रँ समापयादिति तदेतत्समीप्सन्तो ब्राह्मणास्सत्रमासते ॥५॥ इति षष्ठःखण्डः॥२५/६॥

नवत्रिवृतः सँवत्सरा नव पञ्चदशा नव सप्तदशा नवैकविँशाः शाक्त्यानाँ षट्त्रिँशत्सँवत्सरम् ॥१॥ एतेन वै गौरीवितिः शाक्त्यस्तरसपुरोडाशो याव्यावत्याँ सर्व्वामृद्धिमार्ध्नोत् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥२॥ बृहती वा एतत्सत्रायणँ स्वाराज्यं छन्दसां बृहती प्रस्वाराज्यमाप्नुवन्ति य एतदुपयन्ति ॥३॥ तदेतच्छाक्त्यानां दशवीरमेषां दशवीरा जायन्ते य एतदुपयन्ति ॥४॥ इति सप्तमःखण्डः ॥२५/७॥

पञ्चविँशतिस्त्रिवृतःसँवत्सराः पञ्चविँशतिः पञ्चदशाः पञ्चविँशतिः सप्तदशाः पञ्चविँशतिरेकविँशाः साध्यानाँ शतसँवत्सरम् ॥१॥ साध्या वै नाम देवेभ्यो देवाः पूर्व्व आसँस्त एतत्सत्रायणमुपायँस्तेनाब्रुवँस्ते सगवः सपुरुषाः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्व्व एव सह स्वर्गँल्लोकमायन्नेवँ वाव ते सह स्वर्गँल्लोकँ यन्ति य एतदुपयन्ति ॥२॥ आयुर्व्वा एतत्सत्रायणँ शतायुः पुरुषो यावदेवायुस्तदवरुन्धते न ह्यत्यायुषँ सत्रमस्ति ॥३॥ तदभ्यनूक्ता तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्य्यस्य यतः परि जार इवाचरन्त्युषा ददृशे न पुनर्य्यतीवेति ॥४॥ ज्योतिष्टोमस्यायनेन यन्ति ज्योतिरेव भवन्ति ॥५॥ एकविँशोऽन्ततः स्तोमानां भवति प्रतिष्ठा वा एकविँशोऽन्तत एव यज्ञस्य प्रतितिष्ठन्ति ॥६॥ इत्यष्टमः खण्डः॥२५/८॥

अतिरात्रः सहस्रमहान्यतिरात्रोऽग्नेः सहस्रसाव्यम् ॥१॥ एतेन वा अग्निः सर्व्वस्य प्रसवमगच्छत् सर्व्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥२॥ अग्नेर्व्वै सर्व्वमाद्यँ सर्व्वमेषा-माद्यं भवति य एतदुपयन्ति ॥३॥ अथ यत्सहस्रसाव्यं भवति सहस्राक्षरा वै परमा विराट् परमायामेव विराजि प्रतितिष्ठन्ति ॥४॥ इति नवमः खण्डः ॥२५/९॥

सरस्वत्या विनशने दीक्षन्ते ॥१॥ तेषां द्वादशदीक्षा द्वादशोपसदः॥२॥ यदहरतिरात्रो भवति तदहर्व्वत्सानपाकुर्व्वन्ति सँस्थितेऽतिरात्रे सान्नाय्येन यजन्ते ॥३॥ सान्नाय्येनेष्ट्वाध्वर्य्युः शम्यां परास्यति सा यत्र निपतति तद्गार्हपत्यस्ततः षट्त्रिँशतं प्रक्रमान् प्रक्रामति तदाहवनीयः ॥४॥ चक्रीवत्सदश्चक्रीव-द्धविर्द्धानं चक्रीवदाग्नीध्रमुलूखलबुध्नो यूपः प्रकृष्य उपोप्त एव नोपरवान् खनन्ति ॥५॥ ते तमापूर्य्यमाणमामावास्येन यन्ति ॥६॥ तेषां पौर्ण्णमास्यां गोष्टोमस्तोमो भवत्युक्थ्यो बृहत्सामा ॥७॥ सँस्थिते गोष्टोमे पौर्ण्णमासं निर्व्वपन्ते ते तमपक्षीयमाणं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पौर्णमासेन यन्ति तेषाममावास्यायामायुष्टोमः स्तोमो भवत्युक्थ्यो रथन्तरसामा ॥८॥ मित्रावरुणयोरयनम् ॥९॥ एतेन वै मित्रावरुणाविमान् लोकानाजयतामहोरात्रौ वै मित्रावरुणा-वहर्म्मित्रो रात्रिर्व्वरुणोऽर्द्धमासौ वै मित्रावरुणौ य आपूर्य्यते स मित्रो योऽपक्षीयते स वरुणः स एष मित्रो वरुणो रेतः सिञ्चति ॥१०॥ सरस्वत्या वै देवा आदित्यमस्तभ्नुवन् सा नायच्छत् साभ्यव्लीयत तस्मात्सा नु(कु)ब्जिमतीव तं बृहत्यास्तभ्नुवन् सायच्छत्तस्माद्बृहती छन्दसाँ वीर्य्यवत्तमादित्यँ हि तयास्तभ्नुवन् ॥११॥ प्रतीपँ यन्ति न ह्यन्वीपमष्ट वै पूर्व्वेण पक्षसा यन्ति ॥१२॥ तद्धि प्रत्येकाप्येति ॥१३॥ दृषद्वत्येव ॥१४॥ दृषद्वत्या अप्ययेऽ पोनप्त्रीयं चरुं निरूप्याथातियन्ति ॥१५॥ चतुश्चत्वारिँश दाश्वीनानि सरस्वत्या विनशनात् प्लक्षः प्रास्रवण स्तावदितः स्वर्ग्गो लोकः सरस्वती सम्मितेनाध्वनाः स्वर्गँल्लोकँ यन्ति ॥१६॥ एतेन वै नमी साप्यो वैदेहो राजाञ्जसा स्वर्गँल्लोकमैदञ्जसागामेति तदञ्जस्कीयाना-मञ्जस्कीयत्वम् ॥१७॥ स एतदवभृथमभ्यवैद्य एष उत्तरेण स्थूलार्म्मँ ह्रदस्तद्धास्य शतं गावः सहस्रँ सम्पेदुः ॥१८॥ शते गोष्वृषभमप्यृजन्ति ता यदा सहस्रँ सम्पद्यन्तेऽथोत्थानम् ॥१९॥ यदा सर्व्वज्यानिं जीयन्तेऽथोत्थानँ यदा गृहपतिर्म्म्रियतेऽथोत्थानम् ॥२०॥ यदा प्लक्षं प्रास्रवणमागच्छन्त्यथोत्थानम् ॥२१॥ प्लक्षं प्रास्रवणमागम्याग्नये कामायेष्टिं निर्व्वपन्ते तस्यामश्वां च पुरुषीञ्च धेनुके दत्वा ॥२२॥ कारपचवं प्रति यमुनामवभृथमभ्यवयन्ति ॥२३॥ इति दशमः खण्डः॥२५/१०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अतिरात्रस्त्रिवृत्पञ्चदशमिन्द्राग्न्योरयनं गो आयुषी इन्द्रकुक्षी अतिरात्रः ॥१॥ एतेन वा इन्द्राग्नी अत्यन्या देवता अभवतामत्यन्याः प्रजा भवन्ति य एतदुपयन्ति ॥३॥ अथ यत्त्रिवृत् पञ्चदशमिन्द्राग्न्योरयनं गो आयुषी इन्द्रकुक्षी भवतोऽसँव्याथाय ॥४॥ इत्येकादशः खण्डः ॥२५/११॥

अतिरात्रो ज्योतिर्गौरायुस्त्र्यहो विश्वजिदभिजिताविन्द्र-कुक्षी अतिरात्रः ॥१॥ एतेन वार्य्यमैतँल्लोकमजयत् ॥२॥ यदाहुरर्य्यम्णः पन्था इत्येष वाव देवयानः पन्थाः ॥३॥ प्र देवयानं पन्थानमाप्नुवन्ति य एतदुपयन्ति ॥४॥ तस्मादेषो ऽरुणतम इव दिव उपददृशेऽरुणतम इव हि पन्थाः ॥५॥ अथ यज्ज्योतिर्गौरायुस्त्र्यहो विश्वजिदभिजिताविन्द्रकुक्षी भवतो ऽसँव्याथाय ॥६॥ इति द्वादशः खण्डः ॥२५/१२॥

सँवत्सरं ब्राह्मणस्य गा रक्षेत्सँवत्सरँ व्यर्ण्णैतन्धवे ऽग्निमिन्धीत सँवत्सरे परीणह्यग्नीनादधीत ॥१॥ स दक्षिणेन तीरेण दृषद्वत्या आग्नेयेनाष्टाकपालेन शम्यापरासीयात् ॥२॥ इन्द्रश्च रुशमा चाँशं प्रास्येताँ यतरो नौ पूर्व्वो भूमिं पर्य्येति स जयतीति भूमिमिन्द्रः पर्य्यैत् कुरुक्षेत्रँ रुशमा साब्रवीदजैष-न्त्वेत्यहमेव त्वामजैषमितीन्द्रोऽब्रवीत्तौ देवेष्वपृच्छेत्तां ते देवा अब्रुवन्नेतावती वाव प्रजापतेर्व्वेदिर्य्यावत् कुरुक्षेत्रमिति तौ न व्यजयेताम् ॥३॥ स य आग्नेयेनाष्टाकपालेन दक्षिणेन तीरेण दृषद्वत्याः शम्यापरास्येति त्रिप्लक्षान् प्रति यमुनामवभृथमभ्य-वैति तदेव मनुष्येभ्यस्तिरो भवति॥४॥इतित्रयोदशःखण्डः॥२५/१३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आग्नेयोऽष्टाकपाल ऐन्द्र एकादशकपालो वैश्वदेवश्चरुः ॥१॥अदीक्षितः कृष्णाजिनं प्रतिमुञ्चते यददीक्षितः कृष्णाजिनं प्रतिमुञ्चते या मानुष्यृद्धिस्तां तेनर्ध्नोति॥२॥ अथ यत्तपस्तप्यते या दैवी तां तेन ॥३॥ यदाग्नेयोऽष्टाकपालो भवत्यग्निमुखा वै देवता मुखत एव तद्देवता ऋद्ध्नोत्यथो प्रातस्सवनमेव तेनाप्नोत्यथ यदैन्द्र एकादशकपालो भवत्यैन्द्रँ वै माध्यन्दिनँ सवनं माध्यन्दिनमेव सवनं तेनाप्नोऽत्यथ यद्वैश्वदेवश्चरुर्भवति वैश्वदेवँ वै तृतीयसवनं तृतीयसवनमेव तेनाप्नोति ॥४॥ एतेन वै तुरो देवमुनिः सर्व्वामृद्धिमाध्नोत्सर्व्वामृद्धिमृध्नोति य एतदुपैति ॥५॥ इति चतुर्द्दशः खण्डः ॥२५/१४॥

अतिरात्रावभितोऽग्निष्टोमा मध्ये सर्व्वो दशदशी सँवत्सरो द्वादशो विषुवान् सर्प्पसामानि विषुवन्ति क्रियन्ते ॥१॥ एतेन वै सर्प्पा एषु लोकेषु प्रत्यतिष्ठन्नेषु लोकेषु प्रतितिष्ठन्ति य एतदुपयन्ति ॥२॥ जर्व्वरो गृहपतिर्धृतराष्ट्र ऐरावतो ब्रह्मा पृथुश्रवा दौरेश्रवस उद्गाता ग्लावश्चाजगावश्च प्रस्तोतृप्रतिहर्त्तारौ दत्तस्तापसो होता शितिपृष्ठो मैत्रावरुण-स्तक्षको वैशालेयो ब्राह्मणाच्छँसी शिखानुशिखौ नेष्टापोतारा-वरुण आटोऽच्छावाकस्तिमिर्घोदौरेश्रुतोऽग्नीत् कौतस्तावध्वर्य्यू अरिमेजयश्च जनमेजयश्चार्ब्बुदो ग्रावस्तुदजिरः सुब्रह्मण्य-श्चक्रपिशङ्गावुन्नेतारौ षण्डकुषण्डावभिगरापगरौ ॥३॥ एतेन वै सर्प्पा अपमृत्युमजयन्नपमृत्युं जयति य एतदुपयन्ति तस्मात्ते हित्वा जीर्ण्णां त्वचमतिसर्प्पन्त्यपहिते मृत्युमजयन् सर्प्पा वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आदित्या आदित्यानामिवैषां प्रकाशो भवति य एतदुपयन्ति ॥४॥ इति पञ्चदशः खण्डः ॥२५/१५॥

गवामयनं प्रथमः सँवत्सरोऽथादित्यानामथाङ्गिरसाम् ॥१॥ एतेन वै गावः प्रजातिं भूमानमगच्छन्प्रजायन्ते बहवो भवन्ति य एतदुपयन्त्येतेन वा आदित्या एषु लोकेषु प्रत्यतिष्ठन्नेषु लोकेषु प्रतितिष्ठन्ति य एतदुपयन्त्येतेन वा अङ्गिरसः स्वर्गँ ल्लोकमायन् स्वर्गँल्लोकँ यन्ति य एतदुपयन्ति ॥२॥ पर आह्लारस्त्रसदस्युः पौरुकुत्सो वीतहव्यः श्रायसः कक्षीवा- नौशिजस्त एतत्प्रजातिकामाः सत्रायणमुपायँस्ते सहस्रं सहस्रं पुत्रानपुष्यन्नेवँ वाव ते सहस्रँ सहस्रं पुत्रान् पुष्यन्ति य एतदुपयन्ति ॥३॥ इति षोडशः खण्डः ॥२५/१६॥

अतिरात्रःसहस्रं त्रिवृतः सँवत्सरा अतिरात्रः प्रजापतेः सहस्रसँवत्सरम् ॥१॥ एतेन वै प्रजापतिः सर्व्वस्य प्रसवम- गच्छत्सर्व्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति ॥२॥ एतद्वै प्रजापतिर्ज्जीर्य्यामूर उपैत्तेन जरमपहतापजरां घ्नते य एतदुप- यन्ति ॥३॥ तदेतत्प्रजापतेः सहस्रसँवत्सरमेतेन वै प्रजापतिः सर्व्वामृद्धिमाध्र्नोत् सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥४॥ इति सप्तदशः खण्डः ॥२५/१७॥

पञ्चपञ्चाशतस्त्रिवृतः सँवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत एकविँशा विश्वसृजाँ सहस्रसँवत्सरम् ॥१॥ एतेन वै विश्वसृज इदँ विश्वमसृजन्त यद्विश्वमसृजन्त तस्माद्विश्वसृजः ॥२॥ विश्वमेना ननु प्रजायते य एतदुपयन्ति ॥३॥ तपो गृहपतिर्ब्रह्म

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ब्रह्मेरापल्यमृतमुद्गाता भूतं प्रस्तोता भविष्यत्प्रतिहर्त्तर्त्तव उपगातार आर्त्तवाः सदस्याः सत्यँ होतर्त्त मैत्रावरुण ओजो ब्राह्मणाच्छँसी त्विषिश्चापचितिश्च नेष्टापोतारौ यशोऽच्छावाको ऽग्निरेवाग्नीद्भगो ग्रावस्तुदूर्ग्गुन्नेता वाक्सुब्रह्मण्यः प्राणो ऽध्वर्य्युरपानः प्रतिप्रस्थाता दिष्टिर्व्विशास्ता बलं ध्रुवगोप-माशाहविष्येष्यहोरात्राविध्मवाहौ मृत्युः शमितैतेन दीक्षन्ते ॥४॥ तदेष श्लोको विश्वसृजः प्रथमे सत्रमासत सहस्रसमं प्रसुतेन यन्तस्ते ह जज्ञे भुवनस्य गोपा हिरण्मयः शकुनो ब्रह्म नामेति ॥५॥ ब्रह्मणः सलोकताँ सार्ष्टिताँ सायुज्यं गच्छन्ति य एतदुप-यन्ति ॥६॥ तदेतद्विश्वसृजाँ सहस्रसँवत्सर मेतेन वै विश्वसृजः सर्व्वामृद्धिमार्ध्नुवन्त्सर्व्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ॥७॥ इत्यष्टादशः खण्डः ॥२५/१८॥

इति पञ्चविँशोऽध्यायः

आदिमं ताण्ड्यमहाब्राह्मणं समाप्तम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अष्टब्राह्मणे द्वितीयं

षड्विँशब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षड्विँशब्राह्मणम्

अथ प्रथमोऽध्यायः

ओ३म् ब्रह्म च वा इदमग्रे सुब्रह्म चास्ताम् ॥१॥ ततः सुब्रह्मण्योदक्रामत् ॥२॥ अथ ह देवा यज्ञेन ब्रह्म पर्य्यगृह्णत ॥३॥ अग्निर्व्वै ब्रह्माऽसावादित्यः सुब्रह्म ॥४॥ तद्देवा यज्ञस्य सन्धावन्वैच्छन् ॥५॥ एष वै यज्ञस्य सन्धिर्य्यत्रैष उत्करः ॥६॥ तस्मादुत्करे तिष्ठन् त्सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति ॥७॥ सुब्रह्मण्योँ ३ सुब्रह्मण्योँ ३ सुब्रह्मण्यो ३ मिति स्त्रियमिव त्रिराह ॥८॥ त्रिषत्या वै देवाः॥९॥ इन्द्रागच्छेति ॥१०॥ यदाहेन्द्रागच्छेत्येतद्धा अस्य प्रत्यक्षं नाम तेनैवैनं तदाह्वयति ॥११॥ हरिव आगच्छेति ॥१२॥ पूर्व्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्याँ हीदँ सर्व्वँ हरति ॥१३॥ मेधातिथेर्म्मेषेति ॥१४॥ मेधातिथिँ ह काण्व्यायनम्मेषो भूत्वा जहार ॥१५॥ वृषणश्वस्य मेन इति ॥१६॥ वृषणश्वस्य ह मेनस्य मेनका नाम दुहिताऽऽस ताँ हेन्द्रश्चकमे ॥१७॥ गौरावस्कन्दिन्निति ॥१८॥ गौरमृगो ह स्म भूत्वावस्कन्द्यारण्याद्राजानं पिबति ॥१९॥ अहल्यायै जारेति ॥२०॥ अहल्याया ह मैत्रेय्या जार आस ॥२१॥ कौशिक ब्राह्मणेति ॥२२॥ कौशिको ह स्मैनां ब्राह्मण उपन्येति ॥२३॥ गौतम ब्रुवाणेति ॥२४॥ देवासुरा ह सँयत्ता आसँस्तानन्तरेण गोतमः शश्राम तमिन्द्र उपेत्योवाचेह नो भवाँस्पशश्चरत्विति नाहमुत्सह इत्यथाहं भवतो रूपेण चराणीति यथा मन्यस इति स यत्तद्गोतमो वा ब्रुवाणश्चचार गोतमरूपेण वा तदेतदाह गौतमेति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥२५॥ इत्यहे सुत्यामागच्छ मघवन्निति ॥२६॥ तद्यथार्हतो ब्रूयादित्यहे वः पक्तास्मि तदागच्छतेत्येवमेवैतद्देवेभ्यः सुत्यां प्राह ॥२७॥ देवा ब्राह्मण इति ॥२८॥ देवा हैव देवा अथ हैते मनुष्यदेवा ये ब्राह्मणाः शुश्रुवाँसोऽनू-चानास्ते मनुष्यदेवाः ॥२९॥ आहुतय एव (भागधेयं) देवानां दक्षिणा मनुष्यदेवानामाहुतिभिर्ह देवान् प्रीणाति दक्षिणाभिर्मनुष्यदेवाञ्छुश्रूषोऽनूचानान् ब्राह्मणान् प्रीणाति ॥३०॥ इति प्रथमः खण्डः ॥१/१॥

अथ यत्र सुब्रह्मण्यः सुब्रह्मण्यमाह्वयत्येतस्मिन्ह कालेऽसुररक्षाँसि देवानाँ यज्ञमजिघाँसन् ॥१॥ ते देवा निहवमेवाकुर्व्वत ब्रह्मोँ ३ सुब्रह्मो ३ मिति ॥२॥ तानादित्यः पर्ज्जन्यः पुरोबलाको भूत्वाऽभिप्रैत्तान्वृष्ट्याऽ-शन्या विद्युताऽहन् ॥३॥ तदाहुः स्त्री सुब्रह्मण्या३ पुमा३न्नपुँसका३ मिति ॥४॥ सर्व्वमेवेति ब्रूयात् ॥५॥ यत्पर्ज्जन्यः पुरोबलाको भूत्वाऽभिप्रैत्तेन पुमान्यद्वृष्ट्या यदशन्या तेन स्त्री यद्विद्युता तेन नपुँसकं तस्मात्सर्व्व-मेवेति ब्रूयात् ॥६॥ तदाहुर्ऋक् सुब्रह्मण्या ३ यजू३ः सामा ३ इति सर्व्वमेवेति ब्रूयादृच इवास्या नामधेयँ सुब्रह्मण्येति तस्मादृङ्मन्त्र एव खल्वयं निगदभूतो भवति तस्माद्यजुः ॥७॥ सामकारिणः कुर्व्वन्ति यथाऽन्यैः सामभिस्तस्मात्साम तस्मात्सर्व्वमेवेति ब्रूयात् ॥८॥ तद्वा एतत्सुब्रह्मण्यामाहूय यजमानँ वाचयति रक्षसामपहत्यै ॥९॥ सासि सुब्रह्मण्ये तस्यास्ते पृथिवी पाद इत्याह यान्येव पृथिव्यामसुररक्षाँसि तान्येव तेनापहते सासि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुब्रह्मण्ये तस्यास्तेऽन्तरिक्षं पाद इत्याह यान्येवान्तरिक्षेऽसुररक्षाँसि तान्येव तेनापहते सासि सुब्रह्मण्ये तस्यास्ते द्यौःपाद इत्याह यान्येव दिव्यसुररक्षाँसि तान्येव तेनापहते सासि सुब्रह्मण्ये तस्यास्ते दिशः पाद इत्याह यान्येव दिक्ष्वसुररक्षाँसि तान्येव तेनापहते परो रजास्ते पञ्चमः पाद इत्याह पराँ रजसो वै ब्रह्मणः स्थानं तदेतदाह सा न इषमूर्ज्जं धुक्ष्वेत्याहैषमेवास्मा ऊर्ज्जं दुग्धे वीर्य्यमन्नाद्यं धेहीत्याह वीर्य्यमेवास्मा अन्नाद्यं दधाति ॥१०॥ ब्रह्म श्रीर्व्वै नामैतत्साम यत्सुब्रह्मण्या तस्मात्प्रातरनुवाक उपाकृते विसँस्थिते च यज्ञे सुब्रह्मण्यः सुब्रह्मण्या-माह्वयति ॥११॥ एष वै ब्रह्म सुब्रह्म चाप्नोति य एतदनो युक्तँ सुब्रह्मण्याय ददाति ॥१२॥ ब्रह्मणा चैवास्य श्रिया च यज्ञँ समर्द्धयति य एवँ वेद ॥१३॥ अथो खल्वाहुर्य्यच्चाव गतँ यच्चानवगतँ सर्व्वस्यैषैव प्रायश्चित्तिरिति तस्मादेवँ विदँ सुब्रह्मण्यं कुर्व्वीत नानेवँ विदम् ॥१४॥ इति द्वितीयः खण्डः॥१/२॥

एकच्छन्दः प्रातस्सवनं तस्मादेकपात्पुरुषो हरत्यन्यं प्रत्यन्येन तिष्ठति ॥१॥ त्रिच्छन्दा माध्यन्दिनः पवमान-स्तस्मात्त्रयोऽधः प्राणाः ॥२॥ द्वे गायत्र्याँ सामनी तस्माद्द्वयमधरेण प्राणेन करोति ॥३॥ द्वे बृहत्याँ सामनी तस्माद्द्वयमुत्तरेण ॥४॥ एकं त्रिष्टुभि साम तस्मादेकैव नाभिः ॥५॥ प्राणानामिव तु विधृतिः ॥६॥ अथ यदेव तत ऊर्ध्वं तानि पृष्ठानि ॥७॥ बार्हतान्येकगायत्रीकाणि तस्माद्बृहत्य एव पर्श(श)वो बृहत्य एव कीकसाः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठमभिसमायन्ति ॥८॥ अथ यदेव तत ऊर्ध्वँ स आर्भवः पवमानः ॥९॥ प्राणो गायत्री श्रोत्रे उष्णिक्ककुभौ वागनुष्टुप् चक्षुर्ज्जगती ॥१०॥ पुष्टिर्य्यदन्यत् ॥११॥ द्वे गायत्र्याँ सामनी तस्माद्द्वयं प्राणेन करोति प्राणिति चापानिति चैकं छन्दः ककुबुष्णिहौ द्वे सामनी तस्मात्समानँ सच्छ्रोत्रं द्वेधैव श्रृणोति द्वे अनुष्टुभि सामनी तस्माद्द्वयँ वाचा करोति सत्यं चानृतं च वदत्येकं जगत्याँ साम तस्माद्द्वे अक्षिणी सती समानं पश्यतो न हि पश्चादायन्तं पश्यति ॥१२॥ अथ यदेव तत ऊर्ध्वं मूर्धा तद्यज्ञायज्ञीयम् ॥१३॥ मूर्धा स्वानां भवति य एवँ वेद ॥१४॥ अथ इव वा अन्यान्यङ्गान्युपरीव मूर्धाऽध इवास्मा अन्ये स्वा भवन्त्युपरीव स्वानां भवति य एवँ वेद ॥१५॥ यज्ञो वा अथ जज्ञ इत्याहुरेष वाव जात एषोऽवलुप्त-जरायुरेष आर्त्विजीनो य एतँ वेदमनुब्रूते यदा वा एतँ वेदमनुब्रूतेऽथ हैनँ श्रृण्वन्त्यसावन्ववोचतेति तद्वै स जायते ॥१६॥ ऊनाक्षरा गायत्री प्रातस्सवने प्रजानां प्रजात्या ऊनादिव हि प्रजाः प्रजायन्ते ॥१७॥ ऊनाक्षरा गायत्र्यामहीयवे प्रजानां प्रजात्या ऊनादिव हि प्रजाः प्रजायन्ते ॥१८॥ ऊनाक्षरा गायत्री पृष्ठेषु वामदेव्ये यजमानलोक एव स मध्ये हि यज्ञस्य यजमानः ॥१९॥ ऊनाक्षरा गायत्री सँहिते प्राणापानयोरुच्चार ऊनादिव हि प्राणापानावुच्चरतः॥२०॥ ऊनाक्षरँ यज्ञायज्ञीयं प्राणाना-मुत्सृष्ट्यै ॥२१॥ यो हि पूर्णमुपधमेद्यदि प्रतीयाद्विपदेद्यदि न प्रतीयाद्विष्यन्देत ॥२२॥ तदाहुस्सवनानां च वा एत

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उदानाः प्राणानां चोत्सृष्टिरिति॥२३॥ इतितृतीयःखण्डः ॥१/३॥

अध्वर्य्यवित्याहोद्गाता मा स्म मेऽनिवेद्य होत्रे प्रातरनुवाकमुपाकरोरिति ॥१॥ सोऽध्वर्य्युः प्राह ॥२॥ स हूतो व्रजति स पूर्व्वया द्वारा हविर्धाने प्रपद्यते ॥३॥ स दक्षिणस्य हविर्धानस्योत्तरं चक्रमभ्यप श्रयमाण उदङ्ङासीनो विश्वरूपा गायति ॥४॥ क्षत्रँ वै स्तोत्रँ विट्शस्त्रं क्षत्रेणैवास्मै विशमनु वीर्य्यमनु वर्त्मानं करोत्यथो स्तुतशस्त्रयोरेव समारम्भायाव्यवसँस्राय सन्तत्यै ॥५॥ एतद्ध स्माह ग्लावो मैत्रेयः प्राह्णे वा अद्याहं पापवसीयसँ व्याकरिष्यामीति स ह स्म सदस्येवोप-वसथ्येऽहन्युदङ्ङासीनो विश्वरूपा गायति ॥६॥ तदुपवादोऽ स्त्यध्वर्य्यो किँ स्तुतँ स्तोत्रँ होता प्रातरनुवाकेनान्वशँ-सीदिति स ब्रूयादकार्षमहं तद्यन्मम कर्म्म होतारं पृच्छतेति होतः किं स्तुतं स्तोत्रं प्रातरनुवाकेनान्व-शँसीरिति स ब्रूयादकार्षमहं तद्यन्मम कर्म्म उद्गातारं पृच्छतेति उद्गातः किँ स्तुतँ स्तोत्रँ होता प्रातरनुवाकेनान्व शँसीदिति स ब्रूयादकार्षमहं तद्यन्मम कर्म्मागासिषं यद्गेयमिति ॥७॥ तं चेद्ब्रूयुस्तमो वै त्वमगासीर्न्न ज्योतिरिति ॥८॥ स ब्रूयाज्ज्योतिस्तेन येन ज्योतिः ज्योतिस्तेन येन ज्योतिस्तेन येन गायत्रीज्योतिस्तेन येन छन्दो ज्योतिस्तेन येन सामज्योतिस्तेन येन देवता ज्योतिरेवाहमगासिषं न तमो युष्माँस्तु पाप्मना तमसा विध्यानीत्याह पाप्मनेवैनाँ स्तत्तमसा विध्यति ॥९॥ युञ्जे वाचँ शतपदीमित्याह वाग्वा व शतपद्यृक् शतपदी

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शतसनिमेव तदात्मानं च यजमानञ्च करोति ॥१०॥ गाये सहस्रवर्त्तनीति साम वै सहस्रवर्त्तनि सहस्रसनिमेव तदात्मानं च यजमानञ्च करोति ॥११॥ गायत्रं त्रैष्टुभं जगदिति गायत्रँ वै प्रातस्सवनं त्रैष्टुभं माध्यन्दिनँ सवनं जागतं तृतीयसवनँ सवनान्येव तद्यथास्थानं यथारूपं कल्पयति ॥१२॥ विश्वारूपाणि सम्भृतेति विश्वमेव तद्वित्तमात्मने च यजमानाय च सम्भरति ॥१३॥ देवा ओकाँसि चक्रिर इति ॥१४॥ ओको हास्मिन् यज्ञः कुरुते य एवँ वेद ॥१५॥ असितमृगा ह स्म वै पुरा कश्यपा उद्गायन्त्यथ ह युवानमनूचानं कुसुरुबिन्द-मौद्दालकिं ब्राह्मणा उद्गीथाय वव्रे ते होचुः परि वै नोऽयमार्त्त्विज्यमादत्ते हन्तेममनुव्याहरामेति तं हानु-व्याहरिष्यन्त उपनिषेदुः स होवाच ब्राह्मणा नमो वो अस्तु प्राह्णे वा अहँ यज्ञँ समस्थापयँ यथा तु वै ग्रामस्य यातस्य शीर्णँ वा भग्नँ वानु समावहेदेवँ वा अहँ यज्ञस्यातोऽधिकरिष्यामीति ते ह हिं कृत्योत्तस्थुः क इदमस्मा अवोचदिति ॥१६॥ इति चतुर्थः खण्डः ॥१/४॥

इन्द्रो ह वै विश्वामित्रायोक्थमुवाच वसिष्ठाय ब्रह्म वागुक्थमित्येव विश्वामित्राय मनो वाव ब्रह्म वसिष्ठाय ॥१॥ तद्वा एतद्वासिष्ठं ब्रह्म ॥२॥ अपि हैवँ विदँ वा वासिष्ठँ वा ब्रह्माणं कुर्व्वीत ॥३॥ तद्यथोभयवर्त्तनिना रथेन याँ यां दिशं प्रार्थयते तां तामभि प्राप्नोत्येवमेतेनोभयवर्त्तनिना यज्ञेन यं कामं कामयते तमभ्यश्नुते ॥४॥ अथार्धभाग्वै मनः प्राणानाँ स यद् व्याहरति वाचि तन्मनः प्रतिष्ठापयति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तद्यथैकवर्त्तनिना रथेन न काञ्चन दिशँ व्यश्नुते तादृगेतत् ॥५॥ यावदृचा यजुषा साम्ना कुर्य्युस्तावद्ब्रह्मा वाचँयमो बुभूषेत् ॥६॥ प्रजापतिर्व्वा इमाँस्त्रीन् वेदान-सृजत त एनँ सृष्टा नाधिन्वन् तानभ्यपीडयत्तेभ्यो भूर्भुवः स्वरित्यक्षरत् भूरित्यृग्भ्योऽक्षरत्सोऽयँ लोकोऽभवत् भुवरिति यजुर्भ्योऽक्षरत् सोऽन्तरिक्षलोकोऽभवत् स्वरिति सामभ्योऽक्षरत्स स्वर्ग्गो लोकोऽभवत् ॥७॥ तद्यद्यृक्त उल्बणं क्रियते गार्हपत्यं परेत्य भूः स्वाहेति जुहुयादयँ वै लोको गार्हपत्योऽयँ लोक ऋग्वेदस्तद्वा इमं च लोकमृग्वेदं च स्वेन रसेन समर्द्धयति ॥८॥ अथ यदि यजुष्ट उल्बणं क्रियेतान्वाहार्य्यपचनं परेत्य भुवः स्वाहेति जुहुयादन्तरिक्षलोको वा अन्वाहार्य्यपचनोऽन्तरिक्षलोको यजुर्व्वेदः तद्वा अन्तरिक्षलोकं च यजुर्व्वेदं च स्वेन रसेन समर्द्धयति ॥९॥ अथ यदि सामत उल्बणं क्रियेताहवनीयं परेत्य स्वः स्वाहेति जुहुयात्स्वर्ग्गो वै लोक आहवनीयः स्वर्ग्गो लोकः सामवेदस्तद्वै स्वर्ग्गञ्च लोकँ सामवेदञ्च स्वेन रसेन समर्द्धयति ॥१०॥ अतो वाव यतमस्मिन्नेव कतमस्मिँश्चोल्बणं क्रियेत सर्व्वेष्वेवानुपर्य्यायं जुहुयात्तथा हास्य यज्ञोऽस्कन्नः स्वगाकृतो भवतीति ॥११॥ अथ स्कन्नाद्वा भिन्नाद्वा त्रेधा यज्ञ उत्क्रामति देवान्दिवं तृतीयमन्तरिक्षमनुष्याँस्तृतीयं पृथिवीं पितृँस्तृतीयम् ॥१२॥ तदभिमृशेद्देवान्दिवँ यज्ञोऽगात्ततो मा द्रविणमष्ट्वन्तरिक्षं मनुष्यान्यज्ञोऽगात्ततो मा द्रविणमष्टु पृथिवीं पितृन् यज्ञोऽगात्ततो मा द्रविणमष्टु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्र क्व च यज्ञोऽगात्ततो मा द्रविणमष्ट्विति तद्वा आत्मानं च यजमानञ्च स्वेन रसेन समर्द्धयति ॥१३॥ वरुणो वा एतद्विष्णौ यज्ञमुपार्प्पयति ॥१४॥ यद्यज्ञ उल्बणं क्रियते तदप उपनिनयेद्वयोरोजसा स्कभिता रजाँसि वीर्य्येभि- र्व्वीरतमा शविष्ठा या पत्येते अप्रतीता सहोभिर्व्विष्णु अगन्वरुणा पूर्व्वहूतौ स्वाहेति तद्धा आत्मानं च यजमानञ्च स्वेन रसेन समर्द्धयति ॥१५॥ इति पञ्चमः खण्डः ॥१/५॥

ये विराजमतियजन्ते विराजमेव त ईप्सन्तो- ऽमुष्मिँल्लोके श्राम्यन्ति अथ य (एनामर्व्वाग्दभ्नुवन्ति) एनामर्व्वाक्स्तुवन्ति विराजमेव त ईप्सन्तोऽमुष्मिँल्लोके श्राम्यन्ति तेषां तथा श्राम्यताँ सुकृतं क्षीयते न हि तदमुष्मिँल्लोके शक्नुवन्ति यदस्माल्लोकादकृत्वा प्रयन्ति ॥१॥ एतद्ध स्मा होद्दालक आरुणिः कथं ते यजेरन् कथँ वा याजयेयुर्य्ये यज्ञस्य व्यृद्धेन न नन्दन्ति नन्दन्ति यत्समृद्धेनेति ॥२॥ अहँ वाव काले यजेयाहं काले याजयेयँ योऽहँ यज्ञस्य व्यृद्धेन न नन्दामि नन्दामि यत्समृद्धेनेति ॥३॥ अपि ह स्वादेव कामाद्यज्ञस्य व्यर्द्धयति भूयसी रूपाप्सीरुपाप्स्यामि भिषक्कृत्वा ॥४॥ एतद्ध स्म वै तद्विद्वानाह यावद्वा ऋचा होता करोति होतृष्वेव तावद्यज्ञः यावद्यजुषाध्वर्य्युरध्वर्य्युष्वेव तावत् यावत्साम्नोद्गातोद्गातृष्वेव तावद्ब्रह्मण्येव तावद्यज्ञो यत्रोपरताः॥५॥ तस्मात्तस्मिन्नन्तर्धौ ब्रह्मा वाचँयमो बुभूषेत् ॥६॥ स यदि प्रमत्तो व्याहरेदेता वा व्याहृतीर्म्मनसानुद्रवेत्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भूर्भुवः स्वरिति ॥७॥ वैष्णवीँ वर्च्चम् इदँ विष्णुर्व्वि चक्रम इति ॥८॥ राज्ञो ह मितस्य मर्क्कटोऽँशूनादाय वृक्षमापुप्लुवे ॥९॥ स हारुणिराहुतिमुद्यत्योवाच पुनर्वैना- न्निवप्स्यस्यतो वाव मृतोऽवपप्स्यस इति ॥१०॥ स होवाच किँ होष्यसीति ॥११॥ प्रायश्चित्तमिति ॥१२॥ किं प्रायश्चित्तमिति ॥१३॥ सर्व्वप्रायश्चित्तमिति ॥१४॥ किँ सर्व्वप्रायश्चित्तमिति ॥१५॥ महाव्याहृतिरेव मघवन्निति ॥१६॥ स होवाचोम् आरुणे यदाहुतिमनूचिषे कथं नु विदाञ्चकर्थ मर्क्कटोँशूनादत्तेति ॥१७॥ स होवाच यच्चावगतँ यच्चानवगतँ सर्व्वस्यैषैव प्रायश्चित्ति-रिति ॥१८॥ तस्मादेतामेव जुहुयात् ॥१९॥ अपि वाज्ञातँ यदनाज्ञातँ यज्ञस्य क्रियते मिथ्वग्ग्ने तदस्य कल्पय त्वँ हि वेत्थ यथायथँ स्वाहेति अपि वा प्राजापत्यां प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाँ स्वाहेति तद्वा आत्मानञ्च यजमानञ्च स्वेन रसेन समर्द्धयति ॥२०॥ अथ यद्वै किञ्च यज्ञे मृन्मयं भिद्येत तदभिमृशेत् भूमिर्भूमिमगान्माता मातरमप्यगाद्भूयाम पुत्रैः पशुभिर्य्यो- ऽस्मान् द्वेष्टि स भिद्यतामिति तद्वा आत्मानञ्च यजमानञ्च स्वेन रसेन समर्द्धयति ॥२१॥ इति षष्ठः खण्डः ॥१/६॥

घ्नन्तीव वा एतत्सोमँ राजानं प्रेव मीयते यदेन- मभिषुण्वन्ति तस्यैतामनुस्तरणीं कुर्व्वन्ति यत्सौम्यं चरुं तस्मात्पुरुषाय पुरुषायानुस्तरणी क्रियते ॥१॥ साध्यानाँ वै देवानाँ सत्रमासीनानाँ शर्क्करा अक्षसु जज्ञिरे ते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हेन्द्रमुपनिषेदुः कथं नु तेषाँ शर्क्करा अक्षसु जायेरन् यास्त्वँ विद्या इति तेभ्य एतत्सौम्ये चरौ श्यावमाज्यं प्रयच्छत् तदवेक्षन्त ते प्रापश्यन् प्रपश्यत्यनन्धो भवति य एवँ विद्वान्त्सौम्यं चरुमवेक्षते ॥२॥ योऽलमन्नाद्याय सन्नथान्नं नाद्याद्दक्षिणार्धँ सदसो गत्वैतँ सौम्यातिशेषं प्राश्नीयाज्जनँ वा एतस्मादन्नाद्यं क्रामति योऽलमन्नाद्याय सन्नथान्नं नात्ति जनोऽस्मात्पितरो जन्येनैवान्नेनान्नमत्ति अन्नादो भवति ॥३॥ इति सप्तमः खण्डः ॥१/७॥

इति प्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः

प्रजापतिरकामयत बहुः स्यां प्रजायेयेति स एताँ रेतस्यामृचँ साम्ना प्रच्छन्नामगायत् यदृचमसाम्नी-मगास्यदस्थ्यमाँसमजनिष्यत यत्सामानृचं माँसमनस्थि-कमजनिष्यत ऋचँ साम्ना प्रच्छन्नां गायति तस्मात्पुरुषः प्रच्छन्नो माँसेन त्वचा लोम्ना जायते ॥१॥ त्रिरुद्गृह्णाति ॥२॥ त्रय इमे लोका एषाँ लोकानामवरुद्ध्यै त्रिभ्यश्च रेतः सिच्यते ॥३॥ न हिं कुर्य्यात् ॥४॥ वज्रो वै हिङ्कारो बलमिव रेतो यद्धिंकुर्य्याद्वज्रेण हिङ्कारेण रेतः सिक्तँ विच्छिन्द्यात् ॥५॥ रेतस्या छन्दसा प्राजापत्या देवतया सर्व्वमेतया ध्यायन् गायेत्सर्व्वँ हीदँ रेतः ॥६॥ द्वितीयां गायति ॥७॥ तस्या द्वे अक्षरे सशयनी व्यतिषजति मध्यमस्य च पादस्योत्तममुत्तमस्य च प्रथमम् ॥८॥ व्यतिषक्तौ प्राणापानौ प्रजा दधतः ॥९॥ गायत्री

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

छन्दसाग्ग्नेयी देवतया पृथिवीमेतया ध्यायन्गायेत् ॥१०॥ तृतीयां गायति ॥११॥ तां बलवदिवोरसेव गायति ॥१२॥ तस्या द्वे उत्तमार्द्धेऽक्षरे द्योतयति ॥१३॥ चक्षुरेव तद्युनक्ति तस्माद्युक्तं चक्षुः ॥१४॥ त्रिष्टुप् छन्दसैन्द्रीदेवतयान्तरिक्ष-मेतया ध्यायन्गायेत् ॥१५॥ चतुर्थीं गायति ॥१६॥ तस्याश्चत्वारि चत्वार्य्यक्षराणि निक्रीडयन्निव गायत्या द्वादशेभ्योऽक्षरेभ्यः ॥१७॥ द्वादशाक्षरपदा जगती पशवो वै जगती पशुष्वेव प्रतितिष्ठति ॥१८॥ तस्याश्चत्वार्य्युत्त-मार्धेऽक्षराणि द्योतयति॥१९॥ श्रोत्रमेव तद्युनक्ति तस्माद्युक्तँ श्रोत्रँ श्रोत्रे द्वे प्रतिश्रवणे द्वे तस्मात्पुरुषः सर्व्वादिशः श्रृणोति अपि पराङ् यन् प्रत्यङ् श्रृणोति ॥२०॥ जगती छन्दसा सौरीदेवतया दिवमेतया ध्यायन्गायेत् ॥२१॥ पञ्चमीं गायति ॥२२॥ तां निनर्द्दन्निव गायति ॥२३॥ आह बहुतमात्पुरुषादन्नमत्ति अन्नादो भवति य एवँ वेद ॥२४॥ निरुक्तां चानिरुक्तां गायति ॥२५॥ निरुक्तेन वै वाचो भुञ्जतेऽनिरुक्तमस्या उपजीवन्ति भुङ्क्ते वाचमुपैनां जीवति य एवँ वेद ॥२६॥ अनुष्टुप् छन्दसा प्राजापत्या देवतया सर्व्वमेतया ध्यायन्गायेत्सर्व्वँ हीदं प्राजापत्यम् ॥२७॥ षष्ठीं गायति ॥२८॥ तस्या द्वे द्वे अक्षरे उदासं गायत्या षड्भ्योऽक्षरेभ्यः॥२९॥षड्तव ऋतुष्वेव प्रतितिष्ठति ॥३०॥ पङ्क्तिश्छन्दसा सौमीदेवतया दिश एतया ध्यायन् गायेत् ॥३१॥ इहेव च वा एष इहेव च मनसा गच्छति यो गायत्रे प्रातःसवने त्रिष्टुभं गायति जगतीं गायत्यनुष्टुभं गायति पङ्क्तिं गायत्यास्ते ॥३२॥ गायत्रे द्वे गायति ॥३३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राणमेव तदभ्येति प्राणो हि गायत्रं पन्थानमेव तदभ्येति पन्था हि गायत्रम्॥३४॥ रथन्तरवर्णामुत्तमां गायति ॥३५॥ इयँ वै रथन्तरमस्यामेव प्रतितिष्ठति ॥३६॥ इति प्रथमः खण्डः ॥२/१॥

ता वा एता देवलोकाय युज्यन्ते यत्पराच्यः ॥१॥ प्रतीच्यो मनुष्यलोकाय ॥२॥ एष वाव जात एषोऽवलुप्त-जरायुरेष आर्त्विजीनो यस्य धुरो गीयन्ते यश्चैवँ विद्वान् धुरो गायति जातमेवैनमन्नाद्याय परिवृणक्ति उभावन्नमत्त उद्गाता च यजमानश्च ॥३॥ या प्रथमा तामन्नाद्यं ध्यायन् गायेत् ॥४॥ रेतस एव तत्सिक्तायान्नाद्यं प्रतिदधाति॥५॥ न हिं कुर्य्यात्॥६॥ यद्धिङ्कुर्य्याद्वज्ज्रेण हिङ्कारेण रेतस्सिक्तँ विच्छिन्द्यात् ॥७॥ रेतस्या छन्दो युज्यते मनो धीयते ॥८॥ या द्वितीया तां गायत्रीमागां गायँस्तस्या द्वे अक्षरे सशयनी व्यतिषजति मध्यमस्य च पदस्योत्तममुत्तमस्य च प्रथमँ व्यतिषक्तौ प्राणापानौ प्रजा दधतो गायत्रीछन्दो युज्यते प्राणापानौ धीयेते ॥९॥ या तृतीया तां त्रिष्टुभमागां गायँस्तस्या द्वे उत्तमार्धेऽक्षरे द्योतयति चक्षुरेव तद्युनक्ति तस्माद्विरूपं चक्षुः कृष्णमन्यच्छुक्लमन्यत्त्रिष्टुप्छन्दो युज्यते चक्षुषी धीयेते ॥१०॥ यां चतुर्थी तां जगतीमागां गायँस्तस्याश्चत्वार्य्युत्तमार्धेऽक्षराणि द्योतयति श्रोत्रमेव तद्युनक्ति तस्माद्युक्तँ श्रोत्रँ श्रोत्रे द्वे प्रतिश्रवणे द्वे तस्मादपि पराङ् यन् प्रत्यङ् श्रृणोति जगतीछन्दो युज्यते श्रोत्रे धीयेते ॥११॥ या पञ्चमी तामनुष्टुभमागां गायँश्चतुर्धा व्यावृज्य गायेत् चतुर्धा वा इदं पुरुषो वीर्य्याय विकृतो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जायते वीर्य्यायैवैनां तद्व्यावृज्य गायति उच्चावचामिव गायेदुच्चावचैव हि वाक् संक्ष्णुत्येव गायेत् संक्ष्णुत्येव हि वाचं पुरुषो वदत्यनुष्टुप्छन्दो युज्यते वाग्धीयते ॥१२॥ या षष्ठी तां पङ्क्तिमागां गायँस्तस्या द्वे द्वे अक्षरे उदासं गायत्याषड्भ्योऽक्षरेभ्यः षड्तव ऋतुष्वेव प्रतितिष्ठति पङ्क्तिश्छन्दो युज्यते समानोदानौ धीयेते ॥१३॥ सदिति प्रथमाया धुरो निधनँ रेतसो ह्यधि सञ्जायते ॥१४॥ समिति द्वितीयायाः रेतसो ह्यधि सम्भवः ॥१५॥ स्वरिति तृतीयायाः प्रस्वर्ग्गँल्लोकं जानाति॥१६॥ इडेति चतुर्थ्याः पशवो वा इडा पशुष्वेव प्रतितिष्ठति ॥१७॥ वागिति पञ्चम्याः सर्व्वा अस्मिन्पुण्या वाचो वदन्ति ॥१८॥ य एवँ वेद ॥१९॥ या प्रथमा तामायच्छन्निव गायेदायत इव ह्ययमवाङ् प्राणः ॥२०॥ या द्वितीया तां घोषिणीमिव गायेद्घोषीव ह्ययमपानः॥२१॥ या तृतीया तामुद्यच्छन्निव गायेदुद्यत इव ह्ययं उदानः॥२२॥ या चतुर्थी तां निक्रीडय न्निव गायेन्निक्रीडित इव ह्ययँ व्यानः ॥२३॥ या पञ्चमी तां निरुक्तामनिरुक्तामिव गायेन्निरुक्तोऽनिरुक्त इव ह्ययं समानः॥२४॥ या षष्ठी तामुदासमिव गायेदुदस्त इव ह्यय मुदानो यच्छृङ्गम् ॥२५॥ रथन्तरवर्णामुत्तमां गायेदियँ वै रथन्तरमस्यामेव प्रतितिष्ठति॥२६॥ इति द्वितीयः खण्डः॥२/२॥

देवाश्च वा असुराश्चैषु लोकेष्वस्पर्धन्त ते देवाः प्रजापतिमुपाधावन् ॥१॥ तेभ्य एतान् धुरः प्राणान् प्रायच्छत् मनः प्रथममथ प्राणमथ चक्षुरथ श्रोत्रमथ वाचम् ॥२॥ ताभ्यः पञ्चभ्यो धूर्भ्यः पुरुषं च पशूँश्च

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

निरमिमीत ॥३॥ तेन पुरुषेणासुरानधूर्व्वन् यदधूर्व्वँस्तद्धुरां धूस्त्वं धूर्व्वति पाप्मानं भ्रातृव्यं य एवँ वेद ॥४॥ यो वै धुरां धूस्त्वँ वेद धुरा धुरा भ्रातृव्या द्वसीयान्भवति एतद्वै धुरां धूस्त्वँ यन्नाना वीर्य्या नानारूपा नानाछन्दस्या नानादेवत्याः समानँ हिं कारमभिसम्पद्यन्ते एतद्वै धुरां धूस्त्वं धुरा धुरा भ्रातृव्याद्वसीयान्भवति य एवँ वेद ॥५॥ यो वै धूर्षु महाव्रतँ वेद सर्व्वा अस्मिन् पुण्या वाचो वदन्ति ॥६॥ शिरो गायत्र्युरस्त्रिष्टुप् मध्यं जगती पादावनुष्टुप् सर्व्वा अस्मिन् पुण्या वाचो वदन्ति य एवँ वेद ॥७॥ यो वा एवं धुरो विद्वानथासां व्रतं चरत्यागमिष्यतोऽस्य पूर्व्वेद्युः पुण्या कीर्त्तिरागच्छति ॥८॥ सुरभिरेव गन्धो गायत्र्या व्रतं दर्शनीयं त्रिष्टुभः श्रवणीयं जगत्याः यदेव वाचा पुण्यँ वदति तदनुष्टुभस्तदु सर्व्वासाँ व्रतम् ॥९॥ तदु विद्वाँसमाहुरिति नोऽवादीरिति तदनादृत्यम् ॥१०॥ यस्य वै धुरो विगीतास्तस्य सङ्गीताः ॥११॥ यस्य वा एता बहिष्पवमाने विगीयान्तराज्येषु सङ्गायन्ति तस्य वै धुरो विगीतास्तस्य सङ्गीताः ॥१२॥ यः कामयेतैकधा यजमानँ यश ऋच्छेद्यथादिष्टं प्रजाः स्युरिति होतुराज्ये गायेदेकधा यजमानँ यश ऋच्छति यथादिष्टं प्रजा भवन्ति ॥१३॥ यः कामयेत कल्पेरन् प्रजा यथादिष्टँ यजमानः स्यादिति यथाज्यं गायेत्कल्पन्ते प्रजा यथादिष्टँ यजमानो भवति ॥१४॥ यो वा एवं धुरो वेदानपजय्यमात्मने च यजमानाय च लोकं जयत्यति यजमानमात्मानं मृत्युं परँ स्वर्गँल्लोकँ हरति ॥१५॥ इति तृतीयः खण्डः ॥२/३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राञ्चमग्निमुन्नयन्ति तस्मात् प्राङासीनो होतान्वाह प्राङासीनो यजति प्राङासीनः शँसति ॥१॥ असावादित्यः प्राङ्पाङ् सञ्चरति तस्मात् अध्वर्य्युः प्राङ्पाङ् सञ्चरति ॥२॥ अथैष चन्द्रमा दक्षिणेनैति तस्माद्ब्रह्माणं दक्षिणत आसयन्ति ॥३॥ अथैतस्यामुदीच्यां दिशि भूयिष्ठँ विद्योतते तस्मादेतां दिशमुद्गाता प्रत्युद्गायति ॥४॥ अथैष आकाशो मध्यतो भूतानां सन्नस्तस्मान्मध्ये सदस्यमासयन्ति ॥५॥ उच्चावचा वा आप उतेव गाधा भवन्त्युतेव गम्भीरा-स्तस्माद्धोत्राशँसिन उतेव पञ्चर्च्चेन कुर्व्वन्त्युतेव भूयसा ॥६॥ आदित्यस्यैव गतँ रश्मयोऽनुयन्ति तस्मादध्वर्य्योरेव गतं चमसाध्वर्य्यवोऽनुयन्ति ॥७॥ इति चतुर्थःखण्डः॥२/४॥

स प्रातस्सवने सवनमुखीयेष्वाहृतेषूपहवमिच्छते ॥१॥ अग्निर्म्मे होता समोपह्वयताँ होतरुपमाह्वयस्वे-त्युच्चैः ॥२॥ आदित्यो मेऽध्वर्य्युः समोपह्वयतामध्वर्य्य उपमाह्वयस्वेत्युच्चैः ॥३॥ चन्द्रमा मे ब्रह्मा समोपह्वयतां ब्रह्मन्नुपमाह्वयस्वेत्युच्चैः॥४॥ पर्ज्जन्यो म उद्गाता समोप-ह्वयतामुद्गातरुपमाह्वयस्वेत्युच्चैः॥५॥ आकाशो मे सदस्यः समोपह्वयताँ सदस्योपमाह्वयस्वेत्युच्चैः ॥६॥ आपो मे होत्राशँसिनस्तेमोपह्वयन्ताँ होत्राशँसिन उपमाह्वय-ध्वमित्युच्चैः ॥७॥ रश्मयो मे चमसा ध्वर्य्यवस्तेमोप-ह्वयन्तां चमसाध्वर्य्यव उपमाह्वयध्वमित्युच्चैः॥८॥ ता वा एता देवता ऋत्विजामेव वाग्भिरुपह्वयन्ते ॥९॥ स उपहूतो भक्षयति ॥१०॥ प्राणो यजमानोऽथो यत्रैतासां देवतानाँ-ल्लोकस्तदुपहूतो भवति ॥११॥ इति पञ्चमः खण्डः॥२/५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

माध्यन्दिने सवने सवनमुखीयेष्वाहृतेषूपहवमिच्छते ॥१॥ वाङ्मे होता स मोपह्वयताँ होतरुप माह्वयस्वेत्युच्चैः चक्षुर्म्मेऽध्वर्य्युः समोपह्वयतामध्वर्य्य उपमाह्वयस्वे-त्युच्चैर्म्मनो मे ब्रह्मा स मोपह्वयतां ब्रह्मन्नुपमाह्वय-स्वेत्युच्चैः श्रोत्रं म उद्गाता समोपह्वयतामुद्गातरुपमाह्वय-स्वेत्युच्चैः ॥२॥ योऽयमन्तश्चक्षुष्याकाशः स मे सदस्य-स्समोपह्वयताँ सदस्योपमाह्वयस्वेत्युच्चैर्य्या इमा अन्तश्चक्षुष्यापस्ते मे होत्राशँसिनस्ते मोपाह्वयन्ताँ होत्राशँसिन उपमाह्वयध्वमित्युच्चैरङ्गानि मे चमसाध्वर्य्यव स्तेमोपह्वयन्तां चमसाध्वर्य्यव उपमाह्वयध्वमित्युच्चैः ॥३॥ ता वा एता देवता ऋत्विजामेव वाग्भिरुपह्वयन्ते ॥४॥ स उपहूतो भक्षयति ॥५॥ अपानो यजमानोऽथो यत्रैतासां देवतानाँल्लोकस्तदुपहूतो भवति ॥६॥ इति षष्ठःखण्डः॥२/६॥

स तृतीयसवने सवनमुखीयेष्वाहृतेषूपहवमिच्छते ॥१॥ प्राणो मे होता समोपह्वयताँ होतरुपमाह्वयस्वे-त्युच्चैरपानो मेऽध्वर्य्युः समोपह्वयतामध्वर्य्य उपमाह्वय-स्वेत्युच्चैर्व्यानो मे ब्रह्मा समोपह्वयतां ब्रह्मन्नुप माह्वयस्वेत्युच्चैः समानो म उद्गाता स मोपह्वयतामुद्गातरुप माह्वयस्वेत्युच्चैः॥२॥ योऽयमन्तः पुरुष आकाशः स मे सदस्यः स मोपह्वयताँ सदस्योप माह्वयस्वेत्युच्चैर्य्या इमा अन्तः पुरुष आपस्ते मे होत्राशँसिनस्ते मोपह्वयन्ताँ होत्राशँसिन उप माह्वयध्वमित्युच्चैर्ल्लोमानि मे चमसा-ध्वर्य्यवस्ते मोपह्वयन्तां चमसाध्वर्य्यव उप माह्वयध्व-मित्युच्चैः ॥३॥ ता वा एता देवता ऋत्विजामेव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वाग्भिरुपह्वयन्ते ॥४॥ स उपहूतो भक्षयति ॥५॥ स उद्गानो यजमानोऽथो यत्रैतासां देवतानाँ ल्लोकस्तदुपहूतो भवति॥६॥सर्व्वेषाँ वै वषट्कर्त्ता चमसं भक्षयेत् ॥७॥ देवानाँ वा एतद्यज्ञस्य मुखँ यदुद्गातृचमसं तस्मादुद्गातृ-चमसं नान्यो भक्षयेत् ॥८॥ एवँ विदुषो ह वै यज्ञो न व्यथते एवँ विदुषो ह वै यजमानस्य स्वर्ग्यं पुत्र्यं पशव्यमिष्टं भवति एवँ विद्वान् ह वै यजमानो द्विषन्तं भ्रातृव्यमभि भवति अथ वा अतो यज्ञे हीनं कुर्य्यात् ॥९॥ इति सप्तमः खण्डः॥२/७॥ **इति द्वितीयोऽध्यायः**

अथ तृतीयोऽध्यायः

यद्धोता जहाति वाग्घ तद्यजमानं जहाति स यत्तत्करोति स्वाँ वाचँ यजमाने दधाति स विष्वङ् वाचामुष्मिँल्लोके सम्भवति ॥१॥ यदध्वर्य्युर्ज्जहाति चक्षुर्ह तद्यजमानं जहाति स यत्तत् करोति स्वं चक्षुर्य्यजमाने दधाति स विष्वङ्चक्षुषामुष्मिँल्लोके सम्भवति ॥२॥ यद्ब्रह्मा जहाति मनो ह तद्यजमानं जहाति स यत्तत् करोति स्वं मनो यजमाने दधाति स विष्वङ् मनसामुष्मिँल्लोके सम्भवति॥३॥ यदुद्गाता जहाति श्रोत्रँह तद्यजमानं जहाति स यत्तत्करोति स्वँ श्रोत्रँ यजमाने दधाति स विष्वङ् श्रोत्रेणामुष्मिँल्लोके सम्भवति ॥४॥ यत्सदस्यो जहात्यात्मा ह तद्यजमानं जहाति स यत्तत्करोति स्वमात्मानँ यजमाने दधाति स विष्वङ्ङात्मना-मुष्मिँल्लोके सम्भवति ॥५॥ यद्धोत्राशँसिनो जहत्यङ्गानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ह तद्यजमानं जहति ते यत्तत्कुर्व्वन्ति स्वान्यङ्गानि यजमाने दधति ते विश्वञ्चोऽङ्गैरमुष्मिँल्लोके सम्भवन्ति ॥६॥ यच्चमसाध्वर्य्यवो जहति लोमानि ह तद्यजमानं जहति ते यत्तत्कुर्व्वन्ति स्वानि लोमानि यजमाने दधति ते विष्वञ्चो लोमभिरमुष्मिँल्लोके सम्भवन्ति॥७॥ तस्मादेवँ विद्यज्ञे हीनं न कुर्य्यात् ॥८॥ अथ वा अत ऋत्विजामेव विज्ञानम् ॥९॥ पशवो हाध्वर्य्युमनुकीर्त्तिर्होतारँ योगक्षेमो ब्रह्माणमात्मा च प्रजा चोद्गातारम्॥१०॥ इतिप्रथमःखण्डः॥३/१॥

स यदि पशुतो व्याधीयेताध्वर्य्युर्म्म इदमकरिति विद्यादथ यद्येनं पापिका कीर्त्तिरनूदियाद्धोता म इदमकरिति विद्यादथ यद्यस्य योगक्षेमो व्यथेत ब्रह्मा म इदमकरिति विद्यादथ यद्यात्मना वा प्रजया वा व्याधीयेतोद्गाता म इदमकरिति विद्यात्॥१॥ प्राणदेवत्यो वै ब्रह्मा वाग्देवत्या इतर ऋत्विजस्स यदि मन्येत ब्रह्मा स इदमकरिति हरितँ हिरण्यं दर्भानाड्या प्रबध्य स्रुच्यवधाय चतुर्गृहीतमाज्यं गृहीत्वा जुहुयान्नमः प्राणाय वाचस्पतये स्वाहेति यद्यु वा इतरे नमो वाचे प्राणपत्न्यै स्वाहेति यदीतरो यदिवेतरे सर्व्वेष्वेवानुपर्य्यायं जुहुयान्नमः प्राणाय वाचस्पतये स्वाहा नमो वाचे प्राणपत्न्यै स्वाहेति ॥२॥ अथ तद्धिरण्यं ब्रह्मणे दद्यात् ॥३॥ अथ यदाह यज्ञ वाव यज्ञस्य प्रायश्चित्तिरिति पुनर्य्यज्ञ एव स एते उ ह त्वेवा हुती यज्ञविभ्रष्टस्य प्रायश्चित्तिरिति॥४॥ इतिद्वितीयःखण्डः॥३/२॥

ते वा ऋत्विजः स यजमानो दैवा वा अन्य ऋत्विजो मानुषा अन्ये यं दैवा याजयन्ति देवलोकमेव स

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तैरवरुन्धे न मनुष्यलोकमथ यं मानुषा याजयन्ति मनुष्यलोकमेव स तैरवरुन्धे न देवलोकमथ यमुभये याजयन्ति देवलोकं चैव स तैरवरुन्धे मनुष्यलोकं च ॥१॥ स एतान्दैवानृत्विजो वृणीताग्निर्म्मे होतादित्यो मेऽध्वर्य्युश्चन्द्रमा मे ब्रह्मा पर्ज्जन्यो म उद्गाताकाशो मे सदस्य आपो मे होत्राशँसिनो रश्मयो मे चमसाध्वर्य्यवः ॥२॥ स एतान्दैवानृत्विजो वृत्वाथैतान् मानुषान् वृणीत य एनमभिराधयेयुः ॥३॥ अथ क्षत्रियं देवयजनँ याचेत् ॥४॥ स चेत्तस्मै दद्याद्देवयजनवान् भूया इत्येनं ब्रूयात् ॥५॥ न चेत्तस्मै दद्याद्यदहं देवयजनँ वेद तस्मिँस्त्वावृश्चानीत्येनं ब्रूयात्॥६॥ अग्निर्व्वाव तद्देवयजनं भूमिर्व्वाव तद्देव-यजनमापो वाव तद्देवयजनँ श्रद्धा वाव तद्देवयजनमेतेषु ह वा एनं देवयजनेष्वावृश्चत्यथो हार्त्तिमेवापौरुषेयीन्नेति ॥७॥ अथ तत एत्यर्त्त्विजो देवयजनँ याचेत् ॥८॥ अग्निर्म्मे होता स मे देवयजनं ददातु होतर्द्देवयजनम्मे देहीत्युच्चै-रादित्यो मेऽध्वर्य्युस्स मे देवयजनं ददात्वध्वर्य्यो देवयजनम्मे देहीत्युच्चैश्चन्द्रमा मे ब्रह्मा स मे देवयजनं ददातु ब्रह्मन् देवयजनम्मे देहीत्युच्चैः पर्ज्जन्यो म उद्गाता स मे देवयजनं ददातूद्गातर्द्देवयजनम्मे देहीत्युच्चैराकाशो मे सदस्यस्स मे देवयजनं ददातु सदस्य देवयजनम्मे देहीत्युच्चैरापो मे होत्राशँसिनस्ते मे देवयजनं ददतु होत्राशँशिनो देवयजनम्मे दत्तेत्युच्चैः रश्मयो मे चमसा-ध्वर्य्यवस्ते मे देवयजनं ददतु चमसाध्वर्य्यवो देवयजन-म्मे दत्तेत्युच्चैः ॥९॥ ता वा एता देवता ऋत्विजामेव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वाग्भिर्द्देवयजनं ददति स दत्ते यजते ॥१०॥ यदुन्नतं भूम्या अनूषरँ यत्र बहुला ओषधयश्चात्वालसारिण्यो यत्रापः स्युः ॥११॥ तस्य न पुरस्ताद्देवयजनमात्रमतिशिष्याद्यावा-ञ्छम्याप्रासः ॥१२॥ अवरपुरुषा हास्माच्छ्रेयाँसो भवन्ति यस्यैवमति रेचयन्ति ॥१३॥ कामं दक्षिणत आगामुका हैनं दक्षिणा भवन्ति ॥१४॥ कामं पश्चादवरपुरुषा हास्माच्छ्रेयाँसो भवन्ति ॥१५॥ काममुत्तरत उत्तरा हैनं देवयज्योपनामुका भवत्युत्तरोत्तरणी हास्य श्रीर्भवति ॥१६॥ यस्य पुरस्तात् त्रीणि ज्योतीँषि दृश्येरन्नग्निराप आदित्यस्तद्देवयजनं तत्त्रिशुक्रियम् ॥१७॥ पुरस्ताच्चित्रं देवयजनम् ॥१८॥ पश्चाच्चित्रँ श्मशानकरणम् ॥१९॥ प्रागुदक्प्रवणं देवयजनम् ॥२०॥ पश्चाद्दक्षिणाप्रवणँ श्मशानकरणम् ॥२१॥ यथा वै दक्षिणः पाणिरेवं देव-यजनम् ॥२२॥ यथा सव्यस्तथा श्मशानकरणम् ॥२३॥ यथा श्मशानकरणं तथाभि चरणीयानां देवयजनम् ॥२४॥ अप्यु हैक आहुर्य्यस्मिन्नेव कस्मिँश्चिद्देशे श्रद्दधानो यजत ऋध्नोत्येवेति ॥२५॥ इति तृतीयः खण्डः ॥३/३॥

यावान् यज्ञे रसो भवति तेनात एव प्राचीनं प्रचरन्त्यथैतद्यातयाम परिशिष्यतर्ज्जीषन्तन्नाह तस्मै यद्बथैवापास्येयुर्न्नो तस्मै यदग्नावनु प्रहरेयुस्तेनाप एवाभ्यवयन्ति ॥१॥ आपो वै सर्व्वस्य शान्तिः प्रतिष्ठा ॥२॥ पाप्मानँ हैष हन्ति यो यजते तमिमं पाप्मानँ हतमपो हराणीति ॥३॥ तेनान्तरेण प्रतिपद्यन्ते चात्वालं चोत्करञ्च ॥४॥ एतद्वै देवानां तीर्थम् ॥५॥ तदेतदृषिराहात्मानं तीर्थं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क इह प्रवोचद्येन देवाः पथा प्रपिबन्ते सुतस्येति ॥६॥ एतद्वै देवानां तीर्थमतीर्थँ ह्येव यज्ञस्यातोऽन्यत् ॥७॥ तस्मादेतेनैव प्रसृते प्रपद्येतैतेन विष्क्रामेत् ॥८॥ तान् प्रच्युतान् देवयजनादप्राप्तानप एतस्मिन्नवकाशे रक्षाँस्यजिघाँसन्त्स एतदग्नी रक्षोहा सामापश्यत्ता-न्येतेनापाहत तान्यमुर्ह्यपहतानि सन्तीति देवा अकुर्व्व-न्नित्येवैतद्रक्षाँस्यपसेधति ॥९॥ तस्याहावोऽहाव इति स्तोभान्त्स्तोभत्यहावोस्त्वहावोऽस्त्वित्येवैतद्रक्षाँस्यपसेधति ॥१०॥ अग्निष्टपति प्रतिदहतीत्याह रक्षाँस्येव तत्प्रतिदहति ॥११॥ पादाय पादाय स्तोभा अनुवर्त्तन्ते रक्षसामपहत्यै ॥१२॥ विश्वँ समत्रिणं दह विश्वँ समत्रिणं दहेत्यत्रिणो वै रक्षाँसि पाप्मानोऽत्रिणोऽत्रिण एवैतद्रक्षाँसि पाप्मानमप-सेधति ॥१३॥ तस्य त्रिर्न्निधनमाहुः ॥१४॥ यँ वै सुहतं घ्नन्ति न स पुनरुद्रिङ्क्ते यथाह पुनः पुनरादाय सुहतँ हन्यात्तादृगेतत् ॥१५॥ तद्वा अतिच्छन्दस्सु भवति ॥१६॥ वारणमिव वा एतच्छन्दो यदतिच्छन्दो वारणानीव रक्षाँस्यरण्यायतनानि तद्यथा स्वमरण्यमभयेनातिक्रामे-त्तादृगेतत् ॥१७॥ तद्वै सप्तपदासु भवति ॥१८॥ सप्त वै छन्दाँसि चतुरुत्तराणि तद्यथा सर्व्वैश्छन्दोभिरभये-नातिक्रामेत्तादृगेतत् ॥१९॥ तस्य त्रिर्व्वचन एकविँशतिः पदानि त्रिः सामाह तच्चतुर्व्विँशतिः ॥२०॥ चतुर्व्विँशति-रर्धमासाः सँवत्सरस्सँवत्सरः साम ॥२१॥ तस्य ह वा एतस्य सँवत्सरस्य साम्नोऽहोरात्राणि हिङ्कारोऽर्धमासाः प्रस्तावो मासा आदिर्ऋतव उद्गीथः पौर्णमास्यः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतिहारोऽष्टका उपद्रवोऽमावास्या निधनम् ॥२२॥ तस्य ह वा एतस्य सँवत्सरस्य साम्नो वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम् ॥२३॥तस्माद्धेमन्तं प्रजा निधनकृता इवासते निधनरूप-मेवैतर्हि ॥२४॥ तदाहुः कां दिशमवभृथमभ्यवेयुरिति ॥२५॥ प्राञ्चोऽभ्यवेयुर्द्देवानाँ वा एषा दिग्यत्प्राची या देवानां दिक्तां नोऽनु यज्ञः सन्तिष्ठाता इति ॥२६॥ दक्षिणाभ्यवेयुः पाप्मानँ हैष हन्ति यो यजते तमिमं पाप्मानँ हतं दक्षिणाहराणीति पितॄणाँ वा एषा दिग्यद्दक्षिणा या पितॄणां दिक्तां नोऽनु यज्ञः सन्तिष्ठाता इति ॥२७॥ प्रत्यञ्चोऽभ्यवेयुर्म्मनुष्याणाँ वा एषा दिग्यत्प्रतीची या मनुष्याणां दिक्तां नोऽनु यज्ञः सन्तिष्ठाता इति ॥२८॥ उदञ्चोऽभ्यवेयुर्न्नक्षत्राणाँ वा एषा दिग्यदुदीची या नक्षत्राणां दिक्तां नोऽनु यज्ञः सन्तिष्ठाता इति ॥२९॥ अतो वाव यतमथैव कतमथा चापः स्युस्तदभ्यवेयुः ॥३०॥ यद्वै विद्वान्कर्म्म करोत्यस्मादिदमिति वसीयानेव तेन भवति ॥३१॥ तदाहुः स्रवन्तीष्वभ्यवेयू३ स्थावरासू३ इति ॥३२॥ स्रवन्तीष्वभ्यवेयुः पाप्मानँ हैष हन्ति यो यजते तमिमं पाप्मानँ हतमपः प्रवहतामिति॥३३॥ स्थावरा याः शीपल्या स्तास्वभ्यवेयुरितो मा यज्ञो विक्षुब्धः प्रत्युपतिष्ठाता इति ॥३४॥ अतो वाव यतरथैव कतरथा चापाः स्युस्तद-भ्यवेयुः ॥३५॥ यद्वै विद्वान्कर्म्म करोत्यस्मादिदमिति वसीयानेव तेन भवति ॥३६॥ इति चतुर्थः खण्डः ॥३/४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकस्यै हिङ्करोति स प्रथमया तिसृभ्यो हिङ्करोति स मध्यमया पञ्चभ्यो हिङ्करोति स उत्तमया एकस्यै हिङ्करोति स प्रथमया तिसृभ्यो हिङ्करोति स पराचीभिः पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभि-रिषुस्त्रिवृतो विष्टुतिः ॥१॥ अभिचरन्तस्तुवीत ॥२॥ अनीकं प्रथमा इषुर्धनुर्ज्ज्या यत्तिस्रस्सन्दधाति व्येव पञ्चभिः सृजते ॥३॥ स्तृणुते भ्रातृव्यँ वसीयानात्मना भवति य एतया स्तुते ॥४॥ इति पञ्चमः खण्डः ॥३/५॥

तिसृभ्यो हिङ्करोति स पराचीभि स्तिसृभ्यो हिङ्करोति स पराचीभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिः ॥१॥ अभिचरन्तस्तुवीत ॥२॥ वज्ज्रो वै त्रिवृद्वज्ज्रस्त्रिणवो यत्त्रिवृत्त्रिणवाभ्यां पञ्चदशँ विदधाति वज्ज्रमेव तत्सम्यक् सन्दधाति ॥३॥ एवमिव वै वज्ज्रः साधुर्य्यदारम्भणतोऽणीयान् प्रहरणतः स्थवीयान्॥४॥ तेन पाप्मानं भ्रातृव्यँ स्तृणुते वसीया नात्मना भवति य एतया स्तुते ॥५॥ इति षष्ठःखण्डः॥३/६॥

एतयैवाभिचरन्तस्तुवीत ॥१॥ वज्ज्रो वै त्रिवृद्वज्ज्रः पञ्चदशो वज्ज्रस्त्रिणवो यत्त्रिवृत्पञ्चदशत्रिणवैः सप्तदशँ विदधाति वज्ज्रमेव तत्सम्यक् सन्दधाति ॥२॥ एवमिव वै वज्ज्रस्साधुर्य्यदारम्भणतोऽणीयान् प्रहरणतः स्थवीयान् ॥३॥ तेन पाप्मानं भ्रातृव्यँ स्तृणुते वसीयानात्मना भवति य एतया स्तुते ॥४॥ इति सप्तमः खण्डः ॥३/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तिसृभ्यो हिङ्करोति स पराचीभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिरभिचरन्त्स्तुवीत ॥१॥ वज्ज्रो वै त्रिवृद्वज्ज्रस्त्रिणवो यत्त्रिवृत्त्रिणवाभ्यामेकविँशँ विदधाति वज्ज्रमेव तत्सम्यक् सन्दधाति ॥२॥ एवमिव वै वज्ज्रस्साधुर्य्यदारम्भणतोऽणीयान्प्रहरणतस्स्थवीयाँ स्तेन पाप्मानं भ्रातृव्यँ स्तृणुते वसीयानात्मना भवति य एतया स्तुते ॥३॥ इत्यष्टमः खण्डः॥३/८॥

नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिरभिचरन्त्स्तुवीत ॥१॥ वज्ज्रो वै त्रिणवो वज्ज्रमेव तत्पराञ्चं प्रवर्त्तयति स्तृत्यै तेन पाप्मानं भ्रातृव्यँ स्तृणुते वसीयानात्मना भवति य एतया स्तुते ॥२॥ इति नवमः खण्डः ॥३/९॥ **इति तृतीयोऽध्यायः**

अथ चतुर्थोऽध्यायः

स्वरान्तः प्रथमस्त्रिरात्रो गायत्री ॥१॥ प्राणो वै गायत्री प्रजापतिः स्वरः प्रजापतिमेवाप्नोति ॥२॥ निधनान्तो द्वितीयस्त्रिष्टुप्॥३॥ वीर्य्यँ वै त्रिष्टुप्त्रैष्टुभः पुरुषः पुरुषमेवाप्नोति ॥४॥ इडान्तस्तृतीयो जगती ॥५॥ पशवो वा इडा पशवो जगती जागताः पशवः पशूनेवाप्नोति ॥६॥ प्रसृतच्छन्दाः प्रथमस्त्रिरात्रस्तेन सोऽयातयामा ॥७॥ अथोत्तरस्य च्छन्दाँसि व्यूहन्ति त्रिष्टुभः प्रतिपदो भवन्ति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिष्टुभाँल्लोके जगत्यो जगतीनां गायत्र्यस्तेन सोऽयात-यामा ॥८॥ अथोत्तमस्य च्छन्दाँसि व्येवोहन्ति जगत्यः प्रतिपदो भवन्ति जगतीनाँल्लोके त्रिष्टुभस्त्रिष्टुभां गायत्र्यस्तेनो एव सोऽयातयामा ॥९॥ अभि वा एता अन्योन्यस्यै लोकमभ्यध्यायन् काममेवैनागमयत्याप्नोति तं कामँ यस्मै कामायैष आह्रियते ॥१०॥ तस्माद्युजौ न सदृग्वहतस्तस्माद्विपरिणीतौ वहीयाँसौ भवतस्तस्मा-दुभयतोदन्तः स्यदन्ते ॥११॥ तृचे वा अन्य ऋषयो विराजमपश्यन्वसिष्ठश्चतुर्ऋचे ॥१२॥ तेन स चतुर्ऋचो यस्तृचेऽन्यत्साम भवत्येकर्च्चेऽन्यद्यद्वाव चतसृष्वेकँ साम स एव चतुर्ऋचः ॥१३॥ साम भूयाँसं पोषं पुष्यति तमनु पोषं पोषुको भवति ॥१४॥ एतद्ध स्माह मुञ्जः सोम-श्रवस एतँ ह वै वयँ साम्नः पोषँ विद्मेति तस्माद्वय-मप्रतिगृह्णन्तो न सहस्रपोषाच्च्यवामहा इति ॥१५॥ तदु ह स्माह वासिष्ठश्चैकितानेयः साम हैव नूनं भूयाँसं पोषं पुष्यति तमनुपोषं पोषुको भवति विधवाया इव त्वे वै तज्जन्म यदसाम्नी चतुर्थ्येवं ह वा एते विदुरिति तस्मादेतेषाँ युवानः श्रोत्रियाः पुरायुषः प्रमायुका भवन्ति युवतयो जाया विधवा भवन्तीति यत्तृचेऽन्यत्साम भवत्ये-कर्च्चेऽन्यद्यद्वाव चतसृष्वेकँ साम स एव चतुर्ऋच इति ॥१६॥ पशुरतिरिच्यते स ऐन्द्राग्न आलम्भ्यः ॥१७॥ इन्द्राग्नी वै देवानामोजिष्ठौ ता उ अयातयामानौ तावेव तद्युनक्ति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥१८॥ सौर्य्यं ब्रह्मवर्च्चसकाम आलभेत ॥१९॥ एतस्याँ वा एकादशि-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्यामादित्याः सूर्य्यमजनयत्स तेजो ब्रह्मवर्च्चसमवारुन्ध तेजस्वी ब्रह्मवर्च्चसी भवति य एवँ वेद ॥२०॥ अथो खल्वाहुराग्नेय एवालम्भ्य इत्यग्निर्व्वै सर्व्वा देवतास्तेन न देवतानां कां चनान्तरेति ॥२१॥ इति प्रथमःखण्डः ॥४/१॥

अथैष श्येनः॥१॥ अभिचरन्यजेत ॥२॥ श्येनो वै वयसां क्षेपिष्ठो यथा श्येन आददीतैवमेवैनमेतेनादत्ते ॥३॥ त्रिवृतः पवमाना भवन्ति ॥४॥ त्रिवृद्वै स्तोमानां क्षेपिष्ठो यत्त्रिवृद्धवत्याशीयस्तृणवा इति ॥५॥ रथौ हविर्धाने भवतो रथवज्जमेवास्मै तत्प्रवर्त्तयति स्तृत्यै ॥६॥ वषट्कारणिधनं भवति ॥७॥ एष वै वज्जाणामोजिष्ठो यत्साम वज्जो यं बहवो वषट् कुर्व्वन्ति तमेवास्मै वज्जं प्रहरति स्तृत्यै ॥८॥ उभे बृहद्रथन्तरे भवत उभाभ्यामेवास्मै बृहद्रथन्त-राभ्याँ वज्जं प्रहरति स्तृत्यै ॥९॥ पराचीषु रथन्तरं भवति ॥१०॥ पराञ्चमेवास्मै वज्जं प्रहरति स्तृत्यै ॥११॥ तस्य रथन्तरं पृष्ठं बृहत् ब्रह्मसामैष वै साम वज्जस्तमेवास्मै वज्जं प्रहरति स्तृत्यै ॥१२॥ यं कामयेत क्षीयेतेति तस्य बृहत्पृष्ठं कुर्य्याद्रथन्तरं ब्रह्मसाम क्षत्रँ वै बृहत्पशवो रथन्तरं क्षत्रेणैवास्य पशून् हन्त्यपशुर्भवति क्षीयते ॥१३॥ यं कामयेत परां परावतमियान्न प्रतितिष्ठेदिति पवमाने रथन्तरं कुर्य्यात्बृहत्पृष्ठं प्लवं ब्रह्मसाम बृहद्रथन्तरा-भ्यामेवैनमेभ्यो लोकेभ्य उद्धृत्य प्लवेन प्रप्लावयति परां परावतमेति न प्रतितिष्ठति ॥१४॥ वार्षाहरे पवमानमुखे भवतः सफौपगवे नानदं क्रूराणि सामानि सम्भवन्ति स्तृत्यै ॥१५॥ तैल्वको वा बाधको वा यूप स्फ्याग्रः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥१६॥ शवनभ्ये अधिषवणे ॥१७॥ अग्नये रुद्रवते लोहितः पशुः॥१८॥ सादयन्त्युपाँश्वन्तर्य्यामौ॥१९॥ शरमयं बर्हिःशीर्त्यै ॥२०॥ वैभीतक इध्मो विभित्यै ॥२१॥ लोहितोष्णीषा लोहित वाससो निवीता ऋत्विजः प्रचरन्ति स्तृत्यै ॥२२॥ नव नव दक्षिणा भवन्ति ॥२३॥ नावयन्त्येवैनं तत् ॥२४॥ इति द्वितीयः खण्डः ॥४/२॥

त्रिवृदग्निष्टोमः ॥१॥ तस्येषुँ विष्टुतिं कृत्वाभिचरन्यजेत ॥२॥ इषुवधो वै पुरायुषो भवति यदिषुँ विष्टुतिं करोति पुरैवैनामायुषः प्रवृश्चति ॥३॥ त्रिवृद्वै स्तोमानां क्षेपिष्ठो यत्त्रिवृद्धवत्याशीयस्तृणवा इति ॥४॥ वषट्कारणिधनं भवति ॥५॥ सप्तहं भवत्यासप्तमात्पुरुषादनायतनो भवति यमेतेनाभिचरन्ति ॥६॥ समानमितरच्छयेनेन ॥७॥ इति तृतीयः खण्डः ॥४/३॥

अथैष सदँशः॥१॥ अभिचरन् यजेत ॥२॥ यद्वै दुरादानँ सदँशेन तदादत्ते ॥३॥ यद्द्वौ द्वौ स्तोमौ सह यथा ह दुरादानँ सदँशेनानुहायाददीतैवमेवैनमेतेनादत्ते ॥४॥ विवृतँ स्तोमँ सम्पद्यते बृहतीं छन्दो वज्रो वै त्रिवृत्पशवो बृहतीं वज्रेणैवास्य पशून् हन्त्यपशुर्भवति ॥५॥ वैय्यश्वं भवति व्यश्वमेवैनं करोति ॥६॥ परिष्टुब्धेडं भवति पर्य्येवैनँ वृश्चति ॥७॥ वार्षाहरे पवमानमुखे भवतः काशीतौपगवे नानदं क्रूराणि सामानि सम्भवन्ति स्तृत्यै ॥८॥ निस्सप्तदशस्तेन क्रूरः ॥९॥ समानमितरच्छयेनेन ॥१०॥ इति चतुर्थःखण्डः ॥४/४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथैष वज्रोऽभिचरन्यजेत वज्रेणैवास्मै वज्रं प्रहरति स्तृत्यै ॥१॥ सर्व्वः पञ्चदशो भवति ॥२॥ वज्रो वै पञ्चदशस्तमेवास्मै वज्रं प्रहरति स्तृत्यै ॥३॥ उक्थ्यः षोडशिमान्भवति॥४॥ पशवो वा उक्थानि वज्रः षोडशी वज्रेणैवास्मै वज्रं प्रहरति स्तृत्यै ॥५॥ तस्य महानाम्न्यः षोडशिसाम भवति॥६॥ वज्रो वै महानाम्न्यो वज्रः षोडशी वज्रेणैवास्मै वज्रं प्रहरति स्तृत्यै ॥७॥ समानमितरत्पूर्व्वेण ॥८॥ इति पञ्चमः खण्डः॥४/५॥

अतिरात्रश्चतुर्व्विँशं प्रायणीयमहरभिजित्त्रयस्स्वर-सामानो दिवाकीर्त्त्यमहस्त्रयस्स्वर सामानो विश्वजिन्महा-व्रतं चातिरात्रश्च ॥१॥ विश्वेदेवाः सत्रमासत सोमेन राज्ञा गृहपतिना तेऽब्रुवन्त्सोम एव नो राजा सर्व्वत्र विभवेदिति तस्मात्सोमो राजा सर्व्वाणि नक्षत्राण्युपैति सोमो हि रेतोधाः॥२॥ नवाहँ सँवत्सरस्य गर्भमुपयन्ति॥३॥नवाहो वै सँवत्सरस्य प्रतिमा नव प्राणाः प्राणानेवावरुन्धते ॥४॥ प्रजावन्तो जीवा ज्योतिरश्नुवते य एता उपयन्ति ॥५॥ इति षष्ठः खण्डः ॥४/६॥

इति चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

प्रजापतिस्तपोऽतप्यत तस्य ह वै तप्यमानस्य मनः प्राजायत देवान्त्सृजेयमिति त इमे देवा असृजन्त दिवा देवानसृजत नक्तमसुरान्यद्दिवा देवानसृजत तद्देवानां देवत्वँ यदसूर्य्यं तदसुराणामसुरत्वँ यत्पीतत्वं तत्पितृणां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

. Digitized by Madhuban Trust

पितृत्वम् ॥१॥ देवा वै स्वर्ग्गकामास्तपोऽतप्यन्त तेषां तप्यमानानाँ रसोऽजायत पृथिव्यन्तरिक्षं द्यौरिति तेऽभ्यतपँस्तेषां तप्यमानानाँ रसोऽजायत ऋग्वेदः पृथिव्या यजुर्व्वेदोऽन्तरिक्षात्सामवेदोऽमुष्मात्तेऽभ्यतपँस्तेषां तप्यमानानाँ रसोऽजायत ऋग्वेदाद्गार्हपत्यो यजुर्व्वेदाद्दक्षिणाग्निस्सामवेदादाहवनीयस्तेऽभ्यतपँस्तेषां तप्यमानानां पुरुषोऽजायत सहस्रशीर्षाः सहस्राक्षः सहस्रपात् ॥२॥ ते देवाः प्रजापतिमुपाधावन्वेदशरीरैर्व्वा इदममृतशरीरं न ह वा इदं मृत्योस्समाप्स्यतेति तेऽब्रुवन् को नामासीति ॥३॥ स होवाच यज्ञो नामेति ॥४॥ तेषां प्रजापतिः सद्यो यज्ञसँस्थामुपैति सद्यो ह वा एष यज्ञसँस्थामुपैति ॥५॥ यद्गार्हपत्यं प्रादुष्करोति सा दीक्षणीया यद्दक्षिणग्निं चाहवनीयं च सा प्रायणीया यत्समिधोऽभ्यादधाति ता उपसदः ॥६॥ अथ यस्याज्यमुत्पूतँ स्कन्दति सा वै स्कन्नानामाहुतिस्ततो वै यजमानः प्रमायुर्भवति वरो देयः सैव तस्य प्रायश्चित्तिः ॥७॥ अथ यस्याज्यमनुत्पूतँ स्कन्दत्यसौ वा अस्कन्नानामाहुतिस्ततो वै यजमानस्य चित्तं प्रमायुर्भवति चित्रं देयँ सैव तस्य प्रायश्चित्तिः ॥८॥ यद्गार्हपत्ये जुहोति तत्प्रातःसवनँ यद्दक्षिणाग्नौ जुहोति तन्माध्यन्दिनँसवनँ यदाहवनीये जुहोति तत्तृतीयसवनम् ॥९॥ यन्मार्ज्जयते सोऽस्यावभृथः ॥१०॥ यदन्ना ददाति तेनोदयनीयस्योदवसानीयस्य समाप्त्यै ॥११॥ अथ यस्याग्निर्म्मथ्यमानो न जायेतान्यमाहृत्यान्यस्मिन्नवकाशे जुहुयात् ब्राह्मणस्य वा हस्तेऽ-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जस्य वा कर्णे कुशस्तम्बे वाप्सु वा जुहुयात् ॥१२॥ अन्यैः शतहुताद्धोमादेकः शिष्यहुतो वरँ शिष्यैः शतहुताद्धोमादेकः पुत्रहुतो वरं पुत्रैः शतहुताद्धोमादेको ह्यात्महुतो वरम् ॥१३॥ स्वयँ होता स्वयं दोही स्वयमेवोपतिष्ठेताग्निहोत्रम् ॥१४॥ हौम्यशेषं दक्षिणा ॥१५॥ सर्व्वैर्ह वा एतस्य यज्ञक्रतुभिरिष्टं भवति य एवँ विद्वानग्निहोत्रं जुहोति ॥१६॥ इति प्रथमः खण्डः ॥५/१॥

प्रजापतिर्व्वा एतत्सत्रँ सहस्रसँवत्सरमसृजत तेषां प्रजापतिः सहस्रसँवत्सरं गवामयनेऽवारुन्धद्गवामयनं द्वादशाहे द्वादशाहमतिरात्रेऽतिरात्रँ षोडशिनि षोडशिन-मुक्थ्य उक्थ्यमग्निष्टोमेऽग्निष्टोममिष्टिपशुबन्धयोरिष्टि-पशुबन्धावग्निहोत्रे सर्व्वैर्ह वा एतस्य यज्ञक्रतुभिरिष्टं भवति य एवँ विद्वानग्निहोत्रं जुहोति ॥१॥ इति द्वितीयः खण्डः ॥५/२॥

प्रजापतिर्द्देवेभ्य औदम्बरीमुच्छ्रयत्यसुषिरमूलामग्रन्थिं पृथुबुध्नामेकजाम् ॥१॥ यजमानमात्र्यौदुम्बरी भवति ॥२॥ अथ कुब्जवामना यजमाना ह्रस्वाश्चोर्ध्वबाहवः प्रच्छेदनं कुर्य्युः ॥३॥ कतिच्छदनौदुम्बरी भवति नवच्छदनाग्नि-ष्टोम साद्यस्क्रेष्वेकादश वैश्यस्तोमातिरात्रपौण्डरीकेषु सप्तदश वाजपेयाप्तोर्य्याम्णोरेकविँशत्यश्वमेधे अष्टा-चत्वारिँशतं पुरुषमेधे अपरिमितँ सर्व्वमेधे ॥४॥ य एवँ वेद यदौदुम्बरीमुच्छ्रयत्यपचितिमेवाप्नोति ॥५॥ प्रजापति-रकामयतापचितिं प्राप्नवानीत्यूर्ग्गुदुम्बर ऊर्ग्गन्नमन्नँ साम तस्मात्सामगेभ्योऽपचितिं करवाणीति य एवँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वित्त्वौदुम्बरीमुच्छ्रयत्यपचिति मेवाप्नोति ॥६॥ इति तृतीयः खण्डः॥५/३॥

यूपं करोति सक्षीरँ स्थूलं मूले वालाग्रमनुरूपम् ॥१॥ वज्ज्रो वै यूपो वज्ज्रेणैवास्मै भ्रातृव्यं प्रहरति ॥२॥ अष्टाश्रीः करोति ॥३॥ दशदिशः परिगृह्णात्युभयतः पाङ्क्ते द्वे यूपे करोति ॥४॥ पञ्चदशसप्तदशैकविँशत्यरत्निँ वा ॥५॥ पालाशं पुष्टिकामस्य बैल्वं ब्रह्मवर्च्चसकामस्य औदुम्बरमन्नाद्यकामस्य खादिरं बलकामस्य वैभीतक-राजवृक्षौ भ्रातृव्यवतः क्रमुकाश्वत्थपाषाणा यशस्कामस्य यत्किञ्च यज्ञियं पशुकामस्य ॥६॥ तत्र वर्ज्जनीया भवन्ति गडुलो व्रणिलो व्यावृत्तः कुठिः कुब्जः शूलो दग्धः शुष्कः सुषिरो घुणजग्ध इत्यप्रशस्ताः ॥७॥ अथ प्रशस्ताः शुद्धावर्त्ता अनुपूर्व्वसमाः प्रशस्ताः ॥८॥ यूपस्याश्रीदैवतान्यग्निः पूर्व्वायाँ यमो दक्षिणायाँ वरुणः पश्चिमायाँ सोम उत्तरायाँ या विदिशस्तास्वादित्यरुद्र-मरुद्वसवोऽपराजिताः पितरश्चाधरायाँ साध्याश्चोर्ध्वायाम् ॥९॥ सर्व्वदेवत्यो वै यूपो यूपो वै बहुरूपो वज्ज्री भूत्वा देवानुपतिष्ठते ॥१०॥ ते देवाः प्रजापतिमुपाधावन्यूपेन प्रहरन्त्यारोपयन्त्या योधयन्ति च तद्यूपस्य यूपत्वम् ॥११॥ मूलमरत्निँ सत्वचं निखनेत् ॥१२॥ तस्य यन्नैखान्यं तत्पितृणाँ यदूर्ध्वं तन्मनुष्याणाँ यत्तदधो रशनाया ओषधिवनस्पतीनाँ यदूर्ध्वँ रशनायास्तद्विश्वेषां देवानाम् ॥१३॥ आप्लावयन्त्यलङ्कुर्व्वन्त्यहतेन वसनेनाच्छादयन्ति चेति ॥१४॥ तद्गन्धर्व्वाप्सरसाम् ॥१५॥ इन्द्रस्य चषालँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदूर्ध्वं चषालस्याङ्गुलमात्रं कार्य्यं तत्साध्यानां देवानाम् ॥१६॥ प्राचीँ सन्नमत्येतद्वै विष्णोः परमं पदम् ॥१७॥ तस्यर्त्तवः शरीरँ शिरः सँवत्सरो वेदा रूपाणि सँवत्सर एव प्रतितिष्ठति य एवँ वेद ॥१८॥ इति चतुर्थःखण्डः॥५/४॥

ब्रह्मवादिनो वदन्ति कस्माद् ब्राह्मणः सायमासीन सन्ध्यामुपास्ते? कस्मात्प्रातस्तिष्ठन्? का च सन्ध्या? कश्च सन्ध्यायाः कालः? किञ्च सन्ध्यायाः सन्ध्यात्वम्? ॥१॥ देवाश्च वासुराश्चास्पर्धन्त तेऽसुरा आदित्यमभिद्रवन्त्स आदित्योऽबिभेत्तस्य हृदयं कूर्म्मरूपेणातिष्ठत् ॥२॥ स प्रजापतिमुपाधावत्तस्य प्रजापतिरेतद्भेषजमपश्यदृतं च सत्यं च ब्रह्म चोङ्कारं च त्रिपदां च गायत्रीं ब्रह्मणो मुखमपश्यत् ॥३॥ तस्माद् ब्राह्मणोऽहोरात्रस्य सँयोगे सन्ध्यामुपास्ते सज्ज्योति स्याज्ज्योतिषो दर्शनात्सोऽस्याः कालः सा सन्ध्या तत्सन्ध्यायाः सन्ध्यात्वँ यत्साय-मासीनः सन्ध्यामुपास्ते तया वीरस्थानं जयत्यथ यदपः प्रयुङ्क्ते ता विप्रुषो वज्ज्री भवन्ति ता विप्रुषो वज्ज्री भूत्वासुरानपाघ्नन्ति ततो देवा अभवन्परासुरा भवत्यात्मना परास्य भ्रातृव्यो भवति य एवँ वेद यत्सायं च प्रातश्च सन्ध्यामुपास्ते तया वीरस्थानँ स्थानं च सन्ततमविच्छिन्नं भवति य एवँ वेद ॥४॥ इति पञ्चमः खण्डः ॥५/५॥

अथैषा चन्द्रमसः क्षयवृद्धिर्भवति यदा वै चन्द्रमाः क्षीयते चाप्यायते च तदनुव्याख्यास्यामः ॥१॥ पूर्व्वपक्षे वै देवा दीक्षन्ते तेऽपरपक्षे सोमं भक्षयन्ति तत्रेमानि त्रीणि पात्राण्युपधीयन्ते पृथिवी पात्रमन्तरिक्षं पात्रं द्यौः पात्रमिति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तं देवा दिव्येन पात्रेणादित्याः प्रथमं पञ्चकलं पञ्चमीं भक्षयन्ति तेऽन्तरिक्षेण पात्रेण रुद्रा द्वितीयं पञ्चकलं दशमीं भक्षयन्ति ते पृथिव्या पात्रेण वसवस्तृतीयं पञ्चकलं पञ्चदशीं भक्षयन्ति षोडशी कलावशिष्यते षोडशकलो वै चन्द्रमाः स ओषधीश्च वनस्पतीँश्च गाश्च पशूँश्चादित्यं च ब्रह्म च ब्राह्मणाश्चानुप्रविशति तं देवा इन्द्रज्येष्ठाः सोमपाश्चासोमपाश्च यथा पितरं पितामहं प्रपितामहं वा वृद्धं प्रलयमुपगच्छमानँ व्याधिगतं मरिष्यतीति वा ताँ रात्रिँ वसन्ते तदमावास्याया अमावा-स्यात्वं तस्मादमावास्यायां नाध्येतव्यं भवति ॥२॥ अथ सम्भरणन्तमोषधिभ्यश्च वनस्पतिभ्यश्च गोभ्यश्च पशुभ्य-श्चादित्याश्च ब्रह्मणश्च ब्राह्मणाः सन्नयन्ते तात्सान्नाय्यस्य सान्नाय्यत्वम् ॥३॥ चन्द्रमा वै धाता या पूर्व्वा पौर्णमासी सानुमतिर्य्योत्तरा सा राका या पूर्व्वामावास्या सा सिनीवाली योत्तरा सा कुहूर्योऽनुपश्यत्यन्यं न पश्यति तन्मिथुनमेवास्य भवति ॥४॥ पुष्ये चानुमतिर्ज्ज्ञेया सिनीवाली तु द्वापरे खार्व्वायां तु भवेद्राका कृतपर्व्वे कुहूर्भवेत्॥५॥ न्यूने चानुमतिँ विद्याद्यस्मिन्दृश्येत सा सिनीवालीँ राकायान्तु सम्पूर्णश्चन्द्रस्तु कुहूर्न्न दृश्येत ॥६॥ इति षष्ठः खण्डः ॥५/६॥

स्वाहा वै कुतः सम्भूता? कस्य दुहिता? केन प्रकृता? किं गोत्रा? कत्यक्षरा? कतिपदा? कति मात्रा? कति वर्णा? कत्युच्छवासा? किञ्चास्याः शरीरं? कान्यङ्गानि? कानि लोमानि? कति शिराँसि? कति वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चक्षूँषि? किमस्या आस्यं? किं प्रावृता? कौ बाहू? कौ पादौ? क्व च स्थिता? किमधिष्ठाना? कथं च स्वाहां प्रतिगृह्णासि? ब्रूहि स्वाहाया रूपं च दैवतं च ॥१॥ स्वाहा वै सत्यसम्भूता ब्रह्मणो दुहिता ब्रह्मप्रकृता लातव्यसगोत्रा त्रीण्यक्षराण्येकं पदं त्रयोऽस्यै वर्णाः शुक्लः पद्मः सुवर्ण इति चत्वारोऽस्यै वेदाः शरीरँ षडङ्गान्यङ्गान्योषधिवनस्पतयो लोमानि द्वे चास्याः शिरसी एकँ शिरोऽमावास्या द्वितीयं पौर्णमासी चक्षुश्चन्द्रादित्या-वाज्यभागौ हुतं दक्षिणा प्रावृता बृहद्रथन्तरमृग्यजुः सामगतिः सा स्वाहा सा स्वधा स वषट्कारः सैषा देवेषु वषट्कारभूता प्रयुज्यते पितृयज्ञेषु स्वधाभूता शकटीमुखीं पृथिवीमन्तरिक्षेण विपर्य्येति तस्या अग्निर्दैवतं ब्राह्मणो रूपँ यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाँ स्वाहेति ॥२॥ तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥३॥ इति सप्तमः खण्डः ॥५/७॥ **इति पञ्चमोऽध्यायः**

अथ षष्ठोऽध्यायः

अथातोऽद्भुतानां कर्म्मणाँ शान्तिँ व्याख्यास्यामः ॥१॥ पलाशानाँ समिधामष्टसहस्रं जुहुयात् ॥२॥ ऐन्द्रयाम्य वारुणधानदाग्नेयवायव्यसौम्यवैष्णवेत्यष्टौ ॥३॥ इन्द्रायेन्दो मरुत्वते, नाके सुपर्णमुप यत्पतन्तं, घृतवती भुवनानामभिश्रियाभित्यं देवं सवितारमोण्योरग्निं दूतँ वृणीमहे, वात आ वातु भेषजँ, सोमँ राजानँ वरुणमिदँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विष्णुर्व्विचक्रम इति ॥४॥ एतानि सामप्रभृत्यष्टशतं जपित्वा स्वस्ति वाचयित्वा स्वस्ति हैषां भवति ॥५॥ स्वस्तिदा विशस्पतिः, स्वस्त्ययनं ताक्ष्र्यमरिष्टनेमिं, त्यमूषु वाजिनं देवजूतमायुर्व्विश्वायुश्शतं जीव शरदो वर्धमान इति ॥६॥ एतैः सम्भाराणामुपस्थानं कृत्वा स्वस्ति वाचयित्वा स्वस्ति हास्य भवति स्वस्ति हास्य भवति ॥७॥ इति प्रथमः खण्डः ॥६/१॥

देवाश्च वा असुराश्चैषु लोकेष्वस्पर्धन्त ते देवाः प्रजापतिमुपाधावँस्तेभ्य एतां दैवीँ शान्तिं प्रायच्छत् ॥१॥ ते ततः शान्तीका असुरानभ्यजयँस्ततो देवा अभवन् परासुरा भवत्यात्मना परास्य भ्रातृव्यो भवति य एवँ वेद ॥२॥ अथ पूर्व्वाह्ण एव प्रातराहुतिँ हुत्वा दर्भाञ्छमीँ वीरणान्दधि सर्प्पिः सर्षपान् फलवतीमपामार्ग्गँ शिरीषमित्येतान्याहरेदाहारयेद्वा स्नातः प्रयतः शुचिः शुचिवासाः स्थण्डिलमुपलिप्य प्रोक्ष्य लक्षणमुल्लि-ख्याद्भिरभ्युक्ष्याग्निमुपसमाधाय नित्यतन्त्रेणौदन कृसर यवागू रक्तपायस दधि क्षीर घृतपायस घृतमिति घृतोत्तराः पृथक् चरवः सर्व्वे सर्व्वेषाँ वा पायसः ॥३॥ इति द्वितीयः खण्डः ॥६/२॥

स प्राचीं दिशमन्वावर्त्तते ॥१॥ अथ यदास्य मणिमणिककुम्भ स्थालीदरणमायासो राजकुलविवादो वा यानच्छत्रशय्यासनावसथध्वजपताका गृहैकदेशप्रभञ्जनेषु गजवाजिमुख्या वाप्रमीयाः प्रमीयन्त इत्येवमादीनि तान्येतानि सर्व्वाणीन्द्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवन्ति ॥२॥ इन्द्रायेन्दो मरुत्वत इति स्थालीपाकँ हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोतीन्द्राय स्वाहा शचीपतये स्वाहा वज्रपाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत् ॥३॥ इति तृतीयः खण्डः ॥६/३॥

स दक्षिणां दिशमन्वावर्त्तते ॥१॥ अथ यदास्य प्रजायां पशुषु शरीरे वारिष्टानि प्रादुर्भवन्ति व्याधयो वा अनेक विधा अतिस्वप्नमस्वप्नमतिभोजनमभोजन-मालस्यव्रणमजीर्णनिद्राणीत्येवमादीनि तान्येतानि सर्व्वाणि यमदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ नाके सुपर्णमिति स्थालीपाकँ हुत्वा पञ्चभि राज्याहुतिभि-रभिजुहोति यमाय स्वाहा प्रेताधिपतये स्वाहा दण्डपाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृति-भिर्हुत्वाथ साम गायेत् ॥३॥ इति चतुर्थः खण्डः॥६/४॥

स प्रतीचीं दिशमन्वावर्त्तते ॥१॥ अथ यदास्य क्षेत्रगृहसँस्थेषु धान्येष्वीतयः प्रादुर्भवन्तीतयो वानेकविधा आखुपतङ्गपिपीलकमध्वक भौमक शुकशरभकसौक्ष्मक इत्येवमादीनि तान्येतानि सर्व्वाणि वरुणदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ घृतवती इति स्थालीपाकँ हुत्वा पञ्चभिराज्याहुतिभिरभि जुहोति वरुणाय स्वाहा अपां पतये स्वाहा पाशपाणये स्वाहेश्वराय स्वाहा सर्व्वपाप-शमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत्॥३॥ इति पञ्चमःखण्डः॥६/५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स उदीचीं दिशमन्वावर्त्तते ॥१॥ अथ यदास्य कनकरजतवर वस्त्रवज्ज्रवैडूर्य्यमुक्तामणिवियोगो भवत्यारम्भा वा विपद्यन्तेऽथवा अन्यानि क्रूराणि मित्राणि वा विरज्यन्तेऽरिष्टानि वा वयाँसि गृहमध्यासन्ते वाल्मीकभौमानि वा जायन्ते छत्राकँ वोपजायते मधूनि वा निलीयन्त इत्येवमादीनि तान्येतानि सर्व्वाणि वैश्रवण देवतान्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ अभित्यं देवमिति स्थालीपाकँ हुत्वा पञ्चभि राज्याहुतिभिरभि-जुहोति वैश्रवणाय स्वाहा यक्षाधिपतये स्वाहा हिरण्य-पाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत् ॥३॥ इति षष्ठःखण्डः॥६/६॥

स पृथिवीमन्वावर्त्तते ॥१॥ अथ यदास्य पृथिवी तटति स्फुटति कूजति कम्पति ज्वलति रुदति धूमायत्यकस्मात्सलिलमुद्गिरति प्लवन्निमज्जति निमग्न-मुत्प्लवत्यकाले च पुष्पफलमभिनिर्व्वर्त्तयतीत्यश्वतरीगर्भो जायते यदा मज्जति हस्तिनी भूकम्पो जायते प्रासादं भिनत्ति यत्र तत्र राजा विनश्यति गौर्गृहमारोहेद् ग्राममहिषीत्येवमादीनि तान्येतानि सर्व्वाण्यग्निदेवत्या-न्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ अग्निं दूतँ वृणीमह इति स्थालीपाकँ हुत्वा पञ्चभिराज्याहुतिभिरभि-जुहोत्यग्नये स्वाहा हविष्पतये स्वाहार्च्चिष्पाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृति-भिर्हुत्वाथ साम गायेत् ॥३॥ इति सप्तमः खण्डः॥६/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोऽन्तरिक्षमन्वावर्त्तते ॥१॥ अथ यदास्य विवाता वाता वाप्यन्तेऽभ्रेषु चापरूपाणि दृश्यन्ते खरकरभमन्थ-कङ्कंकपोतोलूककाकगृध्रश्येन भासवायसगोमायुसँस्था-न्युपरि पाँसुमाँसपेश्यस्थिरुधिरवर्षाणि प्रवर्त्तन्ते काकमिथुनानि दृश्यन्ते रात्रौ मणिधनुं पश्येच्छशका ग्रामं प्रविशन्ति वृक्षाः स्रवन्ति रुधिराण्याकाशे राजकुलँ वसन्तीत्येवमादीनि तान्येतानि सर्व्वाणि वायुदेवत्या-न्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ वात आवातु भेषजमिति स्थालीपाकँ हुत्वा पञ्चभिराज्याहुतिभि-रभिजुहोति वायवे स्वाहा महद्भूताधिपतये स्वाहा शीघ्रपाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृतिभुर्हुत्वाथ साम गायेत् ॥३॥ इत्यष्टमः खण्डः ॥६/८॥

स दिवमन्वावर्त्तते ॥१॥ अथ यदास्य तारावर्षाणि चोल्काः पतन्ति निपतन्ति धूमायन्ति दिशो दह्यन्ति केतवश्चोत्तिष्ठन्ति गवाँ श्रृङ्गेषु धूमो जायते गवाँ स्तनेषु रुधिरँ स्रवत्यत्यर्थँ हिमं निपततीत्येवमादीनि तान्येतानि सर्व्वाणि सोमदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ सोमँ राजानँ वरुणमिति स्थालीपाकँ हुत्वा पञ्चभि-राज्याहुतिभिरभिजुहोति सोमाय स्वाहा नक्षत्राधिपतये स्वाहा शीतपाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत् ॥३॥ इति नवमः खण्डः॥६/९॥

स परं दिवमन्वावर्त्तते ॥१॥ अथ यदास्यायुक्तानि यानानि प्रवर्त्तन्ते देवतायतनानि कम्पन्ते दैवतप्रतिमा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हसन्ति रुदन्ति गायन्ति नृत्यन्ति स्फुटन्ति स्विद्यन्त्युन्मीलन्ति निमीलन्ति प्रतिप्रयान्ति नद्यः कबन्धमादित्ये दृश्यते विजले च परिविष्यते केतुपताकच्छत्रवज्ज्रविषाणानि प्रज्वलन्त्यश्वानां च वालधीष्वङ्गाराः क्षरन्त्यहतानि मर्म्माणि कनिक्रदत इत्येवमादीनि तान्येतानि सर्व्वाणि विष्णुदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ इदँ विष्णुर्व्विचक्रम इति स्थालीपाकँ हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति विष्णवे स्वाहा सर्व्वभूताधिपतये स्वाहा चक्रपाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत् ॥३॥ खननाद्दहनादभिमर्शनाद्गोभिराक्रमणाच्च चतुर्भिः शुद्ध्यते भूमिः पञ्चमाच्चोपलेपनात् ॥४॥ सम्भारान् प्रदक्षिणमानीय ब्राह्मणान् स्वस्ति वाच्य ॥५॥ एतैः सम्भारैर्य्यदुपस्पृष्टं तदभ्युक्षेत् शाम्यति हातः ॥६॥ ब्राह्मणभोजनँ हिरण्यं गौर्व्वासोऽश्वो भूमिर्दक्षिणा इति शाम्यति हातः शान्त्यर्थः शान्त्यर्थः ॥७॥ इति दशमः खण्डः ॥६/१०॥

सोऽधस्ताद्दिशमन्वावर्त्तते ॥१॥ अथ यदास्य गवां मानुषमहिष्यजाश्वोष्ट्राः प्रसूयन्ते हीनाङ्गान्यतिरिक्ताङ्गानि विकृतरूपाणि वा जायन्तेऽसम्भवानि सम्भवन्त्यचलानि चलन्तीत्येवमादीनि तान्येतानि सर्व्वाणि रुद्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ आ वो राजानमिति स्थालीपाकँ हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति रुद्राय स्वाहा पशुपतये स्वाहा शूलपाणये स्वाहेश्वराय स्वाहा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्व्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत् ॥३॥ इत्येकादशः खण्डः ॥६/११॥

स सर्व्वां दिशमन्वावर्त्तते ॥१॥ अथ यदास्य मानुषाणामतिधृतिमतिदुःखँ वा पर्व्वताः स्फुटन्ति निपतन्त्याकाशाद् भूमिः कम्पते महाद्रुमा उन्मूलन्त्यश्मानः प्लवन्ति तटाकानि प्रज्वलन्ति चतुष्पादं पञ्चपादँ वा भवन्तीत्येवमादीनि तान्येतानि सर्व्वाणि सूर्य्यदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ॥२॥ उदुत्यं जातवेदसमिति स्थालीपाकँ हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति सूर्याय स्वाहा सर्व्वग्रहाधिपतये स्वाहा किरणपाणये स्वाहेश्वराय स्वाहा सर्व्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत् ॥३॥ इति द्वादशः खण्डः ॥६/१२॥

इति षष्ठोऽध्यायः

इति द्वितीयँ षड्विँशब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अष्टब्राह्मणे तृतीयम्

अथ सामविधानब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ सामविधानब्राह्मणम्

प्रथमः प्रपाठकः

ब्रह्म ह वा इदमग्र आसीत् ॥१॥ तस्य तेजो रसोऽत्यरिच्यत । स ब्रह्मा समभवत् ॥२॥ स तूष्णीं मनसाऽध्यायत् । तस्य यन्मन आसीत् स प्रजापतिरभवत् ॥३॥ तस्मात् प्राजापत्यां मनसा जुह्वति । मनो हि प्रजापतिः ॥४॥ तस्य द्यौः शिर आसीदुरोऽन्तरिक्षं मध्यँ समुद्रः पृथिवी पादौ ॥५॥ स वा इदँ विश्वं भूतमसृजत । तस्य सामोपजीवनं प्रायच्छत् ॥६॥ उपजीवनीयो भवति य एवँ वेद ॥७॥ तद्योऽसौ क्रुष्टतम इव साम्नः स्वरस्तं देवा उपजीवन्ति योऽवरेषां प्रथमस्तं मनुष्या यो द्वितीयस्तं गन्धर्वाप्सरसो यस्तृतीयस्तं पशवो यश्चतुर्थस्तं पितरो ये चाण्डेषु शेरते यः पञ्चमस्तमसुर रक्षाँसि योऽन्त्यस्तमोषधयो वनस्पतयो यच्चान्यज्जगत्तस्मा दाहुः सामैवान्नमिति । साम ह्येषामुपजीवनं प्रायच्छत् ॥८॥ उपजीवनीयो भवति य एवँ वेद ॥९॥ तस्य ह वा एतस्य साम्न ऋगेवास्थीनि स्वरो माँसानि स्तोभा लोमानि ॥१०॥ यो ह वै साम्नः स्वँ यः सुवर्णँ वेद स्वं च ह वै साम्नः सुवर्णं च भवति स्वरो वाव साम्नः स्वं तदेव सुवर्णम् ॥११॥ यो ह वै साम्नः प्रतिष्ठाँ वेद प्रति ह तिष्ठत्यस्मिँश्च लोकेऽमुष्मिँश्च वाग्वाव साम्नः प्रतिष्ठा · यद्धेतद्वागित्यृगेव सा ऋचि साम प्रतिष्ठितम् ॥१२॥ स यदा गायत्रं बृहत्यां गायति बार्हतं जगत्यां जागतं त्रिष्टुभिस्समतां चापद्यते तस्मादेतत्सामेत्याह समा उ ह वा अस्मिँश्छन्दाँसि साम्यादिति तत्साम्नः सामत्वम् ॥१३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रुष्टः प्राजापत्यो ब्राह्मो वा वैश्वदेवो वाऽऽदित्यानां प्रथमः साध्यानां द्वितीयोऽग्नेस्तृतीयो वायोश्चतुर्थः सौमो मन्द्रो मित्रावरुणयोरतिस्वार्यः॥१४॥ ते देवाः प्रजापतिमुपाधावन् तेऽब्रुवन् कथं नु वयँ स्वर्ग्गँल्लोकमियाम इति तेभ्य एतान् यज्ञक्रतून् प्रायच्छदेतैः स्वर्ग्गँल्लोकमेष्यथ इति तैः स्वर्ग्गँ-ल्लोकमायन् ॥१५॥ स्वर्ग्गँल्लोकमेति य एवँ वेद ॥१६॥ तेषामहीयन्ताजाः पृश्नयो वैखानसावसुरोचिषो ये चापूता ये च कामेप्सवस्तेऽब्रुवन् कथं नु वयँ स्वर्ग्गँल्लोकमियाम इति तेभ्य एतत्स्वाध्यायाध्ययनं प्रायच्छत्, तपश्चैताभ्याँ स्वर्ग्गँ ल्लोकमेष्यथेति ताभ्याँ स्वर्ग्गँल्लोकमायन् ॥१७॥ स्वर्ग्गँ ल्लोकमेति य एवँ वेद य एवँ वेद ॥१८॥इतिप्रथमःखण्डः॥१/१॥

अथातस्त्रीन् कृच्छ्रान् व्याख्यास्यामः ॥१॥ हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्न्नाश्नीयात् ॥२॥ अथापरं त्र्यहं नक्तं भुञ्जीत ॥३॥ अथापरं त्र्यहं न कञ्चन याचेत ॥४॥ अथापरं त्र्यहमुपवसेत् ॥५॥ तिष्ठेदहनि रात्रावासीत क्षिप्रकामः ॥६॥ सत्यँ वदेदनार्य्यैर्न्न सम्भाषेत रौरवयौधाजये नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापोहिष्ठीयाभिः अथोदक-तर्प्पणम् नमोऽहमाय मोहमाय मँहमाय धून्वते तापसाय पुनर्व्वसवे नमो नमो मौञ्ज्यायौर्म्म्यार्य सौम्याय शम्याय शिवाय नमो नमः पाराय सुपाराय महापाराय पारदाय पारविन्दाय नमो नमः पुरुषाय सुपुरुषाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमो नम इत्येतदेवा-दित्योपस्थानम् एता एवाज्याहुतयः द्वादशरात्रस्यान्ते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्थालीपाकँ श्रपयित्वैताभ्यो देवताभ्यो जुहुयात् अग्गनये स्वाहा सोमाय स्वाहा अग्गनीषोमाभ्यामिन्द्राग्गिनभ्यामिन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेऽग्गनये स्विष्टकृत इति अथो ब्राह्मणतर्प्पणम् ॥७॥ एतेऩैवातिकृच्छ्रो व्याख्यातः॥८॥ यावत्सकृदाददीत तावदश्नीयात् ॥९॥ अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्रः ॥१०॥ प्रथमं चरित्वा शुचिः पूतः कर्म्मण्यो भवति द्वितीयं चरित्वा यत्किञ्चिदन्यन्महापातकेभ्यः पापं कुरुते तस्मात् प्रमुच्यते तृतीयं चरित्वा सर्व्वस्मादेनसो मुच्यते ॥११॥ अथैताँस्त्रीन् कृच्छ्राँश्चरित्वा सर्व्वेषु वेदेषु स्नातो भवति सर्व्वेषु देवेषु ज्ञातो भवति यश्चैवँ वेद यश्चैवँ वेद ॥१२॥ इति द्वितीयः खण्डः॥१/२॥

अथातः स्वाध्यायाध्ययनस्य ॥१॥ काममुक्त्वोपक्रामे-दन्ते वा त्रीन् कृच्छ्राँश्चरित्वा पूतो भवति अग्निं प्रतिष्ठा-प्याग्न्यभावे तूदकमादित्यँ वोपसमाधाय दर्भानुपस्तीर्य्य दर्भेष्वासीनः प्राक्कूलेषूदक्कूलेषु वा दक्षिणेन पाणिना दर्भमुष्टिं गृहीत्वा ॥२॥ प्रथमं त्रिवर्ग्गं नवकृत्वो नवकृत्वो गायेत् ॥३॥ एवँ सदा प्रयुञ्जानोऽग्न्याधेयमवाप्नोति ॥४॥ इन्द्राय पवते मद इति पवमान हवीँष्येतेन कल्पेन ॥५॥ सुवर्म्महाः सुवर्म्मया इत्येताभ्यां दर्शपूर्णमासावेतेनैव कल्पेन ॥६॥ भृत्यातिथि-शेषभोजी काले दारानुपेयात् यथाशक्ति चातिथिभ्यो दद्यादप्युदकमन्ततः एवँव्रतो यदिन्द्राहँ यथा त्वम् इत्येते सदा प्रयुञ्जीत सुवर्म्महाः सुवर्म्मया इत्येते च पर्व्वणि तथा हास्याग्निहोत्रमविलुप्तँ सदा हुतँ स दर्शपूर्णमासं भवति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥७॥ कर्म्मान्तेऽग्निं प्रतिष्ठाप्य व्रीहियवाँस्तण्डुलाँस्त्रिः प्रक्षाल्य जुहुयात् अग्नये स्वाहा सोमाय पवित्रवते वरुणाय धन्वन्तरये मनसा प्राजापत्यां ब्रह्मणे अग्नये स्विष्टकृत इति पश्चात् ॥८॥ अथातः पाञ्चरात्रिकाणाँ व्रीहियवौ भोजनमसौहित्यमन्ते त्वग्न्यादिरुक्तः कल्पः काम्यानां चाविप्रतिषेधस्तमिन्द्रँ वाजयामसीति चतुर्व्वगर्गेण चातुर्म्मास्यान्यवाप्नोति, अस्य प्रेषेति पाशुकानि ॥९॥ त्रातारमिन्द्रँ यजामह इत्येताभ्यां पशु–बन्धम् ॥१०॥ पयोव्रत एतेन कल्पेन बृहदिन्द्राय गायतेति चतुर्व्वगर्गेण सौत्रामण्यौ सौत्रामण्यौ ॥११॥ इतितृतीयःखण्डः॥१/३॥

अथातः साप्तरात्रिकाणां भैक्षं पयो वा व्रतमेके भैक्षार्थायैव ग्रामं प्रविशेन्नान्यत्र स्वाध्यायाद्वाचमुत्सृजेदधः शयीत नापोऽभ्यवेयादन्ते त्वग्न्यादिरुक्तः कल्पः। काम्यानां चाप्रतिषेधः ॥१॥ ईङ्खयन्तीरिति दशतँ रथन्तरं च वामदेव्यं चैतान्यनुसवनं प्रयुञ्जानोऽग्निष्टोममवाप्नोति ॥२॥ यज्ञायज्ञा वो अग्नय इति चतुर्व्वगर्गेणात्यग्निष्टोमं नमस्ते अग्न ओजस इति दशतोक्थ्यम् पुनानः सोम धारयेति वगर्गेण षोडशिनं परीतो षिञ्चता सुतमिति वगर्गेणातिरात्रम् ॥३॥ पयोव्रत एतेन कल्पेन तिस्रो वाच उदीरत इति वगर्गेण वाजपेयम् ॥४॥ मासमेतेन कल्पेनाव इन्द्रं कृविँ यथेति दशताप्तोर्य्यामाणम् ॥५॥ मासं चतुर्थे काले भुञ्जान आजुहोता हविषा मर्ज्जयध्वमिति दशता द्वादशाहम् ॥६॥ सँवत्सरमेतेन कल्पेनाबोध्यग्निरिति दशतं रथन्तरं च वामदेव्यं च बृहच्च वैरूपञ्च वैराजं च महानाम्न्यश्च रेवत्यश्चैतान्यनु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सवनं प्रयुञ्जानो गवामयनमवाप्नोति ॥७॥ राजनरौहिणाभ्यां तापश्चिते ॥८॥ पयोव्रत एतेन कल्पेन सोमः पवते जनिता मतीनामिति चतुर्व्वर्गेण चातुर्म्मास्यानि सौमिकान्यवाप्नोति ॥९॥ सँवत्सरमष्टमे काले भुञ्जानो ग्राम्यमन्नं प्र तु द्रवेति दशतमावर्त्तयन् नैमिशीयं द्वादश सँवत्सरमवाप्नोति ॥१०॥ आग्नेयमैन्द्रं पावमानमित्येतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जानः शतसँवत्सरमवाप्नोति ॥११॥ सर्व्वं प्रयुञ्जानः सहस्रसँवत्सरमवाप्नोत्यनश्नन् सँहिता सहस्रेण वा पृष्ठोपतापशतसहस्रेण वा ॥१२॥ प्रथमस्त्रिवर्ग्गः सावित्र्यां गायत्रं महानाम्न्यश्चैषामृता नाम सँहितैतया वै देवा अमृतत्व-मायन् ॥१३॥ अमृतत्वमेति य एवँ वेद ॥१४॥ इदँ ह्यन्वोजसेति प्रथमोत्तमे त्वामिदा ह्यो नरः स पूर्व्यो महोनां पुरां भिन्दुर्य्युवा कविरुपप्रक्षे मधुमति क्षियन्तः पवस्व सोम मधुमाँ ऋतावा सुरूपकृद्राहसं माधुच्छन्दसमेषा माधुच्छन्दसी नाम सँहितैतया वै देवाः स्वर्ग्गँल्लोकमायन् ॥१५॥ स्वर्ग्गँ ल्लोकमेति य एवँ वेद ॥१६॥ आ वो राजा तद्वोवर्ग्ग आज्य दोहानि देवव्रतानि चैषा रौद्री नाम सँहितैतां प्रयुञ्जन् रुद्रं प्रीणाति ॥१७॥ इदँ विष्णुः प्रक्षस्य वृष्णः प्रकाव्यमुशने वब्रुवाण इति वाराहमन्त्यं पुरुषव्रते चैषा वैष्णवी नाम सँहितैतां प्रयुञ्जन् विष्णुं प्रीणाति ॥१८॥ अदर्दः सुष्वाणास आ तू न इति वर्ग्गा मृज्यमानः सुहस्त्या इति प्रथमषष्ठे चैषा वैनायकी नाम सँहितैतां प्रयुञ्जन् विनायकं प्रीणाति ॥१९॥ आ मन्द्रैरिन्द्र हरिभिरा नो विश्वासु हव्यं प्र सेनानरिति वर्ग्गाः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पवित्रन्त इति द्वे एषा स्कन्दस्य सँहितैतां प्रयुञ्जन् स्कन्दं प्रीणाति ॥२०॥ यद्वा उ विश्पतिः सनादग्ने‌ऽक्षन्नमीमदन्त ह्यभित्रिपृष्ठमक्रान्त्समुद्रः कनिक्रन्तीति द्वे एषा पित्र्या नाम सँहितैतां प्रयुञ्जन् पितॄन् प्रीणाति ॥२१॥ आस्यदघ्न उदके तिष्ठ''न्न क्ये नाकी इत्येतत् त्रिःसप्तकृत्वो गायेदेतत् सर्व्ववाचोगतसंमितमेतेन सर्व्वान् कामानवाप्नोति ॥२२॥ यश्चैवँ वेद यश्चैवँ वेद ॥२३॥ इति चतुर्थः खण्डः॥१/४॥

अथातः प्रायश्चित्तानाम् ॥१॥ अनादेशे मन्त्रा बलवन्त-स्तपोऽन्विताः पावना भवन्ति ॥२॥ आपन्नः प्रायश्चित्तं चरेत् ॥३॥ अभ्यासः साम्नाँ शतं दशावरम् ॥४॥ काहलमुक्त्वा दधिक्राव्णो अकारिषमित्येतद्गायेत् ॥५॥ परुषमुक्त्वेदं विष्णुर्व्वि चक्रम इति ॥६॥ ब्राह्मणमुक्त्वा त्रिः ॥७॥ भ्रातरं मातुलं पितृव्यमिति गुरुजातीयान् प्रसाद्य पक्षिणीँ रात्रिमुपोष्य तवाहँ सोम रारणेति प्रथममेकविँशतिकृत्वः ॥८॥ उपाध्यायं मातरं पितरमित्येतेषु त्रिरात्रमुपवसन्नेतस्यैवान्त्यम् ॥९॥ अनध्याप्य-मध्याप्य सप्तरात्रमुपवसन् सदा गावः शुचयो विश्व धायस इत्येतद्गायेत्॥१०॥ अयाज्ययाजने दक्षिणास्त्यक्त्वा मासं चतुर्थे काले भुञ्जानः कानी इत्येतद्गायेत् ॥११॥ अमेध्यदर्शने ये ते पन्था अधो दिव इति तथामेध्यघ्राणे ॥१२॥ अभोज्यभोजने ऽमेध्यप्राशने वा निष्पुरीषी भावस्त्रिरात्रावरं तूपवसन्नेतोन्विन्द्रँ स्तवाम शुद्धमिति पूर्व्वँ सदा सहस्रकृत्व आवर्त्तयन् ॥१३॥ बहून्यप्युपपतनीयानि कृत्वा त्रिभिरनश्नन् त्पारायणैः पूतो भवति ॥१४॥ सुरां पीत्वा सँवत्सरमष्टमे काले भुञ्जानो यत्पाण्योः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्भवेदवाङ्नाभ्यूर्ध्वँ जानु बर्हितस्त्रिरह्न उपस्पृशँस्तथा रात्रौ स्थानासनाभ्यां तिष्ठेदहनि रात्रावासीत पवित्रन्त इत्युत्तरेणा-होरात्राणि जपन् ग्रामद्वारे स्थानासन भोजनानि यत्र लभेत्तत्र वसेन्न प्रवसेत् स्वकर्म्मणाभिभाषेत चतुर्णां ब्राह्मणानामग्रतः प्राश्नीयात् ग्रामद्वारस्यैवाग्रत आवश्यकायामभिक्रामेदतोऽन्यथा शङ्क्यं पूर्णे सँवत्सरे तैलँ लवणं क्षुरमग्निं गां बीजानीत्यालब्धवन्तं ब्राह्मणा ब्रूयुश्चरितं तवेत्यों भो इति ब्रूयात् सप्तावरान् सप्तपरान् हन्त्यनृतं चरितं तव सुचरितं तवेत्यों भो इति ब्रूयादत ऊर्ध्वं केशश्मश्रु लोमनखानि वापयित्वाहतँ वसनं परिधाय ब्राह्मणान् स्वस्ति वाचयित्वा पूतो भवति ॥१५॥ एतेन कल्पेन भ्रूणहा पूर्व्वमेतेन ब्रह्महा शुद्धाशुद्धीयमुत्तरमेतेन सुवर्णस्तेनोऽभित्रिपृष्ठमित्यभित्रि पृष्ठमिति ॥१६॥ इति पञ्चमः खण्डः॥१/५॥

ब्राह्मणस्वँ हृत्वा मासमुदके वासश्चतुर्थे काले भोजनं दिवा बहिरास्याद् व्रतान्ते शुक्रं ते अन्यद्यजतं ते अन्यदि-त्येतद्गायेत् ॥१॥ अन्यस्य हृत्वा कृच्छ्रं चर न्नयँ सहस्रमानव इति द्वितीयम् ॥२॥ गुरुदारान् गत्वा सुरापकल्पेन अक्रानि-त्येतद्गायेत् ॥३॥ ब्राह्मणदारान् गत्वा त्रीन् कृच्छ्राँश्चरन् ब्रह्मजज्ञानमिति पूर्व्वम् ॥४॥ अन्यस्य गत्वा कृच्छ्रँश्चर-न्नरण्योरित्येतत् ॥५॥ शूद्रां गत्वा त्रिरात्रमुपवसन्निडामग्न इत्येतत् ॥६॥ अकाले दारानुपेत्य त्रीन् प्राणायामानायम्य कयानाया द्वितीयमावर्त्तयेत् ॥७॥ ब्राह्मणाद्वार्धुषिँ हृत्वा त्रीन् कृच्छ्राँश्चरन् ब्रह्मजज्ञानमित्युत्तरम् ॥८॥ अन्यस्य हृत्वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कृच्छ्रँश्चरन्ननु हित्वा सुतँ सोमेत्यनु हि त्वा सुतँ सोमेति ॥३॥ इति षष्ठः खण्डः॥१/६॥

राज्ञः प्रतिगृह्य मासमुदके वसन् दिवा भुञ्जानो महत्तत्सोमो महिषश्चकारेत्येतद्गायेत् ॥१॥ अन्यस्याप्रतिग्राह्यस्य कृच्छ्रँश्चरँ स्त्रिकद्रुकष्वित्येतत् ॥२॥ अदत्तादान एकरात्रमुप-वसन्नग्निस्तिग्मेनेति द्वितीयम् ॥३॥ ब्राह्मणायावगूर्य्य प्राणं गायेन्निहत्यापानँ शोणिते क्षरति प्र सोम देववीतय इति द्वितीयम् ॥४॥ राजन्यवैश्यौ सवनगतौ हत्वा ब्राह्मणस्वकल्पेन शुद्धाशुद्धीयमुत्तरम् ॥५॥ शूद्रँ हत्वा द्वादश रात्रमुपवास उदके च वासोऽयं त इन्द्र सोम इति द्वितीयम् ॥६॥ गाँ हत्वा द्वादशरात्रमुपवास उदके च वासो वयं घ त्वा सुतावन्त इति द्वितीयम् ॥७॥ अन्यत्प्राणिहत्वैकरात्रमुपवसन् अग्निस्तिग्मे-नेति द्वितीयम् ॥८॥ अवकीर्णी त्रीन् कृच्छ्राँश्चरन् परीतो षिञ्चता सुतमिति चतुर्थमावर्त्तयेत् ॥९॥ एतेन कल्पेन परिवेत्ता परिविन्दश्च सोमँ राजानं वरुणमित्येतत् ॥१०॥ अयोनौ रेतः सिक्त्वाग्निर्म्मूर्द्धा घृतवती द्वितीयं यदितस्तन्वो ममेति च ॥११॥ शूद्रजीविकायां सेवित्वोपरम्य त्रीन् कृच्छ्राँश्चरँश्चक्र मित्येतद्गायेत् ॥१२॥ वैश्यजीविकायाँ वयः सुपर्णा इत्येतत् राजन्यजीविकायां पवस्व सोम मधुमाँ ऋतावेत्येतदभित्यं मेष'’मिति वा ॥१३॥सदा प्रयोगः ॥१४॥ ब्राह्मणमनृतमभिशस्य तत्पापं प्रतिपद्यते गुह्यं प्रकाशयन्नर्धभाग्भवति ॥१५॥ अग्निस्तिग्मेन इति वर्ग्गं प्रयुञ्जानस्तेन तत्तरति तेन तत्तरति ॥१६॥ इति सप्तमः खण्डः॥१/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रसान्विक्रीय कृच्छ्रँश्चरन् घृतवती द्वितीयम् ॥१॥ उभयतोदन्तान् विक्रीय कृच्छ्रँश्चरन् को अद्य युङ्क्त इत्येतत् ॥२॥ तान् प्रतिगृह्यैतेनैव कल्पेन शं पदमि त्येतत् ॥३॥ अदत्तां कन्यां प्रकृत्य कृच्छ्रँश्चर न्नभ्रातृव्यो अनात्वमित्येतद्गायेत् ॥४॥ तां प्रतिगृह्यैतेनैव कल्पेन शं पदमित्येतत् ॥५॥ अभ्युदितो भद्रो नो अग्निराहुत इत्येतद्गायेदभ्यस्तमितो न तस्य मायया च नेति ॥६॥ दुःस्वप्नेष्वद्या नो देव सवितरिति द्वितीयम् ॥७॥ अन्यस्मिँस्त्वनाज्ञाते कयानाया द्वितीयमावर्त्तयेत् ॥८॥ अग्निदग्धे घृताक्तान् यवाञ्जुहुयाज्जातः परेण धर्म्मणे त्येतेनाग्नये स्वाहेति च ॥९॥ मूषिकजग्धे तिलाञ्जुहुयान्नकि देवा इनीमसीतीन्द्राय स्वाहेति च ॥१०॥ कूर्च्चनाश एकरात्रमुपवसन्नग्निस्तिग्मेनेति द्वितीयम् ॥११॥ अन्यस्मिँ-स्त्वनाज्ञाते यँ वृत्रेष्विति द्वितीयम् ॥१२॥ मनुष्येष्वभि वातेषु घृताक्तानाँ यवानामाढकं जुहुयादग्ने त्वन्नो अन्तम इति चतुर्व्वर्ग्गेण सामान्तेषु स्वाहाकारैरग्नये स्वाहा वायवे स्वाहा सूर्य्याय स्वाहा चन्द्राय स्वाहेति च स्नेहवदमाँसमन्नं ब्राह्मणान् भोजयित्वा स्वस्ति वाचयित्वा स्वस्ति हैषां भवति ॥१३॥ गोष्वभिवातासु घृताक्तानां यवानामाढकं जुहुयादा वो राजान मित्येतेन रुद्राय स्वाहेति च यावतीर्धूमः स्पृशति स्वस्ति हासां भवति ॥१४॥ अश्वेष्वभिवातेषु घृताक्तानाँ यवानामाढकं जुहुया''दश्वी रथी द्वितीयेनाश्विभ्याँ स्वाहेति च यावतीर्धूमः स्पृशति स्वस्ति हैषां भवति स्वस्ति हैषां भवति ॥१५॥ इत्यष्टमः खण्डः॥१/८॥ **इति प्रथमः प्रपाठकः**

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयः प्रपाठकः

अथातः काम्यानाम् ॥१॥ अनादेशे त्रिरात्रमुपवासः पुष्येणारम्भः ॥२॥ आयुष्याण्येव प्रथमम् ॥३॥ अबोध्यग्नि- र्म्महित्रीणामिति द्वे त्वावत इन्द्रं नरो ग्रामे गेयमायुरिति चास्य निधनं कुर्य्यात्, त्यमूषु द्वे त्रातारमिन्द्रं हविरित्येतस्य स्थाने स्वस्तिन इति सोमः पुनान्त्यँ ससु प्रथमं विश्वतो दावन्निति पूर्वँ रहस्य उदुत्तमँ वरुण पाशमित्येषोऽरिष्टवर्ग्ग एतेषामेक मनेकँ वा सर्व्वाणि वा प्रयुञ्जानः शतँ वर्षाणि जीवति । जरयैव विस्रँसते ॥४॥ भ्राजाभ्राजे शुक्रचन्द्रे राजनरौहिणके शुक्रियाद्ये हाउ स्वरतादीनि चत्वारि सेतुषाम चैषः पवित्रवर्ग्ग एतेषामेकमनेकँ वा सर्व्वाणि वा प्रयुञ्जानः पूतो भवति ॥५॥ बहुप्रतिगृह्य याजयित्वा वासन्नमात्मानं मन्यमानो गौषूक्ताश्वसूक्ते शुद्धाशुद्धीये तरत्समन्दीत्येतानि प्रयुञ्जानः पूतो भवति ॥६॥ तवश्यावीयं प्रयुञ्जानः शुचिः पूतो ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्त्तते॥७॥ उदुत्तमँ वरुणपाशमित्येतत् सदा प्रयुञ्जानः सम्बाधं न निगच्छति निगतश्च प्रमुच्यते ॥८॥ गौरसर्षपाँ स्तुचे तुनाय तत्सु न इत्येतेन प्राश्नीयाद्दीर्घायुर्भवति॥९॥ त्रीन्वोदका- ञ्जलीन् सदाचामेत् पिबा सोममिन्द्र मन्दतु त्वेत्येताभ्यां दीर्घायुर्भवति दीर्घायुर्भवति ॥५॥ इति प्रथमः खण्डः॥२/१॥

अथ यस्या जातानि प्रमीयेरन् न्यग्रोधशुङ्गाँ शरमूलं चोत्थाप्य तदहस्त्रिवृतं कारयेन्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधायाबोध्यग्निरित्येतेनाभिजुहुयात् सहस्रकृत्वः शतावरं तृतीये गर्भमासि निदध्यादाज्यशेषं मेखलायां मणिं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धारयेत् पुमाँसँ ह जनयति जातस्य कण्ठेऽवसजेत् कुमारमाज्यशेषं प्राशयेत् सर्व्वाणि स्रोताँसि तर्प्पयेदभ्यञ्जीताहरहस्तत ऊर्ध्वमुपयुक्ते पुनः प्रयोगः शतँ वर्षाणि जीवति जरयैव विस्रँसते ॥१॥ अथ यो रक्षसा गृहीतः स्यादशनिहतस्य वृक्षस्येध्मः, शुक्लाया गोः सरूपवत्साया अन्यस्या वाज्यं, बैल्वं मणिमुत्थाप्य तदहस्त्रिवृतं कारयेन्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधायेन्द्र त्रिधातु शरणमित्येतेनाभिजुहुयात् सहस्रकृत्वः शतावरं तं मणिं कण्ठेन शिरसा वा धारयन् मुच्यते रक्षसा यद्वा उ विश्पतिरिरिति चैतत्सदा प्रयुञ्जीत स्वस्ति हास्य भवति ॥२॥ आमयावी कौम्भ्यं घृतं विश्वाः पृतना अभिभूतरं नर इत्येतेनाभिजुहुयात् सहस्रकृत्वः शतावरं जीवेति चास्य निधनं कुर्य्यादेतेनैव सदा प्राश्नीयान्मुच्यते आमयाव्यानो मित्रा वरुणेति चैतत्सदा प्रयुञ्जीत स्वस्ति हास्य भवति स्वस्ति हास्य भवति ॥३॥ इति द्वितीयः खण्डः ॥२/२॥

अथ यदस्य रुजे च्छन्नो देवी रहस्येन घृतमभिगीयाभ्यञ्ज्याच्छाम्यति ह ॥१॥ द्विकाद्येन वोदकं पाययेच्छीताभिरद्भिरभिषेचयेत्सोमँ राजानँ सनादग्नेऽग्निँ होतारमित्येतानि चैनमभिश्रावयेच्छाम्यति ह ॥२॥ शङ्खपुष्पीँ सर्प्पसुगन्धां चोत्थाप्य तदहस्त्रिवृतं कारयेन्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधाय चर्षणीधृतमिति वर्ग्गेणाभिजुहुयात् सहस्रकृत्वः शतावरं तं मणिं कण्ठेन शिरसा वा धारयतो न सर्प्पभयं भवति कयानायां च सर्प्पसाम सदा प्रयुञ्जीत स्वस्ति हास्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति ॥३॥ श्वेतपुष्पां बृहतीमुत्थाप्य तदहस्त्रिवृतं कारयेन्मणिमग्निं प्रतिष्ठाप्यवृता हुत्वा मणिं निधाय मोषु त्वा वाघतश्च न इत्येतेनाभिजुहुयात् सहस्रकृत्वः शतावरं तं मणिं कण्ठेन शिरसा वा धारयतो न शस्त्रभयं भवति यत इन्द्र भयामह इति चैतत्सदा प्रयुञ्जीत स्वस्ति हास्य भवति ॥४॥ श्वेतपुष्पमर्कमुत्थाप्य तदहस्त्रिवृतं कारयेन्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधाय स्वाशिरामर्केणाभिजुहुयात् सहस्रकृत्वः शतावरं तं मणिं कण्ठेन शिरसा वा धारयन् बह्वन्नो भवति ॥५॥ दीर्घतमसोऽर्कोऽर्कशिरोऽर्कग्रीवा इति चैतानि प्रयुञ्जानः सर्व्वत्रान्नं लभते ॥६॥ समन्यायन्ती निधनं प्रयुञ्जानो न पिपासया म्रियते ॥७॥ इष्टाहोत्रीयं प्रयुञ्जानो नाप्सु म्रियते ॥८॥ अचोदस इति तृतीयं प्रयुञ्जीत नैनँ यक्ष्मा गृह्णाति ॥९॥ त्वमिमा ओषधीरित्येतत्सदा प्रयुञ्जानो न गरेण म्रियते ॥१०॥ सं ते पयाँसीति पूर्व्वेण प्रथमं ग्रासं ग्रसेदुत्तरेण निगिरेद्विषमप्यस्यान्नं भवति । नैनँ हिँसति नैनँ हिँसति ॥७॥ इति तृतीयः खण्डः ॥२/३॥

करवीरदण्डमुत्थाप्य देवव्रतैरभिजुहुयादनुगानशस्तेन हस्तगतेन यत्र क्व च गच्छति सर्व्वत्र हास्य स्वस्ति भवति ॥१॥ तेन नगरँ वा निगमँ वा ग्रामँ वा गोष्ठँ वाऽऽगारँ वा मनसा ध्यायन्परिलिखेन्नात्रानिष्ठाः प्रविशन्ति ॥२॥ प्रतिभयेऽध्वनि देवव्रतमाद्यं गीत्वा मध्यममावर्त्तयेत् गतेऽध्वन्युत्तमँ समापयित्वा विरमेत् ॥३॥ उद्यतशस्त्रान् शत्रून् दृष्ट्वा देवव्रतानि ध्यायन्नैनँ हिँसन्ति ॥४॥ अमानुषे भये कयानायास्त्रृतीयमावर्त्तयेन्नैनँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हिँसन्ति ॥५॥ अध्वानमभ्युत्थित आमन्द्रैरिति वर्ग्गं गीत्वा ऽनपेक्षमाणो व्रजेत् स्वस्त्यर्थचरितः पुनरैति नाध्वनि च प्रमीयते ॥६॥ अन्यो वैनमनुगायेत् कदाचनस्तरीरसीत्येतेन चैनमभिश्रावयेदर्धसाम्नि प्रदक्षिण मावर्त्तयेत् समाप्यानपेक्षमाणः परो व्रजेत् स्वस्त्यर्थचरितः पुनरैति नाध्वनि च प्रमीयते ॥७॥ एषो उषा अपूर्व्येति सँविशन् सदा प्रयुञ्जीताकालँ स्वस्त्ययनमुदिते यदद्य कच्च वृत्रहन्नित्याकालँ स्वस्त्ययनम् ॥८॥ मूलफलैरुपवसथं कृत्वा मासमुपवसेदरण्ये निस्तान्तवो मुनिर्य्या रौहिणी वा पौषी वा पौर्णमासी स्यात्तदहरुद्यन्तमादित्यमुपतिष्ठेतोद्वयं तमसस्परी त्येतेन तत ऊर्ध्वं तद्व्रतस्तद्भक्षश्चत्वारि वर्षाणि प्रयुञ्जानो जरामृत्यू जहाति जरामृत्यू जहाति ॥९॥ इति चतुर्थः खण्डः ॥२/४॥

अथैकमनुष्याणामावर्त्तनँ स्त्रिया वा पुँसो वा ॥१॥ श्रवणेन व्रतमुपेत्य पूर्व्वैः प्रोष्ठपदैः ॥२॥ पाँसुभिः प्रतिकृतिं कृत्वा प्राक्शिरसं पूर्व्वाह्ले दक्षिणशिरसं मध्याह्ले प्रत्यक्शिरसमपराह्लेऽर्धरात्र उदक्शिरसं तस्या हृदयदेश मधिष्ठाया यन्त इन्द्र सोम इति ब्राह्मणस्येदन्त एकमिति क्षत्रियस्यैष प्रकोश इति वैश्यस्य विभोष्ट इन्द्र राधस इति शूद्रस्यो द्वयन्तमसस्परीति वा सर्व्वेषाँ सौवर्णीं प्रतिकृतिं कुर्य्याद् ब्राह्मणस्य राजतीं क्षत्रियस्यौदुम्बरीं वैश्यस्यायसीँ शूद्रस्यौदुम्बरीँ वा सर्व्वेषामयमसाविति प्राक्शिरसमग्नौ प्रतिष्ठाप्यौदुम्बरेण स्रुवेणाज्येनाभिजुहुयात् च्छाव इतीनिधनेन गुणी हास्य भवति ॥३॥ कृष्णव्रीहीणां नखनिर्भिन्नानां पिष्टमयीं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतिकृतिं कृत्वा पिष्टस्वेदँ स्वेदयित्वा सर्षपतैलेनाभ्यज्य तस्याः क्षुरेणाङ्गान्यवदायाग्नौ जुहुयात् प्र मन्दिन इत्येतेन शेषँ स्वयं प्राश्नीयादितरथाभावे म्रियेत ॥४॥ अथ यः कामयेता वर्त्तयेयमित्येकरात्रं क्षुरसँयुक्तस्तिष्ठेत् सुतासो मधुमत्तमा इति वर्ग्गमेतेषामेकमनेकँ वा सर्व्वाणि वा प्रयुञ्जान एकरात्रेण कुटुम्बिनमावर्त्तयति ॥५॥ द्विरात्रेण राजोपजीविनं त्रिरात्रेण राजानं चतूरात्रेण ग्रामं पञ्चरात्रेण नगरँ षड्रात्रेण जनपदँ सप्तरात्रेणासुररक्षाँस्यष्टरात्रेण पितृपिशाचान्नवरात्रेण यक्षान् दशरात्रेण गन्धर्वाप्सरसोऽर्धमासेन वैश्रवणं मासेनेन्द्रं चतुर्भिः प्रजापतिँ सँवत्सरेण यत्किञ्च जगत्सर्व्वँ हास्य गुणी भवति गुणी भवति ॥६॥ इति पञ्चमः खण्डः ॥२/५॥

अथातः सौभाग्यानाम् ॥१॥ यदिन्द्रो अनयदुच्चा ते जातमन्धस इति नवमदशमे एतेषामेकमनेकँ वा सर्व्वाणि वा प्रयुञ्जानः सुभगो भवति ॥२॥ द्वन्द्वाद्यायाः सप्तमाष्टमाभ्या-मिन्द्राणीँ सदा तर्प्पयन् सुभगो भवति ॥३॥ अपामार्ग्गं दन्तपवनं घृतमधुलिप्तं भद्रो नो अग्निराहुत इत्येतेनानिष्ठीवन् सँवत्सरं भक्षयन् सुभगो भवति ॥४॥ भगो न चित्र इत्येताभ्यामञ्जयन् सुभगो भवति ॥५॥ इममिन्द्रेति वर्ग्गं प्रयुञ्जानः सर्व्वजनस्य प्रियो भवति ॥६॥ परि प्रिया दिवः कविरित्येते यां कामयेत्ताँ श्रावयेत्कामयते हैनम् ॥७॥ अथ यास्य न गुणी स्यात्तां ब्रूयादाचामेतीन्द्रो विश्वस्य राजती त्येताभ्यामाचामेत् ॥८॥ पदपाँसून्वास्याग्नौ जुहुयाद्ये ते पन्था अधो दिव इति ॥९॥ तैलँ वैनाँ याचित्वा पाणी परिमृद्नन्नग्नौ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतापयेदग्न आयाहि वीतय इति द्वितीयेन नानागतायाँ विरमेत् ॥१०॥ गोजरायुकमहस्तस्पृष्टँ शोषयित्वा प्रियङ्गुकाँ सहाँ सहदेवा मध्यण्डां भूमिपाशकाँ सचां काचपुष्पीमित्येता उत्थाप्य तदहश्चूर्णानि कारयेदा नो विश्वासु हव्यमित्येतेन त्रिः सम्पाताँश्चूर्णेषु कृत्वा अग्न आयाहि वीतय इति रहस्येनाद्भिः सँयूय तानि नाशुचिः पश्येद्वोपस्पृशेद्वा तदनुलेपनमेतेना-नुलिप्तो याँ यामुपस्पृशते सा सैनं कामयते ॥११॥ गम्यां नास्नात उपस्पृशेत् ॥१२॥ उत्पले बुद्धे प्रियङ्गुका आवपेद्यदा पर्णानि सँहरेदथैनमुत्थाप्य चतुरङ्गुलमुभयतः परिच्छिद्य मध्यमुद्धरेत्तदनुलेपनम्, तेनानुलिम्पेदवाँशं च नि त्वा नक्ष विश्पत इत्येतेनास्य वेशस्थाः प्रव्रजिताश्च वश्या भवन्ति ॥१३॥ कन्याप्रवहण एकरात्रोपोषितोऽमावास्यायां निशि चतुष्पथ एह्यूषु ब्रवाणि त इत्येतेनाभिषिञ्चेत् त्रिरभिषिक्ता प्रदीयते ॥१४॥ आ ते वत्साः इति पुँसः ॥१५॥ त्रिरात्रोपोषितः कृष्णचतुर्दश्याँ शवादङ्गारमाहृत्य चतुष्पथे बाधकमिध्ममुप समाधाय मत्स्यं कृकरमित्येतौ जुहुयादग्ने मृड महाँ असीति पूर्व्वेणाग्निर्व्वृत्राणीति द्वितीयां ते आहुती कोशे कृत्वा हरितालेन गोहृदयशोणितेन चोत्तरेण संनयेद्यं द्विष्यात् प्रमँ हिष्ठीयेनास्य शय्यामवकिरेदगारं च भस्मना नैकग्रामे वसति ॥१६॥ अथातो यशस्यानां त्वमिन्द्र यशा असि, पवते हर्य्यतो हरिरित्येतेषामेकमनेकँ वा सर्व्वाणि वा प्रयुञ्जानो यशस्वी भवति ॥१७॥ प्रियङ्गुका वा पुष्येणाभिजुहुयाद्यशो मेति तदनुलेपनम् तेनानुलिम्पेत् सँवत्सरँ यशस्वी भवति यशस्वी

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति ॥१८॥ इति षष्ठः खण्डः ॥२/६॥

अथातो ब्रह्मवर्च्चस्यानाँ रथन्तरँ वामदेव्यं नौधसँ श्यैतं महानाम्न्यो यज्ञायज्ञीयमित्येतेषामेकमनेकँ वा सर्व्वाणि वा प्रयुञ्जानो ब्रह्मवर्च्चसी भवति ॥१॥ कस्तमिन्द्रेति द्विकं प्रयुञ्जानो ब्रह्मवर्च्चसी भवति श्रद्धा चास्य भवति ॥२॥ जगृह्मा त इति षड्वर्ग्गं प्रयुञ्जानो ब्रह्मवर्च्चसी भवति ॥३॥ अष्टरात्रोपोषितो ब्राह्मीमुत्थाप्य प्रजापतेर्हृदयेनाभिगीय सहस्र-कृत्वः प्राश्नीयाच्छ्रुतनिगादी भवति ॥४॥ पुष्पाणि वास्या उदकेन सँवत्सरँ यण्वेन प्राश्नीयाच्छ्रुतनिगादी भवति ॥५॥ मासँ सोमभक्षः स्या त्सदसस्पतिमद्भुतमित्येतेन श्रुतनिगादी भवति ॥६॥ सदा वैतत्प्रयुञ्जीत श्रुतनिगादी भवति ॥७॥ भारद्वाजिकाया जिह्वामुत्थाप्य तदहश्चूर्णकारयित्वा मधुसर्प्पिर्भ्याँ सँयूय प्रागन्नप्राशनात्कुमारं प्राशयेदिन्द्रमिद्गाथिनो बृहदित्येतेन श्रुतनिगादी भवति ॥८॥ हरिद्रायास्तुलावरार्द्धं चूर्णयित्वैतेनैव कल्पेन सँवत्सरँ यण्वेन प्राश्नीयाच्छ्रुतनिगादी भवति ॥९॥ वचामेतेन कल्पेन वाचोव्रतेन पूर्व्वेण प्राश्नीयाच्छ्रुतनिगादी भवति ॥१०॥ मत्स्याक्षक शङ्खपुष्पी वचा केरडी घृतानि बार्हद्गिरेणाभिजुहुयात्सहस्रकृत्वः शतावरमेतेनैव प्राश्नीया-च्छ्रुतनिगादी भवति ॥११॥ वचायास्त्रिवृतं कारयेन्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधाय वाचोव्रतेनोत्तरेणाभिजुहुयात् सहस्रकृत्वः शतावरन्तं मणिं कण्ठेन शिरसा वा धारयन् कथासु श्रेयान् भवति ॥१२॥ वचां मधुकमित्येते आस्ये-ऽवधायापां फेनेनेत्येतन्मनसानुद्रुत्यान्ते स्वाहाकारेण निगीर्य्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

राजन्वानहमराजकस्त्वमसीत्युक्त्वा विवदेत् पर्षदि राजनि चोत्तरवादी भवत्युत्तरवादी भवति॥१३॥ इति सप्तमःखण्डः॥२/७॥

अथातः पुत्रीयाणाम् ॥१॥ नि त्वा नक्ष्य, नि त्वामग्ने, प्रयोरायेऽयमग्निः सुवीर्य्यस्य, जातः परेण, न हि वश्चरमञ्च न, सोमः पवते जनिता मतीना'मिति सर्व्वाण्यपत्यं नित्यवत्साः, रथन्तरँ, व्याहृतिवर्ग्गोऽरूरुचदिति द्वे एतेषामेक-मनेकँ वा सर्व्वाणि वा प्रयुञ्जानः सुरूपान् दीर्घायुषः पुत्राँल्लभते ॥२॥ रोहिण्याँ वा रोहिण्या गोः सरूपवत्सायाः पयसि रक्तशालीनाँ स्थालीपाकँ श्रपयित्वा परमेष्ठिनः प्राजापत्यस्य व्रतेनाभिजुहुयात् सहस्रकृत्वः शतावरमेतेनैवा-भिगीयोद्धृत्य सभार्य्यः प्राश्नीयात् सुरूपान् दीर्घायुषः पुत्राँ-ल्लभते॥३॥ कृष्णाया गोस्सरूपवत्सायाः पयसि कृष्णषष्टि-काणाँ स्थालीपाकँ श्रपयित्वा कृष्णपञ्चम्यामुदिते सोमे त्वमिमा ओषधीरित्येतेनाभिजुहुयात् सहस्रकृत्वः शतावर-मेतेनैवाभिगीयोद्धृत्य सभार्य्यः प्राश्नीयात् सुरूपान् दीर्घायुषः पुत्राँल्लभते ॥४॥ कौम्भ्यं घृतं पुरुषव्रतेनाभिजुहुयादनुगानश उत्तरेण सदा प्राश्नीयात् सुरूपान् दीर्घायुषः पुत्राँल्लभते ॥५॥ उडङ्गवानाँ योऽग्रे गच्छेत् तं गृहीत्वा तदहस्त्रिवृतं कारये-न्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधायोच्चा ते जातमन्धस इति तृतीयेनाभिजुहुयात् सहस्रकृत्वः शतावरं तं मणिं कण्ठेन शिरसा वा धारयञ्च्छतानुचरो भवति शतानुचरो भवति ॥६॥ इत्यष्टमः खण्डः॥२/८॥

इति द्वितीयः प्रपाठकः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयः प्रपाठकः

अथातो धन्यानाम् ॥१॥ शुक्लवाससा प्रयोगः स्नानमवलेखनमनिष्ठीवनँ सदा चाञ्जनँ सत्यवचनँ सुमनसां धारणं केशश्मश्रुलोमनखानां तु नान्यत्र व्रताद्दारानेवोपेयात् काले । एवँ व्रतो यदुदीरत आ हर्य्यतायेति वर्ग्ग एतेषामेक-मनेकँ वा सर्व्वाणि वा प्रयुञ्जानः श्रीमान्यशस्वी पुष्टिमान्धन्यो भवति॥२॥ गिर्व्वणः पाहि नः सुतमिति चैतत्सदा प्रयुञ्जीत मयि श्रीरिति चास्य निधनं कुर्य्याच्छ्रीमान् भवति ॥३॥ त्रीन्वोदकाञ्जलीन्सदाचामेदयँ सहस्रमानव इत्येताभ्याँ श्रीरिति चोत्तरस्य निधनं कुर्याच्छ्रीमान्भवति ॥४॥ सक्तुमन्थं दधिमधु-घृतमिश्रमा त्वा विशन्त्विन्दव इत्यनेन सन्नयेदा मा विशन्त्विन्दवो न मामिन्द्रातिरिच्यत इत्येतेन पिबेदलक्ष्मीं नुदते ॥५॥ तिष्येण घृतं क्रीणीयादायाहि सुषुमा हि त इत्येतेन पिबेदलक्ष्मीं नुदते ॥६॥ गौरान् सर्षपाँस्तिष्येण चूर्णं कारयित्वे न्द्रेहि मत्स्यन्दस इत्येतेन सँयूय तैर्म्मुखं पाणी पादौ च सर्व्वाणि चाङ्गानि सर्व्वाँश्च सँश्लेषानुत्सादयन्नलक्ष्मीं नुदते ॥७॥ गौरसर्षपानग्नौ जुहुयाद्यद्वीडाविन्द्र यत् स्थिर इत्येतेन हिरण्यँ लभते ॥८॥ व्रीहियवानग्नौ जुहुयात् सुनीथो घा स मर्त्य इत्येतेन धान्यं लभते ॥९॥ व्रीहियवौ सर्प्पिर्म्मधु-मिश्रावास्येऽवधाय सपूर्व्यो महोनामित्येतेन मनसानुद्रुत्यान्ते स्वाहाकारेण निगिरेदेवँ सदा प्रयुञ्जानः सहस्रँ लभते ॥१०॥ इम उ त्वा विचक्षत इत्येतेनाहुतिसहस्रं जुहुयात्सहस्रँ लभते ॥११॥ मासोपोषितो बिल्वानां दधिमधुघृताक्तानाँ श्रायन्तीयेना

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ष्टसहस्रं जुहुयात् । सिद्धे सौवर्णान्यसिद्धे राजतानि ॥१२॥ नैयग्रोधं दन्तपवनं घृतमधुलिप्तं गव्योषुण इत्येताभ्यामनिष्ठीवन्त्सँवत्सरं भक्षयन्त्सहस्रँ लभते सहस्रँ लभते ॥१३॥ इति प्रथमः खण्डः ॥३/१॥

त्रिरात्रोपोषितो भद्रो नो अग्नि राहुत इत्येतेनाहुतिसहस्रं जुहुयात्सहस्रँ लभते ॥१॥ औदुम्बरीर्व्वा समिधो घृताक्ताः सहस्रं जुहुयाद्ग्रा लभते ॥२॥ व्रीहियवानग्नौ जुहुयाद्धान्यँ लभते ॥३॥ द्वादशरात्रोपोषितः एवा ह्यसि वीरयुरित्येतेनाहुति-सहस्रं जुहुयाद्ग्रामँ लभत एताँश्च सर्व्वान् कामानवाप्नोति ॥४॥ श्रत्ताष्टकं प्रयुञ्जानः प्रथमेन हिरण्यँ लभते द्वितीयेन धान्यं तृतीयेन पशूँश्चतुर्थेन पुत्रान् पञ्चमेन ग्रामान् षष्ठेन यशः सप्तमेन ब्रह्मवर्च्चसमष्टमेन स्वर्ग्गल्लोकमवाप्नोति ॥५॥ सँवत्सरं गोग्रासमाहरेद्गावश्चिद्धा समन्यव इत्येतेनानन्त्याँ विन्दते श्रियम् ॥६॥ वैरूपाष्टकं नित्यं प्रयुञ्जानो लक्ष्मीर्ज्जुषते ॥७॥ अन्त्यँ वा जानुदघ्न उदके तिष्ठन् ॥८॥ नाभिदघ्ने धान्यं कक्षदघ्ने पशूनास्यदघ्ने पुत्रान् ग्रामं च ॥९॥ अनपेक्षितो वाऽसकृद्गीत्वोत्तीर्णः संहस्रँ लभते ॥१०॥ आहुतिसहस्रँ वा जुहुयात्सामान्तेषु स्वाहाकारैः ॥११॥ एतेषां कल्पानाँ यथा भूयस्तथा श्रेयस्तथा श्रेयः॥१२॥ इति द्वितीयःखण्डः॥३/२॥

गाः प्रकाल्यमानाश्चोपकाल्यमानाश्च सदोपतिष्ठेत गव्यो षु ण इत्येताभ्याँ स्फीयन्ते बहुला भवन्ति ॥१॥ सदा भोजनस्योपनीतस्याग्रमग्नौ जुहुयादग्ने विवस्वदुषस इति पूर्व्वेण बलिं चोत्तरेण कुर्य्याद्बहुपशुधनधान्यो भवति ॥२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अष्टरात्रोपोषितोऽमावास्यायां निश्येकवृक्षे क्षीरिण्यरण्ये माँसँ सुसँस्कृतमेकतृप्त्यवराद्ध्यं माणिभद्रायोपहरेदेषस्य ते मधुमाँ इन्द्र सोम इत्येतेन हिरण्यद्रोणँ लभते ॥३॥ त्रिरात्रोपोषितः शुक्लचतुर्दश्याँ शौनं माँसं पायसँ वोपहरेत् त्रिरस्मै सप्त धेनवो दुदुह्रिर इत्येतेन दैवान्पोषान्पुष्यति बहुपुरुषं चास्य भवति क्रियाश्चानेन कुरुते ॥४॥ त्रिरात्रोपोषितः कृष्णचतुर्दश्यां मत्स्यानुपहरेन्महाराजाय सँश्रवस इति वर्ग्गेणासुरान् पोषान् पुष्यति बहुपुरुषं चास्य भवति क्रियाश्चानेन कुरुते ॥५॥ अथातो वास्तुशमनम् ॥६॥ प्रदक्षिणं प्रतिदिशँ रज्वा यच्छेदवान्तरदेशेषु च यत्राभिसमेयुस्तत्रोपलिम्पेत् रज्वन्तेषु च शमीपलाशश्रीपर्णीनां पत्रैर्व्वास्तूपकिरेदक्षतैश्च सुमनोभिश्च पूर्व्वैः प्रोष्ठपदैर्ग्गृहेऽग्निं प्रतिष्ठाप्य धानावन्तं करम्भिणमित्येतद्गीत्वा पायसमग्नौ जुहुयात्परेषां च पलाशपर्णमध्येषु बल्युपहारः प्रजापतये स्वाहेति मध्य उपहरेदिन्द्रायेति पुरस्ताद्वायव इत्यवान्तरदेशे यमायेति दक्षिणतः पितृभ्य इत्यवान्तरदेशे वरुणायेति पश्चान्महाराजायेत्य वान्तरदेशे सोमायेत्युत्तरतो महेन्द्रायेत्यवान्तरदेशे वासुकय इत्यधस्तादूर्ध्वं नमो ब्रह्मण इति दिवि बहुपशुधनधान्यहिरण्यमायुष्मत्पुरुषं वीरसूः सुभगाविधवस्त्रीकँ शिवं पुण्यँ वास्तु भवति, चतुर्षु मासेषु प्रयोगः सँवत्सरे वा पुनः प्रयोगः पुनः प्रयोगः ॥७॥
इति तृतीयः खण्डः॥३/३॥

अथातोऽदृष्टदर्शनानाम् ॥१॥ सङ्करात् सङ्करेवासिनीमावहेच्छूर्पेणाक्षतान्गन्धान्सुमनसश्चात्र कृत्वा सँविष्टः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राक्शिराः शुचौ देशे शिरस्तः कृत्वा क इममुहुवेत्येतद्गीत्वा वाग्यतः प्रस्वपेत् पश्यति ह ॥२॥ गरगोलिकाँ वा समुद्रेऽवधाया याहि सुषुमा हि त इत्येतद्गीत्वा वाग्यतः प्रस्वपेत् पश्यति ह ॥३॥ कन्याँ वोपवासयेददृष्टरजसमादर्शं च अयमग्निः श्रेष्ठतम इत्येतेन व्युष्टायाँ रात्रावेतेनैवाभि गीय परिमृज्य ब्रूयात् पश्येति पश्यति ह ॥४॥ उदशरावँ वोपवासयेत् प्र मित्राय प्रार्य्यम्ण इत्येतेन व्युष्टायाँ रात्रावेते-नैवाभिगीय परिमृज्य ब्रूयात् पश्येति पश्यति ह ॥५॥ वँशमय्यौ वा शलाके गन्धैः प्रलिप्य मध्यमेनोपवासयेद् व्युष्टायाँ रात्रावेतेनैवाभिगीय परिमृज्य ब्रह्मचारिणौ ब्रूयाद्धारयत मिति सन्नमत्योः सिद्धिं विद्यात् ॥६॥ यष्टिँ वान्त्येन चतुरङ्गुलशो निमायोपवासयेत् व्युष्टायाँ रात्रावेतेनैवाभिगीय परिमृज्य प्रमिणुयादङ्गुलिपर्व्वभिः पूर्य्यमाणेषु सिद्ध्यति ॥७॥आषाढ्यां पौर्णमास्यां बीजानि धारयित्वोपवासयेत्तुलां च इन्द्रमिद्देवतातय इत्येतेन व्युष्टायाँ रात्रावेतेनैवाभिगीय परिमृज्य प्रोक्ष्य धारयेत् यानि गरीयाँसि तान्यृध्यन्ते॥८॥अक्षतानां द्वौ राशी कुर्याद्भावा-भावयोरा नो विश्वासु हव्यमित्येतेन व्युष्टायाँ रात्रावेतेनैवाभिगीय प्रोक्ष्य ब्रूयादालभस्वेति भावमालभमाने सिद्ध्यति ॥९॥ ज्योतिष्मताँ विधूमानामङ्गाराणां द्वौ राशी कुर्याद् यावन्तो वा स्युस्तेनार्थिनः श्रुष्ट्यग्ने नवस्य म इत्येतेनैनान् युगपद्धृतेनाभि षिञ्चेत् यः पूर्व्वः प्रज्वलितो विधूमेनार्च्चिषा प्रदक्षिणमभि पर्य्यावर्त्तते स जयतीति विद्यात् ॥१०॥ ज्योतिष्कान् कुर्य्या-न्मानुषीणां घृतेन सद्यो मथितेन प्र सोम देववीतय इत्येतेनैनान्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ज्वलयेद् यः पश्चाच्छाम्यति स चिरं जीवति स चिरं जीवति ॥११॥ इति चतुर्थः खण्डः॥३/४॥

राजानमभिषेचयेत्तिष्येण श्रवणेन वा ॥१॥ व्रीहियवैस्तिलमाषैर्द्दधि मधुसुमनोजातरूपैर्य्यशस्विनीभ्यो नदीभ्यः समुद्राच्चोदकान्याहृत्यौदुम्बरे भद्रासने वैयाघ्रे चर्म्मण्युत्तरलोम्न्यासीनं जीवन्तीनां गवाँ शृङ्गकोशैरभिषिञ्चे दभ्रातृव्य इति रहस्येन ॥२॥ यं कामयेतैकराजः स्यान्नास्य चक्रं प्रतिहन्येतेत्येकवृषेणाभिषिञ्चेत् ॥३॥ अभिषेक्त्रे दद्याद् ग्रामवरं दासीशतँ सहस्रं तदधीनश्च भवेत् ॥४॥ अद्भुते यवद्रोणं जुहुयाद्वात आ वातु भेषजमित्येतेन शाम्यति ह ॥५॥ कृष्णाँस्तिलानग्नौ जुहुयात्प्रदैवो दासो अग्निरित्येतेन नैनं कृतानि हिँसन्ति तान्येव प्रतिगच्छन्ति ॥६॥ व्रीहियवानग्नौ जुहुयात्पञ्चनिधनेन वामदेव्येन नैनं कृतानि हिँसन्ति तान्येव प्रतिगच्छन्ति ॥७॥ ताम्ररजतजातरूपायसीं मुद्रां कारयित्वोच्चा ते जातमन्धस इति चतुर्थेनाभिजुहुयात् सहस्रकृत्वः शतावरं तां मुद्रां दक्षिणेन पाणिना धारयेन्नैनं कृतानि हिँसन्ति तान्येव प्रतिगच्छन्ति तान्येव प्रतिगच्छन्ति ॥८॥ इति पञ्चमःखण्डः॥३/५॥

सङ्ग्रामँ युयुत्समानस्योदकमभि जुहुयात् सोमँ राजानँ वरुणमित्येतेन तत एनं पाययेद्यो राजा चर्षणीनामिति पूर्व्वेण। ये चात्र मुख्याः स्युस्तानुत्तरेणाभिषिञ्चेत् ॥१॥ अथ हैनँ संनाहयेत् प्र सेनानीरिति वर्ग्गेण ॥२॥ अथास्य रथँ युञ्ज्यादा त्वा सहस्रमाशतमिति वर्ग्गेण ॥३॥ बृहद्रथन्तराभ्यां चक्रे वामदेव्येनाधिष्ठानम् ॥४॥ स घा तं वृषणँ रथमित्येतेनाधितिष्ठेत्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रयान्तं चैनमनुगायेदिन्द्रस्य नु वीर्य्याणि इति ॥५॥ आजिशीर्षं गत्वा त्रीनिषूनस्येदुत्वा मन्दन्तु सोमा इत्यनेन जयति न पराजीयते ॥६॥ सन्दर्शने धूम्रायाः गोः सरूपवत्साया घृतद्रोणं जुहुयात् सत्यमित्थे'ति रहस्येन जयति न पराजीयते ॥७॥ बाधकमयीनाँ समिधां घृताक्तानाँ सहस्रं जुहुयादभित्वा पूर्वपीतय इति वषट्कारं चास्य निधनं कुर्याज्जयति न पराजीयते ॥८॥ सैध्रकमयीनाँ समिधां घृताक्तानाँ सहस्रं जुहुयादभित्यं मेषमितीन्द्र इव दस्यूँ प्रमृण इति चास्य निधनं कुर्याज्जयति न पराजीयते ॥९॥ सप्तरात्रोपोषितः सप्तमुख्या-नुद्दिश्य सद्यः पीडितेन सर्षपतैलेन सप्तहेनाहुतिसहस्रं जुहुयात्सप्तरात्रान्न भवन्ति ॥१०॥ हस्त्यश्व रथपदातीनां पिष्टमयीः प्रतिकृतीः कृत्वा पिष्टस्वेदँ स्वेदयित्वा सर्षपतैले-नाभ्यज्य तासां क्षुरेणाङ्गान्यवदायाग्नौ जुहुयादभि त्वा शूर नो नुम इति रहस्येन यत्र हीशब्दो यावतां जुहोति सर्व्वे न भवन्ति ॥११॥ त्रिरात्रोपोषितः कृष्णचतुर्द्दश्याँ शवादङ्गारमाहृत्य चतुष्पथे बाधकमिध्ममुपसमाधाय वैभीतकेन स्रुवेण सर्षपतैलेनाहुतिसहस्रं जुहुयात् संमील्येन यत्र वृश्चशब्दः स्यात्तत्र पुरुषः शूलहस्त उत्तिष्ठति तं ब्रूयादमुं जहीति हन्त्येनम् ॥१२॥ आमगर्भस्य वा क्षुरेणाङ्गान्यवदाय्याग्नौ जुहुयात् कक्षवर्ग्गाद्यैश्चतुर्भिः सपत्नं मनसा ध्यायन्त्सद्यो न भवति सद्यो न भवति ॥१३॥ इति षष्ठः खण्डः॥३/६॥

अथ यः कामयेतामुह्यन्त्सर्व्वाण्या जनित्राणि परिक्रामेय-मिति महे नो अद्य बोधयेत्येतत्सदा प्रयुञ्जीतान्तवेलायां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चैतत्स्मरेदमुह्यन्त्सर्व्वाण्याजनित्राणि परिक्रामति ॥१॥ अथ यः कामयेत सर्व्वत्राग्निर्म्मे ज्वलेदिति सँवत्सरँ शिरसाग्निं धारयेदग्न आ याहि वीतय इति प्रथमेनोपतिष्ठेत् द्वितीयेन परिहरेत् तृतीयेन परिचरेत् सर्व्वत्र हास्य ज्वलति यदिच्छति तद्दहति ॥२॥ अथ यः कामयेत पिशाचान् गुणीभूतान् पश्येयमिति सँवत्सरं चतुर्थे काले भुञ्जानः कपालेन भैक्षं चरन् प्राणाः शिशुरित्यन्त्यँ सदा सहस्रकृत्व आवर्त्तयन् पश्यति ॥३॥ अयाचितमेतेन कल्पेन द्वितीयं प्रयुञ्जानः पितॄन् पश्यति ॥४॥ सँवत्सरमष्टमे काले भुञ्जानः पाणिभ्यां पात्रार्थं कुर्व्वाणो वृत्रस्य त्वा श्वसथादीष माणारित्येतयोः पूर्व्वँ सदा सहस्रकृत्व आवर्त्तयन् गन्धर्व्वाप्सरसः पश्यति ॥५॥ अयाचितमेतेन कल्पेन द्वितीयं प्रयुञ्जानो देवान् पश्यति ॥६॥ यद्वर्च्च इति दिशाँ व्रतं दशानुगानमेतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जीत निधयोऽस्य प्रकाशन्ते ये दैवास्ताँस्तेन ॥७॥ मासमुपवसेदेकमेकमयाचितं भुञ्जीत मयि वर्च्च इत्येतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जीत निधयोऽस्य प्रकाशन्ते ये पृथिव्याम् ॥८॥ अष्टरात्रोपोषितोऽमावास्यायां मुख आज्यं कृत्वाग्निं नर इत्येतयोः पूर्व्वं मनसानुद्रुत्यान्ते स्वाहाकारे-णाग्नौ जुहुयात् व्युष्टायाँ रात्रौ भूतौ पश्यति पञ्च हास्य कार्षापणा भवन्ति व्ययकृताश्च पुनरायन्ति मूलमशून्यं कुर्य्यात् ॥९॥ गवां प्रविशन्तीनाँ या पश्चात् स्यात्तस्याः शिरोऽभ्यनुमृज्य पुच्छमनुमृज्य पाणी सँहृत्यानङ्गमेजयस्तिष्ठेत् सर्व्वाँ रात्रिं द्वितीयमावर्त्तयन् जम्भका हास्य सार्व्वकामिका भवन्ति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सार्व्वकामिका भवन्ति ॥१०॥ इति सप्तमः खण्डः॥३/७॥

अथ यः कामयेत पुनर्न्न प्रत्याजायेयमिति ॥१॥ रात्रिं प्रपद्ये पुनर्भूम्मयोभूङ्क्न्याँ शिखण्डिनीं पाशहस्ताँ युवतिं कुमारिणीमादित्यश्चक्षुषे वातः प्राणाय सोमो गन्धायापः स्नेहाय मनोऽनुज्ञाय पृथिव्यै शरीरम् ॥२॥ सा हैनमुवाचास्मिन्त्सँवत्सरे मरिष्यस्यस्मिन्नयनेऽस्मिन्नृतावस्मिन्मासेऽर्धमासेऽस्मिन् द्वादश-रात्रेऽस्मिन् षड्रात्रेऽस्मिँस्त्रिरात्रेऽस्मिन् द्विरात्रेऽस्मिन्नहोरात्रे ऽस्मिन्नहन्यस्याँ रात्रावस्याँ वेलायामस्मिन्मुहूर्त्ते मरिष्यस्येहि स्वर्गँल्लोकं गच्छ देवलोकँ वा ब्रह्मलोकँ वा क्षत्रलोकँ वा विरोचमानस्तिष्ठ विरोचमानामेहि योनिं प्रविश ॥३॥ नाहँ योनिं प्रवेक्ष्यामि भूतोत्तमाया ब्रह्मणो दुहितुः सँरागवस्त्राया जायते म्रियते सन्धीयते च ॥४॥ रात्रिस्तु मा पुनातु रात्रिः खमेतत् पुष्पान्तँ यत्पुराणमाकाशं तत्र मे स्थानं कुर्व्वपुनर्भवाया पुनर्ज्जन्मन एतावदेव रात्रौ रात्रेर्व्रतं च रात्रेर्व्रतं च ॥५॥ इत्यष्टमः खण्डः ॥

चतुरो मासान् पयोभक्षो गा अनु गत्वारण्ये शुचौ देशे मठं कृत्वा तत्र प्रविशेत् कमण्डलुमुदकोपस्पर्शनार्थमादाय त्रीन्त्सप्तरात्राननुदक उपवसन्नृचँ साम यजामह इत्येतयोः पूर्वँ सदा सहस्रकृत्व आवर्त्तयन् यदि देवताः पश्यति सिद्धं तदित्यथोत्थानमन्तरिक्ष्या हास्य सिद्धा भवत्यन्तरिक्षक्रमणं च द्वाराणि चास्य विल्लीयन्ते ॥१॥ द्वितीयमेतेन कल्पेन प्रयुञ्जानः कामचारी मनोजवा भवति ॥२॥ शुक्लानुपवसेत् सर्व्वान् कालान्मृष्टः शुक्लवासाश्चन्दनेनानुलिप्तः सुमनसो धारयँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्त्यमूषु पूर्व्वँ सदा सहस्रकृत्व आवर्त्तयन् ये मानुषाः कामास्तानवाप्नोति ॥३॥ द्वितीयमेतेन कल्पेन प्रयुञ्जानो ये दैवास्ताँ स्तेन ॥४॥ मासमुपवसेदेकमेकमयाचितं भुञ्जीत मयि वर्च्च इत्येतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जानस्त्रयाणाँ लोकानामाधिपत्यं गच्छति व्यृद्धावप्यस्यैकस्य ॥५॥ अथ यान्यनादिष्टकामकल्पानि तेषाँ यथा श्रुतिस्मृतिलिङ्गैः कामाः क्षुरसँयुक्ताः ॥६॥ आभिप्रायिकं कर्म ॥७॥ सोऽयं प्राजापत्यो विधिस्तमिमं प्रजापतिर्बृहस्पतये प्रोवाच बृहस्पतिर्न्नारदाय नारदो विष्वक्सेनाय विष्वक्सेनो व्यासाय पाराशर्य्याय व्यासः पाराशर्य्यो जैमिनये जैमिनिः पौष्पिञ्ज्याय पौष्पिञ्ज्यः पाराशर्य्यायणाय पाराशर्य्यायणो बादरायणाय बादरायण- स्ताण्डिशाट्यायनिभ्यां ताण्डिशाट्यायनिनौ बहुभ्यः ॥८॥ सोऽयमनूचानाय ब्रह्मचारिणे समावर्त्तमानायाख्येयः ॥९॥ उपाध्यायाय ग्रामवरँ सहस्रँ श्वेतं चाश्वं प्रदायानुज्ञातो वा यं कामं कामयते तमाप्नोति तमाप्नोति ॥१०॥ इति नवमः खण्डः ॥३/९॥

इति तृतीयः प्रपाठकः ॥

इति तृतीयं सामविधानब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अष्टब्राह्मणे चतुर्थम्

अथार्षेयब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथार्षेयब्राह्मणम्

प्रथमोऽध्यायः

अथ खल्वयमार्षः प्रदेशो भवति ॥१॥ ऋषीणां नामधेयगोत्रोपधारणम् ॥२॥ स्वर्ग्ग्यँ यशस्यं धन्यं पुण्यं पुत्र्यं पशव्यं ब्रह्मवर्च्चस्यं स्मार्त्तमायुष्यम् ॥३॥ प्राक् प्रातराशिक-मित्याचक्षते ॥४॥ तदप्येवमाहुर्य्य इदमुपधारयत एकैकर्षेर्द्दिव्यँ वर्षसहस्रमतिथिर्भवत्यभिनन्दितः प्रतिनन्दितो मानितः पूजितस्ततः स्वाध्यायफलमुपजीवतीति ॥५॥ अथापि ब्राह्मणं भवति यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुँ वर्च्छति गर्त्तँ वा पद्यति प्र वा मीयते पापीयान् भवति यातयामान्यस्य छन्दाँसि भवन्ति अथ यो मन्त्रे मन्त्रे वेद सर्व्वमायुरेति श्रेयान् भवत्ययात-यामान्यस्य छन्दाँसि भवन्ति तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति ॥६॥ ऋषीणाँ सँस्थानो भवति सँस्थानो भवति ब्रह्मणः स्वर्ग्गे लोके महीयते स्मरन्नाजायते पुनर्य्य एवँ वेद ॥७॥ तान्येतान्यार्षेयाणि योऽधीते ब्राह्मणः पङ्क्तिपावनो भवत्यर्घ्यः ॥८॥ य एवँ वित्स्यान्न मृन्मये भुञ्जीत तथा हास्यायुर्न्नरिष्येत तेजश्च ॥९॥ अथात उपदेशः ॥१०॥ ओमित्येतत्परमेष्ठिनः प्राजापत्यस्य साम परमेष्ठिनो वा ब्राह्मस्य ब्रह्मणो वा ब्रह्मवाचो वा ॥११॥ सत्यँ साम स्वर्ग्गस्य वा लोकस्याद्वारविवरणं देवानाँ वौकस्त्रयस्य वा वेदस्याप्यायनमयातयामाक्षरस्थँ साम ॥१२॥ वासिष्ठो हिङ्कारः प्राजापत्यो गवाँ वा ॥१३॥ गायत्रं पौष्कल-माग्नेयम् ॥१४॥ प्रथमायाँ वा यथादिष्टं गेयं प्रथमस्वरैर्व्वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतुरक्षरवृद्धान्तैः ॥१५॥ आद्यपात् प्रस्ताव ओंकारान्तः ॥१६॥ हिम्मा वेत्यन्तस्तोभो वृद्धो वा ॥१७॥ इति प्रथमःखण्डः॥१/१॥

गोतमस्य पर्क्काविभितः कश्यपस्य बर्हिष्यं मध्यमम् ॥१॥ सौपर्णं च वैश्वमनसं च ॥२॥ बृहद्भारद्वाजं बृहदाग्नेयं बृहद्वा सौरम् ॥३॥ श्रौतर्षाणि त्रीणि ॥४॥ औशने च शैरीषं चौशने वाऽभितः शैरीषं मद्ध्यमं शैरीषे वोत्तरे सर्व्वाणि वौशनानि सर्वाणि वा शैरीषाणि ॥५॥ इन्द्रस्य साँवर्ग्गवार्त्रघ्ने द्वे ॥६॥ साकमश्वस्य शौनःशेपेः सामनी द्वे ॥७॥ वत्सस्य काण्वस्य सामनी द्वे ॥८॥ अग्ग्नेश्चार्षेयम् ॥९॥ सुमित्रस्य च वाध्र्यश्वेः साम॥१०॥ वाध्र्यश्वस्य वाऽनूपस्य॥११॥ इति द्वितीयःखण्डः॥१/२॥

अग्ग्नेः सँवर्ग्गो वैश्वमनसम् ॥१॥ श्नाभा श्नौष्टीये द्वे ॥२॥ वैश्वामित्रं च ॥३॥ अग्ग्नेर्ज्जराबोधीये द्वे ॥४॥ रुद्रस्य वा ॥५॥ मारुतं च ॥६॥ भार्ग्गवे द्वे शौनःशेपे वेन्द्रस्य वारवन्तीयं तृतीयम् ॥७॥ सर्व्वाणि वा भार्ग्गवाणि सर्व्वाणि वा शौनःशेपानि सर्व्वाणि वा वारवन्तीयानि ॥८॥ और्व्वस्य वैधारयस्य सामनी द्वे ॥९॥ अग्ग्नेर्व्वा सामुद्रे समुद्रस्य वा वाससी ॥१०॥ अत्रेश्चासङ्गः प्रजापतेश्च निधनकामम् ॥११॥ इति तृतीयः खण्डः ॥१/३॥

सैन्धुक्षितानि त्रीणि ॥१॥ अग्ग्नेर्हरसी द्वे इहवद्वामदेव्यं तृतीयम् ॥२॥ यामे द्वे ॥३॥ अग्ने रक्षोघ्ने द्वे ॥४॥ वैश्वमनसं चाग्नेश्चार्षेयम् ॥५॥ सोमसाम च ॥६॥ गौपवनञ्च ॥७॥ सूर्य्यसामनी च कावं च वसुरोचिषः ॥८॥ सूर्य्यवर्च्चसः सामनी द्वे ॥९॥ वसुरोचिषो वा पारावतेः काशीते वा कापोते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वा वासुमन्दे वा ॥१०॥ गौराङ्गिरसस्य सामनी द्वे ॥११॥ गोतमस्य वा मानाज्ये द्वे ॥१२॥ इति चतुर्थः खण्डः ॥१/४॥

भरद्वाजस्यौपहवौ द्वौ श्नौष्टीगवं तृतीयमग्नेर्व्वैश्वानरस्य यज्ञायज्ञीयम् ॥१॥ भरद्वाजस्य वा ॥२॥ कार्त्तयशं च कार्त्तवेशँ वा नार्म्मेधं च कार्त्तवेशं चैव ॥३॥ भरद्वाजस्य पृश्निनी द्वे ॥४॥ उरोराङ्गिरसस्य साम ॥५॥ गोतमस्य पौरुमद्रे द्वे पुरुमद्रस्य वाऽङ्गिरसस्य ॥६॥ मण्डोर्ज्जामदग्न्यस्य सामनी द्वे माण्डवे वा ॥७॥ भरद्वाजस्य गाथम् ॥८॥ गोतमे द्वे अग्ने-रायुः ॥९॥ अग्नेर्हरसी द्वे दैर्घश्रवसे द्वे ॥१०॥ इति पञ्चमः खण्डः ॥१/५॥

अग्नेराग्नेये द्वे गोतमस्य मनाज्ये द्वे ॥१॥ दैवराजं च ॥२॥ गाथिनश्च कौशिकस्य साम ॥३॥ बार्हदुक्थे द्वे ॥४॥ पौरुमीढं च ॥५॥ कार्णश्रवसं प्रास्कण्वँ वा ॥६॥ दैवोदासं च ॥७॥ सौक्रतवं च ॥८॥ काण्वे द्वे ॥९॥ मानवे द्वे ॥१०॥ इति षष्ठः खण्डः ॥१/६॥

अग्नेश्च द्रविणम् ॥१॥ बार्हस्पत्यं च ॥२॥ वसिष्ठस्य च वीङ्कम् ॥३॥ विष्पर्धसश्चाङ्गिरसस्य साम ॥४॥ ऐतवादध्र्यं च ॥५॥ मनसश्च दोहः ॥६॥ समन्तानि त्रीण्यग्नेरेकँ वसिष्ठस्य वा वरुणस्य द्वे ॥७॥ वाम्रस्य च वैखानसस्य सामाञ्जिगस्य वा दानवस्य॥८॥ इति सप्तमः खण्डः ॥१/७॥

श्यावाश्वं चर्त्तुषामणी च यामं च ॥१॥ अग्नेश्चार्षेयम् ॥२॥ कौत्सँ वा यज्ञसारथि वा ॥३॥ अग्नेर्व्वैश्वानरस्य सामनी द्वे ॥४॥ आश्वे द्वे ऐटते वा ॥५॥ वामदेव्यं च रौद्रँ वा ॥६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वैश्वज्योतिषे द्वे ॥७॥ यामे द्वे ॥८॥ इन्द्रस्य वैराजे द्वे ॥९॥ वसिष्ठस्य वा प्रजापतेर्व्वा राशि मराये मरायराशिने वा स्फातिंकरणे वा च्यावने वा शैखण्डिने वैन्वके वा ॥१०॥ इत्यष्टमः खण्डः॥१/८॥

श्येनश्च (स्य) श्यैनँ वा श्यैतँ वा शयनँ वा शायनँ वा प्रजापतेर्व्वा दीर्घायुष्यँ वा ॥१॥ वासुक्रँ च ॥२॥ पौषं च॥३॥ कौत्सं च ॥४॥ काश्यपे द्वे ॥५॥ घृताचेराङ्गिरसस्य साम ॥६॥ भरद्वाजस्य प्रासहम् ॥७॥ अग्ग्नेर्व्वैश्वानरस्य राक्षोघ्नमत्रेर्व्वा ॥८॥ इति नवमः खण्डः॥१/९॥

पाथे च ॥१॥ बृहच्चाग्ग्नेयम् ॥२॥ यामं च ॥३॥ बृहच्चैवाग्ग्नेयम् ॥४॥ बृहतश्च कौमुदस्य साम ॥५॥ अग्ग्नेर्य्यद्वाहिष्ठीये द्वे यन्मँहिष्ठीये वा ॥६॥ अग्ग्नेर्व्विशो-विशीयमैडँ वा शार्ङ्गम् ॥७॥ प्रजापतेश्च कनीनिके द्वे अत्रेर्व्वा ॥८॥ श्रौतर्वणँ वा ॥९॥ कश्यपस्य च स्वयोनीन्द्रस्य चेन्द्रिय-मिन्द्रस्य वा प्रियम् ॥१०॥ इति दशमः खण्डः॥१/१०॥

बार्हस्पत्यं च ॥१॥ आरूढवच्चाङ्गिरसँ यामँ वा ॥२॥ आसिते द्वे ॥३॥ त्वाष्ट्री साम च ॥४॥ अगस्त्यस्य च राक्षोघ्नम् ॥५॥ मानवं च ॥६॥ इत्येकादशः खण्डः ॥१/११॥

तौदे द्वे दैर्घतमसानि त्रीणि सर्व्वाणि वा तौदानि सर्व्वाणि वा दैर्घतमसानि ॥१॥ श्यावाश्वस्य प्रहितौ द्वौ ॥२॥ प्रजापतेः श्रुधीये द्वे श्रुद्ध्ये वा श्रद्धे वा सत्ये वा सामनी वा ॥३॥ प्रजापतेः सदो हविर्धानानि त्रीणि सदः पूर्वँ हविर्धाने उत्तरे ॥४॥ त्वष्टुरातिथ्यम् ॥५॥ अदितेश्च साम ॥६॥ वार्क्कजम्भं च

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥७॥ अगस्त्यस्य च राक्षोघ्नम् ॥८॥ सौमक्रतवं च बृहदाग्नेयीयँ वा ॥९॥अगस्त्यस्य चैव राक्षोघ्नम् ॥१०॥ इति द्वादशः खण्डः ॥१/१२॥

इन्द्रस्य प्रमँहिष्ठीयानि चत्वारि वसिष्ठस्य वासितँ वैषां तृतीयम् ॥१॥ भरद्वाजस्य वाजभृद्वाजाभृद्वा वाजाभर्म्मीयँ वा ॥२॥ सौभराणि त्रीणि ॥३॥ पक्थस्य सौभरस्य सामनी द्वे पथो वा पक्थस्य वा ॥४॥ दैवानीकं च ॥५॥ गौतमं च सध्यँ वा ॥६॥ जमदग्नेश्च सँवर्गः ॥७॥ अगस्त्यस्य च राक्षोघ्नम् ॥८॥ इति त्रयोदशः खण्डः ॥१/१३॥ **इति प्रथमोऽध्यायः**

अथ द्वितीयोऽध्यायः

रौद्रे द्वे माग्गीयवे द्वे ॥१॥ अपि वा माग्गीयवं च रौद्रं च माग्गीयवं चैव सर्व्वाणि वा रौद्राणि सर्व्वाणि वा माग्गीयवाणि ॥२॥ आश्वम् ॥३॥ ऐटते द्वे ॥४॥ श्रौतकक्षे द्वे ॥५॥ तन्वस्य पार्थस्य सामनी द्वे दावसोर्व्वाङ्गिरसस्योत्तरँ वसिष्ठस्य निवेष्ट्वौ द्वौ इडानाँ वा सङ्क्षार उत्तमम् ॥६॥ शार्य्यातानि त्रीणि ॥७॥ इन्द्राण्याः साम ॥८॥ गौषूक्तं चाश्वसूक्तं च ॥९॥ गौरीवितम् ॥१०॥ गाराणि त्रीणि ॥११॥ इति प्रथमःखण्डः ॥२/१॥

सौपर्णानि त्रीणि शारुप्रवेतसानि वा विलम्बसौपर्णँ वैषां तृतीयम् ॥१॥ शाकलम् ॥२॥ आभरद्वसवे द्वे ॥३॥ तान्वे द्वे ॥४॥ इन्द्रस्य रौहितकूलीये द्वे विश्वामित्रस्य वा ॥५॥ इन्द्राण्याः सामनी द्वे ॥६॥ इन्द्रस्य च सहस्रबाहवीयम् ॥७॥ धृषतो मारुतस्य साम भरद्वाजस्यादारसृत् धृषतश्चैव मारुतस्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

साम भरद्वाजस्य चैवादारसृती ॥८॥ ऐध्मवाहानि त्रीणि ऐध्महाराणि वा ॥९॥ अहेः पैड्वस्य सामाहेध्मो (हिघ्नो) वा पैड्वस्य पैल्वस्य वा ॥१०॥ इति द्वितीयः खण्डः ॥२/२॥

ऐषं च ॥१॥ पौषं च ॥२॥ मरुतां च सँवेशीयँ सिन्धुषाम वा ॥३॥ हाविष्मते द्वे हाविष्कृते द्वे ॥४॥ काक्षीवतम् ॥५॥ औषसं च ॥६॥ भरद्वाजस्य मौक्षे द्वे दक्षनिधनँ वैनयोः पूर्व्वम् ॥७॥ भारद्वाजानि त्रीण्यार्षभानि वा सैन्धुक्षितानि वा ॥८॥ शाक्त्यसामनी द्वे ॥९॥ वार्षन्धरे द्वे कुत्सस्य प्रस्तोकौ द्वौ ॥१०॥ इति तृतीयः खण्डः ॥२/३॥

औपगवे द्वे ॥१॥ सौश्रवसे वाऽथमथे वा मथाथे वा सौमित्रे वा शौखण्डिने वा ॥२॥ त्वाष्ट्रीसाम ॥३॥ त्वष्टुरातिथ्ये द्वे ॥४॥ पौषे द्वे ॥५॥ श्यावाश्वे द्वे ॥६॥ प्रजापतेः सुतँरयिष्ठीये द्वे सहोरयिष्ठीये वा ॥७॥ इष्टाहोत्रीयं चाप्सरसँ वाऽपांनिधिः ॥८॥ प्रजापतेर्न्निधनकामँ सिन्धुषाम वा ॥९॥ रेवत्यश्च वाजदावर्य्यो वा ॥१०॥ सौमा पौषं च गो अश्वीयँ वा ॥११॥ इति चतुर्थः खण्डः ॥२/४॥

वैतहव्यानि त्रीण्योकोनिधनँ वैषां तृतीयम् ॥१॥ शाक्त्य-सामनी द्वे गौरीविते द्वे शाक्त्यसाम चैव गौरीवितं चैव सर्व्वाणि वा शाक्त्यसामानि सर्व्वाणि वा गौरीवितानि ॥२॥ काण्वे द्वे ॥३॥ गौरीविते द्वे श्रौतकक्षं तृतीयम् ॥४॥ सौमित्रे द्वे इहवद्दैवोदासं तृतीयम् ॥५॥ रैणवे द्वे वैणवे वा शाक्वरवर्णँ वैनयोः पूर्व्वमौदले द्वे वीङ्कँ वैनयोः पूर्व्वम् ॥६॥ आर्षभानि त्रीणि सैन्धुक्षितानि वा वाध्र्यश्वानि वा ॥७॥ कौत्से द्वे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पाञ्चवाजे वा दाशवाजे वा ॥८॥ सौमेधानि त्रीणि पूर्व्वतिथानि वा पौर्व्वातिथानि वा ॥९॥ दैवातिथं च मैधातिथँ वा ॥१०॥ इति पञ्चमः खण्डः ॥२/५॥

आङ्गिरसानि त्रीणि ॥१॥ अपि वा माधुच्छन्दसं क्रौञ्चं घृत्तश्चुन्निधनं प्राजापत्यं माधुच्छन्दसँ वैव ॥२॥ वाम्राणि त्रीणि प्रैयमेधानि वा वैयश्वानि वाऽऽश्वानि वोद्गातृदमनानि वा ॥३॥ गौरीविते द्वे आपालवैणवे द्वे वैणवापाले वाऽऽकूपारे वा पारबवे वा ॥४॥ धुरोः सामनी द्वे महागौरीवितं तृतीयं गौरीवितँ वैव ॥५॥ वाचः सामनी द्वे महावामदेव्यं तृतीयँ वामदेव्यँ वैव ॥६॥ इन्द्रस्य सत्रासाहीये द्वे अजितस्य वाजिती ॥७॥ वामदेव्यं च ॥८॥ अश्विनोश्च साम ॥९॥ गौतमस्य च भद्रमश्विनोश्चैव साम सोमसाम वा ॥१०॥ इति षष्ठः खण्डः ॥२/६॥

त्वाष्ट्रीसाम च ॥१॥ गौधा साम च ॥२॥ सवितुश्च साम ॥३॥ उषसश्च साम ॥४॥ त्वष्टुरातिथ्ये द्वे ॥५॥ पौषं च ॥६॥ इन्द्रस्य च माया ॥७॥ इन्द्रस्य साँवर्त्ते द्वे सँवर्त्तस्य वाऽऽङ्गिरसस्य ॥८॥ शौनःशेपं च च्यावनँ वा ॥९॥ प्रतीचीनेडं काशीतम् ॥१०॥ इति सप्तमःखण्डः॥२/७॥

सौमित्रं च ॥१॥ श्यावाश्वे द्वे ॥२॥ शैखण्डिनं च ॥३॥ वैतहव्यं च॥४॥ भारद्वाजं च ॥५॥ आरुणस्य च वैतहव्यस्य साम सौभरँ वा ॥६॥ सौभरं चैव ॥७॥ पाष्ठौहे द्वे ॥८॥ साकमश्वं च धुराँ वा साम ॥१०॥ इत्यष्टमः खण्डः॥२/८॥

यामं च ॥१॥ आङ्गिरसं च हरिश्रीनिधनम् ॥२॥ वैरूपं च ॥३॥ आसितं च सिन्धुषाम वा ॥४॥ यमस्यार्क्क इन्द्रस्य वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥५॥ सौमित्रे द्वे ॥६॥ इन्द्रस्य चाभयङ्करम् ॥७॥ त्वाष्ट्रीसाम च ॥८॥ पौषं च ॥९॥ इन्द्राण्याः साम ॥१०॥ इतिनवमःखण्डः॥२/९॥

श्यावाश्वं च तारणँ वा ॥१॥ वैरूपं च ॥२॥ सौमित्रं च कौत्सँ वा ॥३॥ तौभं च ॥४॥ श्रौतं च ॥५॥ आभीशवं च ॥६॥ पौषं च ॥७॥ इन्द्रस्य च क्षुरपवि ॥८॥ सौमित्रे द्वे ॥९॥ इति दशमः खण्डः॥२/१०॥

कौत्से च ॥१॥ औषसं च ॥२॥ भारद्वाजं च ॥३॥ कौत्सं चैव ॥४॥ उषसं चैव ॥५॥ मित्रावरुणयोश्च सँयोजनम् ॥६॥ ऋतुषाम च ॥७॥ विष्णोश्च साम ॥८॥ इत्येकादशः खण्डः ॥२/११॥

कौत्सं च ॥१॥ काश्यपं चाप्सरसँ वा ॥२॥ बार्हदुक्थे द्वे ॥३॥ कौत्सानि चैव त्रीणि ॥४॥ और्ध्व सद्मने द्वे ॥५॥ अभीपादस्य चौदलस्य साम ॥६॥ आमहीयवं च ॥७॥ इति द्वादशः खण्डः॥२/१२॥ **इति द्वितीयोऽध्यायः**

अथ तृतीयोऽध्यायः

भरद्वाजस्यार्क्कौ द्वौ इन्द्रस्य वा ॥१॥ भारद्वाजे द्वे ॥२॥ सान्नते द्वे श्यैतं तृतीयम् ॥३॥ नाविकं च प्रजापतेश्चाभीवर्त्तो ऽभीवर्त्तस्य वाङ्गिरसस्य भागं चेन्द्रस्य चाभीवर्त्तो नौधसं पञ्चमम् ॥४॥ लौशे द्वे धानाके द्वे कालेयानि त्रीणि ॥५॥ क्षुल्लककालेयँ वैषां चतुर्थं महाकालेयमुत्तमम् ॥५॥ सर्व्वाणि वैव कालेयानि ॥६॥ ऐषिरे द्वे गौशृङ्गे द्वे ॥७॥ पृष्ठमेकं शौल्कमेकं जमदग्नेरभीवर्त्त एकः ॥८॥ कौल्मलबर्हिषे द्वे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥९॥ वसिष्ठस्य जनित्रे द्वे ॥१०॥ दैवातिथं च मैधातिथँ वा ॥११॥ इति प्रथमः खण्डः ॥३/१॥

वैखानसं च पौरुहन्मनं च प्राकर्षँ वा ॥१॥ सात्यम् ॥२॥ चत्वारि भारद्वाजानि कण्वबृहद्वैषां द्वितीयम् ॥३॥ वाम्राणि त्रीणि ॥४॥ अग्गनेग्गौङ्गवं गुङ्गोर्व्वा ॥५॥ इन्द्रस्य यशसी द्वे साध्रँ वैनयोरुत्तरं साध्रं चैव विरूपस्य समीचीनप्राचीने द्वे इन्द्रस्य वा यशसी ॥६॥ यौक्तस्रुचँ वा यातस्रुचँ वा ॥७॥ आत्राणि त्रीणि वासिष्ठानि वा ॥८॥ वासिष्ठानि त्रीणि आत्राणि वा ॥९॥ गोराङ्गिरसस्य सामनी द्वे गोतमस्य वा मनाज्ये ॥१०॥ इति द्वितीयः खण्डः॥३/२॥

इन्द्रस्य हारयणानि त्रीणि हारायणानि वा ॥१॥ वाम्राणि त्रीणि ॥२॥ वरुणसामानि त्रीणि ॥३॥ प्रजापतेश्च वषट्कारणिधनम् ॥४॥ धृषतो मारुतस्य साम ॥५॥ सँश्रवसो विश्रवसः सत्यश्रवसः श्रवस इति वाय्यानां चत्वारि सामानि इन्द्रस्य वा सँशानानि ॥६॥ वाम्रे पूर्व्वे वासिष्ठं तृतीयँ वासिष्ठे वा पूर्व्वे वाम्रं तृतीयम् ॥७॥ स्वपस आञ्जिगस्य सामनी द्वे आञ्जिगस्य दानवस्य वा ॥८॥ आष्कारणिधनं काण्वं महा-वैष्टम्भमभिनिधनं च काण्वं महावैष्टम्भं चैव ॥९॥ श्नौष्टीगवं च॥१०॥ इति तृतीयःखण्डः॥३/३॥

इन्द्रस्य च वृषकम् ॥१॥ द्यौते द्वे द्वैगते वा ॥२॥ कार्त्तयशं च कार्त्तवेशँ वा ॥३॥ इन्द्रस्य च शरणम् ॥४॥ श्रायन्तीयं च ॥५॥ वाम्रं चाक्षीलँ वा ॥६॥ शाक्राणि त्रीणि ॥७॥ वासिष्ठानि वा वैयश्वानि आश्वानि वा शौल्कानि वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुम्नानि वा द्युम्नानि वा पृष्ठानि वा यौक्ताश्वानि वा सोमसामानि वा ॥८॥ प्रजापतेश्च निधनकामम् ॥९॥ इन्द्रस्य प्रियाणि त्रीणि वसिष्ठस्य वा ॥१०॥ इन्द्रस्य वैरूपाणि त्रीणि वसिष्ठस्य वा ॥११॥ इति चतुर्थः खण्डः ॥३/४॥

पौरुहन्मनं च प्राकर्षं च ॥१॥ इन्द्रस्य चाभयङ्करम् ॥२॥ कावषे च ॥३॥ सूर्य्यसाम च ॥४॥ वैश्वदेवे द्वे आनूपे वाध्र्यश्वे वा ॥५॥ वैरूपं च ॥६॥ नैपातिथे द्वे ॥७॥ बृहतश्च कौमुदस्य सामनी द्वे स्वज्ज्र्योतिर्न्निधनमुत्तरम् ॥८॥ वाचश्च साम ॥९॥ वाम्रे द्वे आक्षीले वा ॥१०॥ पञ्चमः खण्डः॥३/५॥

गौरीवीतेः प्रहितौ द्वौ वासुक्रे वा ॥१॥ आत्रे द्वे ॥२॥ गौरीवीते द्वे ॥३॥ वामदेव्यं च ॥४॥ अश्विनोश्च साम ॥५॥ वसिष्ठस्य पज्राणि त्रीणि पज्रस्य वा वासिष्ठस्य सफस्य वा पाज्रयस्य ॥६॥ सौभरे द्वे ॥७॥ वैयश्वं च ॥८॥ इन्द्रस्य च सहस्रायुतीये द्वे प्रजापतेर्व्वा महोविशीये ॥९॥ इन्द्राण्याः साम ॥१०॥ इति षष्ठः खण्डः ॥३/६॥

सौभरं च ॥१॥ गार्त्समदं च ॥२॥ वाचश्च साम ॥३॥ बार्हदुक्थं च ॥४॥ वाशं च नैपातिथँ वा ॥५॥ तौरश्रवसं च ॥६॥ त्वाष्ट्र्याश्च साम ॥७॥ अदितेश्च साम ॥८॥ आजीगर्तं च ॥९॥ माधुच्छन्दसं च ॥१०॥ इति सप्तमः खण्डः ॥३/७॥

उषसश्च साम ॥१॥ अश्विनोश्च साम ॥२॥ अश्विनोश्च सँयोजनम् ॥३॥ अश्विनोश्चैव साम ॥४॥ सोमसाम च ॥५॥ आजमायवं च ॥६॥ समुद्रस्य च प्रैयमेधस्य साम ॥७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्रस्य वैरूपे द्वे वसिष्ठस्य वा ॥८॥ वैश्वदेवम्॥९॥ पुरीषं चाथर्व्वणम्॥१०॥ इत्यष्टमःखण्डः॥३/८॥

प्राकर्षं च वसिष्ठस्य च निहवः ॥१॥ गृत्समदस्य योनिनी द्वे ॥२॥ औरुक्षये द्वे ॥३॥ पार्थे द्वे ॥४॥ सौपर्णे द्वे वात्सप्राणि त्रीणि क्षुल्लकवात्सप्रँ वैषां तुरीयं महावात्सप्रमुत्तमँ सर्व्वाणि वा वात्सप्राणि ॥५॥ गौरीवितं च ॥६॥ वैदन्वतं च ॥७॥ यामँ वा महायामं च ॥८॥ ऋतुसामनी द्वे जज्ञानस्य वा ब्राह्मस्य ॥९॥ इन्द्रस्य वारवन्तीयम् ॥१०॥ इति नवमः खण्डः ॥३/९॥

इन्द्रस्य क्षुरपविणी द्वे स्यौमरश्मे द्वे ॥१॥ धृषतो मारुतस्य सामनी द्वे द्युतानस्य वा मारुतस्य ॥२॥ सोमसामनी द्वे ॥३॥ इन्द्रवज्ज्रे द्वे ॥४॥ भृष्टिमतः सूर्य्यवर्च्चसः सामनी द्वे ॥५॥ वसिष्ठस्याङ्कुशौ द्वौ कश्यपस्य वा प्रतोदौ ॥६॥ भारद्वाजं च ॥७॥ वैश्वदेवं च ॥८॥ पुरीषं चाथर्व्वणम् ॥९॥ इति दशमःखण्डः ॥३/१०॥

आदित्याः सामनी द्वे तार्क्ष्यसामनी वा ॥१॥ इन्द्रस्य च त्रातम् ॥२॥ याज्ञतुरं च वार्त्रतुरँ वा ॥३॥ धृषतो मारुतस्य सामनी द्वे ॥४॥ आत्रम् ॥५॥ गृत्समदस्य मदौ द्वौ गौतमस्य वानुतोदौ ॥६॥ वैश्वामित्रम् ॥७॥ सावित्राणि षट् ॥८॥ कुतीपादस्य वैरूपस्य साम ॥९॥ आमहीयवं च ॥१०॥ इत्येकादशः खण्डः ॥३/११॥

शैखण्डिने द्वे विश्वेषां देवानामुद्वँशीयं तृतीयम् ॥१॥ शैखण्डिनानि चैव त्रीणि आष्टादँष्ट्रे द्वे महावैश्वामित्रे द्वे ॥२॥ इन्द्रस्य प्रियाणि चत्वारि वसिष्ठस्य वा गौतमँ वैषां द्वितीयम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥३॥ गृत्समदस्य वीङ्कानि चत्वारि वसिष्ठस्य वा आकूपारँ वैषां तृतीयम् ॥४॥ तिरश्चाङ्गिरसस्य सामनी द्वे तैरश्च्ये वा ॥५॥ वैश्वामित्रं च ॥६॥ काण्वे द्वे ॥७॥ वैश्वामित्रं चैव ॥८॥ इन्द्रस्य शुद्धाशुद्धीये द्वे वसिष्ठस्य वा ॥९॥ गौतमस्य रयिष्ठे द्वे ॥१०॥ इति द्वादशः खण्डः ॥३/१२॥ **इति तृतीयोऽध्यायः**

अथ चतुर्थोऽध्यायः

कौल्मलबर्हिषे द्वे इन्द्रस्य नानदं तृतीयं नदतो वाऽङ्गिरसस्य ॥१॥ शाकपूतम् ॥२॥ कौल्मलबर्हिषे चैव ॥३॥ प्रजापतेश्च मधुश्चिन्निधनम् ॥४॥ उषसश्च साम ॥५॥ भारद्वाजं च ॥६॥ अग्नेश्च दधिक्रम् ॥७॥ मारुतं च माधुच्छन्दसँ वा ॥८॥ इति प्रथमः खण्डः ॥४/१॥

वामदेव्यं च ॥१॥ काश्यपं चाप्सरसँ वा ॥२॥ प्रैयमेधं च॥३॥ बार्हदुक्थं च॥४॥ अग्नेर्व्वैश्वानरस्य सामनी द्वे ॥५॥ शाकपूते द्वे ॥६॥ वरुणान्याः साम ॥७॥ औषसं च ॥८॥ देवानां च रुचिरुचेर्व्वा रोचनम् ॥९॥ ऋक्साम्नोःसामनी द्वे ॥१०॥ इति द्वितीयःखण्डः॥४/२॥

त्रैशोकम् ॥१॥ शैखण्डिने द्वे अत्रेर्व्विवर्त्तौ द्वौ महासावेतसे द्वे महाशैरीषे द्वे ॥२॥ इन्द्रस्य प्रियाणि त्रीणि वसिष्ठस्य वा ॥३॥ इन्द्रस्य वैरूपाणि त्रीणि वसिष्ठस्य वा ॥४॥ बार्हदुक्थं च ॥५॥ त्रासदस्यवे च ॥६॥ सौभरे द्वे सोमसाम वैनयोः पूर्व्वम् ॥७॥ द्यावापृथिव्योः सामनी द्वे वरुणसामनी वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥८॥ इन्द्रस्य च श्येनः ॥९॥ वैरूपं च च्यावनँ वा ॥१०॥ इति तृतीयः खण्डः ॥४/३॥

इन्द्रस्य क्रोशानुक्रोशे द्वे कौत्सं तृतीयँ वसिष्ठस्य क्रोशानि ॥१॥ दैवोदासे द्वे प्रहितोः सँयोजने द्वे ओकोनिधनँ वैनयोः पूर्व्वम् ॥२॥ हारिवर्णानि चत्वारि ॥३॥ त्रैतानि चत्वारि ॥४॥ सुराधसश्च प्राधसश्चाङ्गिरसयोस्त्रीणि सामानि मारुतँ वैषां तृतीयम्॥५॥ वैश्वमनसम् ॥६॥ सौमित्राणि त्रीणि ॥७॥ त्रैककुभानि त्रीणि ॥८॥ औक्ष्णोनियानानि त्रीणि औक्ष्णोरन्ध्राणि वा ॥९॥ इति चतुर्थः खण्डः ॥४/४॥

प्रयस्वच्च प्राजापत्यमक्षरं चाक्षारँ वा प्रयस्वच्चैव ॥१॥ दैवोदासानि चत्वारि ॥२॥ इन्द्रस्य साँवर्त्ते द्वे सँवर्त्तस्य वाऽऽङ्गिरसस्य ॥३॥ आक्षारं चैव यामँ वा ॥४॥ प्रजापतेश्च दीर्घायुष्यम् ॥५॥ भरद्वाजस्य च शुन्ध्युः ॥६॥ आदित्यस्या-पामीवम् ॥७॥ इन्द्रस्य वैराजे द्वे वसिष्ठस्य वा प्रजापतेर्व्वा सहोदैर्घतमसे वा ॥८॥ इति पञ्चमःखण्डः॥४/५॥

इन्द्रस्याभ्रातृव्यम् ॥१॥ शार्क्करे द्वे ॥२॥ बृहत्कम् ॥३॥ सौयवसानि त्रीणि ॥४॥ मरुतां च धेनु ॥५॥ मरुताँ सँवेशीयँ सिन्धुषाम वा ॥६॥ इन्द्रस्याभरे द्वे वसिष्ठस्य वा ॥७॥ वायोरैषिराणि त्रीणि ऐषिरस्य वा प्रैयमेधस्य ॥८॥ प्रजापतेः सीदन्तीये द्वे ॥९॥ पक्थस्य सौभरस्य सामनी द्वे पथो वा पक्थस्य वा सौभरे वा सौभ्रवे वा ॥१०॥ इति षष्ठः खण्डः॥४/६॥

यामम् ॥१॥ गृत्समदस्य मदौ द्वौ ॥२॥ आभीके द्वे आभीशवे द्वे बार्हद्गिराणि त्रीणि ॥३॥ इन्द्रस्य च स्वाराज्यम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥४॥ कश्यपस्य च धृष्णु यामँ वा ॥५॥ मरुतां च सँवेशीयँ सिन्धुषाम वा ॥६॥ यामे चैव ॥७॥ त्रैतानि त्रीणि सौपर्णे द्वे ॥८॥ लौशम् ॥९॥ इति सप्तमः खण्डः ॥४/७॥

इन्द्रस्य सञ्जये द्वे स्रौते वा स्रौग्मते वा द्विहिङ्कारँ वा वामदेव्यं द्वितीयम् ॥१॥ अङ्गिरसां चोत्सेधनिषेधौ ॥२॥ सत्यश्रवसश्च वाय्यस्य साम ॥३॥ पौषं च ॥४॥ औषसं च॥५॥ लौशं च यामँ वा ॥६॥ अङ्गिरसां चैव निषेधः ॥७॥ गौरेराङ्गिरसस्य साम अँहोमुचो वा ॥८॥ इत्यष्टमःखण्डः॥४/८॥

इन्द्रस्य सङ्क्रमे द्वे वसिष्ठस्य वा सौहविषाणि त्रीणि सर्व्वाणि वा सौहविषाणि ॥१॥ वाकानि त्रीणि ॥२॥ प्रजापतेर्धर्म्मविधर्म्माणि चत्वारि ॥३॥ भागं च ॥४॥ वाजिनाँ साम ॥५॥ प्रजापतेर्हिंकविकनिकानि त्रीणि विकनिकहिकानि वा निकविकहिकानि वा ॥६॥ आश्वे द्वे ऐटते वा ॥७॥ वाजिनां चैव साम ॥८॥ आदित्यानां च पवित्रम् ॥९॥ इति नवमः खण्डः ॥४/९॥

इन्द्रस्याभरे द्वे वसिष्ठस्य वा ॥१॥ वासुमन्दे द्वे कावषाणि त्रीणि ॥२॥ प्रजापतेः श्लोकानुश्लोकानि चत्वारि ॥३॥ वाचः सामनी द्वे ॥४॥ मारुतं च माधुच्छन्दसँ वा ॥५॥ मारुतं चैव ॥६॥ उद्वँशपुत्रश्च (पुत्रस्य च)॥७॥ इति दशमःखण्डः ॥४/१०॥

धुरोः शाम्ये द्वे ॥१॥ प्रजापतेश्च गूर्द्दः कूर्द्दो वा विश्वामित्रस्य चात्यर्द्दः प्रजापतेश्चैव गूर्द्दो विश्वामित्रस्य चात्यर्द्दः ॥२॥ प्रजापतेः सान्तनिके द्वे ॥३॥ प्रजापतेर्धनधर्म्मिणी द्वे ॥४॥ उषसश्च साम ॥५॥ भारद्वाजं च ॥६॥ इन्द्रस्य च राति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥७॥ भारद्वाजं च ॥८॥ ऐषं च ॥९॥ इन्द्रस्य वैराजे द्वे वसिष्ठस्य वा प्रजापतेर्व्वा विशाँ वा सामनी ॥१०॥ इत्येकादशः खण्डः ॥४/११॥

प्रजापतेश्च वाजजित् ॥१॥ गोराङ्गिरसस्य सामनी द्वे ॥२॥ प्रयस्वच्च प्राजापत्यम् ॥३॥ अक्षय्यं च रेवत् ॥४॥ याज्ञतुरं च ॥५॥ एवया मारुतस्य साम ॥६॥ भरद्वाजस्य विषमाणि त्रीणि इन्वकानि वा सौन्धुक्षितानि वा ॥७॥ सवितुश्च साम ॥८॥ भारद्वाजे द्वे पारुच्छेपे वा अग्नेर्व्वैश्वानरस्य रक्षोघ्ने द्वे बार्हस्पत्ये वा अवभृथसाम वैनयोः पूर्व्वं प्रवर्ग्यं सामोत्तरम् ॥९॥ ऐषं च ॥१०॥ इति द्वादशःखण्डः॥४/१२॥

इति चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

आजिगं चाभीकं च ऋषभश्च पवमानः औक्ष्णोरन्ध्रो वा आभीकं चैव बाभ्रवे द्वे इन्द्राण्याः साम शैशवे द्वे प्रजापतेर्द्दोहादोहीये द्वे इन्द्राण्याश्चैव साम आमहीयवं च ॥१॥ आजिगँ सुरूपे द्वे जमदग्नेः शिल्पे द्वे सँहितं च वसिष्ठस्य शकुलो जमदग्नेश्च गम्भीरँ सँहितं चैव ॥२॥ सोमसामनी च आशु च भार्गवँ वैश्वदेवे द्वे इन्द्रसामनी द्वे यौक्ताश्वे द्वे ॥३॥ भासं च सोमसाम च प्राजापत्यं च सोमसाम चैव भासं चैव प्राजापत्यं चैव अध्यर्धेडँ वा सोमसाम ॥४॥ वैष्टम्भे द्वे पाष्ठौहे द्वे वैष्टम्भं चैव क्षुल्लकवैष्टम्भँ वा पाष्ठौहं चैव ॥५॥ इषोवृधीयं च इन्द्रसाम च वैश्वदेवे द्वे आग्नेये द्वे वैश्वदेवं चैव आग्नेयं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चैव ॥६॥ शैशवानि चत्वारि च्यावनानि चत्वारि ॥७॥ प्राजापत्ये द्वे ॥८॥ वैदन्वतानि चत्वारि रजेराङ्गिरसस्य पदस्तोभौ द्वौ ॥९॥ और्णायवे द्वे ॥१०॥ इति प्रथमः खण्डः॥५/१॥

सौभरे द्वे सौभ्रवे वा ॥१॥ इन्द्रस्य वृषकाणि त्रीणि देवानाँ वर्षीणाँ वार्षेयं प्रथमम् ॥२॥ बभ्रौः कौम्भ्यस्य सामानि त्रीणि ॥३॥ बभ्रोः कार्त्तवेशस्य त्रीणि ॥४॥ शाम्मदे द्वे ऐटते वा ॥५॥ वसिष्ठस्य जनित्रे द्वे ॥६॥ मरुतां प्रक्रीडा वा सङ्क्रीडा वा निक्रीडा वा त्रयः ॥७॥ औशनम् ॥८॥ इति द्वितीयः खण्डः ॥५/२॥

यामानि त्रीणि देवानामृषीणाँ वार्षेयमुत्तमम् ॥१॥ अङ्कतेश्च वैरूपस्य साम ॥२॥ औशने द्वे देवानाँ वर्षीणाँ वार्षेयं पूर्व्वम् ॥३॥ सोमसाम च ॥४॥ कार्ष्णे द्वे ॥५॥ वैश्वदेवे द्वे सोमसाम वैनयोः पूर्व्वँ सूर्य्यसामोत्तमम् ॥६॥ इन्द्रस्य च वार्त्रघ्नम् ॥७॥ सोमसामानि त्रीणि ॥८॥ भारद्वाजं च ॥९॥ इति तृतीयः खण्डः ॥५/३॥

वार्षाहरम् ॥१॥ वार्शानि त्रीणि ॥२॥ इन्द्रस्य वैरूपे द्वे ॥३॥ तरन्तस्य च वैददश्वेः साम ॥४॥ सोमसाम च ॥५॥ सूर्य्यसाम ॥६॥ दार्ढ्यच्युतानि त्रीणि ॥७॥ इन्द्रस्य च वृषकम् ॥८॥ ऐषं च ॥९॥ श्यावाश्वं च ॥१०॥ आयास्यं चायासोमीयँ वा सोमसाम वा ॥११॥ आग्नेयं च ॥१२॥ आयास्ये चैव ॥१३॥ भारद्वाजं च ॥१४॥ इति चतुर्थः खण्डः॥५/४॥

आयास्यं माण्डवं च वसिष्ठस्यापदासे द्वे सोमसाम वैनयोरुत्तरमायास्यं चैव माण्डवं चैवोद्वच्च प्राजापत्यमायास्यं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चैव कण्वरथन्तरमायास्यं चैव तिरश्चीनिधनं प्रजापतेः सदोविशीयं जमदग्नेः स्ववासिनी द्वे वसिष्ठस्य प्लवोऽग्नेः रौरवमिन्द्रस्य यौधाजयँ युधाजेर्व्वाङ्गिरसस्य युधाजीवस्य वा विश्वामित्रस्येन्द्रस्य ॥१॥ इन्द्रस्याच्छिद्ररयिष्ठे द्वे वसिष्ठस्य वा भारद्वाजे द्वे आभीशवे द्वे माण्डवे द्वे अङ्गिरसामभीवास परिवासस्सी द्वे वैणसोमक्रतवीये द्वे माण्डवँ वैनयोरुत्तरं प्रजापतेर्ग्गूर्द्धौ द्वौ कश्यपस्य वा प्रतोदौ अङ्गिरसां गोष्ठपुँस्तिनी द्वे महारौरवं च महायौधाजयं च ॥२॥ आश्वानि चत्वारि सोमसामानि वा ॥३॥ आग्नेयं चाग्नेर्व्वा त्रिणिधनं कौत्सँ वा यज्ञसारथि वा अग्नेर्व्वैश्वानरस्य सामनी द्वे द्विहिङ्कारँ वामदेव्यं द्वितीयमाङ्गिरसां चोत्सेधनिषेधौ ॥४॥ सोमसामानि षट् आश्वानि वा ॥५॥ विष्णोरयमणी द्वे वैष्णवे वा आङ्गिरसानि त्रीणि ॥६॥ औक्ष्णोनिधनानि त्रीणि औक्ष्णोरन्ध्राणि वा आग्नेयानि त्रीणि द्व्यध्यासं च सौषाम वसिष्ठस्य वा पिप्पल्यौक्ष्णोनिधनं वौक्ष्णोरन्ध्रँ वा प्रजापतेश्च वाजिजित् ॥७॥ वैश्वदेवे द्वे इन्द्रसामनी द्वे स्वःपृष्ठं चाङ्गिरसमिन्द्रसामानि त्रीणि ॥८॥ सोमसामनी च स्वःपृष्ठं चैवाङ्गिरसँ सोमसामनी चैव देवानां च पवित्रमादित्यानाँ वा ॥९॥ इति पञ्चमः खण्डः॥५/५॥

औशनँ वृशस्य वै जानस्याभीवर्त्तौ द्वौ औशने चैव सर्व्वाणि वौशनानि ॥१॥ वाजसनी द्वे वाजजिती द्वे वाराहँ वोत्तरँ सर्व्वाणि वैव वाराहाणि ॥२॥ अङ्गिरसाँ सङ्क्रोशास्त्रयः ॥३॥ सामसुरसी द्वे सामसरसे वा ॥४॥ वेणोर्व्विशाले द्वे गौतमस्य तन्त्रातन्त्रे द्वे ॥५॥ अगस्त्यस्य यमिके द्वे इन्द्रस्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वारवन्तीये द्वे मरुताँ वा कालकाक्रन्दौ ज्याह्लोडौ वा ॥६॥ वासिष्ठान्यष्टौ ॥७॥ वसिष्ठस्य जनित्रे द्वे आङ्गिरसाँ व्रतोपोहः वसिष्ठस्य वा सम्पा वैयश्वं च सोम सामनी च ऐषं च माधुच्छन्दसं च ॥८॥ इति षष्ठः खण्डः॥५/६॥

कुत्सस्याधिरथीयानि त्रीणि आशुरथीयानि वा ॥१॥ वैश्वज्योतिषाणि त्रीणि ॥२॥ वाचः सामनी द्वे ॥३॥ दाशस्पत्ये द्वे ॥४॥ कश्यपस्य च शोभनम् ॥५॥ दाशस्पत्यानि चैव चत्वारि ॥६॥ श्नौष्टानि त्रीणि श्नुष्टेर्व्वाङ्गिरसस्य अग्ग्नेर्व्वैश्वानरस्य सामानि ॥७॥ आत्रं च ॥८॥ वासिष्ठं च ॥९॥ अपाँ वा साम ॥१०॥ इति सप्तमः खण्डः ॥५/७॥

नकुलस्य वामदेवस्य प्रेङ्खौ द्वौ महाकार्त्तयशं च कार्त्तवेशँ वा और्ध्वसद्मनं च श्यावाश्वं च आन्धीगवं चेति ॥१॥ क्रौञ्चानि त्रीणि सोमसामानि वा ॥२॥ त्वाष्ट्रीसामनी च वासिष्ठं च त्वाष्ट्रीसाम च वासिष्ठं च त्वाष्ट्रीसामनी चैव वासिष्ठं चैव ॥३॥ क्रौञ्चे द्वे ॥४॥ सोमसामानि त्रीणि क्रौञ्चं चैव सोमसाम चैव ॥५॥ आङ्गिरसानि त्रीणि प्रैयमेधानि वा ॥६॥ गृत्समदस्य सूक्तानि चत्वारि वसिष्ठस्य वा ॥७॥ आकूपारं च ॥८॥ वैरूपं च नृगस्य वा साम ॥९॥ इत्यष्टमः खण्डः ॥५/८॥

कावँ वाजसनी द्वे कावँ वैनयोः पूर्व्वँ वाजजिती द्वे कावं चैव ॥१॥ आङ्गिरसानि त्रीणि उद्वद्वैषां भार्ग्गवं प्रथमँ सामराजमुत्तमँ सामराजानि चैव त्रीणि सिमानाँ वैषां निषेध उत्तमम् ॥२॥ वासिष्ठम् ॥३॥ लौशे द्वे प्रवच्च भार्ग्गवँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विरूपस्य च तन्त्रँ यामं पञ्चमम् ॥४॥ दासशिरसी द्वे दाससरसे वा ॥५॥ यामानि त्रीणि ॥६॥ मरुतां धेनु ॥७॥ इन्द्रस्यापामीवनी द्वे वायोर्व्वाभिक्रन्द उत्तरम् ॥८॥ यामानि चैव त्रीणि ॥९॥ मरुतां चैव धेनु ॥१०॥ अञ्जतो व्यञ्जतः समञ्जत इति काक्षीवतानि त्रीणि सामानि शार्ङ्गाणि वा ॥११॥ आदित्यस्यार्क्कपुष्पे द्वे ॥१२॥ इति नवमः खण्डः ॥५/९॥

वसिष्ठस्य पदे द्वे वसिष्ठस्यानुपदे द्वे अपि वा पदं चानुपदं च पदं चैवानुपदं चैव पौष्कलं पञ्चमम् ॥१॥ ऐषिराणि पञ्च ॥२॥ शौक्तानि पञ्च ॥३॥ कार्णश्रवसानि त्रीणि ॥४॥ वाचः सामनी द्वे इन्द्रसामनी द्वे मरुतां प्रेङ्खो वसिष्ठस्य वा ॥५॥ प्राजापत्ये द्वे वैश्वदेवे वा ॥६॥ इन्द्रस्य सुज्ञाने द्वे द्यौते द्वे ज्योतिषे वा प्रजापतेरातीषादीये द्वे ॥७॥ सोमसामानि चत्वारि ॥८॥ सोमस्य यशाँसि त्रीणि ॥९॥ भारद्वाजं च ॥१०॥ इति दशमः खण्डः॥५/१०॥

वासिष्ठं च सफे च वासिष्ठं चैव सफं चैव ॥१॥ ऐषिराणि चत्वारि ॥२॥ कार्णश्रवसानि त्रीणि वाचः सामानि त्रीणि ॥३॥ कौल्मलबर्हिषे द्वे शङ्कु तृतीयँ सीदन्तीयँ वा कौल्मलबर्हिषाणि चैव त्रीणि ॥४॥ भरद्वाजस्य लोमनी द्वे प्रजापतेर्व्वा दीर्घे सोमसामानि त्रीणि ॥५॥ शैतोष्माणि चत्वारि शीतोष्णानि वा ॥६॥ गायत्रपार्श्वं च सन्तनि च सोमसामानि चैव त्रीणि ॥७॥ इत्यैकादशः खण्डः॥५/११॥

इति पञ्चमोऽध्यायः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ षष्ठोऽध्यायः

प्रथमपर्व ॥

अष्टौ वैरूपाणि अञ्जश्च वैरूपं ह्रस्वा च बृहदोपशा पञ्चनिधनं च षण्णिधनं च सप्तनिधनं च अष्टानिधनं च द्वादशनिधनं च पुष्यं च ॥१॥ अन्तरिक्षे द्वे ॥२॥ अरिष्टे द्वे ॥३॥ अहरीते द्वे ॥४॥ इति प्रथमःखण्डः ॥६/१॥

वरुणस्य देवस्थानम् ॥१॥ बृहद्देवस्थानम् ॥२॥ ऐरयैरिणे द्वे ॥३॥ आङ्गिरसे द्वे ॥४॥ बार्हस्पत्यं च ॥५॥ भारद्वाजं च ॥६॥ आथर्व्वणं च ॥७॥ नारद्वसवं च ॥८॥ बृहती वामदेव्ये वा ॥९॥ भरद्वाजस्य बृहत् ॥१०॥ इति द्वितीयः खण्डः ॥६/२॥

वसिष्ठजमदग्न्योरर्क्कौ द्वौ अगस्त्यजमदग्न्योर्व्वा ॥१॥ स्वाशिरामर्क्कः ॥॥२। दीर्घतमसोऽर्क्कः ॥३॥ मरुतामर्क्कौ द्वौ सँस्तोभो वोत्तरः ॥४॥ अग्नेरर्क्कः ॥५॥ प्रजापतेश्चार्क्कः ॥६॥ इन्द्रस्यार्क्कौ द्वौ त्रिष्टुभाँ वा॥७॥ अर्क्कशिरश्च ॥८॥। अर्क्कग्रीवाश्च ॥९॥ वरुणगोतमयोरर्क्कः ॥१०॥ अर्क्कपुष्पे द्वे ॥११॥ इति तृतीयः खण्डः॥६/३॥

अग्नेर्व्वैश्वानरस्य त्रीणि ॥१॥ आज्यदोहान्याचिदोहान्याच्यदोहानि वा प्रजापतेर्व्वा विष्णोर्व्वा विश्वामित्रस्य वा ॥२॥ रुद्रस्य त्रयः ऋषभाः ॥३॥ रैवतो वैराजः शाक्वर इतीन्द्रस्य त्रयोऽतीषङ्गाः ॥४॥ अथापरँ रौद्रो वासवः पार्ज्जन्यो वा वैश्वदेवो वा ॥५॥ प्राजापत्याश्चत्वारः पदस्तोभाः ॥६॥ गौतमा वा वैश्वामित्रा वा ऐन्द्राग्ना वा ॥७॥ इति चतुर्थः खण्डः ॥६/४॥

दश सँसर्प्पाणि महासर्प्पाणि सर्प्पसामानि वा ॥१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथापरमग्नेश्च पृथिव्याश्च वायोश्चान्तरिक्षस्य चादित्यस्य च दिवश्चापां च समुद्रस्य च माण्डवे द्वे ॥२॥ अथापरं बाभ्रवाणि चत्वारि पावमानानि चत्वारि दिशाँ सँसर्प्पे द्वे ॥३॥ इति पञ्चमः खण्डः ॥६/५॥

त्रिषन्धि च ॥१॥ यज्ञसारथि च ॥२॥ वृषा च ॥३॥ एकवृषं च ॥४॥ विद्रथं च ॥५॥ अभ्रातृव्यं च ॥६॥ रैवते द्वे रेवत्यो वा ॥७॥ शाक्वरवर्णं च ॥८॥ नित्यवत्साश्च ॥९॥ वसिष्ठस्य च रथन्तरम् ॥१०॥ जमदग्नेश्च सप्तहम् ॥११॥ पञ्चपविमन्ति महासामानि शर्व्वस्य प्रथमोत्तमे रुद्रस्य त्रीणि ॥१२॥ अथापरमग्नेर्हरसी द्वे क्षुरस्य हरसी द्वे मृत्योर्हरः पञ्चमँ सामनी वा त्रिकाद्ये लोकानाँ शान्तिरुत्तमम् ॥१३॥ पञ्चनिधनँ वामदेव्यम् ॥१४॥ इन्द्रस्य महावैराजँ वसिष्ठस्य वा ॥१५॥ अग्नेश्च प्रियम् ॥१६॥ सर्प्पसाम कल्माषँ वा ॥१७॥ स्वर्ग्यँ सेतुषाम पुरुषगतिर्व्वा विशोकँ वा ॥१८॥ इति षष्ठः खण्डः ॥६/६॥ **इति प्रथमपर्व्व**

अथ द्वितीयपर्व्व

वसिष्ठस्य प्राणापानौ द्वौ ॥१॥ इन्द्रस्येन्यौ द्वौ ॥२॥ प्रजापतेर्व्रतपक्षौ द्वावहोरात्रयोर्व्वा ॥३॥ इन्द्राण्या उल्बजरायुणी द्वे ॥४॥ बृहस्पतेर्ब्बलभिदी द्वे इन्द्रस्य वोद्भिद्वैनयोः पूर्व्वम् ॥५॥ इति प्रथमः खण्डः ॥

भर्ग्गयशसी द्वे ॥१॥ यामे द्वे ॥२॥ घर्म्मतनू द्वे ॥३॥ प्रजापतेस्त्रीणि चक्षूँषि ॥४॥ त्रीणि वार्षाहराणि ॥५॥ इति द्वितीयः खण्डः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्यौते द्वे द्वैगते वा ॥१॥ तास्पन्द्रे द्वे तास्विन्द्रे वा ॥२॥ तौरश्रवसे द्वे ॥३॥ धेनुपयसी द्वे ॥४॥ स्वर्ज्योतिषी द्वे ॥५॥ इति तृतीयः खण्डः ॥

यण्वापत्ये द्वे ॥१॥ आयुर्न्नवस्तोभे द्वे ॥२॥ रायोवाजीय-बार्हद्गिरे द्वे ॥३॥ सँकृतिपार्थुरश्मे द्वे ॥४॥ श्येनवृषके द्वे ॥५॥ इति चतुर्थः खण्डः ॥

भद्रश्रेयसी द्वे ॥१॥ तन्त्वोतुनी द्वे ॥२॥ सहोमहसी द्वे ॥३॥ वार्क्कजम्भे द्वे ॥४॥ ईष्विश्वज्योतिषी द्वे ॥५॥ इति पञ्चमः खण्डः ॥

द्रविणविस्पर्धसी द्वे ॥१॥ याममधुच्छन्दसे द्वे ॥२॥ वसिष्ठस्य शफौ द्वौ ॥३॥ शुक्रचन्द्रे द्वे ॥४॥ इति षष्ठः खण्डः ॥

वायोः षट् स्वराणि पराणि वा ॥१॥ स्पराणि वा पारणानि वा अनन्त्यानि वा आदित्यानि वा स्वर्ग्याणि वा स्वर्गस्य लोकस्य गमनानि वा ॥२॥ विष्णोस्त्रीणि स्वरीयाँसि ॥३॥ पञ्चानुगानं द्व्यनुगानं चतुरनुगानम् ॥४॥ इति सप्तमः खण्डः॥ **इति द्वितीयं पर्व**

अथ तृतीयं पर्व

वाचोव्रते द्वे ॥१॥ शशस्य कर्षूशयस्य व्रतम् ॥२॥ सत्रस्यर्धिः प्रजापतेः प्रतिष्ठा व्याहृतिश्च ॥३॥ परमेष्ठिनः प्राजापत्यस्य व्रतम् ॥४॥ कृष्णस्य चाङ्गिरसस्य व्रतम् ॥५॥ सोमव्रते द्वे ॥६॥ इति प्रथमः खण्डः॥

भरद्वाजस्य व्रतम् ॥१॥ भरद्वाजिनाँ व्रतम् ॥२॥ यमव्रते द्वे अङ्गिरसाँ वोत्तरम् ॥३॥ अश्विनोर्व्रते द्वे ॥४॥ गवाँ व्रते द्वे ॥५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कश्यपव्रते द्वे ॥६॥ इति द्वितीयः खण्डः॥

अङ्गिरसाँ व्रते द्वे ॥१॥ अपाँ व्रते द्वे ॥२॥ अहोरात्रयोर्व्रते द्वे अह्नः पूर्वँ रात्रेरुत्तरम् ॥३॥ विष्णोर्व्रतम् ॥४॥ विश्वेषां देवानाँ व्रतम् ॥५॥ वसिष्ठस्य व्रते द्वे ॥६॥ इति तृतीयः खण्डः ॥

इन्द्रस्य सञ्जयम् ॥१॥ अगस्त्यस्य यशः॥२॥ प्रजापते-स्त्रयस्त्रिँशत्सम्मितचतुस्त्रिँशत्सम्मिते द्वे ॥३॥ जमदग्नेर्व्रतम् ॥४॥ युग्यं च दशस्तोभम् ॥५॥ इन्द्रस्य च वार्त्रघ्नम् ॥६॥ प्रजापतेश्चाष्टानिधनम् ॥७॥ इन्द्रस्य राजनरौहिणे द्वे ॥८॥ रौहिणे वैकर्षेर्व्वा राजनं धातूरौहिणम्॥९॥ इति चतुर्थः खण्डः ॥

अग्नेरिलान्दं पञ्चानुगानमिरान्नँ वा ॥१॥ त्रीणि देवानाँ व्रतानि देवस्य वा रौद्रे पूर्व्वे वैश्वदेवं तृतीयं वैश्वदेवे वा पूर्व्वे रौद्रं तृतीयम् ॥२॥ ऋतुष्ठा यज्ञायज्ञीयम् ॥३॥ अजितस्य जितिः ॥४॥ सोमव्रतम्॥५॥ दीर्घतमसश्च व्रतम्॥६॥ इति पञ्चमःखण्डः॥

द्वे पुरुषव्रते पञ्चानुगानं चैकानुगानं च ॥१॥ त्रीणि लोकानाँ व्रतानि ॥२॥ दिवोऽन्तरिक्षस्य पृथिव्या इति ॥३॥ अथापरं द्यावापृथिव्योर्व्विपरीते ॥४॥ ऋश्यस्य सामव्रतँ वा ॥५॥ इति षष्ठः खण्डः ॥

दिशाँ व्रतं दशानुगानम् ॥१॥ कश्यपव्रतं दशानुगानं कश्यपग्रीवा द्वितीयं प्रजापतेर्हृदयं पञ्चममिडानाँ सङ्क्षारः षष्ठः कश्यपपुच्छं दशमं प्राग्दशमाद्द्वाँव्रते ॥२॥ निह्नवाभि-निह्नवौ द्वौ अनडुद्व्रते वा ॥३॥ इति सप्तमः खण्डः॥

इति तृतीयं पर्व्व

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ चतुर्थं पर्व

अग्ग्नेर्व्रतम् ॥१॥ वायोश्च व्रतम् ॥२॥ महावैश्वानरव्रते द्वे ॥३॥ सूर्य्यस्य भ्राजाभ्राजे द्वे ॥४॥ वायोर्व्विकर्णभासे द्वे मृत्योर्व्वा ॥५॥ ऐन्द्रं महादिवाकीर्त्यँ सौर्य्यँ वा दशानुगानं तस्य शिरश्च ग्रीवा च स्कन्धकीकसौ च पुरीषाणि च पक्षौ चात्मा चोरू च पुच्छं चैतत् साम सुपर्णमित्याचक्षते ॥६॥ इति प्रथमः खण्डः ॥

आदित्यव्रतमेकविँशत्यनुगानँ शाण्डिलीपुत्रो द्वाविँशति-रिति वार्ष्यायणीपुत्रः ॥१॥ वैश्वदेवाः समैरयाः सँशानानि भूतवदित्येकम् ॥२॥ चित्रन्देवानामन्तरिति द्वयोरपरम् ॥३॥ गन्धर्व्वाप्सरसामानन्दप्रतिनन्दौ पक्षौ ॥४॥ सौर्य्योऽतिषङ्ग इन्द्रस्य सधस्थं मरुतां भूतिः ॥५॥ प्रजापतेस्तिस्रः सार्प्पराज्ञ्याः सर्प्पाणाँ वाऽर्ब्बुदस्य वा ॥६॥ सर्प्पस्य घर्म्मरोचनमिन्द्रस्य वा ॥७॥ षडैन्द्राः परिधयः ॥८॥ ऋतूनाँ वागादि पित्र्यम् ॥९॥ अन्त्यँ वैकल्पिकम् ॥१०॥ तन्मित्रावरुणयोश्चक्षुरित्याचक्षते श्रोत्रं च तदेवैके ॥११॥ द्वितीयोऽतीषङ्गस्तन्मित्रावरुणयोः श्रोत्रमित्याचक्षते चक्षुश्च तदेवैके ॥१२॥ तृतीयोऽतीषङ्गस्तदिन्द्रस्य शिर इत्याचक्षते ॥१३॥ आदित्यस्योन्नयं तदादित्यात्मेत्याचक्षते ॥१४॥ ऐन्द्यो महानाम्न्यः प्रजापतेर्व्वा विष्णोर्व्वा विश्वामित्रस्य वा सिमा वा महन्या अध्वरगा वा शक्वर्य्यो वा शक्वर्य्यो वा ॥१५॥ इति द्वितीयः खण्डः ॥ **इति षष्ठोऽध्यायः**

इति चतुर्थमार्षेयब्राह्मणं समाप्तम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथाष्टब्राह्मणे पञ्चमम्

देवताध्यायब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवताध्यायब्राह्मणम्

अग्निरिन्द्रः प्रजापतिस्सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्ग्नी ॥१॥ इडानिधनानि पदनिधनानीकारणिधनानीत्याग्ग्नेयानि ॥२॥ सर्व्वाणि निधनवन्त्यैन्द्राण्यन्यान्यादिष्टेभ्यः ॥३॥ सर्व्वाणि स्वाराणि प्राजापत्यानि ॥४॥ यथा वामदेव्यम् ॥५॥ ऋक्समानि सौमानि ॥६॥ यथौशनकावे ॥७॥ वाङ्निधनानि वारुणानि ॥८॥ यथा यज्ञायज्ञीयम् ॥९॥ अक्षरानुस्वाराणि त्वष्ट्राणि ॥१०॥ यथा वारवन्तीयं चाभीवर्त्तश्च ॥११॥ स्वः पृष्ठान्याङ्गिरसानि ॥१२॥ स्वर्णिधनानि पौषाणि ॥१३॥ कयानश्चित्र आभुवदापवस्व सहस्रिणमिति वाङ्निधने सारस्वते ॥१४॥ य आनयत्परावत इत्यैन्द्राग्ग्ने ॥१५॥ सुतँ रयिष्ठास्सहो रयिष्ठा इत्याग्ग्नेयैन्द्रे ॥१६॥ वसवो रुद्रा आदित्या विश्वेदेवाः ॥१७॥ वसूनाँ स्वाराणि रुद्राणां निधनवन्ति आदित्यानामैडानि ॥१८॥ विश्वेषां देवानाँ वाङ्निधनानि यथा भूयस्त्वेन प्रदेशा वर्त्तन्त इत्यन्तराणि ॥१९॥ अथान्तरतराणि सर्व्वाण्याग्ग्नेयानि सर्व्वाण्यैन्द्राणि सर्व्वाणि प्राजापत्यानि सामानीत्यन्तरतराणि ॥२०॥ अथान्तरतमानि सर्व्वाणि ब्राह्माणि सामानीति सर्व्वान्तरतमानि ॥२१॥ अथोपनिषत् ॥२२॥ ऋग्वै माता साम पिता प्रजापतिः स्वरः॥२३॥ तद्यान्यृक्त आख्यायन्ते मातृतस्तान्याख्यायन्ते अथ यानि सामत आख्यायन्ते पितृतस्तान्याख्यायन्ते अथ यानि स्वरत आख्यायन्ते प्रजापतितस्तान्याख्यायन्ते ॥२४॥ स वा एष उद्गीथो बन्धुमान्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बन्धुमत्यः ॥२५॥ बन्धुमान् बन्धुमत्यो भवति जानन्ति ह वा एनं पितृतश्च मातृतश्च य एवँ वेद ॥२६॥ इतिप्रथमःखण्डः॥०१॥

अथातश्छन्दसाँ वर्णाः॥१॥ शुक्ला गायत्र्यो रूपेण सारङ्गँ रूपमुष्णिहां पिशङ्गं ककुभाँ रूपं कृष्णमानुष्टुभं ततः रोहितं बृहतीनान्तु नीलं पाङ्क्तं ततः पुनः सुवर्णं त्रिष्टुभाँ रूपं गौरं जगतमुच्यते ॥२॥ अतो यान्यन्यानि छन्दाँसि श्यावं तेषां ततः पुनर्नकुलं त्वेकपदानां द्विपदा बभ्रुरुच्यते सारङ्ग शुक्लकृष्णरूपाणि ऋग्यजुस्साम ब्राह्मणान्वितानि ॥३॥ ये यज्ञेषु प्रयोक्तव्यास्तेषां दैवतमुच्यते ॥४॥ विराजः पृश्नयो विद्यात् ॥५॥ दैवतं तत उत्तरम् ॥६॥ अग्नेर्गायत्र्यभवत्स-युग्वोष्णिहया सविता सम्बभूव अनुष्टुभा सोम उक्थैर्म्महस्वान् बृहस्पतेर्बृहती वाचमावत् ॥७॥ विराण्मित्रावरुणयोरभि-श्रीरिन्द्रस्य त्रिष्टुबिह भागोऽह्नः विश्वान्देवान्जगत्याविवेशते न चाक्लृप्त ऋषयो मनुष्याः ॥८॥ प्राजापत्या अतिछन्दसो विच्छन्दसो वायुदेवताः पुरुषो द्विपदानां दैवतं ब्राह्म्य एकपदा स्मृताः ॥९॥ वासवी पङ्क्तिः ॥१०॥ स तु लम्मन्येतैतद्दैवत्या एवैतेषु छन्दस्वृचो भवन्तीति छन्दसामुहैतद्दैवतम् ॥११॥ इति द्वितीयः खण्डः ॥

अथातो निर्व्वचनम् ॥१॥ गायत्री गायतेः स्तुतिकर्म्मणः ॥२॥ गायतो मुखादुदपतदिति हि ब्राह्मणम् ॥३॥ उष्णिगुत्स्नानात्स्निह्यतेर्व्वा कान्तिकर्म्मणोऽपि वोष्णीषिणी-त्यौपमिकम् ॥४॥ ककुप्ककुदरूपिणीत्यौपमिकम्॥५॥ ककुप्च

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कुब्जश्च कुजतेर्व्वोब्जतेर्व्वा ॥६॥ अनुष्टुबनुस्तोभनात् ॥७॥ अन्वस्तौदिति हि ब्राह्मणम् ॥८॥ पिपीलिका पेलतेर्गति-कर्म्मणः ॥९॥ पिपीलिकमद्ध्येत्यौपमिकम् ॥१०॥ बृहती बृँहतेर्व्वृद्धिकर्म्मणः ॥११॥ विराड्विरमणाद्विराजनाद्विराधनाद्वा ॥१२॥ पङ्क्तिः पञ्चिनी पञ्चपदा ॥१३॥ त्रिष्टुप् स्तोभत्युत्तर-पदा ॥१४॥ कातु त्रिता स्यात् तीर्णतमं छन्दो भवतीति ॥१५॥ त्रिवृद्वज्ज्रस्तस्य स्तोभिनीवेत्यौपमिकम् ॥१६॥ जगतीगततमं छन्दो जज्जगतिर्भवति क्षिप्रगतिर्ज्जज्जलाकुर्व्वन्नसृजतेति हि ब्राह्मणम् ॥१७॥ अतिच्छन्दाश्छन्देरर्थे ॥१८॥ छन्दाँसि छदयतीति वा ॥१९॥ निचृन्निपूर्व्वस्य चृतेः ॥२०॥ भरणाद्भुरिगुच्यते ॥२१॥ इति तृतीयः खण्डः॥

अथातो गायत्रमाग्नेयं भक्त्या भवति देवानाँ वर्षीणाँ वा परमेष्ठिनो वा प्राजापत्यस्य साम । सावित्री गेयम्। यत्रागीतम् ।

तत्सवितुर्व्वरेणियोम् ॥ भार्गोदेवस्यधीमाहीऽ२ ॥ धियो योनःप्रचोऽ१२१२ ॥ हिं(स्थि)आऽ२ ॥ दायो ॥ आऽ३४५ ॥

ऋषीणाँ विषयज्ञो यश्शरीराद्विमुच्यते अतीत्य तमसः पारँ स्वर्ग्गे लोके महीयते । सहस्रयुगपर्य्यन्तमहर्ब्राहम्यं यदुच्यते नाकस्य पृष्ठे तं कालं दिवि सूर्य्य इव रोचते । ततः कृतयुगस्यादौ ब्रह्मपूतो महायशाः सर्व्वज्ञो धृतिमानृषिः पुनराजायते स्मरन्निति स्मरन्निति ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ सावित्र्यगानि व्याक्ख्यास्यामः । शिरो ब्रह्मा ललाटं द्यौश्चन्द्रादित्यौ चक्षुषी मुखमग्निर्ज्जिह्वा सरस्वती त्वष्टा ग्रीवा वसवश्च रुद्राश्च बाहू उरो वायुः पृष्ठमिन्द्रो विष्णुर्न्नाभिः प्रजापतिर्ज्जघनम् ऊरू मरुतो वेदाः पादौ स्मितँ विद्युत् श्वसितँ वायुरस्थीनि पर्व्वताः समुद्द्रा वासाँसि नक्षत्राण्यलङ्कारः य एवँ वेद दुष्टुतादुरुपयुक्तान्यूनाधिका च सर्व्वस्मात्स्वस्ति देवऋषिभ्यश्च ब्रह्म सत्यं च पातु मामिति ब्रह्म सत्यं च पातु मामिति ॥ इति चतुर्थः खण्डः॥

इति देवताध्यायब्राह्मणम्

अष्टब्राह्मणे पञ्चमं ब्राह्मणं सम्पूर्णम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सामवेदीयाष्टब्राह्मणे षष्ठम्

छान्दोग्यब्राह्मणे प्रथमद्वितीयप्रपाठकौ

छान्दोग्यमन्त्रब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

छान्दोग्यमन्त्रब्राह्मणम्

प्रथमः प्रपाठकः

ॐ अदितेऽनुमन्यस्व ।।क।। अनुमतेऽनुमन्यस्व ।।ख।। सरस्वत्यनुमन्यस्व ।।ग।। देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्व्वः केतपूः केतं नः पुनातु वाचस्पतिर्व्वाचं नः स्वदतु ।।१।। काम वेद ते नाम मदो नामासि समानयामुँ सुरा ते अभवत् । परमत्र जन्माग्ग्ने तपसो निर्म्मितोऽसि स्वाहा ।।२।। इमं त उपस्थं मधुना सँसृजामि प्रजापतेर्म्मुखमेतद्द्वितीयम् । तेन पुँसोऽभि भवासि सर्व्वान-वशान् वशिन्यसि राज्ञी स्वाहा ।।३।। अग्निं क्रव्यादमकृण्वन् गुहानाः स्त्रीणामुपस्थमृषयः पुराणाः। तेनाज्यमकृण्वन्स्त्रैश्रृङ्गं त्वाष्ट्रं त्वयि तद्दधातु स्वाहा ।।४।। या अकृन्तन्नवयन् या अतन्वत याश्च देव्यो अन्तानभितो ततन्थ । तास्त्वा देव्यो जरसा सँव्ययन्त्वायुष्मतीदं परिधत्स्व वासः ।।५।। परिधत्त धत्त वाससैनाँ शतायुषीं कृणुत दीर्घमायुः। शतञ्च जीव शरद-स्सुवर्च्चा वसूनि चार्य्ये विभृजासि जीवन् ।।६।। सोमोऽदद-द्गन्धर्व्वाय गन्धर्व्वोऽददग्गनये । रयिं च पुत्राँश्चादादग्निर्म्मह्य-मथो इमाम् ।।७।। प्र मे पतिः या नः पन्थाः कल्पताम् । शिवा अरिष्टा पतिलोकं गमेयम् ।।८।। प्रास्याः पतिर्य्या नः पन्थाः कल्पताम् । शिवा अरिष्टा पतिलोकं गम्याः ।।९।। अग्निरेतु प्रथमो देवताभ्यः सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयँ राजा वरुणोऽनुमन्यताँ यथेयँ स्त्री पौत्रमघं न रोदात् स्वाहा ।।१०।।इमामग्गिनस्त्रायतां गार्हपत्यः प्रजामस्यै जरदष्टिं कृणोतु। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि विबुध्यतामियं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वाहा ॥११॥ द्यौस्ते पृष्ठँ रक्षतु वायुरूरू अश्विनौ च स्तनन्धयाँस्ते पुत्रान् सविताभिरक्षतु । आवाससः परिधाना-द्बृहस्पतिर्व्विश्वेदेवा अभिरक्षन्तु पश्चात् स्वाहा ॥१२॥ मा ते गृहेषु निशि घोष उत्थादन्यत्र त्वद्रुदत्यः सँविशन्तु । मा त्वँ रुदत्युर आ वधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजाँ सुमनस्यमानाँ स्वाहा ॥१३॥ अप्रजस्यं पौत्रमर्त्त्यं पाप्मानमुत वा अघम् । शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशँ स्वाहा ॥१४॥ परैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु । परं मृत्यो अनु परेहि पन्थां यत्र नो अन्य इतरो देवयानात् । चक्षुष्मते श्रृण्वते ते ब्रवीमि मा नः प्रजाँ रीरिषो मो त वीरान्त्स्वाहा ॥१५॥ इति प्रथमः॥१/२॥

इममश्मानमारोहाश्मेव त्वँ स्थिरा भव । द्विषन्तमप बाधस्व मा च त्वं द्विषतामधः ॥१॥ इयं नार्य्युपब्रूतेऽग्नौ लाजानावपन्ति । दीर्घायुरस्तु मे पतिः शतँ वर्षाणि जीवतु । एधन्तां ज्ञातयो मम स्वाहा ॥२॥ अर्य्यमणं नु देवं कन्या अग्निमयक्षत । स इमां देवो अर्य्यमा प्रेतो मुञ्चातु मामुतः स्वाहा ॥३॥ पूषणं नु देवं कन्या अग्निमयक्षत । स इमां देवः पूषा प्रेतो मुञ्चातु मामुतः स्वाहा ॥४॥ कन्यला पितृभ्यः पतिलोकँ यतीयमप दीक्षामयष्ट । कन्या उत त्वया वयं धारा उदन्या इवाति गाहेमहि द्विषः ॥५॥ एकमिषे विष्णुस्त्वा नयतु ॥६॥ द्वे ऊर्ज्जे विष्णुस्त्वा नयतु ॥७॥ त्रीणि व्रताय विष्णुस्त्वा नयतु ॥८॥ चत्वारि मायोभवाय विष्णुस्त्वा नयतु॥९॥ पञ्च पशुभ्यो विष्णुस्त्वा नयतु॥१०॥ षड्रायस्पोषाय विष्णुस्त्वा नयतु ॥११॥ सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नयतु ॥१२॥ सखा सप्तपदी भव सख्यं ते गमेयम् । सख्यं ते मा योषाः सख्यं ते मा योष्ठ्याः ॥१३॥ सुमङ्गलीरियँ वधूरिमाँ समेत पश्यत । सौभाग्यमस्यै दत्वा याथास्तँ विपरेतन ॥१४॥ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ । सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ ॥१५॥ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्य्यथाऽसः।भगो अर्य्यमा सविता पुरन्धिर्म्मह्यं त्वाऽदुर्ग्गार्हपत्याय देवाः ॥१६॥ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमना सुवर्च्चाः। वीरसूर्ज्जीवसूर्द्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥१७॥ आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्य्यमा । अदुर्म्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥१८॥ इमां त्वमिन्द्र मीढ्वः सुपुत्राँ सुभगां कृधि । दशास्यां पुत्रानाधेहि पतिमेकादशं कुरु ॥१९॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव । ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥२०॥ मम व्रते ते हृदयं दधातु मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यम् ॥२१॥ इति द्वितीयः॥१/२॥

लेखासन्धिषु पक्ष्मस्वावर्त्तेषु च यानि ते । तानि ते पूर्णाहुत्या सर्व्वाणि शमयाम्यहम् ॥१॥ केशेषु यच्च पापक-मीक्षिते रुदिते च यत् । तानि ते पूर्णाहुत्या सर्व्वाणि शमया-म्यहम् ॥२॥ शीलेषु यच्च पापकं भाषिते हसिते च यत् । तानि ते पूर्णाहुत्या सर्व्वाणि शमयाम्यहम् ॥३॥ आरोकेषु च दन्तेषु हस्तयोः पादयोश्च यत् । तानि ते पूर्णाहुत्या सर्व्वाणि शमयाम्यहम् ॥४॥ ऊर्व्वोरुपस्थे जङ्घयोः सन्धानेषु च यानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ते । तानि ते पूर्णाहुत्या सर्व्वाणि शमयाम्यहम् ॥५॥ यानि कानि च घोराणि सर्व्वाङ्गेषु तवाभवन् । पूर्णाहुतिभिराज्यस्य सर्व्वाणि तान्यशीशम७स्वाहा ॥६॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् । ध्रुवासः पर्व्वता इमे ध्रुवा स्त्री पतिकुले इयम् ॥७॥ अन्नपाशेन मणिना प्राणसूत्रेण पृश्निना । बध्नामि सत्यग्रन्थिना मनश्च हृदयं च ते ॥८॥ यदेतद्धृदयं तव तदस्तु हृदयं मम । यदिदँ हृदयं मम तदस्तु हृदयं तव ॥९॥ अन्नं प्राणस्य पड्विँशस्तेन बध्नामि त्वासौ ॥१०॥ सुकिँ शुकँ शल्मलिँ विश्वरूपँ सुवर्णवर्णँ सुकृतँ सुचक्रम् । आ रोह सूर्य्ये अमृतस्य नाभिँ स्योनं पत्ये वहतुं कृणुष्व ॥११॥ मा विदन् परिपन्थिनो य आसीदन्ति दम्पती । सुगेभिर्दुर्ग्गमतीता-मपद्रान्त्वरातयः ॥१२॥ इह गावः प्र जायध्वमिहाश्वा इह पूरुषाः। इहो सहस्रदक्षिणोऽपि पूषा निषीदतु ॥१३॥ इह धृतिरिह स्वधृतिरिह रन्तिरिह रमस्व । मयि धृतिर्म्मयि स्वधृतिर्म्मयि रमो मयि रमस्व ॥१४॥ इति तृतीयः॥१/३॥

अग्ग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्याः पापीलक्ष्मीस्तामस्या अपजहि ॥१॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्याः पतिघ्नीतनूस्तामस्या अपजहि ॥२॥ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्या अपुत्र्या तनूस्तामस्या अपजहि ॥३॥ सूर्य्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्या अपशव्या तनूस्तामस्या अपजहि ॥४॥ अग्निवायुचन्द्रसूर्याः प्रायश्चित्तयो यूयं देवानां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रायश्चित्तयः स्थ । ब्राह्मणो वो नाथकाम उपधावामि याऽस्याः पापीलक्ष्मीर्य्या पतिघ्नी या अपुत्र्या या अपशव्या तनूस्तामस्या अपहत ॥५॥ विष्णुर्य्योनिं कल्पयतु त्वष्टा रूपाणि पिँशतु । आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥६॥ गर्भं धेहि सिनीवाली गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥७॥ पुमाँसौ मित्रावरुणौ पुमाँसावश्विनावुभौ । पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे ॥८॥ पुमानग्निः पुमानिन्द्रः पुमान्देवो बृहस्पतिः। पुमाँसं पुत्रँ विन्दस्व तं पुमाननु जायताम् ॥९॥ इति चतुर्थः॥१/४॥

अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भव । पर्णँ वनस्पते नुत्त्वा नुत्त्वा सूयताँ रयिः॥१॥ येनादितेः सीमानं नयति प्रजापतिर्म्महते सौभगाय । तेनाहमस्यै सीमानं नयामि प्रजामस्यै जरदष्टिं कृणोमि ॥२॥ राकामहँ सुहवाँ सुष्टुती हुवे श्रृणोतु नः सुभगा बोधतु त्मना । सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरँ शतदायु मुख्यम् ॥३॥ यास्ते राके सुमतयः सुपेशसो याभिर्द्ददासि दाशुषे वसूनि । ताभिर्न्नो अद्य सुमना उपागहि सहस्रपोषँ सुभगे रराणा ॥४॥ किं पश्यसि प्रजां पशून् सौभाग्यं मह्यं दीर्घायुष्ट्वं पत्युः ॥५॥ या तिरश्ची निपद्यते अहँ विधरणी इति । तां त्वा घृतस्य धारया यजे सँराधनीमहम् । सँराधन्यै देव्यै देष्ट्यै स्वाहा ॥६॥ विपश्चित्पुच्छमभरत्तद्धाता पुनराहरत् । परेहि त्वँ विपश्चित्पुमानयं जनिष्यतेऽसौ नाम ॥७॥ इयमाज्ञेदमन्नमिदमायुरिदममृतम् ॥८॥ मेधां ते मित्रावरुणौ मेधामग्निर्द्ददातु ते । मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥९॥ यत्ते सुषीमे हृदयँ हितमन्तः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रजापतौ । वेदाहं मन्ये तद्ब्रह्म माहं पौत्रमघं निगाम् ॥१०॥ यत्पृथिव्या अनामृतं दिवि चन्द्रमसि श्रितम् । वेदामृतस्याहं नाम माहं पौत्रमघं रिषम् ॥११॥ इन्द्राग्नी शर्म्म यच्छतं प्रजायै मे प्रजापती । यथायं न प्रमीयेत पुत्रो जनित्र्या अधि ॥१२॥ यददश्चन्द्रमसि कृष्णं पृथिव्या हृदयं श्रितम् । तदहँ विद्वाँस्तत्पश्यन् माहं पौत्रमघँ रुदम् ॥१३॥ कोऽसि कतमोऽस्येषोऽस्यमृतोऽसि । आहस्पत्यं मासं प्रविशासौ॥१४॥ स त्वाह्ने परिददात्वहस्त्वा रात्र्यै परिददातु रात्रिस्त्वाहोरात्राभ्यां परिददात्वहोरात्रौ त्वार्धमासेभ्यः परिदत्तामर्धमासास्त्वा मासेभ्यः परिददतु मासास्त्वर्त्तुभ्यः परिददत्वृतवस्त्वा सँवत्सराय परिददतु सँवत्सरस्त्वायुषे जरायै परिददात्वसौ ॥१५॥ अङ्गादङ्गात् सँस्रवसि हृदयादधि जायसे । प्राणन्ते प्राणेन सन्दधामि जीव मे यावदायुषम् ॥१६॥ अङ्गादङ्गात् सम्भवसि हृदयादधि जायसे । वेदो वै पुत्र नामासि स जीव शरदः शतम्॥१७॥ अश्मा भव परशुर्भव हिरण्यमस्तृतं भव । आत्मासि पुत्र मा मृथाः स जीव शरदः शतम् ॥१८॥ पशूनां त्वा हिङ्कारेणाभि जिघ्राम्यसौ ॥१९॥ इति पञ्चमः॥१/५॥

आयमगात् सविता क्षुरेण ॥१॥ उष्णेन वाय उदकेनैधि ॥२॥ आप उन्दन्तु जीवसे ॥३॥ विष्णोर्द्दँष्ट्रोऽसि ॥४॥ ओषधे त्रायस्वैनम् ॥५॥ स्वधिते मैनँ हिँसीः॥६॥ येन पूषा बृहस्पते-र्व्वायोरिन्द्रस्य चावपत् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्च्चसे ॥७॥ त्र्यायुषं तत्ते अस्तु त्र्यायुषम् ॥८॥ अग्ने व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् । तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वायो व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् । तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥१०॥ सूर्य्य व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् । तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥११॥ चन्द्र व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् । तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥१२॥ व्रतानां व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् । तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥१३॥ आगन्त्रा समगन्महि प्रसुमर्त्यँ युयोतन । अरिष्टाः सञ्चरेमहि स्वस्ति चरतादयम् ॥१४॥ अग्निष्टे हस्तमग्रहीत् सविता हस्तमग्रहीदर्य्यमा हस्तमग्रहीन्मित्रस्त्वमसि कर्म्मणाग्निराचार्य्यस्तव ॥१५॥ ब्रह्मचर्य्यमागामुपमानयस्व ॥१६॥ को नामासि ॥१७॥ असौ नामास्मि ॥१८॥ देवस्य ते सवितुः प्रसवेऽश्विनोर्ब्बाहुभ्यां पूष्णो हस्ताभ्याँ हस्तं गृह्णाम्यसौ ॥१९॥ सूर्य्यस्यावृतमन्वावर्त्तस्वासौ ॥२०॥ प्राणानां ग्रन्थिरसि मा विस्रसोऽन्तक इदं ते परिददाम्यमुम् ॥२१॥ अहुर इदं ते परि ददाम्यमुम् ॥२२॥ कृशन इदं ते परिददाम्यमुम् ॥२३॥ प्रजापतये त्वा परिददाम्यसौ ॥२४॥ देवाय त्वा सवित्रे परिददाम्यसौ ॥२५॥ ब्रह्मचार्य्यस्यसौ ॥२६॥ समिधमाधेह्यपोऽशान कर्म्म कुरु मा दिवा स्वाप्सीः॥२७॥ इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती न आगात् । प्राणापानाभ्यां बलमाहरन्ती स्वसा देवी सुभगा मेखलेयम् ॥२८॥ ऋतस्य गोप्त्री तपसः परस्वी घ्नती रक्षः सहमाना अरातीः। सा मा समन्तमभि पर्य्येहि भद्रे धर्तारस्ते मेखले मा रिषाम ॥२९॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत् सवितुर्व्वरेण्यं भर्ग्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥३०॥ भूर्भुवःस्वरोम् ॥३१॥ सुश्रवः सुश्रवसं मा कुरु यथा त्वँ सुश्रवः सुश्रवा देवेष्वेवमहँ सुश्रवः सुश्रवाः ब्राह्मणेषु भूयासम् ॥३२॥ अग्ग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ग्ने समिधा समिध्यस्येवमहमायुषा वर्च्चसा सन्या मेधया प्रजया पशुभिर्ब्रह्मवर्च्चसेन धनेनान्नाद्येन समेधिषीय स्वाहा ॥३३॥पुनर्म्मा मैत्विन्द्रियं पुनरायुः पुनर्भगः। पुनर्द्द्रविणमैतु मा पुनर्ब्राह्मणमैतु मा॥३४॥ पुनर्म्मनः पुनरात्मा म आगात् पुनश्चक्षुः पुनः श्रोत्रं म आगात् । पुनः प्राणः पुनराधीतं म आगात् । वैश्वानरो अदब्धस्तनूपा अन्तस्तिष्ठतु मे मनोऽमृतस्य केतुः स्वाहा ॥३५॥ इति षष्ठः ॥१/६॥

ये अप्स्वन्तरग्ग्नयः प्रविष्टा गोह्य उपगोह्यो मरूको मनोहाः खलो विरूजस्तनुदूषिरिन्द्रियहा अतितान्त्सृजामि ॥१॥ यदपां घोरँ यदपां क्रूरँ यदपामशान्तमति तत्सृजामि ॥२॥ यो रोचनस्तमिह गृह्णामि तेनाहं मामभिषिञ्चामि ॥३॥ यशसे तेजसे ब्रह्मवर्च्चसाय बलायेन्द्रियाय वीर्य्यायान्नाद्याय रायस्पोषाय त्विष्या अपचित्यै ॥४॥ येन स्त्रियमकृणुतँ येनापामृशतँ सुराम् । येनाक्षानभ्यषिञ्चतँ येनेमां पृथिवीं महीम् । यद्वां तदश्विना यशस्तेन मामभिषिञ्चतम् ॥५॥ उद्यन् भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थात् प्रातर्य्यावभिरस्थात् । दशसनिरसि दशसनिं मा कुर्व्वा त्वा विशाम्या मा विश ॥६॥ उद्यन् भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थात् सान्तपनेभिरस्थात् । शतसनिरसि शतसनिं मा कुर्व्वा त्वा विशाम्या मा विश ॥७॥ उद्यन् भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थात् सायँयावभिरस्थात् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सहस्रसनिरसि सहस्रसनिं मा कुर्व्वा त्वा विशाम्या मा विश ॥८॥ चक्षुरसि चक्षुष्ट्वमस्यव मे पाप्मानं जहि । सोमस्त्वा राजावतु नमस्तेऽस्तु मा मा हिँसीः ॥९॥ उदुत्तमँ वरुण पाशमस्मदवाधमँ वि मध्यमँ श्रथाय । अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥१०॥ श्रीरसि मयि रमस्व ॥११॥ नेत्र्यौ स्थो नयतं माम् ॥१२॥ गन्धर्व्वोऽस्युपाव उपमामव ॥१३॥ यक्षमिव चक्षुषः प्रियो वो भूयासम् ॥१४॥ ओष्ठापिधाना नकुली दन्तपरिमितः पविः । जिह्वे मा विह्वलो वाचं चारु माऽद्येह वादय ॥१५॥ वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः। गोभिस्सन्नद्धो असि वीडयस्वा स्थाता ते जयतु जेत्वानि ॥१६॥ इति सप्तमः॥१/७॥

इमा मे विश्वतो वीर्य्यो भव इन्द्रश्च रक्षतम् । पूषँस्त्वं पर्य्यावर्त्तयानष्टा आयन्तु नौ गृहान् ॥१॥ इमा मधुमतीर्म्मह्य-मनष्टाः पयसा सह । गाव आज्यस्य मातर इहेमाः सन्तु भूयसीः ॥२॥ गवाँ श्लेष्मासि गावो मयि श्लिष्यन्तु ॥३॥ संग्रहण संगृहाण ये जाताः पशवो मम । पूषैषाँ शर्म्म यच्छतु यथा जीवन्तो अप्ययात् ॥४॥ भुवनमसि साहस्रमिन्द्राय त्वा सृमोऽददादक्षतमरिष्टमिलान्दम् । गोपोषणमसि गोपोषस्येशिषे गोपोषाय त्वा सहस्रपोषणमसि सहस्रपोषस्येशिषे सहस्र-पोषाय त्वा ॥५॥ लोहितेन स्वधितिना मिथुनं कर्णयोः कृतम् । यावतीनाँ यावतीनाँ व ऐषमो लक्षणमकारिषम् । भूयसीनां भूयसीनाँ व उत्तरामुत्तराँ समां क्रियासम् ॥६॥ इयं तन्ती गवां माता सवत्सानां निवेशनी । सा नः पयस्वती दुहा उत्तरामुत्तराँ समाम् ॥७॥ इत्यष्टमः ॥१/८॥ **इति प्रथमः प्रपाठकः**

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयः प्रपाठकः

यः प्राच्यां दिशि सर्प्पराज एष ते बलिः॥१॥ यो दक्षिणस्यां दिशि सर्प्पराज एष ते बलिः॥२॥ यः प्रतीच्यां दिशि सर्प्पराज एष ते बलिः॥३॥ य उदीच्यां दिशि सर्प्पराज एष ते बलिः॥४॥ नमः पृथिव्यै दँष्ट्राय विश्वभृन्मा ते अन्तेरिषाम । सँहतं मा विवधीर्व्विहतं माभि सँवधीः॥५॥ सोमो राजा सोमस्तम्बो राजा सोमोऽस्माकँ राजा सोमस्य वयँ स्मः अहिजम्भनमसि सौमस्तम्बँ सौमस्तम्बमहिजम्भनमसि ॥६॥ याँ सन्धाँ समधत्त यूयँ सप्तऋषिभिः सह। ताँसर्प्पा मात्यक्रामिष्ट नमो वो अस्तु मा नो हिँसिष्ट ॥७॥ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान् मा नो रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे ॥८॥ शतायुधाय शतवीर्य्याय शतोतयेऽभिमातिषाहे । शतं यो नः शरदो अजीजादिन्द्रो नेषदति दुरितानि विश्वा स्वाहा ॥९॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषाँ यो अज्यानिमजीजिमावहास्तस्मै नो देवाः परिदत्तेह सर्व्वे स्वाहा ॥१०॥ ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितं नो अस्तु । तेषामृतूनाँ शतशारदानां निवात एषामभये स्याम ॥११॥ इद्वत्सराय परिवत्सराय सँवत्सराय कृणुता बृहन्नमः । तेषाँ वयँ सुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम ॥१२॥ भद्रान्नः श्रेयस्समनैष्ट देवास्त्वयावसेन समशी महित्वा । स नो मयोभूः पितेवा विशस्व शं तोकाय तन्वै स्योनः स्वाहा ॥१३॥ अमोऽसि प्राण तदृतं ब्रवीम्यमा ह्यसि सर्व्वमनु प्रविष्टः। स मे जराँ रोगमपमृज्य शरीरादपाम एधि मा मृथा न इन्द्र

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥१४॥ अग्निः प्राश्नातु प्रथमः स हि वेद यथा हविः। शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः स्वाहा ॥१५॥ एतमुत्यं मधुना सँयुतँ यवँ सरस्वत्या अधिवनाव चर्क्कृधि । इन्द्र आसीत् सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः स्वाहा ॥१६॥ इति प्रथमः॥२/१॥

प्रथमा हव्युवास सा धेनुरभवद्य मे । सा नः पयस्वती दुहा उत्तरामुत्तराँ समाम् ॥१॥ प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु । प्रति प्राणे प्रति तिष्ठामि पुष्टौ प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मनि ॥२॥ प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे ॥३॥ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्रथो दैवान् मा भयादिति ॥४॥ यत् पशवः प्रध्यायत मनसा हृदयेन च । वाचा सहस्रपाशया मयि बध्नामि वो मनः ॥५॥ अनु त्वा माता मन्यतामनु पितानु भ्रातानु सगर्भ्योऽनु सखा स यूथ्यः ॥६॥ आत्तं देवेभ्यो हविः ॥७॥ यत् पशुर्म्मायुमकृतोरो वा पद्भिराहत । अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वँ हसः॥८॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। स नः स्योनः सुयजा यजा च यथा देवानां जनिमानि वेद ॥९॥ औलूखलाः सम्प्रवदन्ति ग्रावाणो हविष्कृण्वन्तः परिवत्सरीणाम् । एकाष्टके सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥१०॥ इडायास्पदं घृतवत् सरीसृपं जातवेदः प्रतिहव्या गृभाय । ये ग्राम्याः पशवो विश्वरूपास्तेषाँ सप्तानां मयि रन्तिरस्तु स्वाहा ॥११॥ एषैव सा या पूर्व्वा व्यौच्छत् सेयमप्स्वन्तश्चरति प्रविष्टा । वसूर्ज्जिगाय प्रथमा जनित्री विश्वे ह्यस्यां महिमानो अन्तः ॥१२॥ एषैव सा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

या प्रथमा व्यौच्छत् सा धेनुरभवद्विश्वरूपा । सँवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ॥१३॥ यां देवाः प्रतिपश्यन्ति रात्रीं धेनुमिवायतीम् । सा नः पयस्वती दुहा उत्तरामुत्तराँ समाम् ॥१४॥ सँवत्सरस्य प्रतिमाँ यां त्वा रात्रि यजामहे । प्रजामजर्य्यां नः कुरु रायस्पोषेण सँसृज ॥१५॥ अन्विमं नो अनुमतिर्य्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनः स नो दाद्दाशुषे मयः ॥१६॥ इति द्वितीयः ॥२/२॥

स्वाहा सोमाय पितृमते ॥१॥ स्वाहाग्नये कव्यवाहनाय ॥२॥ अपहता असुरा रक्षाँसि वेदिषदः ॥३॥ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परा पुरो नि पुरो ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदत्वस्मात् ॥४॥ एत पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्व्विणेभिः । दत्तास्मभ्यं द्रविणेह भद्रँ रयिञ्च नः सर्व्ववीरं नियच्छत ॥५॥ अत्र पितरो मादयध्वँ यथाभागमावृषायध्वम् ॥६॥ अमी मदन्त पितरो यथाभागमावृषा यिषत ॥७॥ नमो वः पितरो जीवाय नमो वः पितरः शूषाय ॥८॥ नमो वः पितरो घोराय नमो वः पितरो रसाय ॥९॥ नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे ॥१०॥ नमो वः पितरः पितरो नमो वः ॥११॥ गृहान्नः पितरो दत्त ॥१२॥ सदो वः पितरो देष्म ॥१३॥ एतद्वः पितरो वासः ॥१४॥ ऊर्ज्जँ वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधा स्थ तर्प्पयत मे पितॄन् ॥१५॥ आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषः स्यात् ॥१६॥ अभून्नो दूतो हविषो जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वा । प्रादात् पितृभ्यः स्वधया ते अक्षन् प्रजानन्नग्ने पुनरेहि योनिम् ॥१७॥ वह

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वपां जातवेदः पितृभ्यो यत्रैतान् वेत्थ निहितान् पराचः। मेदसः कुल्या अभि तान्त्स्रवन्तु सत्या एषामाशिषः सन्तु कामात् स्वाहा ॥१८॥ जातवेदो वपया गच्छ देवाँस्त्वँ हि होता प्रथमो बभूव । सत्या वपा प्रगृहीता मे अस्तु समृध्यतां मे यदिदं करोमि ॥१९॥ यत्कुसीदमप्रदत्तं मयेह येन यमस्य निधिना चराणि । इदं तदग्ने अनृणो भवामि जीवन्नेव प्रतितत्ते ददानि ॥२०॥एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम्। तेन देवा असहन्त शत्रून् हन्तासुराणामभवच्छचीभिः ॥२१॥ इति तृतीयः॥२/३॥

इदं भूमेर्भजामह इदं भद्रँ सुमङ्गलम् । परा सपत्नान् बाधस्वान्येषाँ विन्दते वस्वन्येषाँ विन्दते धनम् ॥१॥ इमँस्तोममर्हते जातवेदसे रथमिव सं महे मामनीषया । भद्रा हि नः प्रमतिरस्य सँ स द्यग्ने सख्ये मा रिषामा वयं तव ॥१क॥ भरामेध्मं कृणवामा हवीँषि ते चितयन्तः पर्व्वणापर्व्वणा वयम् । जीवातवे प्रतराँ साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥१ख॥ शकेम त्वा समिधँ साधया धियस्त्वे देवा हविरदन्त्याहुतम् । त्वमादित्याँ आवह तान् ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव ॥१ग॥ पवित्रे स्थो वैष्णव्यौ ॥१घ॥ विष्णोर्म्मनसा पूतेस्थः॥१ङ॥ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः ॥१च॥ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्वञ्च वाक्च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु भूर्भुवःस्वरों महान्तमात्मानं प्रपद्ये ॥२॥ विरूपाक्षोऽसि दन्ताञ्जिस्तस्य ते शय्या पर्णे गृहा अन्तरिक्षे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विमितं हिरण्मयम् । तद्देवानां हृदयान्ययस्मये कुम्भेऽन्तः सन्निहितानि । तानि बलभृच्च बलसाच्च रक्षतोऽप्रमणी अनिमिषतः सत्यम् । यत्ते द्वादश पुत्रास्ते त्वा सँवत्सरे सँवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति । त्वं देवेषु ब्राह्मणोऽस्यहं मनुष्येषु । ब्राह्मणो वै ब्राह्मणमुपधावत्युप त्वा धावामि । जपन्तं मा मा प्रतिजापीर्ज्जुह्वन्तं मा मा प्रति हौषीः कुर्व्वन्तं मा मा प्रति कार्षीः । त्वां प्रपद्ये । त्वया प्रसूत इदं कर्म्म करिष्यामि । तन्मे राध्यतां तन्मे समृध्यतां तन्न उपपद्यताम् । समुद्द्रो मा विश्वव्यचा ब्रह्मानुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोऽनुजानातु । तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः ॥३॥ अक्तँ रिहाणा व्यन्तु वयः ॥३क॥ यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा । पशूनस्माकं मा हिँसीरेतदस्तु हुतं तव स्वाहा ॥३ख॥ सहस्रबाहुर्ग्गौपत्यः स पशूनभिरक्षतु । मयि पुष्टिं पुष्टिपतिर्द्दधातु मयि प्रजां प्रजापतिः स्वाहा ॥४॥ कौतोमतं सँवननँ सुभागं करणं मम । नाकुली नाम ते माताथाहं पुरुषानयः। यन्नौ कामस्य विच्छिन्नं तन्नौ सं धेह्योषधे ॥५॥ वृक्ष इव पक्वस्तिष्ठसि सर्व्वान् कामान् भुवस्पते । यस्त्वैवँ वेद तस्मै मे भोगान् धुक्ष्वाक्षतान् बृहन् ॥६॥ ऋत७सत्ये प्रतिष्ठितं भूतं भविष्यता सह । आकाश उपनिरज्जतु मह्यमन्नमथो श्रियम् ॥७॥ अभिभागोऽसि सर्व्वस्मिँस्तदु सर्व्वं त्वयि श्रितम् । तेन सर्व्वेण सर्व्वो मा विवासन विवासय ॥८॥ कोश इव पूर्णो वसुना त्वं प्रीतो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ददसे धनम् । अदृष्टो दृष्टमाभर सर्व्वान् कामान् प्र यच्छ मे ॥९॥ आकाशस्यैष आकाशो यदेतद्भाति मण्डलम् । एवं त्वा वेद यो वेदेशानेशान् प्र यच्छ मे ॥१०॥ भूर्भुवःस्वरों सूर्य्य इव दृशे भूयासमग्निरिव तेजसा वायुरिव प्राणेन सोम इव गन्धेन बृहस्पतिरिव बुद्ध्याश्विनाविव रूपेणेन्द्राग्नी इव बलेन ब्रह्मभाग एवाहं भूयासं पाप्मभागा मे द्विषन्तः॥११॥ इति चतुर्थः॥२/४॥

मूर्ध्नोऽधि मे वैश्रवणाञ्छिरसोऽनु प्रवेशिनः। ललाटा-द्वस्वरान्घोरान् विघनान् वि बृहामि वः स्वाहा ॥१॥ ग्रीवाभ्यो मे स्कन्धाभ्यां मे नस्तो मेऽनुप्रवेशिनः। मुखान्मे बद्बदान् घोरान् विघनान् वि बृहामि वः स्वाहा ॥२॥ बाहुभ्यां मे यतो यतः पार्श्वयोरुत्तु तानधि । उरस्तो बद्बदान् घोरान् विघनान् वि बृहामि वः स्वाहा ॥३॥ वङ्क्ष्णाभ्यां मे लोहितादान् योनिहान् पज्रिहानधि । ऊरुभ्यां(भ्यो) निश्लिषान्(षो) घोरान् विघनान् वि बृहामि वः स्वाहा ॥४॥ जङ्घाभ्यां मे यतो यतः पार्ष्ण्योरुत्तु तानधि । पादयोर्व्विकिरान् घोरान् विघनान् वि बृहामि वः स्वाहा ॥५॥ परिबाधं यजामहेऽणुजङ्घं शबलोदरम्। यो नोऽयं परिबाधते दानाय भगाय च स्वाहा ॥६॥ अपेहि त्वं परिबाध मा विबाध वि बाधथाः। सुगं पन्थानं मे कुरु येन मा धनमेष्यति स्वाहा ॥७॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाँ स्वाहा ॥८॥ यशोऽहं भवामि ब्राह्मणानाँ यशो राज्ञाँ यशो विशाम् । यशः सत्यस्य भवामि भवामि यशसाँ यशः॥९॥ पुनर्म्मायन्तु देवता या मदपचक्रमुः।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महस्वन्तो महान्तो भवाम्यस्मिन्पात्रे हरिते सोमपृष्ठे ॥१०॥ रूप रूपं मे दिश प्रातरह्नस्य तेजसः। अन्नमुग्रस्य प्राशिषमस्तु वै मयि त्वयीदमस्तु त्वयि मयीदम् ॥११॥ यदिदं पश्यामि चक्षुषा त्वया दत्तं प्रभासया । तेन मा भुञ्ज तेन भुक्षिषीय तेन मा विश ॥१२॥ अहन्नो अत्यपीपरद्रात्रिर्न्नो अति पारयत् । रात्रिर्न्नो अत्यपीपरदहर्न्नो अति पारयत् ॥१३॥ आदित्यनावमारोक्षं पूर्णामपरिवादिनीम् । अच्छिद्रां पारयिष्ण्वी७ शतारित्रा७ स्वस्तये ॥१४॥ ओं नम आदित्याय नम आदित्याय नम आदित्याय ॥१५॥ उद्यन्तं त्वादित्यानूदियासं प्रतितिष्ठन्तं त्वादित्यानु प्रति तिष्ठासम् ॥१६॥ भलाय स्वाहा ॥१७॥ भल्लाय स्वाहा ॥१८॥ इति पञ्चमः॥२/५॥

वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽनमीवो भवा नः। यत्ते महे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥१॥ हये राके सिनीवालि सिनीवालि पृथुष्टुके । सुभद्रे पथ्ये रेवति पथा नो यश आवह स्वाहा ॥२॥ ये यन्ति प्राञ्चः पन्थानो य उ चोत्तरत आययुः। ये चेमे सर्व्वे पन्थानस्तेभिर्न्नो यश आवह स्वाहा ॥३॥ यथा यन्ति प्रपदो यथा मासा अहर्ज्जरम् । एवं मा श्रीधातारः समवयन्तु सर्व्वतः स्वाहा ॥४॥ यथा समुद्द्रँ स्रवन्तीः समवयन्ति दिशो दिशः। एवं मा सखायो ब्रह्मचारिणः समवयन्तु दिशो दिशः स्वाहा ॥५॥ वसुवन एधि वसुवन एधि वसुवन एधि ॥६॥ वशङ्गमौ देवयानौ युवँ स्थो यथा युवयोः सर्व्वाणि भूतानि वशमायन्त्येवं ममासौ वशमेतु स्वाहा ॥७॥ शङ्खश्च मन आयुश्च देवयानौ युवँ स्थो यथा युवयोः सर्व्वाणि भूतानि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वशमायन्त्येवं ममासौ वशमेतु स्वाहा ॥८॥ आकूतीं देवीं मनसा प्रपद्ये यज्ञस्य मातरँ सुहवा मे अस्तु । यस्यास्त एकमक्षरं परँ सहस्रा अयुतं च शाखास्तस्यै वाचे निहवे जुहोम्या मा वरो गच्छतु श्रीर्य्यशश्च स्वाहा ॥९॥ इदमहमिमँ विश्वकर्म्माणँ श्रीवत्समभिजुहोमि स्वाहा ॥१०॥ पूर्णहोमँ यशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति । वरँ वृणे यशसा भामि लोके स्वाहा ॥११॥ इन्द्रामवदात्तमो वः परस्तादहँ वो ज्योतिर्म्मामभ्येत सर्व्वे स्वाहा ॥१२॥ अन्नँ वा एकश्छन्दस्यमन्नँ ह्येकं भूतेभ्यश्छन्दयति स्वाहा ॥१३॥ श्रीर्व्वा एषा यत्सत्वानो विरोचनो मयि सत्वमवदधातु स्वाहा ॥१४॥ अन्नस्य घृतमेव रसस्तेजः सम्पत्कामो जुहोमि स्वाहा ॥१५॥ क्षुधे स्वाहा ॥१६॥ क्षुत्पिपासाभ्यां स्वाहा ॥१७॥ मा भैषीर्न्न मरिष्यसि जरदष्टिर्भविष्यसि । रसँ विषस्य नाविदमुग्रम्फेन मिवास्यम् ॥१६॥ तुर गोपाय मा नाथ गोपाय मा । अशस्तिभ्यो अरातिभ्यः स्वस्त्यनमसि ॥१९॥ इति षष्ठः॥२/६॥

हतस्ते अत्रिणा क्रिमिर्हतस्ते जमदग्निना । गोतमेन तिनीकृतोऽत्रैव त्वा क्रिमे ब्रह्मवद्यमवद्यम् ॥१॥ भरद्वाजस्य मन्त्रेण सं तिनोमि क्रिमे त्वा ॥२॥ क्रिमिँ ह वक्त्रतो दिनं क्रिमिमान्त्रानुचारिणम् । क्रिमिं द्विशीर्षमर्ज्जुनं द्विशीर्षँ ह चतुर्हनुम् ॥३॥ हतः क्रिमीणां क्षुद्रको हता माता हतः पिता । अथैषां भिन्नकःकुम्भो य एषाँ विषधानकः॥४॥ क्रिमिमिन्द्रस्य बाहुभ्यामवाञ्चं पातयामसि ॥५॥ हताः क्रिमयः साशातिकाः सनील मक्षिकाः ॥६॥ इति सप्तमः ॥२/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अर्हणा पुत्रवाससा धेनुरभवद्य मे । सा नः पयस्वती दुहा उत्तरामुत्तरा७समाम् ॥१॥ इदमहमिमां पद्याँ विराज-मन्नाद्यायाधितिष्ठामि ॥२॥ या ओषधीः सोमराज्ञीर्ब्बह्वीः शतविचक्षणाः ता मह्यमस्मिन्नासनेऽच्छिद्राः शर्म्म यच्छत ॥३॥ या ओषधीः सोमराज्ञीर्व्विष्टिताः पृथिवीमनु । ता मह्यमस्मिन् पादयोरच्छिद्राः शर्म्म यच्छत ॥४॥ यतो देवीः प्रतिपश्या-म्यापस्ततो मा राद्धिरागच्छतु ॥५॥ सव्यं पादमवनेनिजेऽस्मिन् राष्ट्रे श्रियं दधे ॥६॥ दक्षिणं पादमवनेनिजेऽस्मिन् राष्ट्रे श्रियमावेशयामि ॥७॥ पूर्व्वमन्यमपरमन्यमुभौ पादाववनेनिजे राष्ट्रस्यर्ध्या अभयस्यावरुध्यै ॥८॥ अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासम् ॥९॥ यशोऽसि यशो मयि धेहि ॥१०॥ यशसो यशोऽसि ॥११॥ यशसो भक्षोऽसि महसो भक्षोऽसि श्रीर्भक्षोऽसि श्रियं मयि धेहि स्वाहा ॥१२॥ मुञ्च गाँ वरुण पाशाद्विषन्तं मेऽभि धेहि । तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकम् ॥१३॥ माता रुद्राणां दुहिता वसूनाँ स्वसादियानाममृतस्य नाभिः। प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिँ वधिष्ट॥१४॥ इत्यष्टमः॥२/८॥ इति द्वितीयः प्रपाठकः॥

इति छान्दोग्यमन्त्रब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

छान्दोग्यब्राह्मणे

तृतीयप्रपाठकाद्दशमप्रपाठकपर्यन्तम्

छान्दोग्योपनिषद्ब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ छान्दोग्योपनिषद्ब्राह्मणम्

छान्दोग्यब्राह्मणे तृतीयः प्रपाठकः

ॐआप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्व्वाणि सर्व्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्य्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरतेय उपनिषत्सु धर्म्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐशान्तिः शान्तिः शान्तिः ॥

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योप-व्याख्यानम् ॥१॥ एषां भूतानां पृथिवीरसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचस्सामरसस्साम्न उद्गीथो रसः॥२॥ स एष रसानाँ रसतमः परमः परार्द्ध्योऽष्टमो यदुद्गीथः ॥३॥ कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ॥४॥ वागेवर्क्प्राणः सामो मित्येतदक्षरमुद्गीथस्तद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क्च साम च ॥५॥ तदेतन्मिथुन मोमित्येतस्मिन्नक्षरे सँसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ॥६॥ आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥७॥ तद्वा एतदनुज्ञाक्षरं यद्धि किञ्चानुजानात्योमित्येव तदा हैषा एव समृद्धिर्य्यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवँ विद्वानक्षरमुद्गीथमुपास्ते ॥८॥ तेनेयं त्रयी विद्या वर्त्तत ॐ इत्याश्रावयत्योमिति शँसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महिम्ना रसेन ॥९॥ तेनोभौ कुरुतो यश्चैतदेवँ वेद यश्च न वेद नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥१०॥ इति प्रथमः॥३/१॥

देवासुरा ह वै यत्र सँयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजहुरनेनैनानभविष्याम इति ॥१॥ तेह नासिक्यं प्राण-मुद्गीथमुपासाञ्चक्रिरे तँहासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः ॥२॥ अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे ताँहासुराः पाप्मना विविधु-स्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा ॥३॥ अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयञ्चादर्शनीयञ्च पाप्मना ह्येतद्विद्धम् ॥४॥ अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयँ श्रृणोति श्रवणीयञ्चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ॥५॥ अथ ह मन उद्गीथमुपासा-ञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयँ सङ्कल्पयते सङ्कल्पनीयञ्चासङ्कल्पनीयञ्च पाप्मना ह्येतद्विद्धम् ॥६॥ अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे तँ हासुरा ऋत्वा विदध्वँसुर्य्यथाश्मानमाखणमृत्वा विध्वँसेत ॥७॥ एवँ यथाऽश्मानमाखणमृत्वा विध्वँसत एवँ हैव स विध्वँसते य एवँ विदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः ॥८॥ नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदश्नाति यत्पिबति तेनेतरान्प्राणानवत्येतमु एवान्ततोऽवित्वोत्क्रामति व्याददात्येवान्तत इति ॥९॥ तँ हाङ्गिरा उद्गीथमुपासाञ्चक्र एतमु एवाङ्गिरसं मन्यन्तेऽङ्गानाँ यद्रसः॥१०॥ तेन तँ ह बृहस्पतिरुद्गीथमुपासाञ्चक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहति तस्या एष पतिः॥११॥ तेन तँ हायास्यमुद्गीथमुपासाञ्चक्र एतमु एवायास्यं मन्यन्त आस्याद्यदयते ॥१२॥ तेन तँ ह बको दाल्भ्यो विदाञ्चकार । सह नैमिषीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति ॥१३॥ आगाता ह वै कामानां भवति य एतदेवँ विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥१४॥ इति द्वितीयः॥३/२॥

अथाधिदैवतँ य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति । उद्यँस्तमोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवँ वेद ॥१॥ समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिमममुं चोद्गीथमुपासीत ॥२॥ अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः। अथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक् । तस्मादप्राणन्ननपानन्वाचमभिव्याहरति ॥३॥ या वाक्सर्क्तस्मादप्राणन्ननपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्ननपानन्साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायति ॥४॥ अतो यान्यन्यानि वीर्यवन्ति कर्म्माणि यथाग्नेर्म्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राण-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्नपानँस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥५॥ अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्व्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदँ सर्वँ स्थितम् ॥६॥ द्यौरेवोदन्तरिक्षं गीः पृथिवी थमादित्य एवोद्वायुर्ग्गीरग्निस्थँ सामवेद एवोद्यजुर्व्वेदो गीर्ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोऽहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतान्येवँ विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ॥७॥ अथ खल्वाशीः समृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्य-न्स्यात्तत्सामोपधावेत् ॥८॥ यस्यामृचि तामृचँ यदार्षेयँ तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् ॥९॥ येन छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तँ स्तोममुपधावेत् ॥१०॥ यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेत् ॥११॥ आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽ-भ्याशो ह यदस्मै स कामः समृध्येत यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥१२॥ इति तृतीयः॥३/३॥

ओ३मित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योप-व्याख्यानम् ॥१॥ देवा वै मृत्योर्ब्बिभ्यतस्त्रयीँ विद्यां प्राविशँस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयँस्तच्छन्दसां छन्दस्त्वम् ॥२॥ तानु तत्र मृत्युर्य्यथा मत्स्यमुदके परिपश्येदेवं पर्य्यपश्यदृचि साम्नि यजुषि । ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् ॥३॥ यदा वा ऋचमाप्नोत्योमित्येवाति-स्वरत्येवँ सामैवँ यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्प्रविष्य देवा अमृता अभया अभवन् ॥४॥ स य एतदेवँ विद्वानक्षरं प्रणौत्येतदेवाक्षरँ स्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति ॥५॥ इति चतुर्थः॥३/४॥

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥१॥ एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मीँस्त्वं पर्य्यावर्त्तयाद्बहवो वै ते भविष्यन्तीत्यधिदैवतम् ॥२॥ अथाध्यात्मँ य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥३॥ एतमु एवहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणाँस्त्वं भूमानमभिगायताद्बहवो वै मे भविष्यन्तीति ॥४॥ अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृसदनाद्धैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ॥५॥ इति पञ्चमः॥३/५॥

इयमेवर्ग्गग्निः साम तदेतदेतस्यामृच्यध्यूढँ साम तस्मादृच्यध्यूढँ साम गीयत इयमेव साग्निरमस्तत्साम ॥१॥ अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्यामृच्यध्यूढँ साम । तस्मादृच्यध्यूढँ साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम ॥२॥ द्यौरेवर्ग्गादित्यः साम तदेतदेतस्यामृच्यध्यूढँ साम । तस्मादृच्यध्यूढँ साम गीयते । द्यौरेव सादित्योऽमस्तत्साम ॥३॥ नक्षत्राण्येवर्क्क्चन्द्रमाः साम तदेतदेतस्यामृच्यध्यूढँ साम । तस्मादृच्यध्यूढँ साम गीयते । नक्षत्राण्येव सा चन्द्रमा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अमस्तत्साम ॥४॥ अथ यदेतदादित्यस्य शुक्लं भाः सैवर्ग्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढँ साम । तस्मादृच्यध्यूढँ साम गीयते ॥५॥ अथ यदेवैतदादित्यस्य शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्सामाथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्य-केश आप्रणखात्सर्व्व एव सुवर्णः॥६॥ तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्व्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्व्वेभ्यः पाप्मभ्यो य एवँ वेद ॥७॥ तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्वेवोद्गातैतस्य हि गाता । स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥८॥ इति षष्ठः॥३/६॥

अथाध्यात्मं वागेवर्क्प्राणः साम तदेतदेतस्यामृच्यध्यूढँ साम तस्मादृच्यध्यूढँ साम गीयते । वागेव सा प्राणोऽमस्त-त्साम ॥१॥ चक्षुरेवर्ग्गात्मा साम तदेतदेतस्यामृच्यध्यूढँ साम तस्मादृच्यध्यूढँ साम गीयते । चक्षुरेव सात्मामस्तत्साम ॥२॥ श्रोत्रमेवर्ग्मनःसाम तदेतदेतस्यामृच्यध्यूढँ साम तस्मादृच्यध्यूढँ साम गीयते । श्रोत्रमेव सा मनोऽमस्तत्साम ॥३॥ अथ यदेतदक्ष्णः शुक्लं भाः सैवर्ग्गथ यन्नीलं परः कृष्णं तत्साम । तदेतदेतस्यामृच्यध्यूढँ साम । तस्मादृच्यध्यूढँ साम गीयते । अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥४॥ अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म । तस्यैतस्य तदेव रूपँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदमुष्य रूपँ यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥५॥ स एष ये चैतस्मादर्व्वाञ्चो लोकास्तेंषां चेष्टे मनुष्यकामाना-ञ्चेति । तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः॥६॥ अथ य एतदेवँ विद्वान्साम गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्ताँश्चाप्नोति देवकामाँश्च ॥७॥ अथानेनैव ये चैतस्मादर्व्वाञ्चो लोकास्ताँ-श्चाप्नोति मनुष्यकामाँश्च तस्मादु हैवं विदुद्गता ब्रूयात् ॥८॥ कं ते काममागायानीत्येष ह्येव कामागानस्येष्टे य एवँ विद्वान्साम गायति साम गायति ॥९॥ इति सप्तमः॥३/७॥

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्य-श्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथाँ वदाम इति ॥१॥ तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्व्वदतोर्व्वाचँ श्रोष्यामीति ॥२॥ स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच ॥३॥ का साम्नो गतिरिति स्वर इति होवाच । स्वरस्य का गतिरिति प्राण इति होवाच । प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच ॥४॥ अपां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्ग्गँल्लोकमतिनयेदिति होवाच स्वर्ग्गँ वयँ ल्लोकँ सामाभिसँस्थापयामः स्वर्ग्गसँस्थावँहि सामेति ॥५॥ तँह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितँ वै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति ॥६॥ हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययँल्लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठाँल्लोकमतिनयेदिति होवाच प्रतिष्ठाँ वयँल्लोकँ सामाभिसँस्थापयामः प्रतिष्ठा सँस्तावँ हि सामेति ॥७॥ तँह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाच ॥८॥ इत्यष्टमः॥३/८॥

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्व्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तँ यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् ॥१॥ स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवँ विद्वान्परोवरीयाँस-मुद्गीथमुपास्ते ॥२॥ तँ हैतमतिधन्वा शौनक उदर शाण्डिल्या-योक्त्वोवाच यावत्त एनं प्रजायामुद्गीथँ वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति ॥३॥ तथामुष्मिँ-ल्लोके लोक इति । स य एतदेवँ विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथामुष्मिँल्लोके लोक इति लोके लोक इति ॥४॥ इति नवमः॥३/९॥

मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥१॥ स हेभ्यं कुल्माषान्खादन्तं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बिभिक्षे तँ होवाच । नेतोऽन्ये विद्यन्ते यच्च ये म इम उप-निहिता इति ॥२॥ एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टँ वै मे पीतँ स्यादिति होवाच ॥३॥ न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति ॥४॥ स ह खादित्वातिशेषा-ञ्जायाया आजहार साग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ॥५॥ स ह प्रातः सञ्जिहान उवाच यद्बतान्नस्य लभेमहि लभेमहि धनमात्राँ राजासौ यक्ष्यते स मा सर्व्वैरार्त्विज्यै-र्व्वृणीतेति ॥६॥ तं जायोवाच हन्त पत इम एव कुल्माषा इति तान्खादित्वामुँ यज्ञँ विततमेयाय ॥७॥ तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच॥८॥ प्रस्तोतर्य्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ॥९॥ एवमेवोद्गातारमुवाचोद्गातर्य्या देवतोद्गीथ-मन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति ॥१०॥ एवमेव प्रतिहर्त्तारमुवाच प्रतिहर्त्तर्य्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रति हरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णी मासांचक्रिरे ॥११॥ इति दशमः॥३/१०॥

अथ हैनँ यजमन उवाच भगवन्तँ वा अहँ विविदिषाणी-त्युषस्तिरस्मि चाक्रायण इति होवाच ॥१॥ स होवाच भगवन्तँ वा अहमेभिस्सर्व्वैरार्त्विज्यैः पर्य्येषिषं भगवतो वा अहमवि-त्यान्यानवृषि ॥२॥ भगवाँस्त्वेव मे सर्व्वैरार्त्विज्यैरिति तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवताँ यावत्तेभ्यो धनं दद्यात्तावन्मम

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दद्या इति तथेति ह यजमान उवाच ॥३॥ अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्य्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवान-वोचत्कतमा सा देवतेति ॥४॥ प्राण इति होवाच सर्व्वाणि ह वा इमानि भूतानि प्राणमेवाभिसँविशन्ति प्राणमभ्युज्जिहते । सैषा देवता प्रस्तावमन्वायत्ता । तां चेदविद्वान् प्रस्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥५॥ अथ हैनमुद्गातोपससादो-द्गातर्य्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥६॥ आदित्य इति होवाच सर्व्वाणि ह वा इमानि भूतान्यादित्य-मुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वा-नुदगास्यो मुर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥७॥ अथ हैनं प्रतिहर्त्तोपससाद प्रतिहर्त्तर्य्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवान-वोचत्कतमा सा देवतेति ॥८॥ अन्नमिति होवाच सर्व्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्य-त्तथोक्तस्य मयेति तथोक्तस्य मयेति ॥९॥ इत्येकादशः॥३/११॥

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्ववाज ॥१॥ तस्मै श्वा श्वेतः प्रादुर्ब्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति ॥२॥ तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ॥३॥ ते ह यथैवेह बहिष्पवमानेन स्तोष्यमाणाः सँरब्धाः सर्प्पन्तीत्येवमा-ससृपुस्ते ह समुपविश्य हिं चक्रुः॥४॥ ओऽ३मदाऽ३मोंऽ३-पिबाऽ३मोऽ३म् देवो वरुणः प्रजापतिः सविताऽ२न्नमिहाऽ२हरद न्नपतेऽ३न्नमिहाऽ२हराऽ२हरोऽ३मिति ॥५॥ इति द्वादशः॥३/१२॥

अयँवाव लोको हाउकारो वायुर्हाइकारश्चन्द्रमा अथकारः। आत्मेहकारोऽग्निरीकारः ॥१॥ आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोइकारः प्रजापतिर्हिङ्कारः प्राणः स्वरोऽन्नँ या वाग्विराट्॥२॥ अनिरुक्तस्त्रयोदशस्स्तोभस्सञ्चरो हुङ्कारः ॥३॥ दुग्धेऽस्मै वाग्दोहँ यो वाचो दोहोऽन्नवानन्नादो भवति य एता मेवँ साम्नामुपनिषदँ वेदोपनिषदँ वेद ॥४॥इति त्रयोदशः॥३/१३॥

इति तृतीयः प्रपाठकः

अथ चतुर्थः प्रपाठकः

ॐसमस्तस्य खलु साम्न उपासनँ साधु यत्खलु साधु तत्सामेत्याचक्षते यदसाधु तदसामेति ॥१॥ तदुताप्याहु-स्साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैन-मुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥२॥ अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः॥३॥ स य एतदेवँ विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनँ साधवो धर्म्मा आ च गच्छेयुरुप च न मेयुः ॥४॥ इति प्रथमः॥४/१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

लोकेषु पञ्चविधँ सामोपासीत पृथिवी हिङ्कारः। अग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्न्निधनमित्यूर्ध्वेषु ॥१॥ अथावृत्तेषु द्यौर्हिङ्कार आदित्यः प्रस्तावोऽन्तरिक्षमुद्गीथो-ऽग्निः प्रतिहारः पृथिवी निधनम् ॥२॥ कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवँ विद्वाँल्लोकेषु पञ्चविधँ सामोपास्ते ॥३॥ इति द्वितीयः॥४/२॥

वृष्टौ पञ्चविधँ सामोपासीत पुरोवातो हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनम् ॥१॥ वर्षति हास्मै वर्षयति ह य एतदेवँ विद्वान्वृष्टौ पञ्चविधँ सामोपास्ते ॥२॥इति तृतीयः॥४/३॥

सर्व्वास्वप्सु पञ्चविधँ सामोपासीत मेघो यत्सम्प्लवते स हिङ्कारो यद्वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् ॥१॥ न हाप्सु प्रेत्यप्सुमान्भवति य एतदेवँ विद्वान्सर्व्वास्वप्सु पञ्चविधँ सामोपास्ते ॥२॥ इति चतुर्थः॥४/४॥

ऋतुषु पञ्चविधँ सामोपासीत वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम् ॥१॥ कल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेवँ विद्वानृतुषु पञ्चविधँ सामोपास्ते ॥२॥ इति पञ्चमः॥४/५॥

पशुषु पञ्चविधँ सामोपासीताजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥१॥ भवन्ति हास्य पशवः पशुमान्भवति य एतदेवँ विद्वान्पशुषु पञ्चविधँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सामोपास्ते ॥२॥ इति षष्ठः॥४/६॥

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयाँसि वा एतानि ॥१॥ परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवँ विद्वान्प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य ॥२॥ इति सप्तमः॥४/७॥

अथ सप्तविधस्य वाचि सप्तविधँ सामोपासीत यत्किञ्च वाचो हुमिति स हिङ्कारो यत्प्रेति स प्रस्तावो यदेति स आदिः॥१॥ यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम् ॥२॥ दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवँ विद्वान्वाचि सप्तविधँ सामोपास्ते ॥३॥ इत्यष्टमः॥४/८॥

अथ खल्वमुमादित्यँ सप्तविधँ सामोपासीत सर्व्वदा समस्तेन साम मां प्रति मां प्रतीति सर्व्वेण समस्तेन साम ॥१॥ तस्मिन्निमानि सर्व्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिङ्कारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिङ्कुर्व्वन्ति हिङ्कारभाजिनो ह्येतस्य साम्नः ॥२॥ अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशँसाकामाः प्रस्तावभाजिनो ह्येतस्य साम्नः ॥३॥ अथ यत्सङ्गववेलायाँ स आदित्यस्तदस्य वयाँस्यन्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्भणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः॥४॥ अथ यत्सम्प्रति मध्यन्दिने

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स उद्गीथस्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः॥५॥ अथ यदूर्ध्वं मध्यन्दिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्ता-स्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः ॥६॥ अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षँ श्वभ्रमित्युपद्रव-न्त्युपद्रवभाजिनो ह्येतस्य साम्नः ॥७॥ अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधन-भाजिनो ह्येतस्य साम्न एवं खल्वमुमादित्यँ सप्तविधँ सामोपास्ते ॥८॥ इति नवमः ॥४/९॥

अथ खल्वात्मसंमितमतिमृत्युसप्तविधँ सामोपासीत हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम् ॥१॥ आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत इहैकं तत्समम् ॥२॥ उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्समम् ॥३॥ निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ह वा एतानि द्वाविँशतिरक्षराणि ॥४॥ एकविँशत्यादित्यमाप्नोत्येकविँशो वा इतोऽसावादित्यो द्वाविँशेन परमादित्याज्जयति तन्नाकं तद्विशोकम् ॥५॥ आप्नोति हादित्यस्य जयं परो हास्यादित्य जयाज्जयो भवति य एतदेवँ विद्वानात्मसंमितमतिमृत्यु सप्तविधँ सामोपास्ते सामोपास्ते ॥६॥ इति दशमः॥४/१०॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मनो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् ॥१॥ स य एवमेतद्गायत्रं प्राणेषु प्रोतँ वेद प्राणी भवति सर्व्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या महामनाः स्यात्तद्व्रतम् ॥२॥ इत्येकादशः ॥४/११॥

अभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनँ सँशाम्यति तन्निधनमेतद्रथन्तरमग्नौ प्रोतम् ॥१॥ स य एवमेतद्रथन्तरमग्नौ प्रोतँ वेद ब्रह्मवर्च्चस्यन्नादो भवति सर्व्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ॥२॥ इति द्वादशः॥४/१२॥

उपमन्त्रयते स हिङ्कारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीँ सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् ॥१॥ स य एवमेतद्वामदेव्यं मिथुने प्रोतँ वेद मिथुनी भवति मिथुनान्मिथुनात्प्रजायते सर्व्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न काञ्चन परिहरेत्तद्व्रतम् ॥२॥ इति त्रयोदशः॥४/१३॥

उद्यन्हिङ्कार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तँयन्निधनमेतद्बृहदादित्ये प्रोतम् ॥१॥ स य एवमेतद्बृहदादित्ये प्रोतँ वेद तेजस्व्यन्नादो भवति सर्व्वमायुरेति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या तपन्तं न निन्देत्तद्व्रतम् ॥२॥ इति चतुर्दशः॥४/१४॥

अभ्राणि सम्प्लवन्ते स हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्ज्जन्ये प्रोतम् ॥१॥ स य एवमेतद्वैरूपं पर्ज्जन्ये प्रोतँ वेद विरूपाँश्च सुरूपाँश्च पशूनवरुन्धे सर्व्व-मायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या वर्षन्तं न निन्देत्तद्व्रतम् ॥२॥ इति पञ्चदशः॥४/१५॥

वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शर-त्प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम् ॥१॥ स य एवमेतद्वैराजमृतुषु प्रोतँ वेद विराजति प्रजया पशुभिर्ब्रह्म-वर्च्चसेन सर्व्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्यर्त्तून्न निन्देत्तद्व्रतम् ॥२॥ इति षोडशः॥४/१६॥

पृथिवी हिङ्कारोऽतरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्य्यो लोकेषु प्रोताः ॥१॥ स य एवमेताः शक्वर्य्यो लोकेषु प्रोता वेद लोकी भवति सर्व्व-मायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या लोकान्न निन्देत्तद्व्रतम् ॥२॥ इति सप्तदशः॥४/१७॥

अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः॥१॥ स य एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान् भवति सर्व्वमायुरेति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या पशून्न निन्देत्तद्व्रतम् ॥२॥ इत्यष्टादशः॥४/१८॥

लोम हिङ्कारस्त्वक्प्रस्तावो माँसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् ॥१॥ स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतँ वेदाङ्गी भवति नाङ्गेन विहूर्च्छति सर्व्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या सँवत्सरं मज्ज्ञो नाश्नीयात्तद्व्रतं मज्ज्ञो नाश्नीयादिति वा ॥२॥ इत्येकोनविंशः॥४/१९॥

अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतम् ॥१॥ स य एवमेतद्राजनं देवतासु प्रोतँ वेदैतासामेव देवतानाँ स लोकताँ सार्ष्टिताँ सायुज्यं गच्छति सर्व्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्त्या ब्राह्मणान्न निन्देत्तद्व्रतम् ॥२॥ इति विंशः॥४/२०॥

त्रयी विद्या हिङ्कारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्व्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाँसि मरीचयः प्रतिहारः सर्प्पा गन्धर्व्वाः पितरस्तन्निधनमेतत्साम सर्व्वस्मिन्प्रोतम् ॥१॥ स य एवमेतत्साम सर्व्वस्मिन्प्रोतँ वेद सर्व्वँह भवति ॥२॥ तदेष श्लोको यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति ॥३॥ यस्तद्वेद स वेद सर्व्वँ सर्व्वा दिशो बलिमस्मै हरन्ति सर्व्वमस्मीत्युपासीत तद्व्रतं तद्व्रतम् ॥४॥ इत्येकविँशः॥४/२१॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विनर्द्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्न्निरुक्तः सोमस्य मृदु श्लक्ष्णँ वायोः श्लक्ष्णँ बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तँ वरुणस्य तान्सर्व्वा-नेवोपसेवेत वारुणं त्वेव वर्ज्जयेत् ॥१॥ अमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्ग्गँल्लोकँ यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्तः स्तुवीत ॥२॥ सर्व्वे स्वरा इन्द्रस्यात्मानः सर्व्व ऊष्माणः प्रजापतेरात्मानः सर्व्वे स्पर्शा मृत्योरात्मानस्तँ यदि स्वरेषूपालभेतेन्द्रँ शरणं प्रपन्नोऽभूवँ स त्वा प्रतिवक्षती-त्येनं ब्रूयात् ॥३॥ अथ यद्येनमूष्मषूपालभेत प्रजापतिँ शरणं प्रपन्नोऽभूवँ स त्वा प्रतिपेक्षतीत्येनं ब्रूयादथ यद्येनँ स्पर्शेषूपा-लभेत मृत्युँ शरणं प्रपन्नोऽभूवँ स त्वा प्रति वक्षतीत्येनं ब्रूयात् ॥४॥ सर्व्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति सर्व्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्व्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥५॥ इति द्वाविँशः॥४/२२॥

त्रयो धर्म्मस्कन्दा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्य्याचार्य्यकुलवासी तृतीयोऽत्यन्तमात्मान-माचार्य्यकुलेऽवसादयन् सर्व्व एते पुण्यलोका भवन्ति ब्रह्मसँस्थोऽमृतत्वमेति ॥१॥ प्रजपतिर्ल्लोकानभ्यतपत्तेभ्यो-ऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि सम्प्रास्रवन्त भूर्भुवःस्वरिति ॥२॥ तान्यभ्यतप-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्तेभ्योऽभितप्तेभ्य ॐकारः सम्प्रास्रवत्तद्यथा शङ्कुना सर्व्वाणि पर्णानि सन्तृण्णान्येवमोङ्कारेण सर्व्वा वाक्सन्तृण्णोङ्कार एवेदँ सर्व्वमोङ्कार एवेदँ सर्व्वम् ॥३॥ इति त्रयोविंशः॥४/२३॥

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनँ रुद्राणां माध्यन्दिनँ सवनमादित्यानां च विश्वेषां च देवानां तृतीय-सवनम् ॥१॥ क्व तर्हि यजमानस्य लोक इति स यस्तं न विद्यात्कथं कुर्य्यादथ विद्वान्कुर्य्यात् ॥२॥ पुरा प्रातरनुवाक-स्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासवँ सामाभिगायति ॥३॥

१ २ २ १ २ २ २ १
लोकद्वारमपावार्णू३। पश्येमत्वावयँरा३१२१२। हिम्आ३२।
१ २ १ १ १
ज्यायो । आ३३४५ इति ॥४॥

अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥५॥ अत्र यजमानः परस्तादायुषः स्वाहापजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातःसवनँ सम्प्रयच्छन्ति ॥६॥ पुरा माध्यन्दिनस्य सवनस्योपाकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रँ सामाभिगायति ॥७॥

१ २ २ १ २ २ २ १
लोकद्वारमपावार्णू३। पश्येमत्वावयँवैरा३१२१२। हिम्आ३२।
१ २ १ १ १
ज्यायो । आ३३४५ । इति ॥८॥

अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानय विन्दैष वै यजमानस्य लोक एतास्मि ॥९॥ अत्र यजमानः परस्तादायुषः स्वाहापजहि परिघमित्युक्त्वोत्तिष्ठति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्मै रुद्रा माध्यन्दिनँ सवनँ सम्प्रयच्छन्ति ॥१०॥ पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख उपविश्य आदित्यँ स वैश्वदेवँ सामाभिगायति ॥११॥

१ र र १ र र २ २
लोकद्वारमपावार्णू३२। पश्येमत्वावयँस्वारा३१२१२। हिम्
१ २ १ १ १
आ३२। ज्यायो । आ३३४५ इति ॥१२॥ आदित्यमथ वैश्वदेवम् ।
१ र र १ र र २ १
लोकद्वारमपावार्णू३२। पश्येमत्वावयँसाम्रा३१२१२। हिम्आ३२।
१ २ १ १ १
ज्यायो । आ३३४५ इति ॥१३॥

अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दत ॥१४॥ एष वै यजमानस्य लोक एतास्म्यत्र यजमानः परस्तादायुषः स्वाहापहत परिघमित्युक्त्वोत्तिष्ठति ॥१५॥ तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवनँ सम्प्रयच्छन्त्येष ह वै यज्ञस्य मात्राँ वेद य एवँ वेद य एवँ वेद ॥१६॥ इति चतुर्विंशः॥४/२४॥ **इति चतुर्थः प्रपाठकः ॥**

अथ पञ्चमः प्रपाठकः

ओ३म्असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीन वँशोऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥१॥ तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः। ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः ॥२॥ एतमृग्वेद-मभ्यतपँस्तस्याभितप्तस्य यशस्तेज इन्द्रियँ वीर्य्यमन्नाद्यँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रसोऽजायत ॥३॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेत-दादित्यस्य रोहितँ रूपम् ॥४॥ इति प्रथमः॥५/१॥

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूँष्येव मधुकृतो यजुर्व्वेद एव पुष्पं ता अमृता आपः॥१॥ तानि वा एतानि यजूँष्येतँ यजुर्व्वेदमभ्यतपँ स्तस्याभितप्तस्य यशस्तेज इन्द्रियँ वीर्य्यमन्नाद्यँ रसोऽजायत ॥२॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लँ रूपम् ॥३॥ इति द्वितीयः॥५/२॥

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता आपः॥१॥ तानि वा एतानि सामान्येतँ सामवेदमभ्यतपँ स्तस्याभितप्तस्य यशस्तेज इन्द्रियँ वीर्य्यमन्नाद्यँ रसोऽजायत ॥२॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णँ रूपम् ॥३॥ इति तृतीयः॥५/३॥

अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्यो-ऽथर्व्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः ॥१॥ ते वा एतेऽथर्व्वाङ्गिरस एतदितिहासपुराणमभ्यतपँ स्तस्याभितप्तस्य यशस्तेज इन्द्रियँ वीर्य्यमन्नाद्यँ रसोऽजायत ॥२॥ तद्व्यक्षरस्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्णँ रूपम् ॥३॥ इति चतुर्थः॥५/४॥

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपः ॥१॥ ते वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एते गुह्या आदेशा एतद्ब्रह्माभ्यतपँस्तस्याभितप्तस्य यशस्तेज इन्द्रियँ वीर्य्यमन्नाद्यँ रसोऽजायत ॥२॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य मध्ये क्षोभत इव ॥३॥ ते वा एते रसानाँ रसा वेदा हि रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि ॥४॥ इति पञ्चमः॥५/५॥

तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसँविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतँ वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसँविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यँ स्वाराज्यं पर्य्येता ॥४॥ इति षष्ठः॥५/६॥

अथ यद्द्वितीयममृतं तद् रुद्रा उपजीवन्तीन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसँविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतँ वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसँविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यँस्वाराज्यं पर्य्येता ॥४॥ इति सप्तमः॥५/७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसँविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतँ वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसँविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेतादित्यानामेव तावदाधिपत्यँ स्वाराज्यं पर्य्येता ॥४॥ इत्यष्टमः॥५/८॥

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसँविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतँ वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसँविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यँ स्वाराज्यं पर्य्येता ॥४॥ इति नवमः॥५/९॥

अथ यत्पञ्चमममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसँविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतँ वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसँविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्विस्तावदूर्ध्व उदेतार्व्वागस्तमेता साध्यानामेव तावदाधिपत्यँ स्वाराज्यं पर्य्येता ॥४॥ इति दशमः॥५/१०॥

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता तदेष श्लोकः ॥१॥ न वै तत्र न निम्लोच नोदियाय कदाचन। देवास्तेनाहँ सत्येन मा विराधिषि ब्रह्मणेति ॥२॥ न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदँ वेद ॥३॥ तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्म्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच॥४॥ इदँ वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय वान्तेवासिने ॥५॥ नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इत्येतदेव ततो भूय इति ॥६॥ इत्येकादशः॥५/११॥

गायत्री वा इदँ सर्व्वं भूतँ यदिदं किं च वाग्वै गायत्री इदँ सर्व्वं भूतं गायति च त्रायते च ॥१॥ या वै सा गायत्रीयँ वाव सा येयं पृथिव्यस्याँ हीदँ सर्व्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ॥२॥ या वै सा पृथिवीयं वाव सा यदिदमस्मि-न्पुरुषे शरीरमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥३॥ यद्वै तत्पुरुषे शरीरमिदँ वाव तद्यदिदमस्मिन्नन्तःपुरुषे हृदयमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥४॥ सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम् ॥५॥ तावानस्य महिमा ततो ज्यायाँश्च पूरुषः। पादोऽस्य सर्व्वा भूतानि त्रिपादस्यामृतं दिवीति ॥६॥ यद्वै तद्ब्रह्मेतीदँ वाव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः ॥७॥ अयँ वाव स योऽयमन्तः पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशः ॥८॥ अयँ वाव स योऽयमन्तर्हृदय आकाश-स्तदेतत्पूर्णमप्रवर्त्ति पूर्णामप्रवर्त्तिनीँश्रियँल्लभते य एवँ वेद ॥९॥ इति द्वादशः॥५/१२॥

तस्य ह वा एतस्य हृदयस्य पञ्चदेवसुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्य-मित्युपासीत तेजस्व्यन्नादो भवति य एवँ वेद ॥१॥ अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रँ स चन्द्रमास्तदेत-च्छ्रीश्च यशश्चेत्युपासीत श्रीमान्यशस्वी भवति य एवँ वेद ॥२॥ अथ योऽस्य प्रत्यङ्सुषिः सोऽपानः सा वाक्सोऽग्निस्तदेतद् ब्रह्मवर्च्चसमन्नाद्यमित्युपासीत ब्रह्मवर्च्चस्यन्नादो भवति य एवँ वेद ॥३॥ अथ योऽस्योदङ्सुषिः स समानस्तन्मनः स पर्ज्जन्यस्तदेतत्कीर्त्तिश्च व्युष्टिश्चेत्युपासीत कीर्त्तिमान्व्युष्टिमान् भवति य एवँ वेद ॥४॥ अथ योऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवँ वेद ॥५॥ ते वा एते पञ्चब्रह्मपुरुषाः स्वर्ग्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्चब्रह्मपुरुषा-न्स्वर्ग्गस्य लोकस्य द्वारपान्वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्ग्गँल्लोकँ य एतानेवं पञ्चब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥६॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्व्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदँ वाव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिः ॥७॥ तस्यैषा दृष्टिर्य्यत्रैतदस्मिञ्छरीरे सँस्पर्शेनोष्णिमानँ विजानाति तस्यैषा श्रुतिर्य्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उप शृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवँ वेद य एवँ वेद ॥८॥ इति त्रयोदशः॥५/१३॥

सर्व्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत । अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्व्वीत ॥१॥ मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्व्वकर्म्मा सर्व्वकामः सर्व्वगन्धस्सर्व्वरस्सर्व्वमिदमभ्यात्तोऽवाक्यनादरः ॥२॥ एष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्व्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वैष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः ॥३॥ सर्व्वकर्म्मा सर्व्वकामः सर्व्वगन्धः सर्व्वरसः सर्व्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः ॥४॥ इति चतुर्दशः॥५/१४॥

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्य्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलँ स एष कोशो वसुधानस्तस्मिन्विश्वमिदँ श्रितम् ॥१॥ तस्य प्राची दिग्जुहूर्न्नाम सहमाना नाम दक्षिणा राज्ञीनाम प्रतीची सुभूता नामोदीची तासाँ वायुर्व्वत्सः स य एतमेवँ वायुं दिशाँ वत्सँ वेद न पुत्ररोदँ रोदिति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोऽहमेतमेवँ वायुं दिशाँ वत्सँ वेद मा पुत्ररोदँ रुदम् ॥२॥ अरिष्टं कोशं प्रपद्येऽमुनामुनामुना प्राणं प्रपद्येऽमुनामुनामुना भूः प्रपद्येऽमुनामुनामुना भुवः प्रपद्येऽमुनामुनामुना स्वः प्रपद्ये-ऽमुनामुनामुना ॥३॥ स यदवोचं प्राणं प्रपद्य इति प्राणो वा इदँ सर्व्वं भूतं यदिदं किञ्च तमेव तत्प्रापत्सि ॥४॥ अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥५॥ अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् ॥६॥ अथ यदवोचँ स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्व्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम् ॥७॥ इति पञ्चदशः॥५/१५॥

पुरुषो वाव यज्ञस्तस्य यानि चतुर्व्विँशतिवर्षाणि तत्प्रातःसवनं चतुर्व्विँशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसव एते हीदँ सर्व्वँ वासयन्ति ॥१॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूया-त्प्राणा वसव इदं मे प्रातः सवनं माध्यन्दिनँ सवनमनु-सन्तनुतेति माहं प्राणानाँ वसूनां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥२॥ अथ यानि चतुश्चत्वारिँशद्वर्षाणि तन्माध्यन्दिनँ सवनं चतुश्चत्वारिँशदक्षरा त्रिष्टुप्त्रैष्टुभं माध्यन्दिनँ सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदँ सर्व्वँ रोदयन्ति ॥३॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इदं मे माध्यन्दिनँ सवनं तृतीयसवनमनु सन्तनुतेति माहं प्राणानाँ रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत एत्यगदो ह भवति ॥४॥ अथ यान्यष्टाचत्वारिँशद्वर्षाणि तत्तृतीयसवनमष्टाचत्वारिँशदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वा वादित्या एते हीदँ सर्व्व-माददते ॥५॥ तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसन्तनुतेति माहं प्राणाना-मादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति ॥६॥ एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशँ वर्षशतमजीवत्प्र ह षोडशँ वर्षशतं जीवति य एवँ वेद ॥७॥ इति षोडशः॥५/१६॥

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः ॥१॥ अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ॥२॥ अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति ॥३॥ अथ यत्तपो दानमार्ज्जवमहिँसा सत्यवचनमिति ता अस्य दक्षिणाः॥४॥ तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवास्यावभृथः ॥५॥ तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेलाया मेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसँशितमसीति तत्रैते द्वे ऋचौ भवतः॥६॥ आदित्प्रत्नस्य रेतसः। उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरँ स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्य्य मगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति॥७॥इति सप्तदशः॥५/१७॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥१॥ तदेतच्चतुष्पाद् ब्रह्म । वाक्पादः प्राणः पादश्चक्षुःपादः श्रोत्रं पाद इत्यध्यात्मम्। अथाधिदैवतमग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभयमेवादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥२॥ वागेव ब्रह्मण श्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्त्या यशसा ब्रह्मवर्च्चसेन य एवँ वेद ॥३॥ प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्त्या यशसा ब्रह्मवर्च्चसेन य एवँ वेद ॥४॥ चक्षुरेव ब्रह्मणश्चतुर्थः पादस्स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्त्या यशसा ब्रह्म वर्च्चसेन य एवँ वेद ॥५॥श्रोत्रमेव ब्रह्मणश्चतुर्थःपादस्स दिग्भिर्ज्ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्त्या यशसा ब्रह्मवर्च्चसेन य एवँ वेद य एवँ वेद ॥६॥ इत्यष्टादशः ॥५/१८॥

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत् । तत्सदासीतत्समभवत्तदाण्डं निरवर्त्तत तत्सँवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवताम् ॥१॥ तद्यद्रजतँ सेयं पृथिवी यत्सुवर्णँ सा द्यौर्य्यज्जरायु ते पर्व्वता यदुल्बँ स मेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकँ स समुद्रः॥२॥ अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्त्सर्व्वाणि च

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भूतानि सर्व्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति सर्व्वाणि च भूतानि सर्व्वे च कामाः ॥३॥ स य एतमेवँ विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनँ साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्निम्रेडेरन् ॥४॥ इत्येकोनविँशः ॥५/१९॥ **इति पञ्चमः प्रपाठकः**

अथ षष्ठः प्रपाठकः

ॐ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस । स ह सर्व्वत आवसथान्मापयाञ्चक्रे सर्व्वत एव मेऽन्नमत्स्यन्तीति ॥१॥ अथ ह हँ सा निशायामतिपेतुस्तद्धैवँ हँसो हँसमभ्युवाद हो होऽयि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्वा मा प्रधाक्षीरिति ॥२॥ तमु ह परः प्रत्युवाच कम्वर एनमेतत्सन्तँ सयुग्वानमिव रैक्वमात्थेति यो नु कथँ सयुग्वा रैक्व इति ॥३॥ यथा कृतायविजितायाधरेयाः सँयन्त्येवमेनँ सर्व्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्व्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥४॥ तदु ह जानश्रुतिः पौत्रायण उपशुश्राव । स ह सञ्जिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्वमात्थेति यो नु कथँ सयुग्वा रैक्व इति ॥५॥ यथा कृतायविजितायाधरेयाः सँयन्त्येवमेनँ सर्व्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्व्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥६॥ स ह क्षत्तान्विष्य नाविदमिति प्रत्येयाय तँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्च्छेति॥७॥ सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश तँ हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्व इत्यहँ ह्यराऽ३ इति ह प्रतिजज्ञे स ह क्षत्ताविदमिति प्रत्येयाय ॥८॥ इति प्रथमः॥६/१॥

तदु ह जानश्रुतिः पौत्रायणः षट्शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे तँहाभ्युवाद ॥१॥ रैक्वेमानि षट्शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवताँ शाधि यां देवतामुपास्स इति ॥२॥ तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति । तदु ह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे ॥३॥ तँ हाभ्युवाद रैक्वेदँ सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायायं ग्रामो यस्मिन्नास्सेन्वेव मा भगवः शाधीति ॥४॥ तस्या ह मुखमुपोद्गृह्णन्नुवाचाजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति ते हैते रैक्वपर्णा नाम महावृषेषु यत्रास्मा उवास स तस्मै होवाच ॥५॥ इति द्वितीयः॥६/२॥

वायुर्व्वाव सँवर्ग्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्य्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति॥१॥ यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्व्वान्सँवृङ्क्त इत्यधिदैवतम् ॥२॥ अथाध्यात्मं प्राणो वाव सँवर्ग्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणँ श्रोत्रं प्राणं मनः प्राणो ह्येवैतान्सर्व्वान्सँवृङ्क्त इति ॥३॥ तौ वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतौ द्वौ सँवर्ग्गौ वायुरेव देवेषु प्राणः प्राणेषु ॥४॥ अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे तस्मा उ ह न ददतुः ॥५॥ स होवाच महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपास्तं कापेय नाभिपश्यन्ति मर्त्त्या अभिप्रतारिन्बहुधा वसन्तँ यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति ॥६॥ तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येयायात्मा देवानां जनिता प्रजानाँ हिरण्यदँष्ट्रो बभसोऽनसूरिर्म्महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्ती-ति वै वयं ब्रह्मचारिन्नेदमुपास्महे दत्तास्मै भिक्षामिति ॥७॥ तस्मा उ ह ददुस्ते वा एते पञ्चान्ये दश सन्तस्तत्कृतं तस्मात्सर्व्वासु दिक्ष्वन्नमेव दशकृतँ सैषा विराडन्नादी तयेदँ सर्व्वं दृष्टँ सर्व्वमस्येदं दृष्टं भवत्यन्नादो भवति य एवँ वेद य एवँ वेद ॥८॥ इति तृतीयः॥६/३॥

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयाञ्चक्रे ब्रह्मचर्य्यं भवति विवत्स्यामि किं गोत्रोऽन्वहमस्मीति ॥१॥ सा हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रुवीथा इति ॥२॥ स ह हारिद्रुमतं गौतममे-त्योवाच ब्रह्मचर्य्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ॥३॥ तँहोवाच किङ्गोत्रो नु सोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमपृच्छं मातरँ सा मा प्रत्यब्रवीद्बह्वहं चरन्ती

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहँ सत्यकामो जाबालोऽस्मि भो इति॥४॥ तँ होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधँ सोम्याहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशलानामबलानां चतुःशता गा निराकृत्योवाचेमाः सोम्यानुसँव्रजेति ता अभिप्रस्तापयन्नुवाच नासहस्रेणावर्त्तयेति स ह वर्षगणं प्रोवास ता यदा सहस्रँ सम्पेदुः॥५॥इति चतुर्थः॥६/४॥

अथ हैनमृषभोऽभ्युवाद सत्यकाम ३ इति भगव इति ह प्रतिशुश्राव प्राप्ताः सोम्य सहस्रँ स्मः प्रापय न आचार्य्यकुलम् ॥१॥ ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम ॥२॥ स य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥३॥ इति पञ्चमः॥६/५॥

अग्निष्टे पादँ वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार । ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमादाय पश्चादग्नेः प्राङ्ङुपोपविवेश ॥१॥ तमग्निरभ्युवाद सत्यकाम ३ इति भगव इति ह प्रति शुश्राव ॥२॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम ॥३॥ स य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्तेऽनन्त-वानस्मिँल्लोके भवत्यनन्तवतो ह लोकाञ्जयति य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते॥४॥इति षष्ठः॥६/६॥

हँसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापया-ञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमादाय पश्चादग्नेः प्राङ्ङुपोपविवेश ॥१॥ तँ हँस उपनिपत्याभ्युवाद सत्यकाम३ इति भगव इति ह प्रति शुश्राव ॥२॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाचाग्निः कला सूर्य्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम ॥३॥ स य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥४॥ इति सप्तमः॥६/७॥

मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापया-ञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमादाय पश्चादग्नेः प्राङ्ङुपोपविवेश ॥१॥ तं मद्गुरुपनिपत्याभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥२॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान्नाम

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥३॥ स य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मण आयतनवा नित्युपास्त आयतनवानस्मिँल्लोके भवत्यायतनवतो ह लोकाञ्जयति य एतमेवँ विद्वाँश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥४॥ इत्यष्टमः॥६/८॥

प्राप हाचार्य्यकुलं तमाचार्य्योऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥१॥ ब्रह्मविदिव वै सोम्य भासि को नु त्वानुशशासेत्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवाँस्त्वेव मे कामे ब्रूयात् ॥२॥ श्रुतँ ह्येव मे भगवद्दृशेभ्य आचार्य्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति तस्मै हैतदेवो वा चात्र ह न किञ्चन वीयायेति वीयायेति॥३॥ इति नवमः॥६/९॥

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्य्यमुवास तस्य ह द्वादशवर्षाण्यग्नीन्परिचचार स ह स्मान्यानन्तेवासिनः समावर्त्तयँस्तँ ह स्मैव न समावर्त्तयति ॥१॥ तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन्परिचचारीन्मा त्वाग्नयः परिप्रवोचन्प्रब्रूह्यस्मा इति तस्मै हाप्रोच्यैव प्रवासाञ्चक्रे ॥२॥ स ह व्याधिनानशितुं दध्रे तमाचार्य्य-जायोवाच ब्रह्मचारिन्नशान किं नु नाश्नासीति । स होवाच बहव इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णो-ऽस्मि नाशिष्यामीति ॥३॥ अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः पर्य्यचारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ॥४॥ स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

होचुर्य्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः॥५॥ इति दशमः॥६/१०॥

अथ हैनं गार्हपत्योनुशशास पृथिव्यग्निरन्नमादित्य इति। स एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥१॥ स य एतमेवँ विद्वानुपास्तेऽपहते पापकृत्याँल्लोकी भवति सर्व्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च य एतमेवँ विद्वानुपास्ते ॥२॥ इत्येकादशः॥६/११॥

अथ हैनमन्वाहार्यपचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा इति । य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥१॥ स य एतमेवँ विद्वानुपास्तेऽपहते पापकृत्याँल्लोकी भवति सर्व्वमायुरेति ज्योग्जीवति नास्यावर-पुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च य एतमेवँ विद्वानुपास्ते ॥२॥ इति द्वादशः॥६/१२॥

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्व्विद्युदिति । य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥१॥ स य एतमेवँ विद्वानुपास्तेऽपहते पापकृत्याँल्लोकी भवति सर्व्वमायुरेति ज्योग्जीवति नास्यावर-पुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च य एतमेवँ विद्वानुपास्ते ॥२॥ इति त्रयोदशः॥६/१३॥

ते होचुरुपकोसलैषा सोम्य तेऽस्मद्विद्यात्मविद्या चाचार्य्यस्तु ते गतिँ वक्तेत्याजगाम हास्याचार्य्यस्तमाचार्य्योऽ-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भ्युवादोपकोसल३ इति ॥१॥ भगव इति ह प्रतिशुश्राव ब्रह्म विद इव सोम्य ते मुखं भाति को नु त्वानुशशासेति को नु मानुशिष्यादृभ्यो इतीहापेव निह्नुत इमे नूनमीदृशा अन्यादृशा इतीहाग्नीनभ्यूदे किं नु सोम्य किल ते वोचन्निति ॥२॥ इदमिति ह प्रतिजज्ञे लोकान्वाव किल सोम्य तेऽवोचन्नहं तु ते तद्वक्षामि यथा पुष्करपलाशा आपो न श्लिष्यन्त एवमेवँ विदि पापं कर्म्म न श्लिष्यन्त इति ब्रवीतु मे भगवानिति तस्मै होवाच ॥३॥ इति चतुर्दशः॥६/१४॥

य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैत-दमृतमभयमेतद्ब्रह्मेति। तद्यद्यप्यस्मिन्सर्प्पिर्व्वोदकँ वा सिञ्चति वर्त्मनी एव गच्छति ॥१॥ एतँ सँयद्वाम इत्याचक्षत एतँहि सर्व्वाणि वामान्यभिसँयन्ति सर्व्वाण्येनं वामान्यभिसँयन्ति य एवँ वेद ॥२॥ एष उ एव वामनीरेष हि सर्व्वाणि वामानि नयति सर्व्वाणि वामानि नयति य एवँ वेद ॥३॥ एष उ एव भामनीरेष हि सर्व्वेषु लोकेषु भाति सर्व्वेषु लोकेषु भाति य एवँ वेद ॥४॥ अथ यदु चैवास्मिञ्छव्यं कुर्व्वन्ति यदि च नार्च्चिष-मेवाभिसम्भवन्त्यर्च्चिषोऽहरह्न आपूर्य्यमाण पक्षमापूर्य्यमाण-पक्षाद्यान्षडुदङ्केति मासाँस्तान्मासेभ्यः सँवत्सरँ सँवत्सरादा-दित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्त्तन्ते नावर्त्तन्ते ॥५॥ इति पञ्चदशः॥६/१५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष ह वै यज्ञो योऽयं पवत एष ह यन्निदँ सर्व्वं पुनाति । यदेष यन्निदँ सर्व्वं पुनाति तस्मादेष एव यज्ञस्तस्य मनश्च वाक्च वर्त्तनी ॥१॥ तयोरन्यतरां मनसा सँस्करोति ब्रह्मा वाचा होताध्वर्य्युरुद्गातान्यतराँस यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यवदति ॥२॥ अन्यतरामेव वर्तनीँ-सँस्करोति हीयतेऽन्यतरा स यथैकपाद्व्रजन्रथो वैकेन चक्रेण वर्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति यज्ञँ रिष्यन्तँ यजमानोऽ-नुरिष्यति स इष्ट्वा पापीयान्भवति ॥३॥ अथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्यवदत्युभे एव वर्त्तनी सँस्कुर्व्वन्ति न हीयतेऽन्यतरा ॥४॥ स यथोभयपाद्व्रजन्रथो वोभाभ्यां चक्राभ्याँ वर्त्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठन्तँ यजमानोऽनुप्रतितिष्ठति स इष्ट्वा श्रेयान् भवति ॥५॥ इति षोडशः॥६/१६॥

प्रजापतिर्ल्लोकानभ्यतपत्तेषां तप्यमानानाँ रसान् प्रावृहदग्गिनं पृथिव्या वायुमन्त्तरिक्षादादित्यं दिवः ॥१॥ स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानाँ रसान्प्रावृह-दग्ग्नेरृचो वायोर्य्यजूँषि सामान्यादित्यात् ॥२॥ स एतां त्रयीँ विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रावृहद्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः॥३॥ तद्यद्यृक्तो रिष्येद्भूः स्वाहेति गार्हपत्ये जुहुयादृचामेव तद्रसेनर्च्चां वीर्य्येणर्च्चां यज्ञस्य विरिष्टँ सन्दधाति ॥४॥ अथ यदि यजुष्टो रिष्येद्भुवः स्वाहेति दक्षिणाग्ग्नौ जुहुयाद्यजुषामेव तद्रसेन यजुषाँ वीर्य्येण

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यजुषाँ यज्ञस्य विरिष्टँ सन्दधाति ॥५॥ अथ यदि सामतो रिष्येत्स्वः स्वाहेत्याहवनीये जुहुयात्साम्नामेव तद्रसेन साम्नाँ वीर्य्येण साम्नाँ यज्ञस्य विरिष्टँ सन्दधाति ॥६॥ तद्यथा लवणेन सुवर्णँ सन्दध्यात्सुवर्णेन रजतँ रजतेन त्रपु त्रपुणा सीसँ सीसेन लोहँल्लोहेन दारु दारु चर्म्मणा ॥७॥ एवमेषाँल्लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्य्येण यज्ञस्य विरिष्टँ सन्दधाति भेषजकृतो ह वा एष यज्ञो यत्रैवँ विद्ब्रह्मा भवति ॥८॥ एष ह वा उदक्प्रवणो यज्ञो यत्रैवँ विद्ब्रह्मा भवत्येवँ विदँ ह वा एषा ब्रह्माणमनुगाथा यतो यत आवर्त्तते तत्तद्गच्छति ॥९॥ मानवो ब्रह्मैवैक ऋत्विक्कुरूनश्वाभिरक्षत्येवँ विद्ध वै ब्रह्मा यज्ञँ यजमानँ सर्व्वाँश्चर्त्विजोऽभिरक्षति तस्मादेवँ विदमेव ब्रह्माणं कुर्व्वीत नानेवँ विदं नानेवँ विदम् ॥१०॥ इति सप्तदशः॥६/१७॥ **इति षष्ठः प्रपाठकः**

अथ सप्तमः प्रपाठकः

ओ३म् यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठस्य ह वै श्रेष्ठस्य भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥१॥ यो ह वै वसिष्ठँ वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठः॥२॥ यो ह वै प्रतिष्ठाँ वेद प्रति ह तिष्ठत्यस्मिँश्च लोकेऽमुष्मिँश्च चक्षुर्व्वाव प्रतिष्ठा ॥३॥ यो ह वै सम्पदँ वेद सँहास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च श्रोत्रँ वाव सम्पत् ॥४॥ यो ह वा आयतनँ वेदायतनँ ह स्वानां भवति मनो ह वा आयतनम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥५॥ अथ ह प्राणा अहँ श्रेयसि व्यूदिरेऽहँ श्रेयानस्म्यहँ श्रेयानस्मीति ॥६॥ ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन्को नः श्रेष्ठ इति तान्होवाच यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स व श्रेष्ठ इति ॥७॥ सा ह वागुच्चक्राम सा सँवत्सरं प्रोष्य पर्य्येत्योवाच कथमशकतर्त्ते मज्जीवितुमिति? यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ॥८॥ चक्षुर्होच्चक्राम तत्सँवत्सरं प्रोष्य पर्य्येत्योवाच कथमशकतर्त्ते मज्जीवितुमिति? यथान्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ॥९॥ श्रोत्रँ होच्चक्राम तत्सँवत्सरं प्रोष्य पर्य्येत्योवाच कथमशकतर्त्ते मज्जीवितुमिति? यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ॥१०॥ मनो होच्चक्राम तत्सँवत्सरं प्रोष्य पर्य्येत्योवाच कथमशकतर्त्ते मज्जीवितुमिति? यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ॥११॥ अथ ह प्राण उच्चिक्रमिषन्स यथा सुहयः षड्वीशशङ्कून्सङ्खिदेदेवमितरान्प्राणान्समखिदत्तँ हाभिसमेत्योचुर्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति ॥१२॥ अथ हैनँ वागुवाच यदहँ वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठासीति ॥१३॥ अथ हैनँ श्रोत्रमुवाच

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदहँ सम्पदस्मि त्वं तत्सम्पदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ॥१४॥ न वै वाचो न चक्षूँषि न श्रोत्राणि न मनाँसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्व्वाणि भवति ॥१५॥ इति प्रथमः॥७/१॥

स होवाच किं मेऽन्नं भविष्यतीति यत्किञ्चिदिदमाश्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्न मनो ह वै नाम प्रत्यक्षं न ह वा एवँ विदि किञ्चनानन्नं भवतीति ॥१॥ स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो ह भवति ॥२॥ तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति ॥३॥ अथ यदि महज्जिगमिषेदमावास्यायान्दीक्षित्वा पौर्णमास्याँ रात्रौ सर्व्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहे-त्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् ॥४॥ वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्सम्पदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् ॥५॥ अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमोनामास्यमा हि ते सर्व्वमिदँ स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यँ श्रैष्ठ्यँ राज्यमाधिपत्यं गमयत्वहमेवेदँ सर्व्वमसानीति ॥६॥ अथ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

खल्वेतयर्च्चा पच्छ आचामति। तत्सवितुर्व्वृणीमह इत्याचामति। वयं देवस्य भोजनमित्याचामति ।श्रेष्ठँ सर्व्वधातममित्याचामति। तुरं भगस्य धीमहीति सर्व्वं पिबति । निर्णिज्य कँसं चमसँ वा पश्चादग्नेः सँविशति चर्म्मणि वा स्थण्डिले वा वाचँयमोऽप्रसाहः। स यदि स्त्रियं पश्येत्समृद्धं कर्म्मेति विद्यात् ॥७॥ तदेष श्लोको यदा कर्म्मसु काम्येषु स्त्रियँ स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने तस्मिन्स्वप्ननिदर्शने ॥८॥ इति द्वितीयः॥७/२॥

श्वेतकेतुर्हारुणेयः पञ्चालानाँ समितिमेयाय तँ ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाशिषत्पितेत्यनु हि भगव इति ॥१॥ वेत्थ यदितोऽधि प्रजाः प्रयन्तीति? न भगव इति । वेत्थ यथा पुनरावर्त्तन्त ३ इति? न भगव इति । वेत्थ पथोर्द्देवयानस्य पितृयाणस्य च व्यावर्त्तना ३ इति न भगव इति ॥२॥ वेत्थ यथासौ लोको न सम्पूर्यत३ इति? न भगव इति । वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति? नैव भगव इति ॥३॥ अथानु किमनुशिष्टोऽवोचथा यो हीमानि न विद्यात्कथँ सोऽनुशिष्टो ब्रुवीतेति । स हायस्तः पितुरर्धमेयाय तँ होवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाशिषमिति ॥४॥ पञ्च मा राजन्यबन्धुः प्रश्नानप्राक्षीत्तेषां नैकञ्चनाशकँ विवक्तुमिति स होवाच यथा मा त्वं तदैतानवदो यथाहमेषां नैकञ्चन वेद यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यमिति ॥५॥ स ह गौतमो राज्ञोऽर्धमेयाय तस्मै ह

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राप्तायार्हाञ्चकार स ह प्रातः सभाग उदेयाय तँ होवाच मानुषस्य भगवन्गौतमवित्तस्य वरँ वृणीथा इति । स होवाच तवैव राजन्मानुषँ वित्तँ यामेव कुमारस्यान्ते वाचमभाषथा-स्तामेव मे ब्रूहीति स ह कृच्छ्री बभूव ॥६॥ तँ ह चिरँ वसेत्याज्ञापयाञ्चकार तँ होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान्गच्छति तस्मादु सर्व्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ॥७॥ इति तृतीयः॥७/३॥

असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समि-द्रश्मयो धूमो हरर्च्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः ॥१॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति ॥२॥ इति चतुर्थः॥७/४॥

पर्ज्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्च्चिरशनिरङ्गारा ह्रादनयो विस्फुलिङ्गाः॥१॥ तस्मिन्नेत-स्मिन्नग्नौ देवाः सोमँ राजानं जुह्वति तस्या आहुतेर्व्वर्षँ सम्भवति ॥२॥ इति पञ्चमः॥७/५॥

पृथिवी वाव गौतमाग्निस्तस्याः सँवत्सर एव समिदा-काशो धूमो रात्रिरर्च्चिर्द्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गाः ॥१॥ तस्मिन्नेतस्मिन्नग्नौ देवाः वर्षं जुह्वति तस्या आहुतेरन्नँ सम्भवति ॥२॥ इति षष्ठः॥७/६॥

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वार्च्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः॥१॥ तस्मिन्नेतस्मि-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रेतः सम्भवति ॥२॥ इति सप्तमः॥७/७॥

योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुप-मन्त्रयते स धूमो योनिरर्च्चिर्य्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः॥१॥ तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्ग्गर्भः सम्भवति ॥२॥ इत्यष्टमः॥७/८॥

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा नव वा मसानन्तः शयित्वा यावद्वाथ जायते ॥१॥ स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितो-ऽग्नय एव हरन्ति यत एवेतो यतः सम्भूतो भवति ॥२॥ इति नवमः॥७/९॥

तद्य इत्थँ विदुः। ये चे मेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाण-पक्षाद्यान्षडुदङ्ङेति मासाँस्तान् ॥१॥ मासेभ्यः सँवत्सरँ सँवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो-ऽमानवः स एनान्ब्रह्म गमयत्येष देवयानः पन्था इति ॥२॥ अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासते ते धूममभि-सम्भवन्ति धूमाद्रात्रिँ रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासाँस्तान्नैते सँवत्सरमभि प्राप्नुवन्ति ॥३॥ मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ॥४॥ तस्मिन्यावत्सम्पात-मुषित्वाथैतमेवाध्वानं पुनर्न्निवर्त्तन्ते यथेतमाकाशमाकाशाद्वायुं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति ॥५॥ अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधि–वनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु दुर्न्निष्प्रपतरँ यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति ॥६॥ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयाँ योनिमापद्येरन्ब्राह्मणयोनिँ वा क्षत्रिययोनिँ वा वैश्ययोनिँ वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयाँ योनिमापद्येरञ्श्वयोनिँ वा सूकरयोनिँ वा चण्डालयोनिँ वा ॥७॥ अथैतयोः पथोर्न्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयँ स्थानं तेनासौ लोको न सम्पूर्य्यते तस्माज्जुगुप्सेत तदेष श्लोकः॥८॥ स्तेनो हिरण्यस्य सुरां पिबँश्च गुरोस्तल्पमावसन्ब्रह्महा चैते पतन्ति चत्वारः पञ्चमश्चाचरँस्तैरिति ॥९॥ अथ ह य एतानेवं पञ्चाग्नीन्वेद न सह तैरप्याचरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवँ वेद य एवँ वेद ॥१०॥ इति दशमः॥७/१०॥

प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमाँसाञ्चक्रुः को न आत्मा किं ब्रह्मेति ॥१॥ ते ह सम्पादयाञ्चक्रुरुद्दालको वै भगवन्तो–ऽयमारुणिः सम्प्रतीममात्मानं वैश्वानरमध्येति तँ हन्ताभ्या–गच्छामेति तँ हाभ्याजग्मुः॥२॥ स ह सम्पादयाञ्चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्व्वमिव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतिपत्स्ये हन्ताहमन्यमभ्यनुशासानीति ॥३॥ तान्होवाचाश्व-पतिर्व्वै भगवन्तोऽयं कैकेयः सम्प्रतीममात्मानँ वैश्वानरमध्येति तँ हन्ताभ्यागच्छामेति तँ हाभ्याजग्मुः॥४॥ तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार स ह प्रातः सञ्जिहान उवाच न मे स्तेनो जनपदे न कदर्य्यो न मद्यपो नानाहिताग्निर्न्नाविद्वान्न स्वैरिस्वैरिणी कुतो यक्ष्यमाणो वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति ॥५॥ ते होचुर्य्येन हैवार्थेन पुरुषश्चरेत्तँ हैव वदेदात्मानमेवेमँ वैश्वानरँ सम्प्रत्यध्येषि तमेव नो ब्रूहीति ॥६॥ तान्होवाच प्रातर्व्वः प्रतिवक्तास्मीति ते ह समित्पाणयः पूर्व्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैवैतदुवाच ॥७॥ इत्येकादशः ॥७/११॥

औपमन्यव कं त्वमात्मानमुपास्स इति । दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मान-मुपास्से तस्मात्तव सुतं प्रसुत मासुतं कुले दृश्यते ॥१॥ अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्च्चसं कुले य एतमेवमात्मानँ वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति ॥२॥ इति द्वादशः॥७/१२॥

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विश्वरूपं कुले दृश्यते ॥१॥ प्रवृत्तोऽश्वतरीरथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्च्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यो यन्मां नागमिष्य इति ॥२॥ इति त्रयोदशः॥७/१३॥

अथ होवाचेन्द्रद्युम्नं भाल्लवेयँ वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृथग् बलय आयन्ति पृथग्रथश्रेणयोऽनुयन्ति ॥१॥ अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्च्चसं कुले य एतमेवमात्मानँ वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्थ उदक्रमिष्यद्यन्मां नागमिष्य इति ॥२॥इति चतुर्दशः॥७/१४॥

अथ होवाच जनँ शार्क्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च ॥१॥ अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्च्चसं कुले य एतमेवमात्मानँ वैश्वानरमुपास्ते सन्देहस्त्वेष आत्मन इति होवाच सन्देहस्ते व्यशीर्य्यद्यन्मां नागमिष्य इति ॥२॥ इति पञ्चदशः॥७/१५॥

अथ होवाच बुडिलमाश्वतराश्विँ वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यप एव भगवो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वँ रयिमा-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्पुष्टिमानसि ॥१॥ अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्च्चसं कुले य एतमेवमात्मानँ वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच बस्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति ॥२॥ इति षोडशः॥७/१६॥

अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाचैष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च ॥१॥ अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्च्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेवात्मन इति होवाच पादौ ते व्यम्लास्येताँ यन्मां नागमिष्य इति ॥२॥ इति सप्तदशः॥७/१७॥

तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानँ वैश्वानरँ विद्वाँसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानँ वैश्वानरमुपास्ते स सर्व्वेषु लोकेषु सर्व्वेषु भूतेषु सर्व्वेष्वा-त्मस्वन्नमत्ति ॥१॥ तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्व्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादवुर एव वेदिर्ल्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्य्यपचन आस्यमाहवनीयः ॥२॥ इत्यष्टादशः ॥७/१८॥

तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयँ स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति ॥१॥ प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्यौस्तृप्यति दिवि तृप्यन्त्याँ यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठत-स्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥२॥ इत्येकोनविँशः॥७/१९॥

अथ यां द्वितीयां जुहुयात्तां जुहुयाद् व्यानाय स्वाहेति व्यानस्तृप्यति ॥१॥ व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥२॥ इति विंशः॥७/२०॥

अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपान-स्तृप्यति ॥१॥ अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्नि-स्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्याँ यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥२॥ इत्येकविँशः॥७/२१॥

अथ यां चतुर्थीं जुहुयात्तां जुहुयात्समानाय स्वाहेति समानस्तृप्यति ॥१॥ समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्ज्जन्यस्तृप्यति पर्ज्जन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्ज्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥२॥ इति द्वाविंशः॥७/२२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहे-त्युदानस्तृप्यति ॥१॥ उदाने तृप्यति त्वक्तृप्यति त्वचि तृप्यन्त्याँ वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥२॥ इति त्रयोविँशः॥७/२३॥

स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात् ॥१॥ अथ य एतदेवँ विद्वानग्निहोत्रं जुहोति तस्य सर्व्वेषु लोकषु सर्व्वेषु भूतेषु सर्व्वेष्वात्मसु हुतं भवति ॥२॥ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवँ हास्य सर्व्वे पाप्मानः प्रदूयन्ते य एतदेवँ विद्वानग्निहोत्रं जुहोति ॥३॥ तस्मादु हैवँ विद्यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतँ स्यादिति तदेष श्लोकः ॥४॥ यथेह क्षुधिता बाला मातरं पर्य्युपासत एवँ सर्व्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति ॥५॥ इति चतुर्विँशः॥७/२४॥

इति सप्तमः प्रपाठकः

अथाष्टमः प्रपाठकः

ॐश्वेतकेतुर्हारुणेय आस तँ ह पितोवाच श्वेतकेतो वस ब्रह्मचर्य्यम् । न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति ॥१॥ स ह द्वादशवर्ष उपेत्य चतुर्विँशतिवर्षः सर्व्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय । तँ ह

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पितोवाच ॥२॥ श्वेतकतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः येनाश्रुतँ श्रुतं भवत्यमतं मतमविज्ञातँ विज्ञातमिति । कथं नु भगव स आदेशो भवतीति ॥३॥ यथा सोम्यैकेन मृत्पिण्डेन सर्व्वं मृण्मयँ विज्ञातँ स्याद्वाचारम्भणँ विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥४॥ यथा सोम्यैकेन लोहमणिना सर्व्वं लोहमयँ विज्ञातँ स्याद्वाचारम्भणँ विकारो नामधेयँल्लोहमित्येव सत्यम् ॥५॥ यथा सोम्यैकेन नखनिकृन्तनेन सर्व्वं कार्ष्णायसँ विज्ञातँ स्याद्वाचारम्भणँ विकारो नामधेयं कृष्णायसमित्येव सत्यमेवँ सोम्य स आदेशो भवतीति॥६॥न वै नूनं भगवन्तस्त एतदवे-दिषुर्य्यद्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन्निति भगवाँस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच ॥७॥ इति प्रथमः॥८/१॥

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत ॥१॥ कुतस्तु खलु सोम्यैवँ स्यादिति होवाच कथमसतः सज्जायेतेति । सत्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ॥२॥ तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत । तत्तेज ऐक्षत बहुस्यां प्रजायेयेति तदपोऽसृजत । तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते ॥३॥ ता आप ऐक्षन्त बहव्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त । तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते ॥४॥ इति द्वितीयः॥८/२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति ॥१॥ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥२॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् ॥३॥ तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा तु खलु सोम्येमास्तिस्रो देवता त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥४॥ इति तृतीयः॥८/३॥

यदग्ने रोहितँ रूपं तेजसस्तद्रूपँ यच्छुक्लं तदपाँ यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वँ वाचारम्भणँ विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥१॥ यदादित्यस्य रोहितँ रूपं तेजसस्तद्रूपँ यच्छुक्लं तदपाँ यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वँ वाचारम्भणँ विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥२॥ यच्चन्द्रमसो रोहितँ रूपं तेजसस्तद्रूपँ यच्छुक्लं तदपाँ यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वँ वाचारम्भणँ विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥३॥ यद्विद्युतो रोहितँ रूपं तेजसस्तद्रूपँ यच्छुक्लं तदपाँ यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वँ वाचारम्भणँ विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥४॥ एतद्ध स्म वै तद्विद्वाँस आहुः पूर्व्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुः ॥५॥ यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तद्विदाञ्चक्रुर्य्यदु शुक्लमिवाभूदित्यपाँ रूपमिति तद्विदाञ्चक्रुर्य्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रुः ॥६॥ यद्विज्ञातमिवाभूदित्येतासामेव देवतानाँ समास इति तद्विदाञ्चक्रुर्यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥७॥ इति चतुर्थः॥

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्माँसँ योऽणिष्ठस्तन्मनः ॥१॥ आपः पीतास्त्रेधा विधीयन्ते तासाँ यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितँ योऽणिष्ठः स प्राणः ॥२॥ तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ॥३॥ अन्नमयँ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥४॥ इति पञ्चमः॥८/५॥

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्प्पिर्भवति ॥१॥ एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति ॥२॥ अपाँ सोम्य पीयमानानाँ योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति ॥३॥ तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति ॥४॥ अन्नमयँ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥५॥ इति षष्ठः॥८/६॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षोडशकलः सोम्य पुरुषः पञ्चदशाहानिमाशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यत इति ॥१॥ स ह पञ्चदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूँषि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति ॥२॥ तँ होवाच यथा सोम्य महतोऽ-भ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहुदहेदेवँ सोम्य ते षोडशानां कलानामेका कलातिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति ॥३॥ स हाशाथ हैनमुपससाद तँ ह यत्किञ्च पप्रच्छ सर्व्वँ ह प्रतिपेदे ॥४॥ तँ होवाच यथा सोम्य महतोऽभ्याहितस्यैक-मङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्राज्वलयेत्तेन ततोऽपि बहु दहेत् ॥५॥ एवँ सोम्य ते षोडशानां कलानामेका कलातिशिष्टाभूत्सान्नेनोपसमाहिता प्राज्वाली तयैतर्हि वेदाननु-भवस्यन्नमयँ हि सोम्य मन आपो मयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥६॥ इति सप्तमः॥८/७॥

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनँ स्वपिती-त्याचक्षते स्वँ ह्यपीतो भवति ॥१॥ स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतन-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनँ हि सोम्य मन इति ॥२॥ अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितँ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥३॥ तस्य क्व मूलँ स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्व्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥४॥ अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितँ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥५॥ तस्य क्व मूलँ स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्व्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथानु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥६॥ स य एषोऽणिमैतदात्म्यमिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥७॥ इत्यष्टमः॥८/८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानाँ वृक्षाणाँ रसान्समवहारमेकताँ रसं गमयन्ति ॥१॥ ते यथा तत्र न विवेकँ लभन्तेऽमुष्याहँ वृक्षस्य रसोऽस्म्यमुष्याहँ वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्व्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति ॥२॥ त इह व्याघ्रो वा सिँहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दँशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति ॥३॥ स य एषोऽणिमैतदात्म्यमिदँ सर्व्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच॥४॥इति नवमः॥८/९॥

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति ॥१॥ एवमेव खलु सोम्येमाः सर्व्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिँहो वा वराहो वा कीटो वा पतङ्गो वा दँशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति ॥२॥ स य एषोऽणिमैतदात्म्यमिदँ सर्व्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥४॥ इति दशमः॥८/१०॥

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥१॥ अस्य यदेकाँ शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्व्वं जहाति सर्व्वः शुष्यति ॥२॥ एवमेव खलु सोम्य विद्धीति होवाच जीवापेतँ वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदँ सर्व्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इत्येकादशः॥८/११॥

न्यग्रोधफलमत आहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यतीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यतीति न किञ्चन भगव इति ॥१॥ तँ होवाच यँ वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्राधस्तिष्ठति श्रद्धत्स्व सोम्येति॥२॥स य एषोऽणिमैतदात्म्यमिदँसर्व्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञा-पयत्विति तथा सोम्येति होवाच ॥३॥ इति द्वादशः॥८/१२॥

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह तथा चकार तँ होवाच यद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद ॥१॥ यथा विलीनमेवाङ्गास्या-न्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्सँवर्त्तते तँ होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति ॥२॥ स य एषोऽणिमैतदात्म्यमिदँ सर्व्वं तत्सत्यँ स आत्मा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति त्रयोदशः॥८/१३॥

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥१॥ तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशँ व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैव-मेवेहाचार्य्यवान्पुरुषो वेद तस्य तावदेव चिरँ यावन्न विमोक्ष्येऽथ सम्पत्स्य इति ॥२॥ स य एषोऽणिमैतदात्म्यमिदँ सर्व्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्वि-ज्ञापयत्विति तथा सोम्येति होवाच ॥३॥इति चतुर्दशः॥८/१४॥

पुरुषँ सोम्योतोपतापिनं ज्ञातयः पर्य्युपासते जानासि मां जानासि मामिति । तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥१॥ अथ यदास्य वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥२॥ स य एषोऽणिमैतदात्म्य-मिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति पञ्चदशः॥८/१५॥

पुरुषँ सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत् परशुमस्मै तपतेति स यदि तस्य कर्त्ता भवति तत एवानृत-मात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते॥१॥ अथ यदि तस्याकर्त्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥२॥ स यथा तत्र नादाह्येतैतदात्म्यमिदँ सर्व्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति ॥३॥ इति षोडशः॥८/१६॥ **इत्यष्टमः प्रपाठकः**

अथ नवमः प्रपाठकः

ॐअधीहि भगव इति होपससाद सनत्कुमारं नारदस्तँ होवाच यद्वेत्थ तेन नोपसीद ततस्त ऊर्ध्वँ वक्ष्यामीति स होवाच ॥१॥ ऋग्वेदं भगवोऽध्येमि यजुर्व्वेदँ सामवेदमाथर्व्वणं चतुर्थमितिहासपुराणं पञ्चमँ वेदानाँ वेदं पित्र्यँ राशिं दैवं निधिँ वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याँ सर्प्पदेवजनविद्यामेतद्भगवोऽध्येमि ॥२॥ सोऽहं भगवो मन्त्रविदेवास्मि नात्मविच्छ्रुतँ ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति तँ होवाच यद्वै किञ्चैतदध्यगीष्ठा नामैवैतत् ॥३॥ नाम वा ऋग्वेदो यजुर्व्वेदः सामवेद आथर्व्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानाँ वेदः पित्र्यो राशिर्द्दैवो निधिर्व्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्प्पदेवजनविद्या नामैवैतन्नामोपास्स्वेति ॥४॥ स यो नाम ब्रह्मेत्युपास्ते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥५॥ इति प्रथमः॥९/१॥

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदँ विज्ञापयति यजुर्व्वेदँ सामवेदमाथर्व्वणं चतुर्थमितिहासपुराणं पञ्चमँ वेदानाँ वेदं पित्र्यँ राशिं दैवं निधिँ वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याँ सर्प्पदेव-जनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाँश्च मनुष्याँश्च पशूँश्च वयाँसि च तृणवनस्पतीञ्छ्वापदा-न्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्म्मो नाधर्म्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्व्वं विज्ञापयति वाचमुपास्स्वेति ॥१॥ स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथा कामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति भगवो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति द्वितीयः ॥९/२॥

मनो वाव वाचो भूयो यथा वै द्वे वामलके द्वे वा कूले द्वौ वाक्षौ मुष्टिरनुभवत्येवँ वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते कर्म्माणि कुर्व्वीयेत्यथ कुरुते पुत्राँश्च पशूँश्चेच्छेयेत्यथेच्छत इमं च लोकममुं चेच्छेयेत्यथेच्छते मनो ह्यात्मा मनो हि लोको मनो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हि ब्रह्म मन उपास्स्वेति ॥१॥ स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथा कामचारो भवति यो मनो ब्रह्मेत्युपास्तेऽस्ति भगवो मनसो भूय इति मनसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति तृतीयः॥९/३॥

सङ्कल्पो वाव मनसो भूयान्यदा वै सङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्म्माणि ॥१॥ तानि ह वा एतानि सङ्कल्पैकायनानि सङ्कल्पात्मकानि सङ्कल्पे प्रतिष्ठितानि समक्लृपतां द्यावापृथिवी समकल्पेतांँ वायुश्चाकाशं च समकल्पन्त्तापश्च तेजश्च तेषांँ सङ्क्लृप्त्यै वर्षँ सङ्कल्पते वर्षस्य सङ्क्लृत्या अन्नँ सङ्कल्पतेऽन्नस्य सङ्क्लृप्त्यै प्राणाः सङ्कल्पन्ते प्राणानाँ सङ्क्लृप्त्यै मन्त्राः सङ्कल्पन्ते मन्त्राणाँ सङ्क्लृप्त्यै कर्म्माणि सङ्कल्पन्ते कर्म्मणां सङ्क्लृप्त्यै लोकः सङ्कल्पते लोकस्य सङ्क्लृप्त्यै सर्व्वँ सङ्कल्पते स एष सङ्कल्पः सङ्कल्पमुपास्स्वेति ॥२॥ स यः सङ्कल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति । यावत्सङ्कल्पस्य गतं तत्रास्य यथा कामचारो भवति यः सङ्कल्पं ब्रह्मेत्युपास्तेऽस्ति भगवः सङ्कल्पाद्भूय इति सङ्कल्पाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥३॥ इति चतुर्थः॥९/४॥

चित्तँ वाव सङ्कल्पाद्भूयो यदा वै चेतयतेऽथ सङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयन्ति नाम्नि मन्त्रा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकं भवन्ति मन्त्रेषु कर्म्माणि ॥१॥ तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविधचित्तो भवति नायमस्मीत्येवैनमाहुर्य्यदयँ वेद यद्वा अयं नेत्थमचित्तः स्यादित्यथ यद्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तँ ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा चित्तमुपास्स्वेति ॥२॥ स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानो-ऽभिसिध्यति । यावच्चित्तस्य गतं तत्रास्य यथा कामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भूय इति चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥३॥ इति पञ्चमः॥९/५॥

ध्यानँ वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायती-वान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्व्वता ध्यायन्तीव देवमनुष्यास्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादाँशा इवैव ते भवन्त्यथ येऽल्पाः कलाहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्यानापादाँशा इवैव ते भवन्ति ध्यानमुपास्स्वेति ॥१॥ स यो ध्यानं ब्रह्मेत्युपास्ते यावद्-ध्यानस्य गतं तत्रास्य यथा कामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति षष्ठः॥९/६॥

विज्ञानँ वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदँ विजानाति यजुर्व्वेदँ सामवेदमाथर्व्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानाँ वेदं पित्र्यँ राशिं दैवं निधिँ वाकोवाक्यमेकायनं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याँ सर्प्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाँश्च मनुष्याँश्च पशूँश्च वयाँसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति ॥१॥ स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिद्ध्यति यावद्विज्ञानस्य गतं तत्रास्य यथा कामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्ति भगवो विज्ञानाद्भूय इति विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति सप्तमः॥९/७॥

बलँ वाव विज्ञानाद्भूयोऽपि ह शतँ विज्ञानवतामेको बलवानाकम्पयते । स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन् परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन् द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्त्ता भवति विज्ञाता भवति । बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन द्यौर्ब्बलेन पर्व्वता बलेन देवमनुष्या बलेन पशवश्च वयाँसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति ॥१॥ स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथा कामचारो भवति यो बलं ब्रह्मेत्युपास्तेऽस्ति भगवो बलाद्भूय इति बलाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इत्यष्टमः॥ ९/८॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्नँ वाव बलाद्भूयस्तस्माद्यद्यपि दशरात्रीर्नाश्नीयाद्यद्यु ह जीवेदथवा द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञाता भवत्य-थान्नस्यायै द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्त्ता भवति विज्ञाता भवत्यन्नमुपास्स्वेति ॥१॥ स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पानवतोऽभिसिध्यति यावदन्नस्य गतं तत्रास्य यथा कामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽन्नाद्भूय इत्यन्नाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति नवमः॥९/९॥

आपो वावान्नाद्भूयस्यस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीत्यथ यदा सुवृष्टि-र्भवत्यानन्दिनः प्राणा भवन्त्यन्नं बहु भविष्यतीत्याप एवेमा मूर्त्ता येयं पृथिवी यदन्तरिक्षँ यद्यौर्य्यत्पर्व्वता यद्देवमनुष्या यत्पशवश्च वयाँसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकमाप एवेमा मूर्त्ता अप उपास्स्वेति ॥१॥ स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्व्वान्कामाँस्तृप्तिमान् भवति यावदपां गतं तत्रास्य यथा कामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति दशमः॥९/१०॥

तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्न्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्व्वं दर्शयित्वाथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्रादाश्चरन्ति तस्मादाहुर्व्विद्योतते स्तनयति वर्षिष्यति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वा इति तेज एव तत्पूर्व्वं दर्शयित्वाथापः सृजते तेज उपास्स्वेति ॥१॥ स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभि सिद्ध्यति यावत्तेजसो गतं तत्रास्य यथा कामचारो भवति । यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इत्येकादशः॥९/११॥

आकाशो वाव तेजसो भूयानाकाशे वै सूर्य्याचन्द्रमसा-वुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति ॥१॥ स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान्प्रकाशवतोऽसम्बाधा-नुरुगायवतोऽभिसिद्ध्यति यावदाकाशस्य गतं तत्रास्य यथा कामचारो भवति । य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवा-न्ब्रवीत्विति ॥२॥ इति द्वादशः॥९/१२॥

स्मरो वावाकाशाद्भूयस्तस्माद्यद्यपि बहव आसीरन्न स्मरन्तो नैव ते कञ्चन शृणुयुर्न्न मन्वीरन्न विजानीरन्यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन्स्मरेण वै पुत्रा-न्विजानाति स्मरेण पशून्स्मरमुपास्स्वेति ॥१॥ स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथा कामचारो भवति। यः स्मरं ब्रह्मेत्युपास्तेऽस्ति भगवः स्मराद्भूय इति स्मराद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति॥२॥ इतित्रयोदशः॥९/१३॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आशा वाव स्मराद्भूयस्याशेद्धो वै स्मरो मन्त्रानधीते कर्म्माणि कुरुते पुत्राँश्च पशूँश्चेच्छत इमं च लोकममुं चेच्छत आशामुपास्स्वेति ॥१॥ स य आशां ब्रह्मेत्युपास्त आशायास्य सर्व्वे कामाः समृध्यन्त्यमोघा हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथा कामचारो भवति । य आशां ब्रह्मेत्युपास्ते–ऽस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति॥२॥ इति चतुर्दशः॥९/१४॥

प्राणो वाव आशाया भूयान्यथा वा अरा नाभौ समर्प्पिता एवमस्मिन्प्राणे सर्वँ समर्प्पितम् । प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति । प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्य्यः प्राणो ब्राह्मणः॥१॥ स यदि पितरँ वा मातरँ वा भ्रातरँ वा स्वसारँ वाचार्य्यँ वा ब्राह्मणँ वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्य्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति ॥२॥ अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समासँ व्यतिषन्दहेन्नैवैनं ब्रूयुः पितृहासीति न मातृहासीति न भ्रातृहासीति न स्वसृहासीति नाचार्य्याहासीति न ब्राह्मणहासीति ॥३॥ प्राणो ह्येवैतानि सर्व्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवँ विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत ॥४॥ इति पञ्चदशः॥९/१५॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति ॥१॥ इति षोडशः॥९/१६॥

यदा वै विजानात्यथ सत्यँ वदति नाविजानन्सत्यँ वदति विजानन्नेव सत्यँ वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति ॥१॥ इति सप्तदशः॥९/१७॥

यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति ॥१॥ इत्यष्टादशः॥९/१८॥

यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति ॥१॥ इत्येकोनविँशः॥९/१९॥

यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति ॥१॥ इति विँशः॥९/२०॥

यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति कृतिं भगवो विजिज्ञास इति ॥१॥ इत्येकविँशः॥९/२१॥

यदा वै सुखँल्लभतेऽथ करोति नासुखँल्लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति ॥१॥ इति द्वाविँशः॥९/२२॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥१॥ इति त्रयोविँशः॥९/२३॥

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पँ यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्त्यम् । स भगवः कस्मिन्प्रतिष्ठित इति । स्वे महिम्नि यदि वा न महिम्नीति ॥१॥ गोअश्वमिह महिमेत्याचक्षते हस्ति हिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥२॥ इति चतुर्विँशः॥९/२४॥

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदँ सर्व्वमित्यथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदँ सर्व्वमिति ॥१॥ अथात आत्मादेश एव आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदँ सर्व्वमिति । स वा एष एवं पश्यन्नेवं मन्वान एवँ विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड्भवति तस्य सर्व्वेषु लोकेषु कामचारो भवत्यथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषाँ सर्व्वेषु लोकेष्वकामचारो भवति ॥२॥ इति पञ्चविँशः॥९/२५॥

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवँ विजानत आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मत आकाश

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतो ऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्त-मात्मतः सङ्कल्प आत्मतो मन आत्मतो वागत्मतो नामात्मतो मन्त्रा आत्मतः कर्म्माण्यात्मत एवेदँ सर्व्वमिति ॥१॥ तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताँ सर्व्वँ ह पश्यः पश्यति सर्व्वमाप्नोति सर्व्वश इति । स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः शतं च दशचैकश्च सहस्राणि च विँशतिराहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवास्मृतिः स्मृतिलम्भे सर्व्वग्रन्थीनाँ विप्रमोक्षस्तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवा-न्सनत्कुमारस्तँ स्कन्द इत्याचक्षते तँ स्कन्द इत्याचक्षते ॥२॥ इति षड्विँशः॥९/२६॥ **इति नवमः प्रपाठकः**

अथ दशमः प्रपाठकः

ॐ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकँ वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ॥१॥ तं चेद्ब्रूयुर्य्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकँ वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यँ यद्वाव विजिज्ञासितव्यमिति स ब्रूयात् ॥२॥ यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावा-पृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्य्याचन्द्र-मसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्व्वँ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तदस्मिन्त्समाहितमिति ॥३॥ तं चेद्ब्रूयुरस्मिँश्चेदिदं ब्रह्मपुरे सर्व्वँ समाहितँ सर्व्वाणि च भूतानि सर्व्वे च कामा यदैतज्जरा वाप्नोति प्रध्वँसते वा किं ततोऽतिशिष्यत इति ॥४॥ स ब्रूयान्नास्य जरयैतज्जीर्य्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एव आत्मापहत पाप्मा विजरो विमृत्युर्व्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनँ यं यमन्तमभि-कामा भवन्ति यं जनपदँ यं क्षेत्रभागं तं तमेवोपजीवन्ति ॥५॥ तद्यथेह कर्म्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते तद्य इहात्मानमननुविद्य व्रजन्त्येताँश्च सत्या-न्कामाँस्तेषाँ सर्व्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मान-मनुविद्य व्रजन्त्येताँश्च सत्यान् कामाँस्तेषाँ सर्व्वेषु लोकेषु कामचारो भवति ॥६॥ इति प्रथमः॥१०/१॥

स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते ॥१॥ अथ यदि मातृलोककामो भवति सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन सम्पन्नो महीयते ॥२॥ अथ यदि भ्रातृलोककामो भवति सङ्कल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति तेन भ्रातृलोकेन सम्पन्नो महीयते ॥३॥ अथ यदि स्वसृलोककामो भवति सङ्कल्पादेवास्य स्वसारः समुत्तिष्ठन्ति तेन स्वसृलोकेन सम्पन्नो महीयते ॥४॥ अथ यदि सखिलोककामो भवति सङ्कल्पादेवास्य सखायः समुत्तिष्ठन्ति तेन सखिलोकेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्पन्नो महीयते ॥५॥ अथ यदि गन्धमाल्यलोककामो भवति सङ्कल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतस्तेन गन्धमाल्यलोकेन सम्पन्नो महीयते ॥६॥ अथ यद्यन्नपानलोककामो भवति सङ्कल्पादेवास्यान्नपाने समुत्तिष्ठतस्तेनान्नपानलोकेन सम्पन्नो महीयते ॥७॥ अथ यदि गीतवादित्रलोककामो भवति सङ्कल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन सम्पन्नो महीयते ॥८॥ अथ यदि स्त्रीलोककामो भवति सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन सम्पन्नो महीयते ॥९॥ यँ यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते ॥१०॥ इति द्वितीयः॥१०/२॥

त इमे सत्याः कामा अनृतापिधानास्तेषाँ सत्यानाँ सतामनृतापिधानँ यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥१॥ अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदि-च्छन्न लभते सर्व्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्य्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्व्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः॥२॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तँ हृद्यमिति तस्माद्धृदयमहरहर्व्वा एवँ वित्स्वर्गँल्लोकमेति ॥३॥ अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुप-सम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृत-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मभयमेतद् ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥४॥ तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्स-त्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवँ वित्स्वर्गँल्लोकमेति ॥५॥ इति तृतीयः॥१०/३॥

अथ य आत्मा स सेतुर्व्विधृतिरेषाँल्लोकानामसम्भेदाय नैतँ सेतुमहोरात्रे तरतो न जरा न मृत्युर्न्न शोको न सुकृतं न दुष्कृतँ सर्व्वे पाप्मानोऽतो निवर्त्तन्तेऽपहतपाप्मा ह्येष ब्रह्म-लोकः॥१॥ तस्माद्वा एतँ सेतुं तीर्त्वान्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तस्माद्वा एतँ सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकः॥२॥ तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्य्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषाँ सर्व्वेषु लोकेषु कामचारो भवति ॥३॥ इति चतुर्थः॥१०/४॥

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्य्यमेव तद्ब्रह्मचर्य्येण ह्येव यो ज्ञाता तँ विन्दतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्य्यमेव तद्ब्रह्मचर्य्येण ह्येवेष्ट्वात्मानमनुविन्दते ॥१॥ अथ यत्सत्रायणमित्याचक्षते ब्रह्मचर्य्यमेव तद्ब्रह्मचर्य्येण ह्येव सत आत्मानस्त्राणँ विन्दतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्य्यमेव तद्ब्रह्मचर्य्येण ह्येवात्मानमनुविद्य मनुते ॥२॥ अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्य्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्य्येणानुविन्दतेऽथ यदरण्यायनमित्याचक्षते ब्रह्मचर्य्यमेव

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरं मदीयँ सरस्तदश्वत्थः सोमसवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितँ हिरण्मयम् ॥३॥ तद्य एवैतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्य्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषाँ सर्व्वेषु लोकेषु कामचारो भवति ॥४॥ इति पञ्चमः॥१०/५॥

अथ य एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः ॥१॥ तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः॥२॥ तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा सम्पन्नो भवति ॥३॥ अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्ज्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति ॥४॥ अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ओमिति वा होद्वा मीयते स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारँ विदुषां प्रपदनं निरोधोऽविदुषाम् ॥५॥ तदेष श्लोकः। शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्त्युत्क्रमणे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवन्ति ॥६॥ इति षष्ठः॥१०/६॥

य आत्मापहतपाप्मा विजरो विमृत्युर्व्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्व्वाँश्च लोकानाप्नोति सर्व्वाँश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥१॥ तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्व्वाँश्च लोकानाप्नोति सर्व्वाँश्च कामानितीन्द्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासँविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥२॥ तौ ह द्वात्रिँशतँ वर्षाणि ब्रह्मचर्य्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्तावावास्तमिति तौ होचतुर्य्य आत्मापहतपाप्मा विजरो विमृत्युर्व्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्व्वाँश्च लोकानाप्नोति सर्व्वाँश्च कामान्यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्तावावास्तमिति ॥३॥ तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्यथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्व्वेष्वन्तेषु परिख्यायत इति होवाच ॥४॥ इति सप्तमः॥१०/७॥

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति तौ होदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्व्वमेवेदमावां भगव आत्मानं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पश्याव आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति ॥१॥ तौ ह प्रजापतिरुवाच साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामिति तौ ह साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति ॥२॥ तौ होचतुर्य्यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तौ ह शान्तहृदयौ प्रवव्रजतुः ॥३॥ तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमनुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वासुरा वा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य्य आत्मानमेवेहमहयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं चेति ॥४॥ तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणाँ ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेणेति सँस्कुर्व्वन्त्येतेन ह्यमुँल्लोकं जेष्यन्तो मन्यन्ते ॥५॥ इत्यष्टमः॥१०/८॥

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति ॥१॥ नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तँ ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सार्धँ विरोचनेन किमिच्छन् पुनरागम इति स होवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥२॥ एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिँशतँ वर्षाणीति स हापराणि द्वात्रिँशतँ वर्षाण्युवास तस्मै होवाच ॥ ३॥ इति नवमः॥१०/९॥

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृत-मभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श तद्यद्यपीदँ शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥१॥ न वधेनास्य हन्यते नास्य स्रामेण स्रामो घ्नन्ति त्वेवैनँ विच्छादयन्तीवा-प्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीति ॥२॥ स समित्पाणिः पुनरेयाय तँ ह प्रजापतिरुवाच मघवन्य-च्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥३॥ न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनँ विच्छादयन्तीवा-प्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिँशतँ वर्षाणीति स हापराणि द्वात्रिँशतँ वर्षाण्युवास तस्मै

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

होवाच ॥४॥ इति दशमः॥१०/१०॥

तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाहं खल्वयमेवँ सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥१॥ स समित्पाणिः पुनरेयाय तँ ह प्रजापतिरुवाच मघवन्यच्छान्त-हृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच नाहं खल्वयं भगव एवँ सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥२॥ एवमेवैष मघवन्निति होवाचैतं त्वेव भूयोऽनु-व्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्चवर्षाणीति स हापराणि पञ्चवर्षाण्युवास तान्येकशतँ सम्पेदुरेतत्तद्यदाहुरेक-शतँह वै वर्षाणि मघवन्प्रजापतौ ब्रह्मचर्य्यमुवास तस्मै होवाच ॥३॥ इत्येकादशः॥१०/११॥

मघवन्मर्त्यँ वा इदँ शरीरमात्तं मृत्युना तदस्यामृतस्या-शरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥१॥ अशरीरो वायुरभ्रँ विद्युत् स्तनयित्नु-रशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योति-रुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यन्ते॥२॥ एवमेवैष सम्प्रसादो-ऽस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभि-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

निष्पद्यते स उत्तमपुरुषः स तत्र पर्य्येति जक्षत्क्रीडन्नममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनँ स्मरन्निदँ शरीरँ स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः ॥३॥ अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माभिव्याहाराय वागथ यो वेदेदँ शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥४॥ अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते ॥५॥ य एते ब्रह्मलोके तँ वा एतं देवा आत्मानमुपासते तस्मात्तेषाँ सर्व्वे च लोका आत्ताः सर्व्वे च कामाः स सर्व्वाँश्च लोकानाप्नोति सर्व्वाँश्चकामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥६॥ इति द्वादशः॥१०/१२॥

श्यामाच्छबलं प्रपद्ये शबलाच्छामं प्रपद्येऽश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्म्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामीत्यभिसम्भवामीति ॥१॥ इति त्रयोदशः॥१०/१३॥

आकाशो वै नाम नामरूपयोर्न्निर्व्वहिता ते यदन्तरा तद्ब्रह्म तदमृतँ स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानाँ यशो राज्ञाँ यशो विशाँ यशोऽहमनुप्रापत्सि स हाहँ यशसाँ यशः श्येतमदत्कमदत्कँ श्येतँल्लिन्दुमाभिगाँल्लिन्दु माभिगाम् ॥१॥ इति चतुर्दशः॥१०/१४॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्म्मनवे मनुः प्रजाभ्य आचार्य्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्म्मिकान्विदधदात्मनि सर्व्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिँसन्सर्व्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवँ वर्त्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुन रावर्त्तते न च पुनरावर्त्तते ॥१॥ इति पञ्चदशः॥१०/१५॥

दशमः प्रपाठकः

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्व्वाणि । सर्व्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्य्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्म्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐशान्तिः शान्तिः शान्तिः ॥

हरिः ॐ

इति छान्दोग्योपनिषद्ब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सामवेदीयाष्टब्राह्मणे सप्तमम्

सँहितोपनिषद्ब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सँहितोपनिषद्ब्राह्मणम्

ॐ अथातस्सँहितोपनिषदो व्याख्यास्यामः ॥१॥ सर्व्वपरोक्षा देवसँहिता भवति ॥२॥ सर्व्वप्रत्यक्षाऽसुर-सँहिता भवति ॥३॥ परोक्षप्रत्यक्षर्षिसँहिता भवति ॥४॥ यथाऽ धीमहे ॥५॥ स्वर्ग्या देवसँहिता भवति स्वर्गँ ल्लोकं गच्छति यस्तथाधीते ॥६॥ पशव्याऽसुरसँहिता भवति पशुमान्भवति यस्तथाऽधीते ॥७॥ ब्रह्मवर्च्चस्यर्षि-सँहिता भवति ब्रह्मवर्च्चसी भवति यस्तथाऽधीते ॥८॥ अथैतास्तिस्रस्संहिता भवन्ति देवहूरेका वाक्शबहूरेका अमित्रहूरेका ॥९॥ सा या मन्द्रस्वरवती सा देवहूराहास्य देवा हवं गच्छन्ति यस्तथाऽधीते ॥१०॥ अथ यत्क्लबित-मिव निरुदितमिव सा वाक्शबहूः क्षिप्रं मरिष्यतीति विद्याद्यस्तथाऽधीते॥११॥ अथ यदाक्रन्दितमिव निक्रन्दित-मिव साऽमित्रहूः सर्व्वज्यानिं ज्यास्यतीति विद्याद्यस्तथा-ऽधीते ॥१२॥ तद्धै खलु समृद्धिमेव ध्यायन्नुपासीत ॥१३॥ सा याऽदीनतमा सम्पूर्णा सँसृष्टा सँयता वाक् सा पुत्र्यपशव्या तद्यथा वाते वाति प्रजा निर्म्मुच्यन्त एवमेतया ॥१४॥ अथ यामध्यायिनी सम्पूर्णा सँसृष्टा सँयता वाक् सा पुत्र्यपशव्या तद्यथा वातोऽप्सु शनैर्व्वान् सुखी भवत्येवमेतया ॥१५॥ अथ योत्सृष्टा गुल्मीभूताऽसम्पूर्णाऽ सँसृष्टाऽसँयता वाक् साऽपुत्र्यपशव्या तद्यथा वाते नाति शीघ्रँ वाता बहुविभग्नं प्रभग्नँ शेत एवमेवैतया ॥१६॥ अथैतास्तिस्रस्सँहिता भवन्ति शुद्धाऽदुस्पृष्टाऽनिर्भुजेति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥१७॥ अथैषा शुद्धा सँहिता भवति सर्व्वेभ्यः कामेभ्य-स्तद्यथा समञ्जनवता रथेन यं कामं कामयते तमभ्यश्नुत एवमेतया ॥१८॥ अथैषाऽदुस्पृष्टा सँहिता भवति सर्व्वेभ्यः कामेभ्यस्तद्यथा समञ्जनवता पूर्णखेन रथेन यं कामं कामयते तमभ्यश्नुत एवमेतया ॥१९॥ अथैषाऽनिर्भुजा सँहिता भवति सर्व्वेभ्य एव कामेभ्य-स्तद्यथाऽसमञ्जनवता पूर्णखेन समाहितेन रथेन यँ यं कामं कामयते तं तमभ्यश्नुत एवमेवैतया ॥२०॥ अथैतास्तिस्रस्सँहिता भवन्ति वायोरिन्द्रस्याग्ग्नेः सर्व्वा वृद्धा वायोस्सर्व्ववृद्धेन्द्रस्योत्सेधपरोक्ष वृद्धाऽग्ग्नेः ॥२१॥ इति प्रथमः खण्डः॥

अथैषा समावर्त्तनीयेति वेदितव्या सँहिता भवति ॥१॥ लोपातिहार परोक्षसमापाद्याः ॥२॥ सर्व्वत्र गाता-स्स्तोभास्सर्व्वत्र निवृत्तास्सर्व्वत्र प्रवृत्ताः॥३॥ सर्व्वत्र प्राच्यपाञ्चालीषु मुक्तँ सर्व्वत्रामुक्तम् ॥४॥ सर्व्वत्र सौष्टव्यँल्लुप्तेषु रेफसन्धयः ॥५॥ सर्व्वत्र रोहपूर्व्वेष्वरोह-पूर्व्वाणि ॥६॥ उदात्तेष्वनुदात्तानि ॥७॥ अभिगीतेष्वनभि-गीतानि सर्व्वत्र ॥८॥ विनामितप्रणामितेष्वविनामितान्य-प्रणामितानि ॥९॥ सर्व्वत्र विसर्ग्गोपग्रहेष्वविसृष्टान्यनुप-गृहीतानि ॥१०॥ सर्व्वत्र ह्रस्वकर्षणेषु दीर्घकर्षणानि दीर्घकर्षणेषु मन्द्रकर्षणानि मन्द्रकर्षणेष्वात्तकर्षणानि ॥११॥ सर्व्वत्र तीधेनावामर्त्तयोर्व्विप्रवाकः॥१२॥ तीधेना-वान्वृष्टिकामाय कुर्य्यान्मर्त्तमन्नाद्यकामाय ॥१३॥ सर्व्वत्र चतुर्थस्वरा मन्द्रस्वराश्च प्रस्तावाः ॥१४॥ चतुर्थमन्द्राति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वार्य्यस्वराश्च भवन्ति ॥१५॥ प्रथमस्वराश्च द्वितीयस्वराश्च प्रथमद्वितीयतृतीयस्वराश्च भवन्ति ॥१६॥ रथन्तरेऽन्वक्षरं भकारान् ॥१७॥ स्वरवन्ति व्यञ्जनानि यथाक्षरं दर्शयेत् ॥१८॥ तद्यथा स्वरेण सर्व्वाणि व्यञ्जनानि व्याप्तानि एवँ सर्व्वान्कामानवाप्नोति यश्चैवँ वेद ॥१९॥ यस्यैते स्वरवन्तः प्रयुज्यन्ते यश्चैवँ विद्वान्प्रयुङ्क्ते यथा चाग्निचन्द्रसूर्य्या भास्वन्तोऽपहत तमस्कास्तद्वदुद्गातृयजमानौ भवतः॥२०॥ एवँ ह्याह भात्यग्निर्भाति चन्द्रमा भाति सूर्य्यो भान्ति ज्योतीँषि भाति रथन्तरमिति भकाराणामेव दीप्तिं दर्शयति स्वरवताम् ॥२१॥ रथन्तरस्य स्तोभानां स्वरवन्तः प्रयोक्तव्या इति ॥२२॥ यत्र तु व्यञ्जनवन्तः प्रयुज्येरन् क्षोधुकाववध्यायिनौ अप्रजसौ उद्गातृयजमानौ स्यातां तस्मादन्वक्षरं प्रयुञ्जानः स्वरवन्ति व्यञ्जनानि यथाक्षरं दर्शयेत् ॥२३॥ इति द्वितीयः खण्डः ॥

अथैते आनुदेशिक्यौ सँहिते याज्ञेन कर्म्मणा चरिते भवतोऽन्ततो निधनसामान्यात् अन्तस्सामिकानि निधनानि सम्प्रसारयन्ति ॥१॥ चतुर्थोदात्ततमान् स्वरान् द्व्यन्तरानु-दूहन्ति प्रागुपायान्न चेत्समानपुरुषवचने ॥२॥ तृतीय-प्रभृतीनामुदात्ततमः कश्चित्स्वरो भवति तमुदूह इत्याचक्षते ॥३॥ तथा च यज्ञे क्रियते ॥४॥ अरण्येगेयं चाधीमहे ॥५॥ ग्रामेगेयं च लाङ्गलायनामेवैके बहुलम् ॥६॥ अनुदात्तमुदात्तमुदात्तं चानुदात्तमवृद्धँ वृद्धँ वृद्धं चावृद्ध-मकृष्टं कृष्टं कृष्टं चाकृष्टमिति एवँ स्तोत्रीयतमं भवति ॥७॥ अथापि याज्ञिका यज्ञे युक्ता अनुदिशन्ति उदात्तानु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दात्तयोरुदात्तँ सेवेत वृद्धावृद्धयोरवृद्धं कृष्टाकृष्टयोरकृष्ट-मित्येवँ स्तोत्रीयतमं भवति ॥८॥ विद्या ह वै ब्राह्मण-माजगाम तवाहमस्मि त्वं मा पालयस्व अनर्हते मानिने नैव मादा गोपाय मा श्रेयसे तेऽहमस्मि ॥९॥ विद्यया सार्धं म्रियेत न विद्यामूषरे वपेत् ॥१०॥ ब्रह्मचारी धनदायी मेधावी श्रोत्रियो विद्यया वा विद्याँ यः प्राह तानि तीर्थानि षणममेति ॥११॥ अथैष आर्चिको निगदो भवति ॥१२॥ य आतृणोत्यवितथेन कर्णावतृप्तं कुर्व्वन्नमृतँ सम्प्रयच्छन् तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह ॥१३॥अग्निरिव कक्षं दहति ब्रह्मपृष्ठमनादृतम् ॥१४॥ तस्मै ब्रह्म न प्रब्रूयात् ॥१५॥ शक्यमानमकुर्व्वते ॥१६॥ सँसिद्धमपि गच्छेत विद्यया सह ॥१७॥ ज्ञानवान् नत्वेनामसते दद्यात् ॥१८॥ सतश्च न विमानयेदिति ॥१९॥ अथैषा वेदस्याष्टावुपनिषदो भवन्ति । वित्तिश्चोपस्तवश्च दमश्च श्रद्धा च सम्प्रश्नश्चानाकाशीकरणं च योगश्चाचार्य शुश्रूषा चेति ॥२०॥ तदेतत्कौकुरुण्डेर्व्वचनँ वेदयन्ते त्रिभिः पर्य्यायैः यः सम्पूर्णं पश्यति छन्दस्तो देवतातो निगमत इति स मन्त्रदर्शी भवति ॥२१॥ अथ य एतैस्सम्पूर्णं पश्यति स गाथादर्शी भवति ॥२२॥ ते खल्विम एव पूर्व्वैराचार्य्यैः प्रोक्ता धर्म्माः प्रोक्ता धर्म्माः ॥२३॥ इति तृतीयः खण्डः॥

दानेन सर्व्वान्कामानवाप्नोति चिरजीवित्वं च ॥१॥ ब्रह्मचारी रूपवानहिँस्र उपपद्यते ॥२॥ स्वगर्ग्यं पर्णाशनात् ॥३॥ दिविचरः पयोभक्षः॥४॥ स्थान वीरासनाद्वित्तवान्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥५॥ पितृमातृगुरुशुश्रूषा ध्यानवान् स्वर्ग्गी ॥६॥ यः काञ्चनदाता यावानुवैरस्तावानात्मा सः ॥७॥ एष इम एव लोका अयँ स लोकः सप्रतिष्ठित एव भवति ॥८॥ प्रतिष्ठित इव ह्ययँल्लोकः ॥९॥ अथ यदुत्तरँ सा द्यौर्म्मूर्त्तिमत्सु गृहेष्वभिजायते ॥१०॥ त्रीण्याहुरति दानानि गावः पृथ्वी सरस्वती ॥११॥ नरकादुद्धरन्त्येते जपवापन-दोहनादुपस्पर्शनात् ॥१२॥ षड्भागं करकँ यः प्रयच्छति अपिपासितश्च म्रियते सोमपाश्चाभिजायते सोमपाश्चा-भिजायते ॥१३॥ इति चतुर्थः खण्डः॥

अथ हिरण्यमेवापः कनको भवति सहस्रँल्लभते ॥१॥ अथैषा यजनीयेऽहनि सप्त च्छन्दाः॥२॥ अथैषा-ऽग्निरुपसमाहितो भवति ॥३॥ ब्रह्मचारी भैक्षं चरति निवेद्य लभते ॥४॥ तिष्ठत्यहश्शेषो भवति ॥५॥ व्रतमिति सारस्वतम्॥६॥ अन्नं प्रजापतिमपृच्छत् पृच्छामि त्वामिति वामेति वा ॥७॥ सर्व्वत्र दानप्रतिग्रहस्सोमयाज्यपीतो भवति ॥८॥ स खलु त एतं प्रजापतिर्व्वा इदमेकम् ॥९॥ अह्नः क्षितयः ॥१०॥ पुरुषो वाऽयमीश्वरोऽभिजायते ॥११॥ अनाकाशीकरणं च ॥१२॥ चतुर्ऋचो भवति य एवँ वेद य एवँ वेद ॥१३॥ इति पञ्चमः खण्डः ॥

इति सप्तमँ सँहितोपनिषद्ब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सामवेदीयाष्टब्राह्मणे अष्टमम्

वँशब्राह्मणम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वँशब्राह्मणम्

ॐ नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्य्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वेदेभ्यो नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय चोपजाय च शर्व्वदत्तात् गार्ग्याच्छर्व्वदत्तो गार्ग्यो रुद्रभूतेर्द्राह्यायणेर्रुद्रभूतिर्द्राह्यायणि-स्त्रातादैषुमतात्त्रात ऐषुमतो निगडात् पार्णवल्केर्न्निगडः पार्णवल्किर्गिरिशर्म्मणः काण्डेविद्धेर्गिरिशर्म्मा काण्डेविद्धि-र्ब्रह्मवृद्धेश्छन्दोगमाहकेर्ब्रह्मवृद्धिश्छन्दोगमाहकिर्म्मित्रवर्च्चसः स्थैरकायनान्मित्रवर्च्चाः स्थैरकायनः सुप्रतीतादौलुन्द्यात् सुप्रतीत औलुन्द्यो बृहस्पतिगुप्ताच्छायस्थेर्बृहस्पतिगुप्तः शायस्थिर्भवत्राताच्छायस्थेर्भवत्रातः शायस्थिः कुस्तुका-च्छार्क्कराक्षात् कुस्तुकः शार्क्कराक्षः श्रवणदत्तात् कौहला-च्छ्रवणदत्तः कौहलः सुशारदाच्छालङ्कायनात् सुशारदः शालङ्कायन ऊर्ज्जयत औपमन्यवादूर्ज्जयन्नौपमन्यवो भानुमत औपमन्यवाद्भानुमानौपमन्यव आनन्दजाच्चान्धनायनात् आनन्दजश्चान्धनायनः शाम्बाच्छार्क्कराक्षात् काम्बोजाच्चौप-मन्यवाच्छाम्बः शार्क्कराक्षः काम्बोजश्चौपमन्यवो मद्रगारा-च्छौङ्गायनेर्म्मद्रगारः शौङ्गायनिः स्वातेरौष्ट्राक्षेः स्वातिरौष्ट्राक्षिः सुश्रवसो वार्षगण्यात् सुश्रवा वार्षगण्यः प्रातरह्नात् कौहलात् प्रातरह्नः कौहलः केतोर्व्वाज्यात् केतुर्व्वाज्यो मित्रविन्दात् कौहलान्मित्रविन्दः कौहलः सुनीथात् कापटवात् सुनीथः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कापटवः सुतेमनसः शाण्डिल्यायनात् सुतेमनाः शाण्डिल्या-यनोऽँशोर्धानञ्जय्यादँशुर्द्धानञ्जय्यः ॥ इति प्रथमः खण्डः ॥

अमावास्याच्छाण्डिल्यायनाद्राधाच्च गौतमाद्राधो गौतमो गातुर्ग्गौतमात्पितुर्ग्गाता गौतमः सँवर्ग्गजितो लामकयना-त्सँवर्ग्गजिल्लामकायनः शाकदासाद् भादितायनाच्छाकदासो भादितायनो विचक्षणात् ताण्ड्याद्विचक्षणस्ताण्ड्यो गर्द्दभीमुखा-च्छाण्डिल्यायनाद् गर्द्दभीमुखः शाण्डिल्यायन उदरशाण्डिल्या-त्पितुरुदरशाण्डिल्योऽतिधन्वनश्च शौनकान्मशकाच्च गार्ग्ग्या-न्मशको गार्ग्ग्यः स्थिरकाद्गार्ग्ग्यात्पितुः स्थिरको गार्ग्ग्यो वासिष्ठाच्चैकितानेयाद्वासिष्ठश्चैकितानेयो वासिष्ठादारैहण्या-द्राजन्यात् वासिष्ठआरैहण्यो राजन्यः सुमन्ताद्बाभ्रवाद् गौतमात् सुमन्तो बाभ्रवो गोतमः शूषाद्वाह्नेयाद् भारद्वाजाच्छूषो वाह्नेयो भारद्वाजोऽरालाद्दार्त्तेयाच्छौनकादरालो दार्त्तेयः शौनको दृतेरैन्द्रोताच्छौनकात्पितुर्द्दृतिरैन्द्रोतश्शौनक इन्द्रोताच्छौनकात् पितुरेवेन्द्रोतः शौनको वृषशुण्णाद्वातावताद् वृषशुण्णो वातावतो निकोथकाद् भायजात्यान्निकोथको भायजात्यः प्रतिथेर्द्देव-तरथात् प्रतिथेर्द्देवतरथो देवतरसः शावसायनात् पितुर्द्देवतराः शावसायनः शवसः पितुरेव शवा अग्निभुवः काश्यपा-दग्निभूः काश्यप इन्द्रभुवः काश्यपादिन्द्रंभूः काश्यपो मित्रभुवः काश्यपात् मित्रभूः काश्यपो विभण्डकात्काश्यपात् पितुर्व्विभण्डकः काश्यप ऋश्यश्रृङ्गात्काश्यपात्पितुर्ऋश्यश्रृङ्गः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

काश्यपः कश्यपात्पितुरेव कश्यपोऽग्नेरग्निरिन्द्रादिन्द्रो वायोर्व्वायुर्म्मृत्योर्म्मृत्युः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्मा स्वयम्भूस्तस्मै नमस्तेभ्यो नमः ॥ इति द्वितीयः खण्डः ॥२॥

आचार्य्येभ्यो नमस्कृत्वाऽथ वँशस्य कीर्त्तयेत् । स्वधा पूर्व्वेषां भवति नेतायुर्द्दीर्घमश्नुते ॥ इत्युक्तानुकामेद् वँशमाब्रह्मणो नयन्नर्य्यमभूतेः कालयवादर्य्यमभूतिः कालयवो भद्रशर्म्मणःकौशिकाद् भद्रशर्म्मा कौशिकः पुष्ययशस औदव्रजेः पुष्ययशा औदव्रजिः सङ्कराद् गौतमाद् सङ्करो गौतमोऽर्य्यमराधाच्च गौभिलात् पूषमित्राच्च गोभिलात् पूषमित्रो गोभिलोऽश्वमित्राद्गोभिलादश्वमित्रो गोभिलो वरुणमित्राद्गोभिलाद्वरुणमित्रो गोभिलो मूलमित्राद्गोभिलान्मूलमित्रो गोभिलो वत्समित्राद्गोभिलाद्वत्समित्रो गोभिलो गौल्गुलवीपुत्राद्गोभिलाद्गौल्गुलवीपुत्रो गोभिलो बृहद्वसोग्गर्गोभिलात् पितुर्बृहद्वसुगर्गोभिलो गोभिलादेव गोभिलो राधाच्च गौतमात् समानम्परँ समानम्परम् ॥३॥ इति तृतीयः खण्डः ॥

इत्यष्टमँ वँशब्राह्मणम् समाप्तम्

समाप्तान्यष्टब्राह्मणानि

हरिः ॐ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ताण्ड्यब्राह्मणस्थ मन्त्रानामनुक्रमणिका

अ

अक्किलासो	२३/१६/१२
अकृतं वा एते	२१/१५/०४
अक्रान् समुद्रः	१५/०१/०१
अङ्कान्यङ्कू	०१/०७/०५
अक्षरपङ्क्तिषु	०८/१०/०९
अक्षरं त्र्यक्षर	१०/०५/१०
अगन्म महा	१५/०२/०१
अगस्त्यो वै	२१/१४/०७
अङ्गिरसस्तप	१५/०९/०९
अङ्गिरसः स्वर्गं	०८/०९/०५
अङ्गिरसः स्वर्गं	२०/११/०३
अङ्गिरसां गोष्ठे	१३/०९/२४
अङ्गिरसां संक्रोश	१२/०३/२२
अङ्गिरसो वै	१२/११/१०
अग्न आयाहि	११/०२/०३
अग्न आयूँषि	०६/१०/०१
अग्न आयूँषि	०९/०८/१२
अग्न इति प्रथम	१०/०७/०१
अग्न इति षष्ठ	१०/०७/०४
अग्नये हिरण्यं	०१/०८/०५
अग्निनाग्निः	१२/०२/०१
अग्निना पृथिवि	१०/०१/०१
अग्निभिरितो	१४/०८/०२
अग्निरकामयत	१४/०३/१९
अग्निरकामयत	१४/११/३८
अग्निरुषसं	२०/१५/०३
अग्निरेवैनं	१६/०५/१०
अग्निर्देवानां	२४/१३/०५
अग्निर्वा इदं	०५/०३/०९
अग्निर्वा एतत्	१७/०८/०३
अग्निर्वा एतस्य	१२/०४/२५
अग्निर्वै रूरः	०७/०५/१०
अग्निर्वै रूरो	१२/०४/२४
अग्निर्वै सर्वाः	१८/०१/०८
अग्निर्वै सर्वमा	२५/०९/०३
अग्निष्टोम	१८/०८/०१
अग्निष्टोम	१८/११/०७
अग्निष्टोम एव	०४/०५/२०
अग्निष्टोमेन	०९/०२/०९
अग्निष्टोमेन	२२/१४/०५
अग्निहोत्रं दश	२५/०४/०२
अग्निं दूतं	११/०७/०३
अग्निं वै पूर्वे	१५/०५/०९
अग्निं वो वृधन्तं	१२/१२/०१
अग्निं वो वृधन्तं	१४/०८/०१
अग्निं संवत्सरः	१७/१३/१७
अग्निः सृष्टो	१३/०३/१२
अग्नीषोमः प्रथ	२१/०९/०६
अग्नीषोमाभ्यां	०१/०८/०६
अग्ने युँक्ष्वा हि	०४/०२/१९
अग्नेर्वा एतत्	१३/११/२३
अग्नेर्वा एतानि	२१/०२/०९
अग्नेर्वै होत्रं	२१/१०/११
अग्ने विवस्व	०९/०३/०४
अग्नेश्चिकित्त	१३/०२/०३
अग्नेस्तेजसे	०१/०३/०५
अग्नौ स्तोत्रं	०६/०३/०५
अग्रं ह्येतर्हि	१२/११/०४
अग्रादग्रं	०२/०१/०३
अग्रादग्रं रोहति	१७/०४/०२
अच्छिन्नं पव	०६/०६/१९
अच्छिद्रं भवति	१४/०९/३५
अजोग्नीषोमी	२१/१४/११
अजोस्येकपात्	०१/०४/१२
अजः सुब्रह्म	१८/०९/१९
अञ्जसार्यौ	१३/०४/११

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अतिच्छन्दस्सु	०५/०२/१०
अतिजगतीषु	१२/१०/२२
अतिरात्रः पृष्ठ्यः	२३/०१/०१
अतिरात्रः पृष्ठ्यः	२३/०३/०१
अतिरात्रः पृष्ठ्यः	२३/०६/०१
अतिरात्रः पृष्ठ्यः	२३/१६/०१
अतिरात्रः पृष्ठ्यः	२३/१९/०१
अतिरात्रश्चत्वा	२४/०६/०१
अतिरात्रश्चत्वा	२४/१३/०१
अतिरात्रश्चत्वा	२४/१६/०१
अतिरात्रश्चतु	२४/१४/०१
अतिरात्रश्चतु	२४/१८/०१
अतिरात्रश्चतु	२४/२०/०१
अतिरात्रश्चतु	२५/०१/०१
अतिरात्रश्चतु	२५/०२/०१
अतिरात्रः षडभि	२४/१७/०१
अतिरात्रः सहस्रं	२५/१७/०१
अतिरात्रः सहस्रः	२५/०९/०१
अतिरात्रस्त्रयो	२३/१६/०१
अतिरात्रस्त्रयः	२४/०१/०१
अतिरात्रस्त्रयः	२४/०३/०१
अतिरात्रस्त्रिवृत्	२३/०७/०१
अतिरात्रस्त्रिवृत्	२५/०३/०१
अतिरात्रस्त्रिवृत्	२५/११/०१
अतिरात्रस्त्रीणि	२४/११/०१
अतिरात्रावभि	२५/१५/०१
अतिरात्रो गौ	२३/०५/०१
अतिरात्रो गौ	२३/२२/०१
अतिरात्रो गौ	२३/२८/०१
अतिरात्रो गौ	२४/०८/०१
अतिरात्रो ज्योतिः	२३/०४/०१
अतिरात्रो ज्योतिः	२३/०९/०१
अतिरात्रो ज्योतिः	२३/११/०१
अतिरात्रो ज्योतिः	२३/१७/०१
अतिरात्रो ज्योतिः	२३/१८/०१
अतिरात्रो ज्योतिः	२३/२३/०१
अतिरात्रो ज्योतिः	२३/२५/०१
अतिरात्रो ज्योतिः	२४/०५/०१
अतिरात्रो ज्योतिः	२४/०९/०१
अतिरात्रो ज्योतिः	२४/१९/०१
अतिरात्रो ज्योतिः	२५/१२/०१
अतिरात्रो द्वादश	२२/०२/०१
अतिरात्रो द्वावभि	२३/२०/०१
अतिरात्रो नव	२४/१५/०१
अतिरात्रो भवति	२०/०४/०८
अतिरात्रोऽभि	२३/१२/०१
अत्रिरात्रोऽभि	२३/१४/०१
अतिरात्रोऽभि	२३/१५/०१
अतिरात्रोऽभि	२४/०२/०१
अतिरात्रौ द्वौ	२४/१२/०१
अतिरिक्तं गौरीवि	०९/०२/०४
अतिरिक्तं वा	११/०५/१७
अति वा एषा	०५/०२/११
अतिविश्वानि	०५/०८/०६
अतिविश्वानि	१४/०५/१८
अतिश्रिया भ्रातृ	१२/१३/०२
अति ह्ययं	१२/०९/०४
अतो वै प्रजाः	२३/१९/०६
अत्रिरकामयत	२१/०९/०२
अथ पञ्चदशौ	१९/१०/०६
अथ त्रयस्त्रिंशौ	१९/१०/१०
अथ त्रिणवौ	१८/१०/०९
अथ परोक्षमनु	१५/०९/१५
अथ यज्योतिः	२२/०२/०४
अथ यज्योतिः	२२/०९/०६
अथ यज्योतिः	२२/११/०५
अथ यज्योतिः	२५/१२/०६
अथ यत्तपस्त	२५/१४/०३
अथ यत्त्रिवृत्	२५/११/०३
अथ यत्पञ्च	१२/०४/०८

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ यत्पृष्ठ्यः	२३/०४/०५
अथ यत्सहस्र	२५/०९/०४
अथ यदभ्या	२२/१३/१३
अथ यदायुर	२०/१२/०३
अथ यदायुर्गौ	२३/०४/०७
अथ यदेषा	१९/०३/०५
अथ यद्व्यक्षर	२१/०५/०५
अथ यस्य च	११/०६/०१
अथ यस्य ज्यो	२०/१२/०१
अथ यस्य त्रिः	२०/१३/०१
अथ या दशैषा	१६/०१/०९
अथ या द्वादशी	१९/०४/०४
अथ यानि द्वादश	२३/०५/०३
अथ यानि द्वादश	२३/०९/०४
अथ यानि द्वादश	२३/११/०४
अथ यानि द्वादश	२३/२०/०३
अथ यानि द्वादश	२३/२२/०६
अथ यानि द्वादश	२४/०१/०५
अथ यावन्त्यौ	२४/१४/०५
अथर्वणो वा	०८/०२/०६
अथ वा एता	१२/१३/२२
अथ वायुरौशनं	०७/०५/१६
अथ सप्तदशौ	१९/१०/०७
अथ ह वै तर्हि	२४/१८/०३
अथाभिजिद	२२/०८/०४
अथेन्द्रो यौधाजयं	०७/०५/१२
अथैकविंशौ	१९/१०/०८
अथैतच्छैतं	०७/१०/१२
अथैतत्त्रयस्त्रिंश	२२/०७/०४
अथैतदान्धीगवं	०८/०५/१२
अथैतद्व्रतमन्त्रं	२४/१४/०७
अथैतद्व्रतमन्त्रं	२४/१६/०४
अथैतद्व्रतमन्त्रं	२५/०१/१४
अथैतन्नार्मेधं	०८/०८/२१
अथैतानि द्वादश	२४/१४/०६
अथैतानि द्वादश	२४/१६/०६
अथैतानि द्वादश	२५/०१/१०
अथैतावुद्भिद्	२५/०१/११
अथैते स्वरसामा	२४/१४/०४
अथैते स्वरसामा	२५/०१/०८
अथैतो गो आ	२५/०१/१२
अथैतौ प्रायणीय	२४/१४/०८
अथैतौ प्रायणीय	२५/०१/१५
अथैतौ प्रायणीय	२५/०२/०६
अथैष आयुः	१६/०३/०१
अथैष इन्द्रः	१९/१७/०१
अथैष इन्द्रा	१९/१५/०१
अथैष ऋषयः	१९/१२/०१
अथैष एकत्रिकः	१६/१६/०१
अथैष औपश	१९/०३/०१
अथैष गौः	१६/०२/०१
अथैष चक्षुष्टोम	१९/०५/०१
अथैष छन्दोम	२५/०१/१३
अथैष छन्दोम	२५/०२/०५
अथैष ज्योतिः	१६/०८/०१
अथैष ज्योतिः	१९/११/०८
अथैष त्रिवृत्	२५/०१/०७
अथैष द्विदेव	२०/१५/१४
अथैष द्विषोडश	१७/०३/०१
अथैष पञ्च	१५/०१/०९
अथैष पञ्च	१९/१६/०१
अथैष पुन	१९/०४/०१
अथैष मरुत्	१९/१४/०१
अथैष राट्	१९/०१/०१
अथैष विघनः	१९/१८/०१
अथैष विश्व	१६/१०/०१
अथैष विश्व	१६/१५/०१
अथैष विराट्	१९/०२/०१
अथैष शमनी	१७/०४/०१
अथैष षट्षोड	१७/०२/०१

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथैष सर्व	१६/०९/०१
अथैष सर्वस्तोम	१९/०९/०१
अथैषोऽङ्गिरस	१६/१४/०१
अथैषोऽपचिति	१९/०८/०१
अथैषोऽभिषेचनी	१८/०८/०२
अथो एतध्ये	१४/०५/०७
अथो खल्वाहुः	०४/०२/१३
अथो खल्वाहुः	०४/०२/१५
अथो खल्वाहुः	०४/०२/२०
अथो खल्वाहुः	०४/०३/११
अथो खल्वाहुः	०४/०७/०८
अथो खल्वाहुः	०५/०१/१४
अथो खल्वाहुः	०५/०१/१९
अथो खल्वाहुः	०५/०६/०६
अथो खल्वाहुः	०५/१०/०६
अथो खल्वाहुः	०९/०४/०४
अथो खल्वाहुः	०९/०४/१६
अथो खल्वाहुः	०९/०९/०३
अथो खल्वाहुः	१७/०१/११
अथो खल्वाहुः	१८/०१/०७
अथो खल्वाहुः	२४/१४/०३
अथो गवामेव	०४/०९/२३
अथो तदुभय	०६/०६/०४
अथोत्तरस्या	२१/१०/०२
अथो रेत एव	०८/०७/०९
अथो शमयन्त्येवै	०४/०६/०९
अथो श्वस्तनमेव	०४/०९/१८
अदीक्षितः	२५/१४/०२
अद्यमानस्य	२१/०२/०२
अद्याद्या श्वः श्वः	०४/०७/०७
अध क्षपा	१८/०८/१६
अधरोत्तरमपा	०२/०३/०७
अधाहीन्द्रगिर्व	१७/०१/०५
अधिपतिरसि	०१/१०/०५
अधिपतिः समा	१९/१२/०४
अधिपतिः समा	१९/१२/०४
अधोऽधोऽक्षं	०६/०५/१४
अध्यर्धेडं तथा	१३/०३/०८
अध्यर्धेडं तथा	१३/०३/१३
अध्यर्धेडं तथा	१३/०३/२०
अध्वनामध्वपते	०१/०४/०१
अध्वर्युः शिरसो	०५/०६/०२
अध्वर्युः प्रस्तरं	०६/०७/१६
अध्वर्यो अद्रिभिः	१४/०९/०१
अनड्वानग्नी	१८/०९/१८
अनड्वाहौ वा	१२/०४/१४
अनतिवाद्येनं	११/०३/०७
अनभिजिता वा	०६/०५/२०
अनवपादानतिपा	०४/०५/१२
अनन्ता वा एता	२३/२५/०३
अनाकृतमेषां	२३/१३/०५
अनायतनं वा	०५/०२/०५
अनिधनमन्त	०७/०३/२३
अनिरुक्तं गेयं	०७/०१/०८
अनिरुक्तं गेयं	०७/०९/१७
अनिरुक्तं प्रातः	१८/०६/०७
अनिवर्तिः पशुः	०७/०९/०२
अनीकवती	१७/१३/१३
अनुतुन्नं गायति	१२/०९/१७
अनुतुन्नं गायति	१२/१०/११
अनुतोदो वैराज	०८/०९/१३
अनुद्धते दक्षिणत	१९/१३/०९
अनुरूप एनं	११/०६/०७
अनुष्टुप् च वै	१०/०२/०४
अनुष्टुप्छन्दसे	०४/०५/०७
अनुष्टुप्सु षोडश	१२/१३/१५
अनुष्टुब्वा एता	२३/२८/०२
अनुष्टुभमुत्तमां	०८/०७/०२
अनुष्टुभः सत्यः	११/१०/०६
अनुष्टुभि छन्दसां	११/०५/१७

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अनुष्टुभि बृहत्	१९/१२/०८
अनुष्टुभं वा	१०/०५/०८
अनुष्टुभं सम्पद्य	१६/११/१७
अनुष्टुभ्याथ	१६/१०/०९
अन्नमक्रमन्न	०१/०३/०७
अन्नमत्यन्नादो	१९/११/०५
अन्नवत्यो गणव	१८/०७/०४
अन्नस्यान्नपतिः	०१/०८/०७
अन्नादो भवति	१४/०५/२९
अन्नादो भवति	१६/०७/०६
अन्नादो भवति	१७/०९/०३
अन्नाद्यं वाव	११/०८/१२
अन्नं करिष्याम्य	०१/०३/०६
अन्नं पशव	१६/१५/०८
अन्नं पृष्ठानि	२२/०३/०४
अन्नं वा अर्को	०५/०१/०९
अन्नं वा अर्को	१४/११/०९
अन्नं विराडन्नं	०८/०९/०८
अन्नं विराडन्नं	२३/२५/०२
अन्नं वै जरा	१४/०५/२८
अन्नं वै देवाः	१२/१०/२५
अन्नं वै देवाः	१५/०३/२३
अन्नं वै पृष्ठानि	२५/०२/०३
अन्नं वै पृष्ठानि	२५/०१/०४
अन्नं वै वाजो	१३/०९/२१
अन्नं वै सप्त	०२/०२/०७
अन्नं वै सप्त	१९/०९/०२
अन्तरिक्षदेवत्यः	१२/०१/०८
अन्तरिक्षदेवत्यः	१२/०३/१९
अन्तरिक्षं भवति	१२/०३/१८
अन्तरिक्षं वै	०७/०९/०९
अन्तरिक्षं वै	१५/१२/०५
अन्तरोत्सेध	१५/०९/१२
अन्तो वा अश्वः	२१/०४/०६
अन्तो वा अष्टा	०३/१२/०२
अन्तो वा अष्टा	०३/१३/०२
अन्तो वै तृतीयं	१२/०५/०४
अन्तो वै त्रय	०३/०३/०२
अन्तो वै त्रय	०३/०४/०२
अन्तो वै सूरो	१३/०८/०३
अन्धस्वती भवति	१२/०३/०३
अन्यदन्यद्वा	२१/०४/०९
अन्यस्मै वा	२२/१०/०२
अन्यस्मै वै	२२/०३/०२
अन्यस्मै वै	२३/०८/०२
अन्वासि रात्र्यै	०१/०९/०८
अन्विरसि दिवे	०१/०९/०३
अपक्रान्तौ वा	०६/१०/०५
अपघ्नन्पवते	०६/१०/०६
अपच्छिदिव वा	११/११/०२
अपच्छिदिव वा	१३/०६/०२
अपच्छिदिव वा	१८/०६/२३
अप तमोघ्नते	२३/१६/०३
अप पाप्मानं	१४/०५/२३
अपः पश्चात्	०८/०७/०८
अपभ्रंश इव	१२/१०/०३
अपभ्रंश इव	१४/०४/०३
अपभ्रंश इव	१४/०६/०३
अपभ्रंश इव	१४/१०/०२
अपरिश्रिते	०६/०८/१०
अपरुद्ध यज्ञः	१२/१३/३१
अपशव्यो द्विरात्र	१८/११/०९
अपशव्यं वा	२३/१९/०८
अपशव्यं वा	२४/११/०६
अपशुचँ हते	१२/०६/१०
अपानेन पश्चात्	०५/०४/०२
अपां पुष्पमस्यौ	०१/०६/०८
अपां वा एष	१३/१०/०५
अपाश्लीलां	१७/०५/०२
अपि वा एतस्या	०९/०८/०३

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपूता इव वा	०६/१०/०२
अपो वा ऋत्व्यः	०७/०८/०१
अप्रतिष्ठितो	१८/११/०५
अप्रतिवाद्येनं	१०/०७/०३
अप्सु धौतस्य	०१/०६/११
अबलिष्ठ इव	०७/०३/१८
अभिक्रान्ताप	०५/०८/०३
अभिक्रामन्ती	०२/०६/०३
अभिक्रामन्ती	०२/०७/०३
अभिगरापगरौ	०५/०५/१३
अभिचार्यमाण	२२/१७/०३
अभिजुहोति	१२/१०/१८
अभित्वा वृषभा	०९/०२/१५
अभित्वा वृषभा	२१/०९/१७
अभित्वा शूर नो	११/०४/०१
अभिद्युम्नं बृहद्य	१३/०५/०२
अभिद्युम्नं बृहद्य	१४/११/०२
अभिनिधनेन	१४/०४/०५
अभिनिधनं	१४/०४/०४
अभिपूर्वमेवै	२३/२५/०३
अभिपूर्वेण	१७/०२/०२
अभिप्रयाय	२४/१९/०३
अभिप्रवः सुराध	११/०९/०२
अभिप्रियाणि	०८/०५/१४
अभिवत्यः	१७/१२/०४
अभि वा एते	१५/०७/०६
अभिशस्यमा	१८/०१/१०
अभिसोमास	१२/०३/०४
अभिसोमास	१४/०९/०३
अभीति रथन्तरं	१२/०३/०५
अभीनो वाजसा	१४/११/०४
अभीवर्तेन वै	०४/०३/०३
अभीवर्तेन वै	०८/०२/०८
अभीवर्तो ब्रह्म	०४/०३/०१
अभीवर्तो ब्रह्म	१५/१०/१३
अभीवर्तो ब्रह्म	१८/०६/१४
अभीवर्तं भ्रातृव्य	०८/०२/०७
अभीशवं यदभी	१५/०३/२७
अभ्यतृणत्प	०६/०६/१२
अभ्यभिसोमान्	१८/०५/१४
अभ्यभ्येवास्य	१२/०४/२६
अभ्याघात्यं भवति	१४/०९/३०
अभ्यासङ्ग्यः	२१/१३/०९
अभ्यासङ्ग्यः	२२/०३/०१
अभ्यासङ्ग्यः	२२/०३/०६
अभ्यासङ्ग्यः	२२/०७/०१
अभ्यासङ्ग्यः	२२/१६/०१
अभ्यासङ्ग्यः	२२/१८/०१
अभ्युस्वरेण	१३/१२/१३
अमावास्यायां	१८/११/०८
अमुष्मै वा एत	०६/०८/१२
अमुष्मै वा एत	०६/०८/१६
अमुं वा एष	०९/०७/१२
अया पवा पव	१३/११/०७
अया रुचा हरि	१६/१६/०८
अयुतं दक्षिणा	१९/१३/०६
अयं त इन्द्र	०९/०२/०८
अयं पूषा रयिः	११/१०/०५
अयं वा मित्रावरु	१२/०८/०३
अयं वै लोको	०७/०९/०५
अयं हविष्मान्	११/१०/११
अरण्ये तिस्रो	१६/०६/०३
अरतिं पृथिव्या	०४/०६/२०
अरावाणो वा	०६/१०/०७
अरिष्टं भवति	१२/०५/२२
अरूक्षो भवति	२०/१३/०५
अरूपेण वा	२४/०१/०३
अर्कपुष्पं भवति	१५/०३/२२
अर्कवतीषु	०५/०१/०८
अर्क्यं शस्यते	१६/०७/०४

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अर्ध मास एव १०/०१/०४
अर्धेडामति स्वर १३/१२/११
अर्धेडा वै देवा ०८/०९/१५
अर्धेडा वै पूर्वं ०८/०९/१७
अर्धेडा शक्वरी ०८/०९/१४
अर्बुदः सर्प ०४/०९/०५
अर्बुदः सर्प ०९/०८/०८
अर्षा सोम १३/०३/०१
अवभृथादुदेत्य ०९/०५/१२
अवमैस्त ऊर्वैस्ते ०१/०५/०९
अवर्धन्त ह्येतर्हि १२/१२/०२
अवषट्कृतो ०९/०६/०२
अश्रयन्वाव १८/११/०४
अश्वः कृष्णः १२/१३/२६
अश्वः प्रस्तोता १८/०९/११
अश्ववद्भवति १२/०४/१५
अश्वश्यावो दक्षि १८/०१/२०
अश्वोऽस्यत्यो ०१/०७/०१
अश्वो वै भूत्वा ११/०३/०५
अष्टमेन वै देवा १४/०८/०६
अष्टरात्रेण वै २२/११/०६
अष्टर्चो भवति १५/०१/०७
अष्टाक्षरा गाय ०६/०३/१३
अष्टाक्षरेण प्रथमा १५/१०/०८
अष्टाचत्वारिंश १५/०१/१३
अष्टाचत्वारिंश १५/०६/०७
अष्टादँष्ट्रं भवति १२/०९/१३
अष्टादँष्ट्रे भवतः ११/११/११
अष्टादँष्ट्रे वैरूपो ०८/०९/२०
अष्टाभिर्वा अक्षरै १०/०५/०९
अष्टाभ्यो हिङ्करो ०३/०८/०१
अष्टावेकविंशाः १९/०१/०४
अष्टाशफाः पशव १५/०१/०८
अष्टेडपदस्तोभो १३/०५/२१
अष्टौ पुत्रासो २४/१२/०६
अष्टौ वा एताः ११/०५/०८
असम्मितं स्तोत्रं ०९/०८/१४
असावि सोम १२/१३/१७
असावि सोम १३/०६/०५
असवि सोमो १५/०३/०४
असाव्यँशुर्म १३/०५/०१
असिति वै रथन्त १२/०३/२१
असितो वा एतेन १४/११/१९
असुराणां वै १९/०७/०१
असुरा वा एषु ०८/०९/०२
असुरा वा एषु ०९/०२/११
असुरा वै देवा ०७/०५/११
असुरेषु वै ०८/०६/०५
असुर्यं वा एतत् ०९/१०/०२
असृक्षत प्र वा १३/०७/०५
असौ वाव त्रिरात्र २०/१६/०९
असँश्लिष्टा गाय १३/०४/०६
असँ हार्य्यं भ्रातृ ०९/०१/२२
अस्तावि वा ०३/१०/०२
अस्तीव त्रिरात्र २१/०७/०४
अस्तीव वा अयं २०/०७/०३
अस्तो मा वा एते ०३/०९/०३
अस्थूरिर्वा एष १६/०१/०६
अस्थूरिर्वा एष १६/१०/०४
अस्थूरिर्वा एष २१/१३/०५
अस्या अमुष्या ०९/०४/१८
अस्यां हि सोऽध्य १७/०६/१३
अहतं वसानो १७/१३/०६
अहतं वसानो १७/१३/१४
अहर्भिर्वै त्रिरात्र १६/१०/०३
अहर्वा एतत् १२/०३/१०
अहर्वा एतत् १२/०३/१३
अहर्वा एतत् १४/०९/१०
अहर्वा एतत् १४/०९/२६
अहर्वा एतत् १५/०३/२९

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अहर्वै पान्तम ०९/०१/०७
अहिरसि ०१/०४/११

आ

आकूपारं भवति १५/०५/२९
आकूपाराङ्गिरसो ०९/०२/१४
आकूपारो वा १५/०५/३०
आक्रमोऽस्याक्रमा ०१/१०/११
आक्षारं भवति ११/०५/०७
अग्निपावमानी १६/०५/०९
आग्निपावमानी १६/०५/१९
आग्नेय एकक्रपा २१/१०/२३
आग्नेयी पृथिव्यां १५/०४/०८
आग्नेयी प्रतिपत् १७/१३/०२
आग्नेयीषु पूर्वे १५/०६/०१
आग्नेयैन्द्रीषु १५/०६/०३
आग्नेयोऽष्टाक्रपा २५/१४/०१
आङ्गिरसः स्वर्गं १२/०६/१२
आजागृविर्विप्र १५/०९/०३
आजिगं भवति १५/०९/०६
आजिर्वा एष १४/०३/१४
आजिर्वा एष १५/०९/०७
आजिं धावति १८/०७/०९
आज्यानां प्रथ ०३/११/०२
आज्येनाभि १२/१०/१९
आज्येनाभि १७/११/१०
आतमितोर्निधनं ०५/०४/०९
आतमितोर्निधनं १२/११/१७
आतीषादीयं भव १२/११/१५
आतून इन्द्र ०९/०२/१३
आतृतीयायाः ०८/०७/१४
आ ते अग्न इधी १३/०६/०१
आ ते यतन्ते १३/०२/०४
आ ते वत्सो मनो १४/०६/०१
आत्तमस्या प्र १३/०७/१३
आत्मदक्षिणं वा ०४/०९/१९
आत्मना वा १८/०८/०६
आत्मन्येव तत् ०५/०६/०५
आत्मा वा अग्निः १९/०५/११
आत्मा वा एष ०४/०७/०१
आत्मा वा एष १४/०६/२०
आत्मा वै यज्ञस्य ०७/०३/०५
आत्वेता निषीदत ०९/०२/१८
आथर्वणं लोक ०८/०२/०५
आदित्य देवत्यं १५/०४/०२
आदित्या अस्मिन् २३/१५/०५
आदित्या अस्मिन् २४/१२/०७
आदित्या एवैक १०/०१/१०
आदित्यानां पत्म ०१/०५/०२
आदित्यानां मध्ये २५/०१/०२
आदित्यानां यमा २४/१२/०२
आदित्याश्चाङ्गिर १६/१२/०१
आदित्याश्चाङ्गिर १९/०२/०२
आदिर्बृहत् ०८/०९/११
आनुजावर ०१/१०/०२
आनूपं भवति १३/०३/१६
आ नो मित्रावरु ०६/१०/०४
आन्धीगवं १२/११/२१
आपो वा रेवत्यः १३/०९/१६
आपो वै क्षीरं १३/०४/०८
आपो वै रेवत्यः ०७/०९/२०
आप्ते त्रिरात्रे १२/०७/०२
आप्तेन व्रतेन २१/१६/०६
आप्ते षडहे १४/०१/०२
आप्यन्ते वा १४/०१/०१
आप्यायस्व समे ०१/०५/०८
आभीकं भवति १५/०९/०८
आभीशवं १२/०९/१५
आमयाविनं १८/०५/११
आमहीयवं भवति ११/११/०७
आमहीयवं भवति १५/०९/०५

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आयतनवान्	१०/०१/०२
आयतनवान्	१०/०१/०५
आयतनवान्	१०/०१/०८
आयतनवान्	१०/०१/११
आयतनवान्	१०/०१/१४
आयतनवान्	१०/०१/१७
आयतनवान्	१०/०१/२०
आयास्ये भवतः	११/०८/०९
आयास्यो वा	११/०८/१०
आयास्यो वा	१४/०३/२२
आयास्यं भवति	१४/०३/२१
आयाहि सोम	०४/०६/१०
आयुर्णवस्तो	०५/०४/१२
आयुर्मे प्राणो	०१/०५/१८
आयुर्वा आतीषा	१२/११/१६
आयुर्वा एतत्	२५/०८/०३
आयुषार्तिमति	०६/०५/०२
आयुषा वै देवाः	१६/०३/०२
आयुषे मे पवस्व	०६/०६/१७
आरण्येभ्यो वा	०६/०८/०८
आर्तं वा एते	०५/०९/०५
आर्भवपवमान	१७/१२/०५
आ वा एते संव	०५/१०/०१
आशिषमेवास्मा	१३/१२/०७
आशिषमेवास्मा	१५/०५/१३
आशुभार्गवं	१४/०९/०९
आश्वं भवति	११/०३/०४
आश्वसूक्तं भवति	१५/०५/०८
आश्विनं होता	०९/०१/३४
आष्कारणिधनं	०८/०१/०१
आष्कारणिधनं	०८/०२/०१
आष्कारणिधनं	१२/०३/२०
आसन्दीमारुह्य	०५/०५/०१
आसन्ना पात्रं	०४/०६/२३
आसितं भवति	१४/११/१८
आसितं भवति	१५/०५/२७
आसोता परि	१२/०५/०३
आहवनीये	१२/१०/०६
	इ
इडानां संक्षारो	१५/०३/०४
इडान्ताः पवमाना	१४/०५/३१
इडान्ताः पवमाना	१४/११/१०
इडा पशुकामाय	०७/०१/११
इडाभिरैडं तथा	१२/१०/२६
इडे अभितो	१३/०४/०४
इढन्वा एतेन	१४/०९/१६
इतो वा इमे	०७/१०/०५
इतो वै प्रात	०८/०७/०१
इदमहममुं यज	०१/०२/०६
इदं वसो सुतं	०९/०२/१६
इदं वा अन्तरिक्षं	२४/०१/०७
इदं वाव प्रथमे	२०/१६/०१
इदँ ह्यन्वोजसा	०९/०२/१७
इन्दुरिन्द्रायमवा	०९/०९/१०
इन्दुर्वाजी पव	१३/०५/०६
इन्द्रक्रतुं न आभ	०४/०७/०२
इन्द्रमच्छ सुता	११/१०/०४
इन्द्रमदेव्यो	१९/१९/०१
इन्द्रवत्यो गायत्र्यो	१३/०९/२९
इन्द्रविन्द्रपीतस्य	०१/०५/०४
इन्द्रविन्द्रपीतस्य	०१/०५/१३
इन्द्रविन्द्रपीतस्य	०१/०५/१६
इन्द्रविन्द्रपीतस्य	०१/०६/०२
इन्द्रश्च बृहच्च	१२/१३/०१
इन्द्रश्च रुशमा	२५/१३/०३
इन्द्रश्च वै नमुचिः	१२/०६/०८
इन्द्र सुतेषु	०९/०२/२१
इन्द्राग्नी आगतं	१५/०८/०४
इन्द्राग्नी पूर्व्य	१२/०८/०८
इन्द्राग्नी वै देवा	२४/१७/०३

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इन्द्राग्नी युवा	१३/०२/०९
इन्द्राय मद्वने	०९/०२/०७
इन्द्राय साम	१३/०६/०३
इन्द्रायाहि	१४/०२/०५
इन्द्रायेन्द्रो मरु	१३/०९/०१
इन्द्रे अग्ना नमो	१४/०८/०७
इन्द्रेण सँ हि	१२/०२/०६
इन्द्रेति प्रथमा	१०/०८/०१
इन्द्रोऽकामयत	१९/१८/०२
इन्द्रो दधीचो	१२/०८/०५
इन्द्रो मदाय	१३/०४/१४
इन्द्रो मरुतः	२१/०१/०१
इन्द्रो यतीन्	०८/०१/०४
इन्द्रो यतीन्	१३/०४/१७
इन्द्रो यतीन्	१४/११/२९
इन्द्रो यतीन्	१८/०१/०९
इन्द्रो यतीन्	१९/०४/०७
इन्द्रो वृत्रमहन्	०९/०५/०७
इन्द्रो वृत्रमहन्	१८/०५/०२
इन्द्रो वृत्रमहन्	१८/०९/०६
इन्द्रो वृत्रमहन्	१८/११/०१
इन्द्रो वृत्रं हत्वा	१५/११/०९
इन्द्रो वृत्रात्	१२/०५/२१
इन्द्रो वृत्राय	१३/०५/२२
इन्द्रो वृत्राय	२०/१५/०६
इन्द्रो वै त्रिशिर	१७/०५/०१
इन्द्रो वै युधा	०७/०५/१४
इन्द्रोऽसुरान्	२२/१४/०२
इन्द्रं गीर्भिर्ह	११/०४/०४
इन्द्रं वा अक्ष्या	१२/०५/१९
इन्द्रं विश्वा अवी	११/११/०४
इन्दँ सर्वाणि	०५/०४/१४
इन्द्रँ सर्वाणि	१४/०५/१५
इन्द्रस्तृतीयः	०८/०४/०५
इन्द्रस्तृतीयः	०८/०५/११
इन्द्रस्तेजस्कामो	१४/०९/३४
इन्द्रः प्रजापतिः	१२/१३/०४
इन्द्रः प्रजापति	१३/०४/०१
इममिन्द्र सुतं	१२/१२/०४
इमानेव लोकान्	२३/०४/०४
इमं वाव देवा	१०/१२/०३
इमं वाव देवा	१०/१२/०४
इमँ स्तोममर्हते	१३/०८/०१
इमे लोकास्त्रिरा	२१/०७/०२
इमे वै लोकाः	०४/०९/०२
इमे वै लोकाः	०६/०२/०३
इमे वै लोकाः	०७/०१/०१
इमे वै लोकाः	०७/०३/०९
इमे वै लोकाः	०८/०१/०९
इमे वै लोकाः	२१/०२/०७
इमौ वै लोकौ	०७/१०/०१
इयं वामस्य मन्म	१२/०८/०७
इयं वै गायत्री	१४/०१/०४
इयं वै रथन्तरं	०९/०१/२९
इयं वै रथन्तरं	११/०४/०७
इयं वै रथन्तरं	१६/१०/०८
इयं वै रथन्तरं	१६/११/०४
इयं वै रथन्तरं	१८/०५/१८
इयं वै रथन्तरं	१८/०६/११
इयं वै सर्पराज्ञी	०४/०९/०६
इलान्दमग्नि	०५/०३/०१
इष ऊर्ज आयुषे	०१/०१/०९
इष्टयजुषस्ते	०१/०६/०४
इषोवृधीयं भवति	१३/०९/०८
इहवद्वामदेव्यं	१३/०९/२६
इहे हेति गायेत्	१३/१०/०९
ई	
ईनिधनं तथा	१२/११/१६
ईश्वरो वा एषो	२१/०४/११
ईश्वरं वै रथन्तरं	०७/०७/१५

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उ

उक्थः षोडशी	१९/०६/०३
उक्थो भवति	१६/१०/१२
उक्थो भवति	१७/०२/०४
उक्थो भवति	१८/०५/२४
उक्थ्यो भवति	१९/१६/०६
उक्थं श्यस्यते	१८/०६/२२
उक्ष्णोरन्ध्रो वा	१३/०९/१९
उग्रगाधमिव	१४/०८/०४
उग्रगाधमिव	१४/०८/०८
उग्रगाधमिव	१५/०२/०६
उग्रगाधमिव	१५/०२/०९
उच्चा ते जातम	१२/०३/०१
उच्चा ते जातम	१५/०९/०१
उत्तमानि पदानि	०९/०१/१९
उत्तरेणोत्तरेण	१८/०२/०७
उत्तरो दशर्चो	१३/०७/०९
उत्तिष्ठन्नोजसा	१३/०२/०७
उत्ते शुष्मासः	१८/०८/१४
उत्सेधनिषेधौ	१९/०७/०४
उत्सेधेन वै	१५/०९/११
उत्सेधो भवति	१५/०९/१०
उदगयन एव	१३/१२/०२
उदङासीन	०६/०४/१४
उदलो वा एतेन	१४/११/३४
उदुत्ये मधुमत्तम	१५/१०/०३
उदुम्वरे वसति	१६/०६/०४
उद्गात्रा पत्नीः	०८/०७/१२
उद्वत्त्रिवद्दिग्वद्रोम	१०/०६/०३
उद्वद्वा एतत्	१२/०३/०२
उद्वद्वा एतत्	१२/०५/०२
उद्वद्धार्गवं भवति	१४/०९/३९
उद्वँशपुत्रो	१२/१२/०९
उद्वँशीयं भवति	१५/०६/०६
उद्वँशीयमुक्थानां	१६/१०/११
उद्वँशीयमुक्थानां	१८/०५/२३
उद्वँशीयमुक्थानां	१८/०६/१७
उप क्षुद्रा गायति	१३/०४/०५
उपगुर्वे सौश्रव	१४/०६/०८
उप त्वा जामयो	१६/०५/०१
उप नो हरिभिः	१२/१३/०३
उपवती प्रतिपत्	१६/०५/१४
उपवती प्रतिपत्	१७/१३/१६
उपवत्यो भवन्ति	१५/११/१५
उप वा अन्नं	०६/०९/०३
उप वै प्रजानां	०६/०९/०५
उपसदि सहस्रं	१६/०८/०३
उपाकृते हिङ्कृते	१२/१०/१३
उपास्मै गायता	०६/०९/०१
उपास्मै गायता	१६/११/०२
उपैनं पशव	०६/०७/२०
उपैनं पशव	०७/०९/०८
उपैनं पशव	१५/०५/३६
उपैनमुत्तरो	०८/०९/१८
उपोषु जातमप्तु	०६/०९/०४
उपोषु जातमप्तु	१५/०५/०६
उभयतः क्ष्णुद	१६/०६/०६
उभयतः स्तोत्रं	१२/०३/१७
उभयँश्रृणवच्च	१४/१०/०६
उभये स्तोमा	२१/०९/०५
उभये स्तोमा	२२/०६/०५
उभये स्तोमा	२२/०७/०७
उभये स्तोमा	१६/१४/०६
उभये स्तोमा	१९/०८/०५
उभये स्तोमा	१९/११/०७
उभये स्तोमा	२०/११/०९
उभये स्तोमा	२१/०६/०४
उभयोरनयो	२३/१५/०७
उभा जिग्यथुर्न	२०/१५/०७
उभावेवैताभिः	२३/०८/०४

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उभाभ्यां बृहत् ०७/१०/०९
उभाभ्यां रूपा ११/०७/०१
उभाभ्यां वै रूपा ११/०२/०१
उभे बृहद्रथन्तरे १६/१०/०७
उभे बृहद्रथन्तरे १९/०८/०३
उभे बृहद्रथन्तरे १९/०९/०३
उभे बृहद्रथन्तरे १९/१२/०७
उभे बृहद्रथन्तरे १९/१३/०५
उभे बृहद्रथन्तरे २२/१८/०६
उर्वरा वेदिर्भवति १६/१३/०६
उशना वै काव्यो ०७/०५/२०
उशना वै काव्यो १४/१२/०५
उभे यदिन्द्र रोद १३/१०/०३
उशिगसिवसु ०१/०९/०९
उष्णिक्ककुभा ०८/०५/०१
उष्णिक्ककुभ्यां ०८/०५/०२
उष्णीषश्च प्रतो १७/०१/०४
उष्णीषं बिभर्ति १६/०६/१३

ऊ

ऊधर्वा अन्त २४/०१/०६
ऊधर्वै मध्यतो २४/०१/१०
ऊनातिरिक्तौ ०४/०८/०३
ऊर्गस्यूर्जोदा ०६/०४/११
ऊर्गस्यूर्जं ०१/०६/१५
ऊर्ध्वसद्मनं ०९/०२/१०
ऊर्ध्वानि छन्दांसि २४/११/०८
ऊर्ध्वाः स्तोमा १६/०३/०४
ऊर्ध्वेडं तथा ११/०९/०७
ऊर्ध्वः सप्तऋषिः ०१/०५/०५
ऊहुषीव वा १३/१२/१४

ऋ

ऋक्था वा अन्यत् १६/०८/०४
ऋतधामासि ०१/०४/०९
ऋतपात्रमसि ०१/०२/०३
ऋतमुक्त्वा १८/०२/०९
ऋतवो न प्रत्यति २२/०१/०२
ऋतवो न प्रत्यति २३/२२/०२
ऋतवो न प्रत्यति २४/१६/०२
ऋतवो न प्रत्यति २५/०३/०२
ऋतस्य त्वा देव ०१/०६/०५
ऋतस्य द्वारौ ०१/०५/०१
ऋतस्य सदने ०१/०२/०२
ऋतुभिश्च वा १२/०४/०९
ऋश्यस्य साम्ना ०५/०४/१३
ऋषभः पवमानो १५/०३/१६
ऋषभः शाक्वरो १३/०५/१७
ऋषभो ब्राह्मणः १८/०३/१४
ऋषभो रैवतो १३/१०/१०
ऋषभो वा १९/१२/०२
ऋषयो वा इन्द्रं १५/०५/२४
ऋषेर्वा एतत् ०८/०९/२१

ए

एकयूपो वैका २१/०४/१३
एकविंश एव १२/०७/११
एकविंश एव १२/१३/३४
एकविंशमहर्भव २१/०४/०७
एकविंशस्तोमा २१/१२/०८
एकविंशस्तोमा २२/१५/०९
एकविंशायतने १२/१३/०८
एकविंशं पुच्छं ०५/०१/१६
एकविंशं पुच्छं २२/०५/०९
एकविंशं होतुः १६/१५/१०
एकविंशोंऽगिर १६/१४/०८
एकविंशोंऽतत २५/०८/०६
एकविंशोऽग्नि १६/०९/०६
एकविंशोऽग्नि १६/१३/०४
एकविंशोऽग्नि १७/०३/०४
एकविंशोऽग्नि १९/०८/०७
एकविंशोऽग्नि १९/०९/०६
एकविंशोऽति २२/१५/०७

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकविंशो भवति ०४/०६/०३
एकविंशोऽभि १८/१०/०९
एकविंशो वै ०५/०१/१७
एकस्मा अन्यो ०६/०३/०२
एकस्यां स्तोत्री ०५/०५/०७
एकं वा अन्येन १२/०९/१२
एकं साम बहू १९/०५/१०
एकं स्तोममुत्सृ २१/०९/०३
एकाक्षरणिधनो ०४/०३/०३
एकाक्षरा वै १५/१०/१४
एकाक्षरं देवा १२/१३/२७
एकाक्षरं निधनं ११/०३/०६
एकादश राजसा १८/१०/०७
एकादशभ्यो हिं ०३/०३/०१
एकादशभ्यो हिं ०३/०४/०१
एकादशाक्षरा १४/०५/१९
एकादशेन च ०६/०१/०२
एकाष्टकायां ०५/०९/०१
एकां गायत्रीं ०४/०४/०७
एकां संस्तुतानां १६/०२/०८
एकां संस्तुतानां १९/११/१०
एकां संस्तुतानां २०/१२/०४
एकैका स्तोत्रीयो १९/०३/०३
एको दीक्षितैको १०/०३/०३
एत इति वै प्रजा ०६/०९/१५
एत इति वै प्रजा १२/०१/०४
एत इति सर्वा ०६/०९/१४
एतत्तद्यदाहुः १६/०१/०५
एतदन्यत्कुर्युः ०९/०७/११
एतदन्यत्कुर्युः ०९/०८/०२
एतद्धस्म वा ०८/०६/०८
एतद्धा आभ्यां २०/१५/०८
एतद्धा व मनुष्य २२/१२/०२
एतद्धा व मनुष्य २३/१२/०३
एतद्वै दृतिवात २४/०३/०६
एतद्वै देवानां २३/०६/०३
एतद्वै परोक्षं २२/१०/०४
एतद्वै पुरुषमक २२/०९/०५
एतद्वै प्रजापति २५/१७/०३
एतद्वै प्रत्यक्षं १६/११/११
एतद्वै यज्ञस्य ०५/०७/०५
एतद्वै यज्ञस्य ०७/०४/०१
एतद्वै यज्ञस्य १५/०९/१७
एतद्वै वैश्यस्य १८/०४/०६
एतद्वै व्रतमाप्तं २१/१५/०५
एतद्वै व्रतमाप्तं २२/११/०४
एतद्वै व्रात्य १७/०१/१६
एतद्वै साक्षात् ०५/०२/०७
एतद्वै साक्षात् ०५/०३/०२
एतमुत्यं दश १३/०९/०५
एतमुत्यं दश १८/०८/१२
एतया वै देवाः ०२/०६/०३
एतया वै देवाः ०२/०७/०२
